
कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः

धआर्ह्वत्॥ तस्याउपहत्योदमज्जत्॥ तत्पुष्करपर्णेप्रथयत्॥ यदप्रथयत्॥ [illegible] थ
व्यैपृथिवित्त्वं॥ अभूद्वाइदमिति॥ तद्भूम्यैभूमित्वं॥ तांदिशोनुवात॥ तत्पेह[illegible] ताः
शर्कराभिरदृंहत्॥ शंवैनोभूदिति॥ तच्छर्कराणां शर्करत्वं॥ यद्दूराहूपं॥ रूपेणे
भवति॥ अस्यामेवाछंबट्कारमग्निमाधत्ते॥ शर्कराभवंतिधृत्यै॥ ७॥ [illegible] त्वाय
सरेताअग्निराधेयइत्याहुः॥ आपोवरुणस्यपत्नयआसन्॥ ताअग्निरभ्यध्याय
त्॥ ताःसमभवत्॥ तस्यरेतःपरापतत्॥ तद्धिरण्यमभवत्॥ यद्धिरण्यमुपास्यति॥
सरेतसमेवाग्निमाधत्ते॥ पुरुषइन्वैस्वाद्रेतसोबीभत्सतइत्याहुः॥ ८ ॥ उत्तरत
उपास्यत्यबीभत्सायै॥ अतिप्रयच्छति॥ आर्तिमेवातिप्रयच्छति॥ अग्निर्देवेभ्योनिला
यत॥ अश्वोरूपंकृत्वा॥ सोश्वत्थेसंवत्सरमतिष्ठत्॥ तदश्वत्थस्याश्वत्थत्वं॥ यदाश्व

ब्रा०प्र०
५

थः संभारोभवति॥यदेवास्यतत्रन्यक्तं॥तदेवावरुंधे॥ ९ ॥देवावाऊर्जंव्यभजंत॥
ततउदुंबरउदतिष्ठत्॥ऊर्ग्वाउदुंबरः॥यदौदुंबरः संभारोभवति॥ऊर्जमेवावरुंधे॥
तृतीयस्यामितोदिविसोमआसीत्॥तंगायत्र्याहरत्॥तस्यपर्णमच्छिद्यत॥तत्पु
र्णोभवत्॥तत्पर्णस्यपर्णत्वं॥ १० ॥यस्यपर्णमयः संभारोभवति॥सोमपीथमे
वावरुंधे॥देवावैब्रह्मन्नवदंत॥तत्पर्णउपाशृणोत्॥सुश्रवावैनाम॥यत्पर्णम
यः संभारोभवति॥ब्रह्मवर्चसमेवावरुंधे॥प्रजापतिरग्निमसृजत॥सोबिभेत्प्र
माधक्ष्यतीति॥तं शम्याशमयत्॥ ११ ॥तच्छम्यैशमित्वं॥यच्छमीमयः संभारोभ
वति॥शांत्याअप्रदाहाय॥अग्नेः सृष्टस्ययतः॥विकंकतं भाआर्छत्॥यद्वैकंक
तः संभारोभवति॥भाएवावरुंधे॥सहृदयोग्निराधे[illegible]इत्याहुः॥मरुतोद्भिरग्नि

सांबु

मतमयन्॥तस्यतांतस्यहृदयमाच्छिंदन्॥साशनिरभवत्॥यदशनिहतस्यवृक्षस्य
संभारोभवति॥सहृदयमेवाग्निमाधत्ते॥ १२ ॥ऊषाअभवन्ननभवद्वल्मीकोश्वा
ग्यदश्वत्थयद्धस्त्यैबीभत्सतइत्याहूरुंधेपर्णत्वमशामयदच्छिंदंस्त्रीणिच॥ ३ ॥ ॥
द्वादशसुविक्रामेष्वग्निमादधीत॥द्वादशमासाः संवत्सरः॥संवत्सरादेवैनमवरुध्या
धत्ते॥यद्द्वादशसुविक्रामेष्वादधीत॥परिमितमवरुंधीत॥चक्षुर्निमितआदधीत॥
इयद्द्वादशविक्रामाउइति॥परिमितंचैवापरिमितंचावरुंधे॥अनृतंवैवाचावद
ति॥अनृतंमनसाध्यायति॥ १ ॥चक्षुर्वैसत्यं॥अद्राऽगित्याह॥अदर्शमिति॥
तत्सत्यं॥यश्चक्षुर्निमितेग्निमाधत्ते॥सत्यएवैनमाधत्ते॥तस्मादाहिताग्निर्नानृ
तंवदेत्॥नास्यब्राह्मणोनाश्वान्गृहेवसेत्॥सत्येह्यस्याग्निराहितः॥आग्नेयी

ब्रा०त्र०
६

वै रात्रिः॥ २ ॥आग्नेयाः पशवः॥ऐंद्रमहः॥ नक्तं गार्हपत्यमादधाति॥ पशूनेवा
वरुंधे॥ दिवाहवनीयं॥ इंद्रियमेवावरुंधे॥अर्धोदिते सूर्य आहवनीयमादधा
ति॥ एतस्मिन्वै लोके प्रजापतिः प्रजा असृजत॥ प्रजा एव तद्यजमानः सृजते॥अ
थो भूतं चैव भविष्यच्चावरुंधे॥ ३ ॥इडा वै मानवी यज्ञानूकाशिन्यासीत्॥ साशृ
णोत्॥असुरा अग्निमादधत इति॥ तदगच्छत्॥ त आहवनीयमग्र आदधत॥अ
थ गार्हपत्यं॥अथान्वाहार्यपचनं॥ साब्रवीत्॥ प्रतीच्येषां श्रीरगात्॥ भद्रा भू
त्वा पराभविष्यंतीति॥ ४ ॥ यस्यैवमग्निराधीयते॥ प्रतीच्यस्य श्रीरेति॥ भद्रो
भूत्वा पराभवति॥ साशृणोत्॥देवा अग्निमादधत इति॥ देते गच्छत्॥ ते न्वाहार्यप
चनमग्र आदधत॥अथ गार्हपत्यं॥अथाहवनीयं॥ साब्रवीत्॥ ५ ॥प्राच्येषां

सा०ब्रा०
६

श्रीरगात्॥ भद्रा भूत्वा सुवर्गं लोकमेष्यंति॥ प्रजां तु न वेत्स्यंत इति॥ यस्यैवमग्नि
राधीयते॥ प्राच्यस्य श्रीरेति॥ भद्रो भूत्वा सुवर्गं लोकमेति॥ प्रजां तु न विंदते॥ सा
ब्रवीदिडा मनुं॥ तथा वा अहं तवाग्निमाधास्यामि॥ यथा प्र प्रजया पशुभिर्मिथु
नैर्जनिष्यसे॥ ६ ॥प्रत्यस्मिँल्लोके स्थास्यसि॥ अभि सुवर्गं लोकं जेष्यसीति॥
गार्हपत्यमग्र आदधात्॥ गार्हपत्यं वा अनु प्रजाः पशवः प्रजायंते॥ गार्हपत्येनैवा
स्मै प्रजां पशून्प्राजनयत्॥ अथान्वाहार्यपचनं॥ तिर्यङ्ङिव वा अयं लोकः॥ अस्मि
न्नेव तेन लोके प्रत्यतिष्ठत्॥ अथाहवनीयं॥ तेनैव सुवर्गं लोकमभ्यजयत्॥ ७॥
यस्यैवमग्निराधीयते॥ प्र प्रजया पशुभिर्मिथुनैर्जायते॥ प्रत्यस्मिँल्लोके तिष्ठति॥
अभि सुवर्गं लोकं जयति॥ यस्य वा अयथादेवतमग्निराधीयते॥ आ देवताभ्यो वृ

श्च्यते॥पापीयान्भवति॥ यस्ययथादेवतं॥नदेवताभ्यआवृश्च्यते॥वसीयान्भवति॥
॥ ८ ॥भृगूणांत्वांगिरसांव्रतपते व्रतेनादधामीतिभृग्वंगिरसामादध्यात्॥आ
दित्यानांत्वादेवानांव्रतपते व्रतेनादधामीत्यन्यासांब्राह्मणीनांप्रजानां॥वरुण
स्यत्वाराज्ञोव्रतपते व्रतेनादधामीतिराज्ञः॥इंद्रस्यत्वेंद्रियेणव्रतपते व्रतेनादधा
मीतिराजन्यस्य॥मनोस्त्वाग्रामण्योव्रतपते व्रतेनादधामीतिवैश्यस्य॥ऋभूणां
त्वादेवानांव्रतपते व्रतेनादधामीतिरथकारस्य॥यथादेवतमग्निराधीयते॥नदे
वताभ्यआवृश्च्यते॥वसीयान्भवति॥ ९ ॥ध्यायतिरात्रिश्वावरुंधेभविष्यंतीत्य
ब्रवीज्जनिष्यसेजयद्वसीयान्भवतिनवचि॥ ४ ॥प्रजापतिर्वाचःसत्यमपश्य
त्॥तेनाग्निमाधत्त॥तेनवैसआर्ध्नोत्॥भूर्भुवःसुवरित्याह॥एतद्वैवाचःसत्यं॥

तु

यएतेनाग्निमाधत्ते॥ऋध्नोत्येव॥अथोसत्यप्राश्रीरेवभवति॥अथोयएवंविद्वानभि
चरति॥स्तृणुतएवैनं॥ १ ॥भूरित्याह॥प्रजाएवतद्यजमानःसृजते॥भुवइत्याह॥
अस्मिन्नेवलोकेप्रतितिष्ठति॥सुवरित्याह॥सुवर्गएवलोकेप्रतितिष्ठति॥त्रिभिर
क्षरैर्गार्हपत्यमादधाति॥त्रयइमेलोकाः॥एष्वेवैनंलोकेषुप्रतिष्ठितमाधत्ते॥स
र्वैःपंचभिराहवनीयं॥ २ ॥सुवर्गायवाएषलोकायाधीयते॥यदाहवनीयः॥
सुवर्गएवास्मैलोकेवाचःसत्यंसर्वमाप्नोति॥त्रिभिर्गार्हपत्यमादधाति॥पंच
भिराहवनीयं॥अष्टौसंपद्यंते॥अष्टाक्षरागायत्री॥गायत्रोग्निः॥यावानेवा
ग्निः॥तमाधत्ते॥ ३ ॥प्रजापतिःप्रजाअसृजत॥ताअस्मात्सृष्टाःपराचीरा
यन्॥ताभ्योज्योतिरुदगृह्णात्॥तंज्योतिःपश्यंतीःप्रजाअभिसमावर्तंत॥

ब्रा०प्र०
२

२

उपरीवाग्निमुद्गृह्णीयादुद्धृत्य। ज्योतिरेव पश्यंती: प्रजाय जमानमभिसमाव
र्तंते॥ प्रजापते रक्ष्यश्वयत्तत्॥ तत्परापतत्तत्॥ तदश्वोभवत्तत्॥ तदश्वस्याश्वत्वं॥ ४॥
एषवैप्रजापति:॥ यदग्नि:॥ प्राजापत्योश्व:॥ यदश्वंपुरस्तान्नयति॥ स्वमेवच
क्षु:पश्यन्प्रजापतिरन्वेति॥ वज्रीवाएष:॥ यदश्व:॥ यदश्वंपुरस्तान्नयति॥
जातानेवभ्रातृव्यान्प्रणुदते॥ पुनरावर्तयति॥ ५॥ जनिष्यमाणानेवप्रति
नुदते॥ न्याहवनीयोगार्हपत्यमकामयत॥ निगार्हपत्यआहवनीयं॥ तौवि
भाजंनाशक्नोत्॥ सोश्व:पूर्ववाड्भूत्वा॥ प्रांचंपूर्वमुदवहत्॥ तत्पूर्ववाह:पूर्ववा
ट्त्वं॥ यदश्वंपुरस्तान्नयति॥ विभक्तिरेवैनयो:सा॥ अथोनानावीर्यावेवैनौ
कुरुते॥ ६॥ यदुपर्युपरिशिरोहरेत्॥ प्राणान्विच्छिंद्यात्॥ अधोध:शिरोह

२ सां०

रति॥ प्राणानांगोपीथाय॥ त्र्यत्यैहरति॥ अथेयत्यथेयति॥ त्रयइमेलोका:॥ एष्वे
वैनंलोकेषुप्रतिष्ठितमाधत्ते॥ प्रजापतिरग्निमसृजत॥ सोबिभेत्प्रमाधक्ष्यतीति॥
॥ ७॥ तस्यत्रेधामहिमानंव्यौहत्॥ शांत्याअप्रदाहाय॥ यत्त्रेधाग्निराधीयते॥ म
हिमानमेवास्यतद्व्यूहति॥ शांत्याअप्रदाहाय॥ पुनरावर्तयति॥ महिमानमेवास्य
संदधाति॥ पशुर्वाएष:॥ यदश्व:॥ एषरुद्र:॥ ८॥ यदग्नि:॥ यदश्वस्यपदेग्नि
मादध्यात्॥ रुद्रायपूनपिदध्यात्॥ अपशुर्यजमानस्यात्॥ यन्नाक्रमयेत्॥
अनवरुद्धाअस्यपशव:स्यु:॥ पार्श्वतआक्रमयेत्॥ यथाहितस्याग्नेरंगाराअ
भ्यववर्तेरन्॥ अवरुद्धाअस्यपशवोभवंति॥ नरुद्रायापिदधाति॥ ९॥ त्रीणि
हवींषिनिर्वपति॥ बिराजएवविक्रांतिंयजमानोनुविक्रमते॥ अग्नयेपवमाना

३

श्रा०प्र०
९

य॥अग्नयेपावकाय॥अग्नयेशुचये॥यदग्नयेपवमानायनिर्वपति॥पुनात्येवैनं॥
यदग्नयेपावकाय॥पूतएवास्मिन्नन्नाद्यंदधाति॥यदग्नयेशुचये॥ब्रह्मवर्चसमे
वास्मिन्नुपरिष्टाद्दधाति॥ १० ॥एतमाहवनीयंधत्तेश्वत्थंवर्त्तयतिकुरुतइति
रुद्रोदधातियदग्नयेशुचयएकंच॥ ५ ॥देवासुराःसंयत्ताआसन्॥तेदेवा
विजयमुपयंतः॥अग्नौवामंवसुसन्यदधत॥इदमुनोभविष्यति॥यदिनोजेष्यं
तीति॥तदग्निर्नोत्सहमशक्नोत्॥तत्रेधाविन्यदधात्॥पशुषुतृतीयं॥अप्सु
तृतीयं॥आदित्येतृतीयं॥ १ ॥तद्देवाविजित्य॥पुनरवारुरुत्संत॥तेग्नयेपवमा
नायपुरोडाशमष्टाकपालंनिरवपन्॥पशवोवाअग्निःपवमानः॥यदेवपशु
ष्वासीत्॥तत्तेनावारुंधत॥तेग्नयेपावकाय॥आपोवाअग्निःपावकः॥मे

सांबू
९

यदेवाप्स्वासीत्॥तत्तेनावारुंधत॥ २ ॥तेग्नयेशुचये॥असौवाआदित्योग्निः
शुचिः॥यदेवादित्यआसीत्॥तत्तेनावारुंधत॥ब्रह्मवादिनोवदंति॥तनुवोवा
वैताअग्न्याधेयस्य॥आग्नेयोवाअष्टाकपालोग्न्याधेयमिति॥यत्तंनिर्वपेत्॥ने
तानि॥यथात्मास्यात्॥ ३ ॥नांगानि॥तादृगेवतत्॥यदेतानिनिर्वपेत्॥नतं॥
यथांगानिस्युः॥नात्मा॥तादृगेवतत्॥उभयानिसहनिरुप्याणि॥यज्ञस्यसात्म
त्वाय॥उभयंवाएतस्येंद्रियंवीर्यमाप्यते॥ ४ ॥योग्निमाधत्ते॥ऐंद्राग्नमेकादश
कपालमनुनिर्वपेत्॥आदित्यंचरुं॥इंद्राग्नीवैदेवानामयातयामानौ॥येएवदे
वतेअयातयाम्नी॥ताभ्यामेवास्माइंद्रियंवीर्यमवरुंधे॥आदित्योभवति॥इयं
वाअदितिः॥अस्यामेवप्रतितिष्ठति॥धेन्वैवाएतद्रेतः॥ ५ ॥यदाज्यं॥अन

तुहस्तंतुलाः॥ मिथुनमेवावरुंधे॥ घृतेभवति॥ यज्ञस्यालूक्षांतत्वाय॥ चत्वारआर्षे
याःप्राश्नंति॥ दिशामेवज्योतिषिजुहोति॥ पशवोवाएतानि हवींषि॥ एषरुद्रः
यदग्निः॥ ६ ॥ यत्सद्यएतानि हवींषिनिर्वपेत्॥ रुद्रायपशूनपिदध्यात्॥ अप
शुर्यजमानःस्यात्॥ यन्नानुनिर्वपेत्॥ अनवरुद्धाअस्यपशवःस्युः॥ द्वादशासुरा
त्रीष्वनुनिर्वपेत्॥ संवत्सरप्रतिमावैद्वादशरात्रयः॥ संवत्सरेणैवास्मैरुद्रंश
मयित्वा॥ पशूनवरुंधे॥ यदेकमेकमेतानिहवींषिनिर्वपेत्॥ ७ ॥ यथात्री
ण्यावपनानिपूरयेत्॥ तादृक्तत्॥ नप्रजननमुच्छिंषेत्॥ एकंनिरुप्य॥ उत्तरेस
मस्येत्॥ तृतीयमेवास्मैलोकमुच्छिंषति प्रजननाय॥ तंप्रजयापशुभिरनुप्र
जायते॥ अथोयज्ञस्यैवैषाभिक्रांतिः॥ रथचक्रंप्रवर्तयति॥ मनुष्यरथेनैवदे

वरथंप्रत्यवरोहति॥ ८ ॥ ब्रह्मवादिनोवदंति॥ होतव्यमग्निहोत्रांन्नहोतव्या३
मिति॥ यद्यजुषाजुहुयात्॥ अयथापूर्वमाहुतीजुहुयात्॥ यन्नजुहुयात्॥ अग्निः
पराभवेत्॥ तूष्णीमेवहोतव्यं॥ यथापूर्वमाहुतीजुहोति॥ नाग्निःपराभवति॥ अ
ग्नीधेददाति॥ ९ ॥ अग्निमुखानेवर्तून्प्रीणाति॥ उपबर्हणंददाति॥ रूपाणा
मवरुध्यै॥ अश्वंब्रह्मणे॥ इंद्रियमेवावरुंधे॥ धेनुंहोत्रे॥ आशिषएवावरुंधे॥
अनड्वाहमध्वर्यवे॥ वह्निर्वाअनड्वान्॥ वह्निरध्वर्युः॥ १० ॥ वह्निनैववह्नियज्ञ
स्यावरुंधे॥ मिथुनौगावौददाति॥ मिथुनस्यावरुध्यै॥ वासोददाति॥ सर्वदेवत्यं
वैवासः॥ सर्वाएवदेवताःप्रीणाति॥ आद्वादशभ्योददाति॥ द्वादशमासाःसंव
संवत्सरएवप्रतितिष्ठति॥ काममूर्ध्वंदेयं॥ अपरिमितस्यावरुध्यै॥ ११ ॥

आदित्येत्तृतीयमस्थासीत्तेनावारुंधतुस्यादाप्यतेरेत्तोग्निरेकमेकमेतानिहवीं
षिनिर्वपेत्प्रत्यवरोहतिददात्यध्वर्युर्देयमेकंच॥ ६ ॥घर्मःशिरस्तदयमग्निः॥
संप्रियःपशुभिर्भुवत्॥छर्दिस्तोकायतनयायछ॥वातःप्राणःस्तदयमग्निः॥सं
प्रियःपशुभिर्भुवत्॥स्वदितंतोकायतनयायपितुंपच॥प्राचीमनुप्रदिशंप्रेहि
विद्वान्॥अग्नेरग्नेपुरोअग्निर्भवेह॥विश्वाआशादीद्यानोविभाहि॥ऊर्जंनोधे
हिद्विपदेचतुष्पदे॥ ७ ॥अर्कश्चक्षुस्तदसौसूर्यस्तदयमग्निः॥संप्रियःपशु
भिर्भुवत्॥यत्तेशुक्रशुक्रंवर्चःशुक्रांतनूः॥शुक्रंज्योतिरजस्रं॥तेनमेदीदिहि
तेनत्वादधे॥अग्निनाग्नेब्रह्मणा॥आनशेव्यानशेसर्वमायुर्व्यानशे॥येतेअ
ग्नेशिवेतनुवौ॥विराट्चस्वराट्च॥तेमाविशतांतेमाजिन्वतां॥ २ ॥येतेअग्ने

जिन्व

शिवेतनुवौ॥संम्राट्चाभिभूश्च॥तेमाविशतांतेमाजिन्वतां॥येतेअग्नेशिवेतनुवौ॥
प्रविभूश्चपरिभूश्च॥तेमाविशतांतेमाजिन्वतां॥येतेअग्नेशिवेतनुवौ॥प्रभ्वीच
प्रभूतिश्च॥तेमाविशतांतेमाजिन्वतां॥यास्तेअग्नेशिवास्तनुवः॥ताभिस्त्वाद
धे॥यास्तेअग्नेघोरास्तनुवः॥ताभिरमुंगछ॥ ३ ॥चतुष्पदेजिन्वतांतनुवस्त्री
णिच॥ ७ ॥इमेवाएतेलोकाअग्नयः॥तेयदव्यावृत्ताआधीयेरन्॥शोचयेयु
र्यजमानं॥घर्मःशिरइतिगार्हपत्यमादधाति॥वातःप्राणइत्यन्वाहार्यपचनं॥
अर्कश्चक्षुरित्याहवनीयं॥तेनैवैनान्व्यावर्तयति॥तथानशोचयंतियजमा
नं॥रथंतरमभिगायतेगार्हपत्यआधीयमाने॥राथंतरोवाअयंलोकः॥
॥ १ ॥अस्मिन्नेवैनंलोकेप्रतिष्ठितमाधत्ते॥वामदेव्यमभिगायतउद्ध्रिय

ने

ब्रा०प्र०
१२

माणे॥अंतरिक्षं वै वामदेव्यं॥अंतरिक्षएवैनं प्रतिष्ठितमाधत्ते॥अथोशांतिर्वै वाम
देव्यं॥शांतमेवैनं पशव्यमुद्धरते॥बृहदभिगायतआहवनीयआधीयमाने॥बार्ह
तो वा असौ लोकः॥अमुष्मिन्नेवैनं लोके प्रतिष्ठितमाधत्ते॥प्रजापतिरग्निमसृ
जत॥ २ ॥सोश्वो वारी भूत्वा परांङैत्॥तं वारवंतीयेनावारयत॥तद्वारवंतीयस्य
वारवंतीयत्वं॥श्यैतेनश्येतीअकुरुत॥तछ्यैतस्य श्यैतत्वं॥यद्वारवंतीयमभि
गायते॥वारयित्वैवैनं प्रतिष्ठितमाधत्ते॥श्यैतेनश्येतीकुरुते॥घर्मः शिरइतिगा
र्हपत्यमादधाति॥सशीर्षाणमेवैनमाधत्ते॥ ३ ॥उपैनमुत्तरोयज्ञो नमति॥रु
द्रोवाएषः॥यदग्निः॥सआधीयमानईश्वरोयजमानस्य पशून्हिंसितोः॥संप्रियः
पशुभिर्भुवदित्याह॥पशुभिरेवैनं संप्रियं करोति॥पशूनामहिंसायै॥छर्दि

सा०ब्रू
१२

स्तोकायतनयायछेत्याह॥आशिषमेवैतामाशास्ते॥वातःप्राणइत्यन्वाहार्यप
चनं॥ ४ ॥सप्राणमेवैनमाधत्ते॥स्वदितंतोकायतनयायपितुंपचेत्याह॥अन्न
मेवास्मैस्वदयति॥प्राचीमनुप्रदिशंप्रेहिविद्वानित्याह॥विभक्तिरेवैनयोः सा॥अ
थोनानावीर्यावेवैनौ कुरुते॥ऊर्जं नोधेहिद्विपदेचतुष्पदइत्याह॥आशिषमेवैता
माशास्ते॥अर्कश्चक्षुरित्याहवनीयं॥अर्कोवै देवानामन्नं॥ ५ ॥अन्नमेवावरुं
धे॥तेनमेदीदिहीत्याह॥समिंधएवैनं॥आनशेव्यानशइतित्रिरुदिंगयति॥त्र
यइमेलोकाः॥एष्वेवैनंलोकेषुप्रतिष्ठितमाधत्ते॥तत्तथानकार्यं॥वींगितमप्र
तिष्ठितमादधीत॥उद्धृत्यैवाधायाभिमंत्र्यः॥अवींगितमेवैनं प्रतिष्ठितमाधत्ते॥
विराड्डस्वराड्डयास्तेअग्नेशिवास्तनुवस्ताभिस्त्वादधइत्याह॥एतावाअग्नेः

ब्रा॰प्र॰
१३

शिवास्तनुवः॥ ताभिरेवैनꣳ समर्द्धयति॥ यास्ते अग्ने घोरास्तनुवस्ताभिरमुं गच्छे
तिब्रूयाद्यं द्विष्यात्॥ ताभिरेवैनं पराभावयति॥ ६ ॥ लोकोस्सृजतेन माधत्ते न्वाहार्य
पचनं देवानामन्नमेनं प्रतिष्ठितमाधत्ते पंचच॥ ७ ॥ शमीगर्भाद्ग्निं मंथति॥ एषा
वा अग्नेर्यज्ञिया तनूः॥ तामेवास्मै जनयति॥ अदितिः पुत्रकामा॥ साध्येभ्यो देवे
भ्यो ब्रह्मौदनमपचत्॥ तस्या उच्छेषणमददुः॥ तत्प्राश्नात्॥ सा रेतोधत्त॥ तस्यै धा
ता चार्यमा चाजायेतां॥ सा द्वितीयमपचत्॥ तस्या उच्छेषणमददुः॥ तत्प्राश्नात्॥
सा रेतोधत्त॥ तस्यै मित्रश्च वरुणश्चाजायेतां॥ सा तृतीयमपचत्॥ तस्या उच्छेषण
मददुः॥ तत्प्राश्नात्॥ सा रेतोधत्त॥ तस्या अंशश्च भगश्चाजायेतां॥ सा चतुर्थमप
चत्॥ तस्या उच्छेषणमददुः॥ तत्प्राश्नात्॥ सा रेतोधत्त॥ तस्या इंद्रश्च विवस्वांश्चा
॥२॥

सां॰बृ॰
१३

जायेतां॥ ब्रह्मौदनं पचति॥ रेत एव तद्दधाति॥ प्राश्नंति ब्राह्मणा ओदनं॥ यदाज्यमुच्छि
ष्यते॥ तेन समिधोभ्यज्यादधाति॥ उच्छेषणाद्धा अदिती रेतोधत्त॥ ३ ॥ उच्छेषणादे
व तद्रेतो धत्ते॥ अस्थि वा एतत्॥ यत्समिधः॥ एतद्रेतः॥ यदाज्यं॥ यदाज्येन समिधोभ्यज्या
दधाति॥ अस्थ्येव तद्रेतसि दधाति॥ तिस्र आदधाति मिथुनत्वाय॥ इयतीर्भवंति॥ प्रजा
पतिना यज्ञमुखेन संमिताः॥ ४ ॥ इयतीर्भवंति॥ यज्ञपरुषा संमिताः॥ इयतीर्भवंति॥
एतावद्वै पुरुषे वीर्यं॥ वीर्यसंमिताः॥ आर्द्रा भवंति॥ आर्द्रमिव हि रेतः सिच्यते॥ चित्रि
यस्याश्वत्थस्यादधाति॥ चित्रमेव भवति॥ घृतवतीभिरादधाति॥ ५ ॥ एतद्वा अग्नेः
प्रियं धाम॥ यद्घृतं॥ प्रियेणैवैनं धाम्ना समर्द्धयति॥ अथो तेजसा॥ गायत्रीभिर्ब्राह्म
णस्यादध्यात्॥ गायत्रछंदा वै ब्राह्मणः॥ स्वस्य छंदसः प्रत्ययनत्वाय॥ त्रिष्टुभि

ब्रा०प्र
१५

राजन्यस्य॥ त्रिष्टुप्छंदा वै राजन्यस्य॥ स्वस्यछंदसः प्रत्ययनस्त्वाय॥ ६ ॥ जगती भिर्वैश्यस्य॥ जगतीछंदा वैश्यो वै॥ स्वस्यछंदसः प्रत्ययनस्त्वाय॥ तं संवत्सरं गोपायेत्॥ संवत्सरं हि रेतो हितं वर्धते॥ यद्येनं संवत्सरे नोपनमेत्॥ समिधः पु न रादध्यात्॥ रेत एव तद्धितं वर्धमानमेति॥ नमांसमश्नीयात्॥ नस्त्रियमुपे यात्॥ ७ ॥ यन्मांसमश्नीयात्॥ यत्स्त्रियमुपेयात्॥ निर्वीर्यः स्यात्॥ नैनमग्नि रुपनमेत्॥ श्वआधास्यमानो ब्रह्मौदनं पचति॥ आदित्या वा इत उत्तमाः सुवर्गं लो कमायन्॥ ते वा इतोयं तं प्रतिनुदंते॥ एते खलु वा वादित्याः॥ यद्ब्राह्मणाः॥ तैरेव सं त्वं गच्छति॥ नैनं प्रतिनुदंति॥ ८ ॥ ब्रह्मवादिनो वदंति॥ क्वासः॥ अग्निः कार्यः॥ यो स्मै प्रजां पशून्प्रजनयतीति॥ त्रा ल्के क्तां रात्रिमग्निर्मंथीत॥ तस्मिन्नुपव्युषमर

सां ब्र
१५

णीनिष्टपेत्॥ यथर्षभाय वाशिता न्याविच्छायति॥ तादृगेव तत्॥ अथो हृद्यभस्माग्निं मंथति॥ ९ ॥ सैव साग्नेः संततिः॥ तं मथित्वा प्रांचमुद्धरति॥ संवत्सरमेव तद्रेतो हि तं प्रजनयति॥ अनाहितस्तस्याग्निरित्याहुः॥ यः समिधो नाद्याग्निमाधत्त इति॥ ताः संवत्सरे पुरस्तादादध्यात्॥ संवत्सरादेवैनमवरुध्याधत्ते॥ यदि संवत्सरे नादध्या त्॥ द्वादश्यां पुरस्तादादध्यात्॥ संवत्सरप्रतिमा वै द्वादश रात्रयः॥ संवत्सरमेवा स्याहिताभवंति॥ यदि द्वादश्यां नादध्यात्॥ त्र्यहे पुरस्तादादध्यात्॥ आहिता एवास्य भवंति॥ १० ॥ द्वितीयमपच्चतुर्थमपचदृदितीरेतोधत्त संमिता घृतवती भिरादधाति राजन्यस्य स्वस्य छंदसः प्रत्यपरस्त्वायेयाद्गच्छति मंथति रात्रयश्चत्वारि च॥ ९ ॥ प्रजापतिः प्रजा असृजत॥ सा रिरिचानो मन्यत॥ स तपोतप्यत॥

श्रा०प्र०
१५

गृह

स आत्मन्वीर्यमपश्यत्॥ तदवर्धत॥ तदस्मात्सहसोर्ध्वमसृज्यत॥ सा विराडभवत्॥ तां देवासुरा व्यगृह्णंत॥ सोऽब्रवीत्प्रजापतिः॥ मम वा एषा॥ १ ॥ दोह एव युष्माकमिति॥ सा ततः प्राच्युदक्रामत्॥ तत्प्रजापतिः पर्यगृह्णात्॥ अथर्वं पितुं मे गोपायेति॥ सा द्वितीयमुदक्रामत्॥ तत्प्रजापतिः पर्यगृह्णात्॥ नर्य प्रजां मे गोपायेति॥ सा तृतीयमुदक्रामत्॥ तत्प्रजापतिः पर्यगृह्णात्॥ शꣳस्य पशून्मे गोपायेति॥ २ ॥ सा चतुर्थमुदक्रामत्॥ तत्प्रजापतिः पर्यगृह्णात्॥ सप्रथ सभां मे गोपायेति॥ सा पंचममुदक्रामत्॥ तत्प्रजापतिः पर्यगृह्णात्॥ अहे बुध्निय मंत्रं मे गोपायेति॥ अग्नीन्वाव सा तान्व्यक्रमत॥ तान्प्रजापतिः पर्यगृह्णात्॥ अथो पंक्तिमेव॥ पंक्तिर्वा एषा ब्राह्मणे प्रविष्टा॥ ३ ॥ तामात्म

सां०

१५

नो धिनिर्मिमीते॥ यदग्निराधीयन्ते॥ तस्मादेतावंतोऽग्नय आधीयंते॥ पांक्तं वा इदꣳ सर्वं॥ पांक्तेनैव पांक्तꣳ स्पृणोति॥ अथर्व पितुं मे गोपायेत्याह॥ अन्नमेवैतेन स्पृणोति॥ नर्य प्रजां मे गोपायेत्याह॥ प्रजामेवैतेन स्पृणोति॥ शꣳस्य पशून्मे गोपायेत्याह॥ ४ ॥ पशूनेवैतेन स्पृणोति॥ सप्रथ सभां मे गोपायेत्याह॥ सभामेवैतेनेंद्रियꣳ स्पृणोति॥ अहे बुध्निय मंत्रं मे गोपायेत्याह॥ मंत्रमेवैतेन श्रियꣳ स्पृणोति॥ यदन्वाहार्यपचनेऽन्वाहार्यं पचंति॥ तेन सोऽस्याभीष्टः प्रीतः॥ यद्गार्हपत्य आज्यमधिश्रयंति संपत्नीर्याजयंति॥ तेन सोऽस्याभीष्टः प्रीतः॥ यदाहवनीये जुह्वति॥ ५ ॥ तेन सोऽस्याभीष्टः प्रीतः॥ यत्सभायां विजयंते॥ तेन सोऽस्याभीष्टः प्रीतः॥ यदावसथेऽन्नꣳ हरंति॥ तेन सोऽस्याभीष्टः प्रीतः॥

तथास्य सर्वेप्रीता अभीष्टा आधीयंते॥ प्रवसथमेष्यन्नेवमुपतिष्ठेतैकमेकं॥ यथा
ब्राह्मणाय गृहे वासिने परिदाय गृहानेति॥ तादृगेवतत्॥ पुनरागत्योपतिष्ठते॥ सा
भागेयमेवैषां तत्॥ सा ततऽर्ध्वा रोहत्॥ सा रोहिण्यभवत्॥ तद्रोहिण्यै रोहिणित्वं॥ रो
हिण्यामग्निमादधीत॥ स्वएवैनं योनौ प्रतिष्ठितमाधत्ते॥ ऋध्नोत्येनेन॥ ९ ॥
एषा पशून्मे गोपायेति प्रविष्टा पशून्मे गोपायेत्याह जुहुतिति ष्ठतेसप्त च॥ १० ॥ ॥
ब्रह्मसंधत्तं कृत्तिकाः स्वर्द्धंति द्वादश प्रजापति र्वा चोदेवासुराः घर्मः शिरऽद्रमेवैश मीग
र्भा प्रजापतिः सरिरिच्यानः सतपः स आत्मन्वीर्यं दश॥ १० ॥ ॥ ब्रह्मसंधत्तं
तौ दिव्यावथो शंत्वाय प्राच्येषां यदुपर्युपरि यत्तद्यः सोश्वो वा रोजगतीभिरशी
तिः॥ ८० ॥ ॥ श्रीसांबसदाशिवार्पणमस्तु॥ ॥ ओम्॥ ॥

॥ हरिः ओम्॥ ॥ उद्धन्यमानमस्या अमेध्यं॥ अपपाप्मानं यजमानस्य हंतु॥ शिवा
नः संतु प्रदिशश्चतस्रः॥ शन्नो माता पृथिवी तोकसाता॥ शन्नो दिवीरभिष्टये॥ आपो भ
वंतु पीतये॥ शंयोरभिस्रवंतु नः॥ वैश्वानरस्य रूपं॥ पृथिव्यां परिस्रसा॥ स्योनमा वि
शंतु नः॥ १ ॥ यदिदं दिवोयददः पृथिव्याः॥ संजज्ञाने रोदसी संबभूवतुः॥ ऊषान्कृष्ण
मवतु कृष्णमूषाः॥ इहोभयोर्यज्ञियमागमिष्ठाः॥ ऊतीः कुर्वाणो यत्पृथिवीमचरः॥ गु
हाकारमाखुरूपं प्रतीत्य॥ तत्ते न्यक्तमिह संभरंतः॥ शतं जीवेम शरदः सवीराः॥ ऊर्जं
पृथिव्या रसमाभरंतः॥ शतं जीवेम शरदः पुरूचीः॥ २ ॥ वम्रीभिरनुवित्तं गुहासु॥ श्रो
त्रं तऽर्व्यं बधिरा भवामः॥ प्रजापतिसृष्टानां प्रजानां॥ क्षुधोपहत्यै सुवितन्नो अस्तु॥
उपप्रभिन्नमिषमूर्जं प्रजाभ्यः॥ सूदं गृहेभ्यो रसमाभरामि॥ यस्यरूपं बिभ्रदिमा

॥ ब्रा०अ० ॥
॥ १७ ॥

मविंदन्॥ गुहाप्रविष्टाꣳ सरिरस्य मध्ये॥ तस्येदं विहत माभरंतः॥ अहं बहू का
रमस्यां विधेम॥ ३॥ यत्पर्यपश्यत्सरिरस्य मध्ये॥ उर्वीमपश्यज्जगतः प्रति
ष्ठां॥ तत्पुष्करस्यायतनाद्धि जातं॥ पर्णं पृथिव्याः प्रथनꣳ हरामि॥ याभिरदृꣳ
हज्जगतः प्रतिष्ठां॥ उर्वीमिमां विश्वजनस्य भर्त्रीं॥ तानः शिवाः शर्कराः संतु
सर्वाः॥ अग्नेरेतश्चंद्रꣳ हिरण्यं॥ अद्भ्यः संभूतममृतं प्रजासु॥ तत्संभरंनुत्तरतो
निधाय॥ ४॥ अतिप्रयच्छं दुरितिं तरेयं॥ अश्वो रूपं कृत्वा यदश्वत्थेतिष्ठः॥ सं
वत्सरं देवेभ्यो निलाय॥ तत्तेन्यक्तमिह संभरंतः॥ शतं जीवेम शरदः सवीराः॥
ऊर्जः पृथिव्या अध्युत्थितोसि॥ वनस्पते शतवल्शो विरोह॥ त्वया वयमिष
मूर्जं मदंतः॥ रायस्पोषेण समिषा मदेम॥ गायत्रिया ह्रियमाणस्य तैये॥ ५॥

सां बु
१७

पर्णमपतत्तृतीयस्येदिवोधि॥ सोयं पर्णः सोमपर्णाद्धि जातः॥ ततो हरामि सो
मपीथस्यावरुध्यै॥ देवानां ब्रह्मवादं वदतां यत्॥ उपाशृणोः सुश्रवा वै श्रुतोसि॥
ततो मामाविशतु ब्रह्मवर्चसं॥ तत्संभरꣳस्तदवरुंधीय साक्षात्॥ यया ते सृष्टस्या
ग्नेः॥ हेतिमशमयत्प्रजापतिः॥ तामिमामप्रदाहाय॥ ६॥ शमीꣳ शांत्यै हराम्य
हं॥ यत्ते सृष्टस्य यतः॥ विकंकतं भा आर्छज्जातवेदः॥ तया भासा संमितः॥ उरुं नो
लोकमनुप्रभाहि॥ यत्ते तांतस्य हृदयमाछिंदन्जातवेदः॥ मरुतोद्भिस्तमयित्वा॥
एतत्ते दे तेशनेः संभरामि॥ सात्मा अग्ने सहृदयो भवेह॥ चित्रियादश्वत्थात्संभृता
बृहत्यः॥ ७॥ शरीरमभिसꣳस्कृता स्थ॥ प्रजापतिना यज्ञमुखेन संमिताः॥
तिस्रस्त्रिवृद्भिर्मिथुनाः प्रजात्यै॥ अश्वत्थाद्धव्यवाहाद्धि जातां॥ अग्नेस्तनूं य
ज्ञियाꣳ संभरामि॥ शांतयोनिꣳ शमीगर्भं॥ अग्नये प्रजनयितवे॥ यो अश्वत्थः श

॥ श्री०प्र० ॥
॥ १८ ॥

मीगर्भः॥आरुरोहत्वेसचा॥तंतेहरामिब्रह्मणा॥ ८ ॥यज्ञियैःकेतुभिःसह॥यंत्वा
समभरञ्जातवेदः॥यथाशरीरंभूतेषुन्यक्तं॥ससंभृतःसीदशिवःप्रजाभ्यः॥उरुन्नो
लोकमनुनेषिविद्वान्॥प्रवेपसेकवयेमेध्याय॥वचोवंदारुवृषभायवृष्णे॥यतो
भयमभयंतन्नोअस्तु॥अवदेवान्यजेहेड्यान्॥समिधाग्निंदुवस्यत॥ ९ ॥घृतैर्बो
धयतातिथिं॥आस्मिन्हव्याजुहोतन॥उपत्वाग्नेहविष्मतीः॥घृताचीर्यंतुहर्यत॥जु
षस्वसमिधं॥तंत्वासमिद्भिरंगिरः॥घृतेनवर्द्धयामसि॥बृहच्छोचायविष्ठ्य॥समि
ध्यमानःप्रथमोनुधर्मः॥समक्तुभिरज्यतेविश्ववारः॥ १० ॥शोचिष्केशोघृतनिर्णि
क्पावकः॥सुयज्ञोअग्निर्यजथायदेवान्॥घृतप्रतीकोघृतयोनिरग्निः॥घृतैःस
मिद्धोघृतमस्यान्नं॥घृतप्रुषस्त्वासरितोवहंति॥घृतंपिबन्त्सुयजायक्षिदेवान्॥

॥ सां०ब्रा ॥
॥ १८ ॥

आयुर्दाअग्नेहविषोजुषाणः॥घृतप्रतीकोघृतयोनिरेधि॥घृतंपीत्वामधुचारुगव्यं॥
पितेवपुत्रमभिरक्षतादिमं॥ ११ ॥त्वामग्नेसमिधानंयविष्ठ॥देवादूतंचक्रिरेहव्यवाहं॥
उरुज्रयसंघृतयोनिमाहुतं॥त्वेषंचक्षुर्दधिरेचोदयन्मति॥त्वामग्नेप्रदिवआहुतंघृते
न॥सुम्नायवःसुषमिधासमीधिरे॥सवावृधानओषधीभिरुक्षितः॥उरुज्रयांसिपा
र्थिवाविष्ठसे॥घृतप्रतीकंवऋतस्यधूर्षदं॥अग्निंमित्रंनसमिधानऋंजते॥ १२ ॥
इंधानोअक्रोविदथेषुदीद्यत्॥शुक्रवर्णामुदुनोयंसतेधियं॥प्रजाअग्नेसंवासय॥
आशाश्चपशुभिःसह॥राष्ट्राण्यस्माआधेहि॥यान्यासन्त्सवितुःसवे॥महीविश्प
त्नीसदनेऋतस्य॥अर्वाचीएतंधरुणेरयीणां॥अंतर्वत्नीजन्यंजातवेदसं॥अध्वरा
णांजनयथःपुरोगां॥आरोहतंदशतंशक्करीर्मम॥ऋतेनाग्नआयुषावर्चसासह॥

ज्योत्स्नीचंतउत्तरामुत्तरांꣳसमां ॥ दर्शमहंपूर्णमासंयज्ञंयथायजै ॥ ऋत्वियवतीस्थो
अग्निरेतसो ॥ गर्भंदधाथांतेवामहंददे ॥ तत्सत्यंयद्वीरंबिभृथः ॥ वीरंजनयिष्यथः ॥
तेमत्प्रातःप्रजनिष्येथे ॥ तेमाप्रजातेप्रजनयिष्यत्थः ॥ २४ ॥ प्रजयापशुभिर्ब्रह्मवर्च
सेनसुवर्गेलोके ॥ अनृतात्सत्यमुपैमि ॥ मानुषाद्दैव्यमुपैमि ॥ दैवींवाचंयच्छामि ॥ श
ल्कैरग्निमिंधानः ॥ उभौलोकौसनेमहं ॥ उभयोर्लोकयोर्ऋध्वा ॥ अतिमृत्युंतरा
म्यहं ॥ जातवेदोभुवनस्यरेतः ॥ इहसिंचतपसोयज्जनिष्यते ॥ २५ ॥ अग्निमश्व
त्थादधिहव्यवाहं ॥ शमीगर्भाज्जनयन्योमयोभूः ॥ अयंतेयोनिर्ऋत्वियः ॥ यतोजा
तोअरोचथाः ॥ तंजानन्नग्नआरोह ॥ अथानोवर्धयारयिं ॥ अपेतवीतविचसर्पतातः ॥
येत्रस्थपुराणायेचनूतनाः ॥ अदादिदंयमोवसानंपृथिव्याः ॥ अक्रन्निमंपितरोलो

कमस्मै ॥ २६ ॥ अग्नेर्भस्मास्यग्नेःपुरीषमसि ॥ संज्ञानमसिकामधरणं ॥ मयितेकामधर
णंभूयात् ॥ संवःसृजामिहृदयानि ॥ सꣳसृष्टंमनोअस्तुवः ॥ सꣳसृष्टःप्राणोअस्तुवः ॥ सं
यावःप्रियास्तनुवः ॥ संप्रियाहृदयानिवः ॥ आत्मावोअस्तुसंप्रियः ॥ संप्रियास्तनुवोमम ॥
॥ २७ ॥ कल्पेतांद्यावापृथिवी ॥ कल्पंतामापओषधीः ॥ कल्पंतामग्नयःपृथक् ॥ ममज्यै
ष्ठ्यायसव्रताः ॥ येग्नयःसमनसोंतराद्यावापृथिवी ॥ वासंतिकावृतूअभिकल्पमानाः ॥
इंद्रमिवदेवाअभिसंविशंतु ॥ दिवस्त्वावीर्येण ॥ पृथिव्यैमहिम्ना ॥ २८ ॥ अंतरिक्षस्यपो
षेण ॥ सर्वपशुमादधे ॥ अजीजनन्नमृतंमर्त्यासः ॥ अस्रेमाणंतरणिंवीडुजंभं ॥ दशस्व
सारोअग्रुवःसमीचीः ॥ पुमाꣳसंजातमभिसꣳरभंतां ॥ प्रजापतेस्त्वाप्राणेनाभिप्राणि
मि ॥ पूष्णःपोषेणमह्यं ॥ दीर्घायुत्वायशतशारदाय ॥ शतꣳशरद्भ्यआयुषेवर्चसे ॥ १९ ॥

॥श्रा०प्र०॥ ॥२०॥

जीयात्वे पुण्याय॥अहं त्वदस्मि मदसि त्वमेतत्॥ममासि योनिस्तव योनिरस्मि॥म
मैव सन्वह हव्यान्यग्ने॥पुत्रः पित्रे लोककृज्जातवेदः॥प्राणे त्वामृतमादधामि॥अ
न्नादमन्नाद्याय॥गोप्तारं गुप्त्यै॥सुगार्हपत्यो विदहन्नरातीः॥उषसः श्रेयसीः श्रेय
सीर्दधत्॥ २० ॥अग्ने सपत्नाँ अपबाधमानः॥रायस्पोषमिषमूर्जमस्मासु धेहि॥
इमा उमामुपतिष्ठंतु रायः॥आभिः प्रजाभिरिह संवसेय॥इहो इडा तिष्ठतु विश्वरूपी॥
मध्ये वसोर्दीदिहि जातवेदः॥ओजसे बलाय त्वोद्यच्छे॥वृषणे शुष्मायायुषे वर्चसे॥
सपत्नतूरसि वृत्रतूः॥यस्ते देवेषु महिमा सुवर्गः॥ २१ ॥यस्त आत्मा पशुषु प्रविष्टः॥
पुष्टिर्या ते मनुष्येषु पप्रथे॥तया नो अग्ने जुषमाण एहि॥दिवः पृथिव्याः पर्यंतरिक्षा
त्॥वातात्पशुभ्यो अध्योषधीभ्यः॥यत्रयत्र जातवेदः संबभूथ॥ततो नो अग्ने जु

॥सां॰ब्रु॥ ॥२०॥

षमाण एहि॥प्राचीमनु प्रदिशं प्रेहि विद्वान्॥अग्नेरग्ने पुरो अग्निर्भवेह॥विश्वा आ
शा दीद्यानो विभाहि॥ २२ ॥ऊर्जं नो धेहि द्विपदे चतुष्पदे॥अन्वग्निरुषसामग्रमख्य
त्॥अन्वहानि प्रथमो जातवेदाः॥अनु सूर्यस्य पुरुत्रा च रश्मीन्॥अनु [द्या]वापृथि
वी आततान॥विक्रमस्व महाँ असि॥वेदिषन्मानुषेभ्यः॥त्रिषु लोकेषु जागृहि॥य
दिदं दिवो यद्दः पृथिव्याः॥संविदाने रोदसी संबभूवतुः॥ २३ ॥तयोः पृष्ठे सीदतु जा
तवेदाः॥शंभूः प्रजाभ्यस्तनुवे स्योनः॥प्राणं त्वामृत आदधामि॥अन्नादमन्नाद्याय॥
गोप्तारं गुप्त्यै॥यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः॥शुक्रं ज्योतिरजस्रं॥तेन मे दीदिहि
तेन त्वादधे॥अग्निनाग्ने ब्रह्मणा॥आनशे व्यानशे सर्वमायुर्व्यानशे॥ २४ ॥नर्य
प्रजां मे गोपाय॥अमृतत्वाय जीवसे॥जातां जनिष्यमाणां च॥अमृते सत्ये प्रतिष्ठितां॥

॥ब्रा०प्र०॥
॥२१॥

अथर्वपितुं मे गोपाय॥ रसमन्नमिहायुषे॥ अदब्धायोऽशीततनो॥ अविषन्नः पितुं कृणु॥ शङ्‌
स्य पशून्मे गोपाय॥ द्विपादो ये चतुष्पदः॥ २५ ॥ अष्टाशफाश्च य इहाग्ने॥ ये चैकशफा आ
शुगाः॥ सभ्य सभां मे गोपाय॥ ये च सभ्याः सभासदः॥ तानिंद्रियावतः कुरु॥ सर्वमायुरुपा
सतां॥ अहे बुध्निय मंत्रं मे गोपाय॥ यमृषयस्त्रैविदा विदुः॥ ऋचः सामानि यजूंषि॥ साहि
श्रीरमृता सतां॥ २६ ॥ चतुःशिखंडा युवतिः सुपेशाः॥ घृतप्रतीका भुवनस्य मध्ये॥ मर्मृ
ज्यमाना महते सौभगाय॥ मह्यं धुक्ष्व यजमानाय कामान्॥ इहैव संतत्र सतो वो अग्नयः॥
प्राणेन वाचा मनसा बिभर्मि॥ तिरो मा संतमायुर्मा प्रहासीत्॥ ज्योतिषा वो वैश्वानरेणोप
तिष्ठे॥ पंचधाग्नीन्व्यक्रामत्॥ विराट् सृष्टा प्रजापतेः॥ ऊर्ध्वारोहद्रोहिणी॥ योनिरग्नेः प्र
तिष्ठितिः॥ २७ ॥ विशंतु नः पुरुचीर्विधेम निधायपत्ने प्रदाहाय वृहत्या ब्रह्मणा दुवस्यत

॥ सांब्र
॥ २१ ॥

च अ

विश्वया रइम हंजते पुरीगां प्रजननयिष्यथो जनितेंस्मे ममहिम्ना वर्चसे दधत्सुवर्गेऽभा
हिंसं बभूवतु रायुर्व्यानशातुष्पदः सत्तां प्रजापते हृच्च॥ १ ॥ ॥ नवैतान्यहानि भ
वंति॥ नव वै सुवर्गा लोकाः॥ यदेतान्यहान्युपयंति॥ नवस्वेतेवेत्सुवर्गेषु लोकेषु सत्रिणः
प्रतितिष्ठंतो यंति॥ अग्निष्टोमाः परः सामानः कार्या इत्याहुः॥ अग्निष्टोमसंमितः सु
वर्गो लोक इति॥ द्वादशाग्निष्टोमस्य स्तोत्राणि॥ द्वादशमासाः संवत्सरः॥ तत्तं न स्र
क्ष्यं॥ उक्थ्या एव सप्तदशाः परः सामानः कार्याः॥ १ ॥ पशवो वा उक्थानि॥ पशूना
मवरुध्ये॥ विश्वजिदभिजितावग्निष्टोमौ॥ उक्थ्याः सप्तदशाः परः सामानः॥ ते सं
स्तुता विराजमभिसंपद्यंते॥ द्वे चर्चावतिरिच्येते॥ एकया गौरतिरिक्तः॥ एकयायुरू
नः॥ सुवर्गो वै लोको ज्योतिः॥ ऊर्ग्विराट्॥ २ ॥ सुवर्गमेव तेन लोकमभिजयंति॥

आ०ब्रा०
॥२२॥

यत्परꣳराथंतरं॥ तत्प्रथमे हन्कार्यं॥ बृहद्द्वितीये॥ वैरूपं तृतीये॥ वैराजं चतुर्थे॥ शाक्वरं पंचमे॥ रैवतꣳषष्ठे॥ तद्दृष्टेभ्यो नयंति॥ संतनय एते ग्रहा गृह्यंते॥ ३ ॥ अतिग्राह्याः परः सामसु॥ इमानेवैते लोकान्त्संतन्वंति॥ मिथुनाए तेग्रहा गृह्यंते॥ अतिग्राह्याः परः सामसु॥ मिथुनमेवैतेर्यजमानाअवरुंधते॥ बृहत्पृष्ठं भवति॥ बृहद्वैसुवर्गो लोकं यंति॥ त्रयस्त्रिꣳशिनाम साम॥ माध्यंदिने पवमाने भवति॥ ४ ॥ त्रयस्त्रिꣳशद्वै देवताः॥ देवताएवावरुंधते॥ येवाइतः परांचꣳसंवत्सरमुपयंति॥ नैहे नं ते स्वस्ति समश्नुवते॥ अथये मुष्मो र्वांचमुपयंति॥ तेहैनꣳस्वस्ति सश्नुवते॥ एतद्वा अमुतो र्वांचमुपयंति॥ यदेवं॥ यो ह स्वचक्षुवा वप्रजापतिः॥ सउवै वेंद्रः॥ तद्देवेभ्यो नयंति॥ ५ ॥ कार्याचिराद्गृह्यंते पवमाने भवतींद्रएकं च॥ २ ॥

बृहतैव सुवर्गं लोकं यंति॥

सां०बृ०
॥२२॥

संततिर्वा एते ग्रहाः॥ यत्परः सामानः॥ विषूवान्दिवाकीर्त्यं॥ यथाशालायै पक्षसी॥ एवꣳसंवत्सरस्य पक्षसी॥ यदेते न गृह्येरन्॥ विषूचीसंवत्सरस्य पक्षसी व्यवस्रꣳसेयातां॥ आर्त्तिमार्छेयुः॥ यदेते गृह्यंते॥ यथाशालायै पक्षसी मध्यमं वꣳशमभिसमायच्छति॥ १ ॥ एवꣳसंवत्सरस्य पक्षसी दिवाकीर्त्यमभिसंतन्वंति॥ नार्त्तिमार्छति॥ एकविꣳशमहर्भवति॥ शुक्राग्राया यहा गृह्यंते॥ प्रत्युत्तब्ध्यै सयत्वाय॥ सौर्य एतदहः पशुरालभ्यते॥ सौर्यातिग्राह्यो गृह्यते॥ अहरेव रूपेण समर्धयंति॥ अथो अन्ह एवैष बलिर्ह्रियते॥ सप्तैतदहरतिग्राह्या गृह्यंते॥ २ ॥ सप्त वै शीर्षण्याः प्राणाः॥ असावादित्यः शिरः प्रजानां॥ शीर्षन्नेव प्रजानां प्राणान्दधाति॥ तस्मात्सप्त शीर्षन्प्राणाः॥ इंद्रो वृत्रꣳहत्वा॥ असुरान्पराभाव्य॥ सइमान्लोकान्

॥ ब्रा० प्र० ॥
॥ २३ ॥

भ्यजयत्॥ तस्यासौ लोको नभिजित आसीत्॥ तं विश्वकर्मा भूत्वाभ्यजयत्॥
यद्वैश्वकर्मणो गृह्यते॥ ३ ॥ सुवर्गस्य लोकस्याभिजित्यै॥ प्रवा एते स्माल्लोका
च्यवंते॥ ये वैश्वकर्मणं गृह्णते॥ आदित्यश्चो गृह्यते॥ इयं वा अदितिः॥ अस्या
मेव प्रतितिष्ठंति॥ अन्योन्यो गृह्येते॥ विश्वान्येवान्येन कर्माणि कुर्वाणा यंति॥
अस्यामन्येन प्रतितिष्ठंति॥ तावा परार्धात्संवत्सरस्यान्योन्यो गृह्येते॥ तावुभौ
सह महाव्रते गृह्येते॥ यज्ञस्यैवांतं गत्वा॥ उभयोर्लोकयोः प्रतितिष्ठंति॥ अर्क्य
मुक्थं भवति॥ अन्नाद्यस्यावरुध्यै॥ ४ ॥ समाय छत्यतियाह्यागृह्यंते गृह्य
ते संवत्सरस्यान्योन्यो गृह्येते पंच च॥ ३ ॥ एकविंश एष भवति॥ एतेन वै
देवा एकविंशेन॥ आदित्यमितउत्तमं सुवर्गं लोकमारोहयन्॥ स वा एष

॥ सां ब्रा ॥
॥ २२ ॥

६

इत एकविंशः॥ तस्य दशावस्ताद्दहानि॥ दश परस्तात्॥ स वा एष विराज्युभय
तः प्रतिष्ठितः॥ विराजि हि वा एष उभयतः प्रतिष्ठितः॥ तस्माद्दंतरेमौ लोकौ यन्॥
सर्वेषु सुवर्गेषु लोकेष्वभितपन्नेति॥ १ ॥ देवा वा आदित्यस्य सुवर्गस्य लोक
स्य॥ पराचोतिपाद्दाद्विभयुः॥ तं छंदोभिरदृंहन्धृत्यै॥ देवा वा आदित्यस्य सुव
र्गस्य लोकस्य॥ अवाचोवपादाद्बिभयुः॥ तं पंचभी रश्मिभिरुदवयन्॥ तस्मा
देकविंशेहन्पंच दिवाकीर्त्यानि क्रियंते॥ रश्मयो वै दिवाकीर्त्यानि॥ ये गाय
त्रे॥ ते गायत्रीषूत्तरयोः पवमानयोः॥ २ ॥ महादिवाकीर्त्यं होतुः पृष्ठं॥ वि
कर्णं ब्रह्मसामं॥ भासोग्निष्टोमः॥ अथैतानि पराणि॥ परैर्वै देवा आदित्यं
सुवर्गं लोकमपारयन्॥ यदपारयन्॥ तत्पराणां परत्वं॥ पारयंत्येनं पराणि॥

॥ब्रा०प्र०॥
॥२४॥

यएवंवेद॥अथैतानिस्पराणि॥स्पैरेवैदेवाआदित्याꣳसुवर्गंलोकमस्पारयन्॥य
दस्पारयन्॥तत्स्पराणाꣳस्परत्वं॥स्पारयंत्येनꣳस्पराणि॥यएवंवेद॥ ३ ॥एति
पवमानयोस्पराणिपंचच॥ ४ ॥अप्रतिष्ठांवाएते गच्छंति॥येषाꣳसंवत्सरेनाप्तेथ॥
एकादशिन्याप्यते॥वैष्णवंवामनमालभंते॥यज्ञोवैविष्णुः॥यज्ञमेवालभंतेप्रति
ष्ठित्यै॥ऐंद्राग्नमालभंते॥इंद्राग्नीवैदेवानामयातयामानौ॥येएवदेवतेअयात
याम्नी॥तेएवालभंते॥ २ ॥वैश्वदेवमालभंते॥देवताएवावरुंधते॥द्यावापृथिव्यां
धेनुमालभंते॥द्यावापृथिव्योरेवप्रतितिष्ठंति॥वायव्यंवत्समालभंते॥वायुरेवै
भ्योयथायतनाद्देवताअवरुंधे॥आदित्यामविंवशामालभंते॥इयंवाअदितिः॥अ

॥सां०ब्रा०॥
॥२४॥

॥ ३ ॥

स्यामेवप्रतितिष्ठंति॥मैत्रावरुणीमालभंते॥ २ ॥मित्रेणैवयज्ञस्यस्विष्टꣳशमयंति॥
वरुणेनदुरिष्टिं॥प्राजापत्यंतूपरंमहाव्रतआलभंते॥प्राजापत्योतिमा ह्योगृह्यते॥
अहरेवरूपेणसमर्द्धयंति॥अथोअन्हएवैषबलिर्ह्रियते॥आग्नेयमालभंतेप्रति
प्रज्ञात्यै॥अजपेत्वान्वाएते पूर्वैर्मासैरवरुंधते॥यदेतेगव्याःपशवआलभ्यंते॥
उभयेषांपशूनामवरुध्यै॥यदतिरिक्तामेकादशिनीमालभेरन्॥अप्रियं
भ्रातृव्यमभ्यतिरिच्येत॥यद्वौद्वौपशूसमस्येयुः॥कनीयआयुःकुर्वीरन्॥यदे
तेब्राह्मणवंतःपशवआलभ्यंते॥नाप्रियंभ्रातृव्यमभ्यतिरिच्यते॥नकनीयआ
युःकुर्वते॥ ४ ॥तेएवालभंतेमैत्रावरुणीमालभंतेवरुध्यैसप्तच॥ ५ ॥प्रजा
पतिःप्रजाःसृष्ट्वावृत्तोशयत॥तंदेवाभूतानाꣳरसंतेजःसंभृत्य॥तेनैनमभिष

ज्यन्॥ महान्नं वत इति॥ तन्महाव्रतस्य महाव्रतत्वं॥ महद्व्रतमिति॥ तन्महाव्रत
स्य महाव्रतत्वं॥ महतोव्रतमिति॥ तन्महाव्रतस्य महाव्रतत्वं॥ पंचविंꣳशस्तोमो भ
वति॥ १ ॥ चतुर्विंꣳशस्यार्धमासाः संवत्सरः॥ यद्वा एतस्मिन्त्संवत्सरेधि प्राजा
यत॥ तदन्नं पंचविंꣳशमभवत्॥ मध्यतः क्रियते॥ मध्यतोह्यन्नमशितं धिनोति॥
अथो मध्यत एव प्रजानामूर्ग्धीयते॥ अथयद्वा इदमंततः क्रियते॥ तस्मादुदंते प्रजाः
समेधंते॥ अंततः क्रियते प्रजननायैव॥ त्रिवृच्छिरो भवति॥ २ ॥ त्रेधाविहितꣳ
हि शिरः॥ लोमछवीरस्थि॥ पराञ्चा स्तुवंति॥ तस्मात्तत्सदृगेव॥ नमेद्यतोनुमेद्य
ति॥ न कृश्यतोनुकृश्यति॥ पंचदशोन्यः पक्षो भवति॥ सप्तदशोन्यः॥ तस्माद्वयाꣳ
स्यन्यतरमर्धमभिपर्यावर्तते॥ अन्यतरतोहितद्गरीयः क्रियते॥ ३ ॥ पंचविꣳशा

आत्मा भवति॥ तस्मान्मध्यतः पशवो वरिष्ठाः॥ एकविंꣳशं पुच्छं॥ द्विपदासु स्तुवंति प्र
तिष्ठित्यै॥ सर्वेण सह स्तुवंति॥ सर्वेण ह्यात्मनात्मन्वी॥ सहोत्यंनि॥ एकैकामुच्छिंꣳषं
ति॥ आत्मन्ह्यंगानि बद्धानि॥ नवा एतेन सर्वः पुरुषः॥ ४ ॥ यदितइतो लोमानि
दतो नखान्॥ परिमादः क्रियंते॥ तान्येव तेन प्रत्युप्यंते॥ औदुंबरस्तल्पो भवति॥
ऊर्ग्वा अन्नमुदुंबरः॥ ऊर्ज एवान्नाद्यस्यावरुध्ये॥ यस्य तल्पसद्यमनभिजितꣳस्या
त्॥ स देवानाꣳ साम्यक्षे॥ तल्पसद्यमभिजयानीति तल्पमारुह्योद्गायेत्॥ तल्प
सद्यमेवाभिजयति॥ ५ ॥ यस्य तल्पसद्यमभिजितꣳ स्यात्॥ स देवानाꣳ साम्य
क्षे॥ तल्पसद्यं मापराजेषीति तल्पमारुह्योद्गायेत्॥ न तल्पसद्यं पराजयते॥ प्लें
खेशꣳसति॥ महो वै प्लेंखः॥ महस एवान्नाद्यस्यावरुध्ये॥ देवासुराः संयत्ता आसन्॥

त आदित्ये व्याय छंत ॥ तं देवाः समयेजेन् ॥ ६ ॥ ब्राह्मणश्च शूद्रश्च चर्मकर्ते
व्यायच्छेते ॥ दैव्यो वै वर्णो ब्राह्मणः ॥ असुर्यः शूद्रः ॥ इमे रात्सुरिमे सुभूतमक्र
न्नित्यन्यतरो ब्रूयात् ॥ इमउद्वासीकारिणइमे दुर्भूतमक्रन्नित्यन्यतरः ॥ यदेवै
षांसुकृतंया राद्धिः ॥ तदन्यतरोभिश्रीणाति ॥ यदेवैषां दुष्कृतंया राद्धिः ॥ तद
न्यपरोपहंति ॥ ब्राह्मणः संजयति ॥ अमुमेवादित्यंभ्रातृव्यस्यसंविंदंते ॥ ७ ॥
भवतिभवतिक्रियतेपुरुषोजयत्यजयन्जयत्येकंच ॥ ६ ॥ ॥ उद्धन्यमा
नंनवेतानि संततिरेकविंशएषोप्रतिष्ठांप्रजापतिः प्रजासृष्ट्वा वृत्तः षट् ॥
॥ ६ ॥ ॥ उद्धन्यमानंशोचिष्केशोग्नेसपत्नानत्तियाप्रोचैरेवदेव
मालभंतेपंचाशत् ॥ ५० ॥ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ ॥

पं

॥ हरिः ओम् ॥ ॥ देवासुराः संयत्ताआसन् ॥ तेदेवाविजयमुपयंतः ॥ अग्नीषो
मयोस्तेजस्विनीस्तनूः संन्यदधत ॥ इदमुनोभविष्यति ॥ यदिनोजेष्यंतीति ॥ तेना
ग्नीषोमावपाक्रामतां ॥ ते देवा विजित्य ॥ अग्नीषोमावन्वैछन् ॥ तेग्निमन्वविंदन्
तुषूत्सन्नं ॥ तस्यविभक्तीभिस्तेजस्विनीः स्तनूः सवारंधत ॥ १ ॥ तेसोममन्ववि
दन् ॥ तमघ्नन् ॥ तस्ययथाभिज्ञानंतनूर्व्यगृह्णत ॥ तेयहाअभवन् ॥ तद्ग्रहाणां
ग्रहत्वं ॥ यस्यैवंविदुषोग्रहाणस्यगृह्यंते ॥ तस्यत्वेवगृहीताः ॥ नानाग्नेयंपुनरा
धेयेकुर्यात् ॥ यदनाग्नेयंपुनराधेयेकुर्यात् ॥ व्यृद्धमेवतत् ॥ २ ॥ अनाग्नेयंवा
एतत्क्रियते ॥ यत्समिधस्तनूनपातमिडोबर्हिर्यजति ॥ उभावाग्नेयावाज्यभा
गौस्यातां ॥ अनाज्यभागोभवतइत्याहुः ॥ यदुभावाग्नेयाचन्वंचाविति ॥ अग्न

ब्रा०प्र०
२७

येपवमानायोत्तरस्यात्॥ यत्पवमानाय॥त्तिनाज्यभागः॥ तेनसोम्यः॥बुधन्व
त्याग्नेयस्याज्यभागस्यपुरोनुवाक्याभतिं॥यथा सुप्तं बोधयति॥ तादृगेवतत्॥
अग्निन्यक्ताः पत्नीसंयाजानामृचस्युः॥तेनाग्नेयं सर्वंभवति॥ एकधातेजस्वि
नींदेवतामुपैतीत्याहुः॥सेनमीश्वराप्रदहइति॥ नेतिब्रूयात्॥प्रजननंवाअग्निः॥
प्रजननमेवोपैतीति॥ कृतयजुः संभृतसंभारइत्याहुः॥ ४ ॥न संभृत्याः संभाराः॥न
यजुः कार्यमिति॥अथोखलु॥ संभृत्याएव संभाराः॥ कार्यंयजुः॥पुनराधेयस्यसं
मृध्यै॥त्तेनोपांशु प्रचरति॥ एष्यइववाएषः॥यत्पुनराधेयः॥यथोपांशुनष्टमि
च्छति॥ ५ ॥तादृगेवतत्॥उच्चैः स्विष्टकृतमुत्सृजति॥ यथानष्टं वित्वाप्राहाय
मिति॥तादृगेवतत्॥एकधातेजस्विनीं देवतामुपैत्यातीहुः॥सेनमीश्वराप्रदह

सांब्र
२७

इति॥ तत्तथानोपैति॥ प्रयाजानूयाजेष्वेव विभक्तीः कुर्यात्॥ यथापूर्वमाज्यभागौ स्या
तां॥ एवंपत्नीसंयाजाः॥ ६ ॥तेहैभ्यानरवत्यजननवत्तरमुपैतीति॥ तदाहुः॥ व्यृद्धं
वाएतत्॥अनाग्नेयंवाएतत्क्रियत्तइति॥ नेतिब्रूयात्॥अग्निंप्रथमंविभक्तीनांयज
ति॥अग्निमुत्तमंपत्नीसंयाजानां॥ तेनाग्नेयं॥तिन समृद्धंक्रियत्तइति॥ ७ ॥अरुंध
तैयतद्भवति संभृत संभारइत्याहुरिच्छतिपत्नीसंयाजानवच॥ १ ॥देवावैयथाद
र्शं यज्ञानाहरंत॥ योग्निष्टोमं॥ यउक्थ्यं॥ योतिरात्रं॥तेसहैव सर्वेवाजपेयमपश्य
न्॥ते॥अन्योन्यस्मैनातिष्ठंत॥अहमनेनयजाइति॥ तेब्रुवन्॥आजिमस्यधा
वामेति॥१॥तस्मिन्नाजिमधावन्॥ तं बृहस्पतिरुदजयत्॥ तेनायजत॥ सस्वा
राज्यमगच्छत्॥ तमिंद्रोब्रवीत्॥ मामनेयाजयेति॥ तेनेंद्रमयाजयत्॥ सोग्रंदे

वतानांपर्यैत्॥अगच्छत्स्वाराज्यं॥अतिष्ठंतास्मैज्यैष्ठ्याय॥ २ ॥यएवंविद्वान्वाजपेये
नयजते॥गच्छतिस्वाराज्यं॥अग्रंसमानानांपर्येति॥तिष्ठंतेस्मैज्यैष्ठ्याय॥ सवाएषब्रा
ह्मणस्यचैवराजन्यस्यचयज्ञः॥तंवाएतंवाजपेयइत्याहुः॥वाजाप्योवाएषः॥वाजं
ह्येतेनदेवाऐप्सन्॥सोमोवैवाजपेयः॥योवैसोमंवाजपेयंवेद॥ ३ ॥वाज्येवैनंपी
त्वाभवति॥आस्यवाजीजायते॥अन्नंवैवाजपेयः॥यएवंवेद॥अत्त्यन्नं॥आस्यान्ना
दोजायते॥ब्रह्मवैवाजपेयः॥यएवंवेद॥अत्तिब्रह्मणान्नं॥आस्यब्रह्माजायते॥ ४ ॥
वाग्वैवाजस्यप्रसवः॥यएवंवेद॥करोतिवाचावीर्यं॥ऐनंवाचागच्छति॥अपिवतीं
वाचंवदति॥प्रजापतिर्देवेभ्योयज्ञान्व्यादिशत्॥सआत्मन्वाजपेयमधत्त॥तंदे
वाअब्रुवन्॥एषवावयज्ञः॥यद्वाजपेयः॥ ५ ॥अप्येवनोत्रास्त्विति॥तेभ्यएता

उज्जितीःप्रायच्छत्॥तावाएताउज्जितयोव्याख्यायंते॥यज्ञस्यसर्वत्वाय॥देवतानाम
निर्भागाय॥देवावैब्रह्मणश्चान्नस्यचशमलमपाघ्नन्॥यद्ब्रह्मणःशमलमासीत्॥
सागाथानाराशंस्यभवत्॥यदन्नस्य॥सासुरा॥ ६ ॥तस्माद्गायतश्चमत्तस्य
चनप्रतिगृह्यं॥यत्प्रतिगृह्णीयात्॥शमलंप्रतिगृह्णीयात्॥सर्वावाएतस्यवाचो
वरुद्धाः॥योवाजपेययाजी॥यापृथिव्यांयाग्नौयारथंतरे॥यांतरिक्षेयावायौ
यावामदेव्ये॥यादिवियादित्येयाबृहति॥याप्सुयौषधीषुयावनस्पतिषु॥तस्मा
द्वाजपेययाज्यार्त्विजीनः॥सर्वाह्यस्यवाचोवरुद्धाः॥ ७ ॥धावामेतिज्येष्ठ्यायवे
दब्रह्माजायतेवाजयतेवाजपेयःसुरार्त्विजीनएकंच॥ २ ॥देवावैयदन्येर्ग्रहै
र्यज्ञस्यनावारुंधत॥तदतिग्राह्यैरतिगृह्यावारुंधत॥तदतिग्राह्याणामतिग्राह्य

श्री०प्र०
२९

त्वं॥यदतिग्राह्या गृह्यंते॥यदेवान्यैर्ग्रहैर्यज्ञस्य नावरुंधे॥तदेवैतैरतिगृह्यावरुंधे॥पंच गृह्यंते॥पांक्तो यज्ञः॥यावानेव यज्ञः॥तमाप्त्वावरुंधे॥ १ ॥सर्वे ऐंद्रा भवंति॥एकधैव यजमान इंद्रियं दधति॥सप्तदश प्राजापत्या ग्रहा गृह्यंते॥सप्तदशः प्रजापतिः॥प्रजापतेराप्त्यै॥एकया र्चा गृह्णाति॥एकधैव यजमाने वीर्यं दधाति॥सोमग्रहांश्च सुराग्रहांश्च गृह्णाति॥एतद्वै देवानां परममन्नं॥यत्सोमः॥ २ ॥एतन्मनुष्याणां॥यत्सुरा॥परमेणैवास्मा अन्नाद्येनावरमन्नाद्यमवरुंधे॥सोमग्रहान्गृह्णाति॥ब्रह्मणो वा एतत्तेजः॥यत्सोमः॥ब्रह्मण एव तेजसा तेजो यजमाने दधाति॥सुराग्रहान्गृह्णाति॥अन्नस्य वा एतच्छमलं॥यत्सुरा॥ ३ ॥अन्नस्यैव शमलेन शमलं यजमानादपहंति॥सोमग्रहांश्च सुराग्रहांश्च गृह्णा

सां०ब्रा०
२९

ति॥पुमान्वै सोमः॥स्त्री सुरा॥तन्मिथुनं॥मिथुनमेवास्य तद्यज्ञे करोति प्रजननाय॥आत्मानमेव सोमग्रहैः स्पृणोति॥जायां सुराग्रहैः॥तस्माद्वाजपेययाज्यमुष्मिन्लोके स्त्रियं संभवति॥वाजपेयाभिजितं ह्यस्य॥ ४ ॥पूर्वे सोमग्रहा गृह्यंते॥अपरे सुराग्रहाः॥पुरोक्षं सोमग्रहान्त्सादयति॥पश्चादक्षं सुराग्रहान्॥पापवस्यसस्य विधृत्यै॥एष वै यजमानः॥यत्सोमः॥अन्नं सुरा॥सोमग्रहांश्च सुराग्रहांश्च व्यतिषजति॥अन्नाद्येनैवैनं व्यतिषजति॥ ५ ॥संपृचस्थ सं मा भद्रेण पृङ्क्तेत्याह॥अन्नं वै भद्रं॥अन्नाद्येनैवैनं संसृजति॥अन्नस्य वा एतच्छमलं॥यत्सुरा॥पाप्मेव खलु वै शमलं॥पाप्मना वा एनमेतच्छमलेन व्यतिषजति॥यत्सोमग्रहांश्च सुराग्रहांश्च व्यतिषजति॥विपृचस्थ वि मा पाप्मना पृङ्क्तेत्याह॥

ब्रा० त्र०
३०

पाप्मनैवैनं शमलेन व्यावर्तयति॥ ६ ॥ तस्माद्वाजपेययाजी पूतो मेध्यो दक्षिणः॥ प्रादुर्भवति सोमग्रहैः॥ अमुमेव तैर्लोकमभिजयति॥ प्रत्यङ् सुराग्रहैः॥ इममेव तैर्लोकमभिजयति॥ प्रतिष्ठंति सोमग्रहैः॥ यावदेव सत्यं॥ तेन सूयते॥ वाजसृद्भ्यः सुराग्रहान्हरंति॥ अनृतेनैव विशं संसृजति॥ हिरण्यपात्रं मधोः पूर्णं ददाति॥ मधव्योसानीति॥ एकधा ब्रह्मण उपहरति॥ एकधैव यजमान आयुस्तेजो दधाति॥ ७ ॥ आप्त्वावरुंधे सोमः शमलं यत्सुराह्यस्यैनं व्यतिषजति व्यावर्तयति सृजतिच त्वारिंच॥ ३ ॥ ब्रह्मवादिनो वदंति॥ नाग्निष्टोमो नोक्थ्यः॥ न षोडशी नातिरात्रः॥ अथ कस्माद्वाजपेये सर्वे यज्ञक्रतवोवरुध्यंत इति॥ पशुभिरिति ब्रूयात्॥ आग्नेयं पशुमालभते॥ अग्निष्टोममेव तेनावरुंधे॥ ऐंद्राग्नेनोक्थ्यं॥

सांब
३०

ऐंद्रेण षोडशिनं स्तोत्रं॥ सारस्वत्यातिरात्रं॥ १ ॥ मारुत्या बृहत स्तोत्रं॥ एतावंतो वै यज्ञक्रतवः॥ तान्पशुभिरेवावरुंधे॥ आत्मानमेव स्पृणोत्यग्निष्टोमेन॥ प्राणापानावुक्थ्येन॥ वीर्यं षोडशिन स्तोत्रेण॥ वाचमतिरात्रेण॥ प्रजां बृहत स्तोत्रेण॥ इममेव लोकमभिजयत्यग्निष्टोमेन॥ अंतरिक्षमुक्थ्येन॥ २॥ सुवर्गं लोकं षोडशिन स्तोत्रेण॥ देवयानानेव पथ आरोहत्यतिरात्रेण॥ नाकं रोहति बृहत स्तोत्रेण॥ तेज एवात्मन्धत्त आग्नेयेन पशुना॥ ओजो बलमैंद्राग्नेन॥ इंद्रियमैंद्रेण॥ वाचं सारस्वत्या॥ उभावेव देवलोकं च मनुष्यलोकं चाभिजयति मारुत्यावशया॥ सप्तदश प्राजापत्यान्पशूनालभते॥ सप्तदशः प्रजापतिः॥ ३ ॥ प्रजापतेराप्त्यै॥ श्यामा एकरूपा भवंति॥ एवमिव हि प्रजापतिः समृध्यै॥ तान्पर्यग्निकृता

नुत्सृजति॥ मरुतोयज्ञमजिघांसन्प्रजापतेः॥ तेभ्यएतां मारुतींवशामालभत॥
तयैवैनानशमयत्॥ मारुत्या प्रचर्य॥ एतान्त्संज्ञपयेत्॥ मरुतएवशमयित्वा॥
॥ ४ ॥एतैःप्रचरति॥ यज्ञस्याघाताय॥ एकधातावपाजुहोति॥ एकदेवत्याहि॥
एते॥ अथोएकधैवयजमानेवीर्यंदधाति॥ नैवारेणसप्तदशशरावेणैतर्हिप्रचरि॥
एतत्पुरोडाशाख्येते॥ अथोपशूनामेवछिद्रमपिदधाति॥ सारस्वत्योत्तमयाप्रच
रति॥ वाग्वैसरस्वती॥ तस्मात्प्राणानां वागुत्तमा॥ अथोप्रजापतावेवयज्ञंप्रति
ष्ठापयति॥ प्रजापतिर्हिवाक्॥ अपन्नदतीभवति॥ तस्मान्मनुष्याः सर्वांवाचंवद
ति॥ ५ ॥अतिरात्रमंतरिक्षमुक्थ्येनप्रजापतिःशामयित्वोत्तमयाप्रचरतिषड्
च॥ ४ ॥सावित्रंजुहोतिकर्मणःकर्मणःपुरस्तात्॥ कस्तद्वेदेत्याहुः॥ यद्वाज

पेयस्यपूर्वंयदपरमिति॥ सवितृप्रसूतएवयथापूर्वंकर्माणिकरोति॥ सवनेस
वनेजुहोति॥ आक्रमणमेवतत्सेतुंयजमानःकुरुते॥ सुवर्गस्यलोकस्यसम
ष्ट्यै॥ वाचस्पतिर्वाचमद्यस्वदातिनइत्याह॥ वाग्वैदेवानांपुरान्नमासीत्॥ वा
चमेवास्माअन्नंस्वदयति॥ १ ॥इंद्रस्यवज्रोसिवार्त्रघ्नइतिरथमुपावहर
तिविजित्यै॥ वाजस्यनुप्रसवेमातरंमहीमित्याह॥ यच्चैवेयं॥ यच्चास्यामधि॥
तदेवावरुंधे॥ अथोतस्मिन्नेवोभयेभिषिच्यते॥ अप्स्वंतरमृतमप्सुभेषजमि
त्यश्वान्पल्पूलयति॥ अप्सुवाअश्वस्यतृतीयंप्रविष्टं॥ तदनुवेनन्वयप्लुवते॥
यदप्सुपल्पूययति॥ २ ॥यदेवास्याप्सुप्रविष्टं॥ तदेवावधे॥ बद्धुवाअश्वोमेध्यमु
पगच्छति॥ यदप्सुपल्पूलयति॥ मेध्यामेवैनान्करोति॥ वायुर्वात्वामनुर्वात्वे

ब्रा॰ प्र॰
३२

त्याह॥ एता वा एतं देवता अग्रे अश्वमयुंजन्॥ ताभिरेवैनान्युनक्ति॥ सवस्यो
ज्जित्यै॥ यजुषा युनक्ति व्यावृत्त्यै॥ ३॥ आपान्नपादाशुहेमन्निति संमार्ष्टि॥
मेध्यानेवैनान्करोति॥ अथो स्तौत्यैवैनान्॥ वाजिं सरिष्यतः॥ विष्णुक्रमान्क्रा
मते॥ विष्णुरेव भूत्वेमाँल्लोकानभिजयति॥ वैश्वदेवो वै रथः॥ अंकौ न्यंकावभि
तो रथं यावित्याह॥ या एव देवता रथे प्रविष्टाः॥ ताभ्य एव नमस्करोति॥ आ
त्मनो नार्त्यै॥ अश्नाम रथं भावुको स्य रथो भवति॥ य एवं वेद॥ ४॥ स्वदयतिप
स्यूलयति व्यावृत्त्या अनार्त्यै द्वे च॥ ५॥ देवस्याहं सवितुः प्रसवे बृहस्पति
ना वाजजिता वाजं जेषमित्याह॥ सवितृप्रसूत एव ब्रह्मणा वाजमुज्जयति॥
देवस्याहं सवितुः प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकं रुहेयमित्याह॥

सांबू
३२

रिक्षो

प्र

सवितृप्रसूत एव ब्रह्मणा वर्षिष्ठं नाकं रोहति॥ चात्वाले रथचक्रं निमितं रोहति॥ अतो
वा अंगिरस उत्तमाः सुवर्गं लोकमायन्॥ साक्षादेव यजमानं सुवर्गं लोकमेति॥
आवेष्टयति॥ वज्रो वै रथः॥ वज्रेणैव दिशो भिजयति॥ १॥ वाजिनां साम गाय
ते॥ अन्नं वै वाजः॥ अन्नमेवावरुंधे॥ वाचो वर्ष्म देवेभ्यो पाक्रामत्॥ तद्वनस्पतीन्
प्राविशत्॥ सैषा वाग्वनस्पतिषु वदति॥ या दुंदुभौ॥ तस्माद्दुंदुभिः सर्वाचोतिवद
ति॥ दुंदुभीन्त्समाघ्नंति॥ परमा वा एषा वाक्॥ २॥ या दुंदुभौ॥ परमयैव वाचा वरां
वाचमवरुंधे॥ अथो वाच एव वर्ष्म यजमानो वरुंधे॥ इंद्राय वाचं वदतेंद्रं वाजं जापयतें
द्रो वाजमजयिदित्याह॥ एष वा एतर्हींद्रः॥ यो यजते॥ यजमान एव वाजमुज्जय
ति॥ सप्तदश प्रव्याधाना जिं धावति॥ सप्तदशं स्तोत्रं भवति॥ सप्तदश सप्तदशादी

ब्रा०प्र०
३२

यंते॥ ३ ॥सप्तदशः प्रजापतिः॥प्रजापतेराप्त्यै॥अर्वासि सप्तिरसि वाज्यसीत्याह॥
अग्निर्वा अर्वा॥ वायुः सप्तिः॥आदित्यो वाजी॥एताभिरेवास्मै देवताभिर्देवरथं युन
क्ति॥प्रष्टिवाहिनं युनक्ति॥प्रष्टिवाही वै देवरथः॥देवरथमेवास्मै युनक्ति॥ ४॥
वाजिनो वाजं धावत काष्ठां गच्छतेत्याह॥ सुवर्गो वै लोकः काष्ठा॥सुवर्गमेव लोकं यं
ति॥ सुवर्गं वा एते लोकं यंति॥ य आजिं धावंति॥ प्रांचो धावंति॥ प्राङिव हि सुवर्गो लो
कः॥ चतसृभिरनुमंत्रयते॥ चत्वारि छंदांसि॥ छंदोभिरेवैनान्त्सुवर्गं लोकं गमय
ति॥ ५ ॥प्र वा एतेऽस्माल्लोकाच्च्यवंते॥ य आजिं धावंति॥ उदंच आवर्तंते॥ अस्मादे
तेन लोकान्न यंति॥ रथविमोचनीयं जुहोति प्रतिष्ठित्यै॥ आ मा वाजस्य प्रसवो जग
म्यादित्याह॥ अन्नं वै वाजः॥ अन्नमेवावरुंधे॥ यथा लोकं वा एत उज्जयंति॥ य आ

सां ब
३२

जिं धावंति॥ ६ ॥कृष्णलं कृष्णलं वाजसृद्भ्यः प्रयच्छति॥ यमेव ते वाजं लोकमुज्ज
यंति॥ तं परिक्रीयावरुंधे॥ एकधा ब्रह्मण उपहरति॥ एकधैव यजमाने वीर्यं दधा
ति॥ देवा वा ओषधीष्वाजिमयुः॥ ता बृहस्पतिरुदजयत्॥ स नीवारान्निरवृणीत॥
तन्नीवाराणां नीवारत्वं॥ नैवारश्चरुर्भवति॥ ७ ॥ एतद्वै देवानां परममन्नं॥ यन्नी
वाराः॥ परमेणैवास्मा अन्नाद्येनावरमन्नाद्यमवरुंधे॥ सप्तदशशरावो भवति॥
सप्तदशः प्रजापतिः॥ प्रजापतेराप्त्यै॥ क्षीरे भवति॥ रुचमेवास्मिन्दधाति॥ सर्पिष्वा
न्भवति मेध्यत्वाय॥ बार्हस्पत्यो वा एष देवतया॥ ८ ॥ यो वाजपेयेन यजते॥ बार्ह
स्पत्य एष चरुः॥ अश्वान्त्सरिष्यतः सस्रुषश्चावघ्रापयति॥ यमेव ते वाजं लोकमु
ज्जयंति॥ तमेव ते वावरुंधे॥ अजीजिपत वनस्पतय इंद्रं वाजं विमुच्यध्वमिति दुंदु

भी न्विमुंचति ॥ यमेवते वाजंलोकमिंद्रियं दुंदुभय उज्जयंति ॥ तमेवावरुंधे ॥ ९ ॥
अभिजयति वा एषावागदीयंते सैम गमयति य आजिंधावंति भवति देवत्तयाष्टोच ॥
॥ ६ ॥ तार्प्यं यजमानं परिधापयति ॥ यज्ञो वै तार्प्यं ॥ यज्ञेनैवैनं समर्धयति ॥
दर्भमयं परिधापयति ॥ पवित्रं वै दर्भाः ॥ पुनात्येवैनं ॥ वाजं वा एषोवरुरुत्सते ॥ यो
वाजपेयेन यजते ॥ ओषधयः खलु वै वाजः ॥ यद्दर्भमयं परिधापयति ॥ १ ॥ वा
जस्यावरुध्ये ॥ जाय एहि सुवो रोहावेत्याह ॥ पत्निया एवैष यज्ञेये स्यान्वारंभो न
वछित्त्ये ॥ सप्तदशा रत्निर्यूपो भवति ॥ सप्तदशः प्रजापतिः ॥ प्रजापतेराप्त्ये ॥ तूप
रश्चतुरश्रिर्भवति ॥ गोधूमं चषालं ॥ नवा एते व्रीहयो न यवाः ॥ यद्गोधूमाः ॥ २ ॥
एवमिवद्धि प्रजापतिः समृध्ये ॥ अथो अमुमेवास्मै लोकमन्नवंतं करोति ॥ वासो

भिर्वेष्टयति ॥ एष वै यजमानः ॥ यद्यूपः ॥ सर्वदेवत्यं वासः ॥ सर्वाभिरेवैनं देवताभिः स
मर्द्धयति ॥ अथो आक्रमणमेव तत्सेतुं यजमानः कुरुते ॥ सुवर्गस्य लोकस्य समष्ट्यै ॥
द्वादश वाजप्रसवीयानि जुहोति ॥ ३ ॥ द्वादश मासाः संवत्सरः ॥ संवत्सरमेव प्रीणा
ति ॥ अथो संवत्सरमेवास्मा उपदधाति ॥ सुवर्गस्य लोकस्य समष्ट्यै ॥ दशभिः कल्पै
रोहति ॥ नव वै पुरुषे प्राणाः ॥ नाभिर्दशमी ॥ प्राणानेव यथास्थानं कल्पयित्वा ॥
सुवर्गं लोकमेति ॥ एतावद्वै पुरुषस्य स्वं ॥ ४ ॥ यावत्प्राणाः ॥ यावदेवास्यास्ति ॥
तेन सह सुवर्गं लोकमेति ॥ सुवर्देवाँ अगन्मेत्याह ॥ सुवर्गमेव लोकमेति ॥ अमृ
ता अभूमेत्याह ॥ अमृतमिव हि सुवर्गो लोकः ॥ प्रजापतेः प्रजा अभूमेत्याह ॥ प्राजाप
त्यो वा अयं लोकः ॥ अस्मादेव तेन लोकान्नेति ॥ ५ ॥ समहं प्रजया संमया प्रजे
न्

ब्रा०प्र०
३५

त्याह॥आशिषमेवैतामाशास्ते॥ आसपुटैर्घ्नंति॥ अन्नं वा इयं॥ अन्नाद्येनैवैनं ँ स
मर्धयंति॥ ऊषैर्घ्नंति॥ एते हि साक्षादन्नं॥ यदूषाः॥ साक्षादेवैनमन्नाद्येन मर्धयंति॥
पुरस्तात्प्रत्यंचं घ्नंति॥ ६॥ पुरस्ताद्धि प्रतीचीनमन्नमद्यते॥ शीर्षतो घ्नंति॥ शी
र्षतो ह्यन्नमद्यते॥ दिग्भ्यो घ्नंति॥ दिग्भ्य एवास्मा अन्नाद्यमवरुंधते॥ ईश्वरो वा ए
ष पराङ्प्रदघ्नः॥ यो यूपं ँ रोहति॥ हिरण्यमध्यवरोहति॥ अमृतं ँ सुवर्गो लोकः॥
॥ ७॥ अमृत एव सुवर्गे लोके प्रतितिष्ठति॥ अमृतं वै हिरण्यं॥ शतमानं भवति॥
शतायुः पुरुषः शतेंद्रियः॥ आयुष्येवेंद्रिये प्रतितिष्ठति॥ पुष्टं वा एतद्रूपं॥ यदजा॥
त्रिः संवत्सरस्यान्यान्पशून्परि प्रजायते॥ बस्ताजिनमध्यवरोहति॥ पुष्ट्यामे
व प्रजनने प्रतितिष्ठति॥ ८॥ परिधापयति गोधूमान् जुहोति स्वन्नेन तिप्रत्यं चंघ्नं

सांबू
३५

लोको नव च॥ ७॥ सप्तान्नहोमाञ्जुहोति॥ सप्त वा अन्नानि॥ यावंत्येवान्नानि॥ ता
न्येवावरुंधे॥ सप्त ग्राम्या ओषधयः॥ सप्तारण्याः॥ उभयीषामवरुध्यै॥ अन्नस्यान्न
स्य जुहोति॥ अन्नस्यान्नस्यावरुध्यै॥ यद्वाजपेययाज्यनवरुद्धस्याश्नीयात्॥ १॥ अ
वरुद्धेन व्यृध्येत॥ सर्वस्य समवदाय जुहोति॥ अनवरुद्धस्यावरुध्यै॥ औदुंबरेण
स्रुवेण जुहोति॥ ऊर्ग्वा अन्नमुदुंबरः॥ ऊर्ज एवान्नाद्यस्यावरुध्यै॥ देवस्य त्वा सवितुः प्र
सव इत्याह॥ सवितृप्रसूत एवैनं ब्रह्मणा देवताभिरभिषिंचति॥ अन्नस्या
न्नस्याभिषिंचति॥ अन्नस्यान्नस्यावरुध्यै॥ २॥ पुरस्तात्प्रत्यंचमभिषिंचति॥ पुरस्ता
द्धि प्रतीचीनमन्नमद्यते॥ शीर्षतोऽभिषिंचति॥ शीर्षतो ह्यन्नमद्यते॥ आ मुखादन्
न्ववस्रावयति॥ मुखत एवास्मा अन्नाद्यं दधाति॥ अग्नेस्त्वा साम्राज्येनाभिषिं

श्री०ब्रा०
३६

चामीत्याह॥ एषवा अग्नेः सवः॥ तेनैवैनमभिषिंचति॥ इंद्रस्यत्वा साम्राज्येनाभि
षिंचामीत्याह॥ ३॥ इंद्रियमेवास्मिन्नेतेन दधाति॥ बृहस्पतेस्त्वा साम्राज्येनाभि
षिंचामीत्याह॥ ब्रह्मवै देवानां बृहस्पतिः॥ ब्रह्मणैवैनमभिषिंचति॥ सोमग्रहांश्च
वदानीयानि चर्त्विग्भ्य उपहरंति॥ अमुमेवं तेर्लोकमन्नवंतं करोति॥ सुराग्रहांश्
श्वानवदानीयानि च वाजसृद्भ्यः॥ इममेवं तेर्लोकमन्नवंतं करोति॥ अथो उभयी
षेवाभिषिच्यते॥ विमाथं कुर्वते वाजसृद्भ्यः॥ ४॥ इंद्रियस्यावरुध्यै॥ अनिरुक्ता
भिः प्रातःसवने स्तुवते॥ अनिरुक्तः प्रजापतिः॥ प्रजापतेराप्त्यै॥ वाजवतीभिर्मा
ध्यंदिने॥ अन्नंवै वाजः॥ अन्नमेवावरुंधे॥ शिपिविष्टवतीभिस्तृतीयसवने॥
यज्ञोवै विष्णुः॥ पशवः शिपिः॥ यज्ञएव पशुषु प्रतितिष्ठति॥ बृहदंत्यं भवति॥

सांब्र
३६

तेः।

अंतमेवैनं श्रियै गमयति॥ ५॥ अभ्नीयादंनस्यान्नस्यावरुध्या इंद्रस्यत्वासा
म्राज्येनाभिषिंचामीत्याह वाजसृतः शिपिस्त्रीणि च॥ ~॥ नृषदं त्वेत्याह॥ प्रजा
वैनृनृ॥ प्रजानामेवैतेन सूयते॥ द्रुषदमित्याह॥ वनस्पतयो वै द्रु॥ वनस्पतीना
मेवैतेन सूयते॥ भुवनसदमित्याह॥ यदावैवसीयान्भवति॥ भुवनमगन्निति वै
तमाहुः॥ भुवनमेवैतेन गच्छति॥ १॥ अप्सुषदं त्वा घृतसदमित्याह॥ अपामेवै
तेन घृतस्य सूयते॥ व्योमसदमित्याह॥ यदावैवसीयान्भवति॥ व्योमागन्नि
ति वै तमाहुः॥ व्योमैवैतेन गच्छति॥ पृथिविषदं त्वांतरिक्षसदमित्याह॥ एषा
मेवैतेन लोकानां सूयते॥ तस्माद्वाजपेययाजीनकंचन प्रत्यवरोहति॥ अ
पीवहि देवानां सूयते॥ २॥ नाकसदमित्याह॥ यदावैवसीयान्भवति॥ ना

ब्रा०प्र०
२७

कमग्निर्निति वै तमाहुः ॥ नाकमेवैनेन गच्छति ॥ येग्रहाः पंचजनीनाइत्याह ॥ पंचज
नानामेवैतेन सूयते ॥ अपां रसमुद्वयसमित्याह ॥ अपामेवैतेन रसस्य सूय
ते ॥ सूर्यरश्मिं समाभृतमित्याह सशुक्रत्वाय ॥ ३ ॥ गच्छति सूयते नव च ॥ ९ ॥
इंद्रो वृत्रं हत्वा ॥ असुरान्पराभाव्य ॥ सोमावास्यां प्रत्यागच्छत् ॥ ते पितरः पूर्वे
द्युरागच्छन् ॥ पितॄन्यज्ञो गच्छत् ॥ तं देवाः पुनरयाचंत ॥ तमेभ्यो न पुनरददुः ॥ ते
ब्रुवन्वरं वृणामहै ॥ अथ वः पुनर्दास्यामः ॥ अस्मभ्यमेव पूर्वेद्युः क्रियाता इति ॥
॥ १ ॥ तमेभ्यः पुनरददुः ॥ तस्मात्पितृभ्यः पूर्वेद्युः क्रियते ॥ यत्पितृभ्यः पूर्वेद्युः
करोति ॥ पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानः प्रतनुते ॥ सोमाय पितृपी
ताय स्वधा नम इत्याह ॥ पितुरेवाधि सोमपीथमवरुंधे ॥ न हि पिता प्रमीय

सां बु
२७

माण आ हैष सोमपीथ इति ॥ इंद्रियं वै सोमपीथः ॥ इंद्रियमेव सोमपीथमवरुंधे ॥ तेनेंद्रिये
ण द्वितीयां जाममभ्यश्नुते ॥ २ ॥ एतद्वै ब्राह्मणं पुरा वाजश्रवसा विदामक्रन् ॥ तस्मात्ते द्वि
जाये अभ्याक्षत ॥ य एवं वेद ॥ अभि द्वितीयां जाममश्नुते ॥ अग्नये कव्यवाहनाय स्वधा नम इत्या
ह ॥ य एव पितॄणामग्निः ॥ तं प्रीणाति ॥ तिस्र आहुतीर्जुहोति ॥ त्रिर्निदधाति ॥ षट्संपद्यंते ॥
॥ ३ ॥ षड्वा ऋतवः ॥ ऋतूनेव प्रीणाति ॥ तूष्णीं मेक्षणमादधाति ॥ अस्ति वा हि षष्ठ ऋतु
र्न वा ॥ देवान्वै पितॄन्प्रीतान् ॥ मनुष्याः पितरोनुप्रपिपते ॥ तिस्र आहुतीर्जुहोति ॥ त्रि
र्निदधाति ॥ षट्संपद्यंते ॥ षड्वा ऋतवः ॥ ४ ॥ ऋतवः खलु वै देवाः पितरः ॥ ऋतूनेव देवा
न्पितॄन्प्रीणाति ॥ तान्प्रीतान् ॥ मनुष्याः पितरोनुप्रपिपते ॥ सकृदाच्छिन्नं बर्हिर्भवति ॥
सकृदिव हि पितरः ॥ त्रिर्निदधाति ॥ तृतीये वा इतो लोके पितरः ॥ तानेव प्रीणाति ॥ परा

श्रा॰प्र॰
२८

ऊ॒आवर्तते॥ ५ ॥ह्लीकाहि पितरः॥ ओषमणो व्यावृत्तउपास्ते॥ ऊष्मभागाहि पितरः॥
ब्रह्मवादिनो वदंति॥ प्राश्यां३ न प्राश्या३मिति॥ यत्प्राश्नीयात्॥ जन्यमन्नमद्यात्॥
प्रमायुकः स्यात्॥ यन्नप्राश्नीयात्॥ अहविः स्यात्॥ ६ ॥पितृभ्य आवृश्च्येत॥ अव
घ्रेयमेव॥ तन्नेवप्राशितन्नेवाप्राशितं॥ वीरंवावैपितरः प्रयंतो हरंति॥ वीरंवाददति॥
दशांछिनत्ति॥ हरणभागाहि पितरः॥ पितृनेव निरवदयते॥ उत्तर आयुषिलोम छिंदी
त॥ पितृणांᳲह्येतर्हिनेदीयः॥ ७ ॥नमस्करोति॥ नमस्कारोहि पितृणां॥ नमोवः
पितरो रसाय॥ नमोवः पितरः शुष्माय॥ नमोवः पितरो जीवाय॥ नमोवः पितरः स्व
धायै॥ नमोवः पितरो मन्यवे॥ नमोवः पितरो घोराय॥ पितरो नमोवः॥ यएतस्मिन्

सां॰वृ॰
२८

लोकेस्थ॥ ८ ॥युष्मांᳲस्तेनु॥ येस्मिन्लोके॥ मांतेनु॥ यएतस्मिन्लोकेस्थ॥
यूयंतेषां वसिष्ठा भूयास्त॥ येस्मिन्लोके॥ अहंतेषां वसिष्ठो भूयासमित्याह॥ व
सिष्ठः समानानां भवति॥ यएवंविद्वान्पितृभ्यः करोति॥ एषवैमनुष्याणां यज्ञः॥
॥ ९ ॥देवानां वाइतरे यज्ञाः॥ तेन वाएत त्पितृलोके चरति॥ यत्पितृभ्यः करोति॥
सईश्वरः प्रमेतोः॥ प्राजापत्ययर्चा पुनरेति॥ यज्ञो वै प्रजापतिः॥ यज्ञेनैव सह पुन
रैति॥ न प्रमायुको भवति॥ पितृलोके वा एतद्यजमानश्चरति॥ यत्पितृभ्यः करोति॥
सईश्वर आर्तिमार्तोः॥ प्रजापतिस्त्वा वैनं तत उन्नेतुमर्हतीत्याहुः॥
यत्प्राजापत्ययर्चा पुनरैति॥ प्रजापतिरेवैनं तत उन्नयति ॥ ना

ब्रा०म०२
३९

र्त्तिमार्छतियजमानः॥ १० ॥इत्यश्रुतेपद्यंतेपद्यंतेषड्ढाऋतवो
वर्तंतेहविःस्यान्नेदीयश्छयज्ञोयजमानश्चरतियत्पितृभ्यः
करोतिपंचच॥ १० ॥ ॥ ॥देवासुरादेवावैयथादर्शं
देवावैयदन्येर्ग्रहैर्ब्रह्मवादिनोनाग्निष्टोमोनसावित्रंदेव
स्याहंतार्प्यंᳲसस्तान्नहोमांन्नषदंत्वेंद्रोवृत्रंᳲहत्वादश॥
॥ १० ॥ ॥देवासुरावाज्येवेनंतस्माद्वाजपेययाजीदेव
स्याहंवाजस्यावरुध्याइंद्रियमेवास्मिंल्लोकाहिपितरःपंच
षष्टिः॥ ६५ ॥ ओम्॥ ॥ ॥ श्री ॥

सांबू
३९

॥हरिःओम्॥ ॥उभयेवाएतेप्रजापतेरध्यसृज्यंत॥देवाश्चासुराश्च॥तान्नव्य
जानात्॥इमेन्यइमेन्यइति॥सदेवानंᳲशूनकरोत्॥तानभ्यषुणोत्॥तान्पवित्रेणा
पुनात्॥तान्परस्तात्पवित्रस्यव्यगृह्णात्॥तेग्रहाअभवन्॥तद्ग्रहाणांग्रहत्वं॥१॥
देवतावाएतायजमानस्यगृहेगृह्यंते॥यद्ग्रहाः॥विदुरेनंदेवाः॥यस्यैवंविदुषएते
ग्रहागृह्यंते॥एषावैसोमस्याहुतिः॥यदुपांᳲशुः॥सोमेनदेवांᳲस्तर्पयाणीतिख
लुवैसोमेनयजते॥यदुपांᳲशुंजुहोति॥सोमेनैवतद्देवांᳲस्तर्पयति॥यद्ग्रहांजुहो
ति॥ २ ॥देवाएवतद्देवान्गच्छंति॥यच्चमसांजुहोति॥तेनैवानुरूपेणयजमानः
सुवर्गंलोकमेति॥किन्त्वेतदग्रआसीदित्याहुः॥यत्पात्राणीति॥इयंवाएतदग्र
आसीत्॥मृन्मयानिवाएतान्यासन्॥तेदेवानव्यावृत्तमगच्छन्॥तएतानिदा

रुमयाणि पात्राण्यपश्यन् ॥ तान्यकुर्वत ॥ ३ ॥ तैर्वै ते व्यावृत्तमगच्छन् ॥ यद्दा
रुमयाणि पात्राणि भवंति ॥ व्यावृत्तमेव तैर्यजमानो गच्छति ॥ यानि दारुमया
णि पात्राणि भवंति ॥ अमुमेव तैर्लोकमभिजयति ॥ यानि मृन्मयानि ॥ इममे
व तैर्लोकमभिजयति ॥ ब्रह्मवादिनो वदंति ॥ काश्वतस्रः स्थाली र्वायव्याः सोमग्र
हणीरिति ॥ देवा वै पृश्निमदुह्रन् ॥ ४ ॥ तस्या एते स्तना आसन् ॥ इयं वै पृश्निः ॥
तामादित्या आदित्यस्थाल्या चतुष्पदः पशूनदुह्रन् ॥ यदादित्यस्थाली भवति ॥
चतुष्पद एव तया पशून्यजमान इमां दुहे ॥ तामिंद्र उक्थ्यस्थाल्येंद्रियमदुहत ॥
यदुक्थ्यस्थाली भवति ॥ इंद्रियमेव तया यजमान इमां दुहे ॥ तां विश्वेदेवा आग्र
यणस्थाल्योर्जमदुह्रन् ॥ यदाग्रयणस्थाली भवति ॥ ५ ॥ ऊर्जमेव तया यजमा

न इमां दुहे ॥ तां मनुष्या ध्रुवस्थाल्यायुरदुह्रन् ॥ यद्ध्रुवस्थाली भवति ॥ आयुरेव त
या यजमान इमां दुहे ॥ स्थाल्या गृह्णाति ॥ वायव्येन जुहोति ॥ तस्मादन्येन पात्रे
ण पशून्दुहंति ॥ अन्येन प्रतिगृह्णंति ॥ अथो व्यावृत्तमेव तद्यजमानो गच्छति ॥
॥ ६ ॥ ग्रहत्वं ग्रहाञ्जुहोत्यकुर्वतादुह्रन्नाग्रयणस्थाली भवति नव च ॥ १ ॥ ॥
युवं सुराममश्विना ॥ नमुचावासुरे सचा ॥ विपिपाना शुभस्पती ॥ इंद्रं कर्मस्वाव
तं ॥ पुत्रमिव पितरावश्विनोभा ॥ इंद्रावतं कर्मणा दंसनाभिः ॥ यत्सुरामं व्यपिबः
शचीभिः ॥ सरस्वती त्वा मघवन्नभीष्णात् ॥ अहाव्यग्ने हविरास्ये ते ॥ स्रुचीव घृ
तं चमूरिव सोमः ॥ १ ॥ वाजसनिं रयिमस्मे सुवीरं ॥ प्रशस्तं धेहि यशसं बृहंतं ॥
यस्मिन्नश्वास ऋषभास उक्षणः ॥ वशा मेषा अवसृष्टास आहुताः ॥ कीलालपे

सोमपृष्ठाय वेधसे॥ हृदा मतिं जनय चारुमग्नये॥ नानाहि वां देवहितं सदो मि
तं॥ मा सं सृक्षाथां परमे व्योमन्॥ सुरा त्वमसि शुष्मिणी सोम एषः॥ मा मा हिंसी
स्वां योनिमाविशन्॥ २ ॥ यदत्र शिष्टं रसिनः सुतस्य॥ यदिंद्रो अपिबच्छचीभिः॥
अहं तदस्य मनसा शिवेन॥ सोमं राजानमिह भक्षयामि॥ द्वे स्रुती अशृणवं पितॄ
णां॥ अहं देवानामुत मर्त्यानां॥ याभ्यामिदं विश्वं भुवनं समेति॥ अंतरा पूर्वमप
रं च केतुं॥ यस्ते देव वरुण गायत्रछंदाः पाशः॥ तं तएतेनावयजे॥ ३ ॥ यस्ते देव व
रुण त्रिष्टुप्छंदाः पाशः॥ तं तएतेनावयजे॥ यस्ते देव वरुण जगती छंदाः पाशः॥ तं
तएतेनावयजे॥ सोमो वा एतस्य राज्यमादत्ते॥ यो राजा सन्राज्यो वा सोमेन जते॥
देवसुवामेतानि हवींषि भवंति॥ एतावंतो वै देवानां सवाः॥ तएवास्मै सवान्प्रय

छंति॥ तएनं पुनः सुवंते राज्याय॥ देवसू राजा भवति॥ ४ ॥ सोम आविशन्यजेरा
ज्यायै कं च॥ २ ॥ उदस्थाद्देव्यदितिर्विश्वरूपी॥ आयुर्यज्ञपतावधात्॥ इंद्राय कृण्व
ती भागं॥ मित्राय वरुणाय च॥ इयं वा अग्निहोत्री॥ इयं वा एतस्य निषीदति॥ यस्या
ग्निहोत्री निषीदति॥ तामुत्थापयेत्॥ उदस्थाद्देव्यदितिरिति॥ इयं वै देव्यदितिः॥ १ ॥
इमामेवास्मा उत्थापयति॥ आयुर्यज्ञपतावधादित्याह॥ आयुरेवास्मिन्दधाति॥
इंद्राय कृण्वती भागं मित्राय वरुणाय चेत्याह॥ यथायजुरेवैतत्॥ अवर्तिं वा एषै
तस्य पाप्मानं प्रतिख्याय निषीदति॥ यस्याग्निहोत्र्युपसृष्टा निषीदति॥ तां दुग्ध्वा
ब्राह्मणाय दद्यात्॥ यस्यान्नं नाद्यात्॥ अवर्तिमेवास्मिन्पाप्मानं प्रतिमुंचति॥ २ ॥
दुग्ध्वा ददाति॥ न ह्यदुष्टा दक्षिणा दीयते॥ पृथिवीं वा एतस्य पयः प्रविशति॥

ब्रा॰प्र॰
४२

यस्याग्निहोत्रं दुह्यमानꣳ स्कंदति॥ यदद्य दुग्धं पृथिवीमसक्त॥ यदोषधीरप्यसरद्य दापः॥ पयो गृहेषु पयो अघ्नियासु॥ पयो वत्सेषु पयो अस्तु तन्मयीत्याह॥ पय एवात्म न्गृहेषु पशुषु धत्ते॥ अप उपसृजति॥ ३॥ अद्भिरेवैनदाप्नोति॥ यो वै यज्ञस्यार्त्तेनाना र्तꣳ संसृजति॥ उभे वै ते तर्ह्यार्छतः॥ आर्छति खलु वा एतदग्निहोत्रं॥ यद्दुह्यमानꣳ स्कंदति॥ यदभिदुह्यात्॥ आर्त्तेनानार्तं यज्ञस्य संसृजेत्॥ तदेव यादृक्कीदृक्क होत व्यं॥ अथान्यां दुग्ध्वा पुनर्होतव्यं॥ अनार्तेनैवार्तं यज्ञस्य निष्करोति॥ ४॥ यद्युदु तस्य स्कंदेत्॥ यत्ततो जुहुत्वा पुनरेयात्॥ यज्ञं विछिंद्यात्॥ यत्र स्कंदेत्॥ तन्निषद्य पुनर्गृह्णीयात्॥ यत्रैव स्कंदति॥ तत एवैनत्पुनर्गृह्णाति॥ तदेव यादृक्कीदृक्क हो तव्यं॥ अथान्यां दुग्ध्वा पुनर्होतव्यं॥ अनार्तेनैवार्तं यज्ञस्य निष्करोति॥ ५॥

सं॰बृ॰
४२

वि वा एतस्य यज्ञश्छिद्यते॥ यस्याग्निहोत्रेऽधिश्रिते श्वांतरा धावति॥ रुद्रः खलु वा एषः॥ यदग्निः॥ यद्गामन्तरावर्तयेत्॥ रुद्राय पशूनपिदध्यात्॥ अपशुर्यजमानः स्यात्॥ यदपोन्वतिषिंचेत्॥ अनाद्यमग्नेरापः॥ अनाद्यमाभ्यामपिदध्यात्॥ गार्हपत्या द्भस्मादाय॥ इदं विष्णुर्विचक्रम इति वैष्णव्यर्चाहवनीयाद्ध्वꣳसमन्नुद्वपेत्॥ यज्ञो वै विष्णुः॥ यज्ञेनैव यज्ञꣳ संतनोति॥ भस्मना पदमपिवपति शांत्यै॥ ६॥ वि वै द्व्यदि तिर्मुंचति सृजति करोति करोत्याभ्यामपिदध्यात्पंचच॥ ७॥ नि वा एतस्याहव नीयो गार्हपत्यं कामयते॥ नि गार्हपत्य आहवनीयं॥ यस्याग्निमनुद्धृतꣳ सूर्योभि निम्रोचति॥ दर्भेण हिरण्यं प्रबध्य पुरस्ताद्धरेत्॥ अथाग्निं॥ अथाग्निहोत्रं॥ य द्धिरण्यं पुरस्ताद्धरति॥ ज्योतिर्वै हिरण्यं॥ ज्योतिरेवैनं पश्यन्नुद्धरति॥ यदग्निं

पूर्वꣳहरत्यथाग्निहोत्रं ॥ १ ॥ भागधेयेनैवैनं प्रणयति ॥ ब्राह्मणआर्षेयउद्धरेत् ॥
ब्राह्मणोवै सर्वादेवताः ॥ सर्वाभिरेवैनं देवताभिरुद्धरति ॥ अग्निहोत्रमुपसाद्यात
मितोरासीत ॥ व्रतमेवहृतमनुम्रियते ॥ अंतंवाएषआत्मनोगच्छति ॥ यस्ताम्यति ॥
अंतमेषयज्ञस्यगच्छति ॥ यस्याग्निमनुद्धृतꣳसूर्योभिनिम्रोचति ॥ २ ॥ पुनः
समन्यजुहोति ॥ अंतेनैवांतंयज्ञस्यनिष्करोति ॥ वरुणोवाएतस्ययज्ञंगृह्णाति ॥
यस्याग्निमनुद्धृतꣳसूर्योभिनिम्रोचति ॥ वारुणंचरुंनिर्वपेत् ॥ तेनैवयज्ञं
निष्क्रीणीते ॥ निवाएतस्याहवनीयोगार्हपत्यंकामयते ॥ निगार्हपत्यआहव
नीयं ॥ यस्यामनुद्धृतꣳसूर्योभ्युदेति ॥ चतुर्गृहीतमाज्यंपुरस्ताद्धरेत् ॥ ३ ॥
अथाग्निं ॥ अथाग्निहोत्रं ॥ यदाज्यंपुरस्ताद्धरति ॥ एतद्वाअग्नेःप्रियंधाम ॥

यदाज्यं ॥ प्रियेणैवेनंधाम्नासमर्धयति ॥ यदग्निंपूर्वꣳहरत्यथाग्निहोत्रं ॥ भाग
धेयेनैवेनंप्रणयति ॥ ब्राह्मणआर्षेयउद्धरेत् ॥ ब्राह्मणोवैसर्वादेवताः ॥ ४ ॥
सर्वाभिरेवैनंदेवताभिरुद्धरति ॥ पराचीवाएतस्मैव्युच्छंतीव्युच्छति ॥ यस्याग्नि
मनुद्धृतꣳसूर्योभ्युदेति ॥ उषाःकेतुनाजुषतां ॥ यज्ञंदेवेभिरन्वितं ॥ देवेभ्योम
धुमत्तमꣳस्वाहेतिप्रत्यङ्ङ्निषद्याज्येनजुहुयात् ॥ प्रतीचीमेवास्मैविवासय
ति ॥ अग्निहोत्रमुपसाद्यातमितोरासीत ॥ व्रतमेवहृतमनुम्रियते ॥ अंतंवा
एषआत्मनोगच्छति ॥ ५ ॥ यस्ताम्यति ॥ अंतमेषयज्ञस्यगच्छति ॥ यस्याग्नि
मनुद्धृतꣳसूर्योभ्युदेति ॥ पुनःसमन्यजुहोति ॥ अंतेनैवांतंयज्ञस्यनिष्करोति ॥
मित्रोवाएतस्ययज्ञंगृह्णाति ॥ यस्याग्निमनुद्धृतꣳसूर्योभ्युदेति ॥ मैत्रंचरुं

श्रो॰प्र॰
४४

निर्वपेत् ॥ तेनैव यज्ञं निष्क्रीणीते ॥ यस्याहवनीयेनुद्वाते गार्हपत्य उद्वायेत् ॥
॥ ६ ॥ यदाहवनीयमनुद्वाप्य गार्हपत्यं मंथेत् ॥ विच्छिंद्यात् ॥ भ्रातृव्यमस्मै जन
येत् ॥ यदि वै यज्ञस्य वास्तव्यं क्रियते ॥ तदनु रुद्रोवचरति ॥ यत्पूर्वम॰न्ववस्येत् ॥
वास्तव्यमग्निमुपासीत ॥ रुद्रोस्य पशून्घातुकः स्यात् ॥ आहवनीयमुद्वाप्य ॥
गार्हपत्यं मंथेत् ॥ ७ ॥ इतः प्रथमं जज्ञे अग्निः ॥ स्वाद्योनेरधिजातवेदाः ॥ सगा
यत्रिया त्रिष्टुभा जगत्या ॥ देवेभ्यो हव्यं वहतु प्रजानन्निति ॥ छंदोभिरेवैनं स्वा
द्योनेः प्रजनयति ॥ गार्हपत्यं मंथति ॥ गार्हपत्यं वा अन्वाहिताग्नेः पशव उप
तिष्ठंते ॥ स यदुद्वायति ॥ तदनु पशवोपक्रामंति ॥ इषे रय्यै रमस्व ॥ ८ ॥ सहसे
द्युम्नाय ॥ ऊर्जे पत्याय स्वाहा ॥ पशवो वै रयिः ॥ पशूनेवास्मै रमयति ॥ सारस्व

सां॰ब्रा॰
४४

तौ त्वोत्सौ समिंधातामित्याह ॥ ऋक्सामे वै सारस्वतावुत्सौ ॥ ऋक्सामाभ्यामेवैनं
समिंधे ॥ सम्राडसि विराडसीत्याह ॥ रथंतरं वै सम्राट् ॥ बृहद्विराट् ॥ ९ ॥ ताभ्यामे
वैनं समिंधे ॥ वज्रो वै चक्रं ॥ वज्रो वा एतस्य यज्ञं विच्छिनत्ति ॥ यस्यानो वा रथो वां
तराग्नी याति ॥ आहवनीयमुद्वाप्य ॥ गार्हपत्यादुद्धरेत् ॥ यदग्ने पूर्वं प्रभृतं पदं
हि ते ॥ सूर्यस्य रश्मीनन्वाततान ॥ तत्र रयिष्ठामनु संभरैतं ॥ संनः सृज सुमत्या
वाजवत्येति ॥ १० ॥ पूर्वेणैवास्य यज्ञेन यज्ञमनु संतनोति ॥ त्वमग्ने सप्रथा अ
सि स्वाहा ॥ अग्निः सर्वा देवताः ॥ देवताभिरेवै॰ यज्ञं संतनोति ॥ अग्नये पथिकृ
ते पुरोडाशमष्टाकपालं निर्वपेत् ॥ अग्निमेव पथिकृतं स्वेन भागधेयेनोपधा
वति ॥ स एवैनं यज्ञियं पंथामपि नयति ॥ अनड्वान्दक्षिणा ॥ वही ह्येष समृध्यै ॥ ११ ॥

ऐ०ब्रा०
५५

हरत्यथाग्निहोत्रंनिमंत्र्योचतिहरेद्देवतागछत्युद्वायेन्मथेद्रमस्यबृहद्गिराउतिन
वचः॥ ४॥ निर्वेपूर्वेत्रीणिनिमंत्र्योचति दर्भेणहिरण्यमग्निहोत्रंपुनर्वरुणोवारुणं
निवाएतत्स्याभ्युदेतिचतुर्गृहीतमाज्यंयदाज्येपराच्युषाःपुनर्मित्रोमैत्रंयस्याहव
नीयेनुद्वालेगार्हपत्येयदृ॥ ॥यस्यप्रातःसवनेसोमोतिरिच्यते॥माध्यंदिनंस
वनंकामयमानोभ्यतिरिच्यते॥गोर्द्धयतिमरुत्वामितिधयहूतीषुकुर्वंति॥हि
नस्तिवैसंध्यधीतं॥संधीयखलुवाएतत्॥यत्सवनस्यातिरिच्यते॥यद्धयहूती
षुकुर्वंति॥संधेःशांत्यै॥गायत्रंसामभवतिपंचदशस्तोमः॥तेनैवप्रातःसवनान्न
यंति॥ १॥ मरुत्वतीषुकुर्वंति॥तेनैवमाध्यंदिनात्सवनान्नयंति॥होतुश्चम
समन्नून्नयंते॥होतानुशंसति॥मध्यतएवयज्ञंसमादधाति॥यस्यमाध्यं

सां०ब्रा०
५९

दिनेसवनेसोमोतिरिच्यते॥आदित्यंतृतीयसवनंकामयमानोभ्यतिरिच्यते॥गौ
रिवीतंसामभवति॥अतिरिक्तंवैगौरिवीतं॥अतिरिक्तंयत्सवनस्यातिरिच्यते॥ २॥
अतिरिक्तस्यशांत्यै॥बण्महाँअसिसूर्येतिकुर्वंति॥यस्येवादित्यसवनस्यकामेना स्य
तिरिच्यते॥तेनैवैनंकामेनसमर्द्धयंति॥गौरिवीतंसामभवति॥तेनैवैमाध्यंदि
नात्सवनान्नयंति॥सप्तदशस्तोमः॥तेनैवतृतीयसवनान्नयंति॥होतुश्चमसम
नून्नयंते॥होतानुशंसति॥ ३॥मध्यतएवयज्ञंसमादधाति॥यस्यतृतीयसव
नेसोमोतिरिच्येत॥उक्थ्यंकुर्वीत॥यस्योक्थ्येतिरिच्येत॥अतिरात्रंकुर्वीत॥य
स्यातिरात्रेतिरिच्यते॥तद्वैदुष्प्रज्ञानं॥यजमानंवाएतत्पशवआसाह्ययंति॥
बृहत्सामभवति॥बृहद्वाइमांल्लोकान्दाधार॥ ४॥ बार्हताःपशवः॥ बृहतैवा

स्मै पशून्दाधार ॥ त्रिपिविष्टवतीषु कुर्वंति ॥ त्रिपिविष्टो वै देवानां पुष्टं ॥ पुष्ट्यैवैनं
समर्धयंति ॥ होतुश्चमससमनून्नयंते ॥ होतानुशंसति ॥ मध्यत एव यज्ञं समा
दधाति ॥ ५ ॥ यंतियत्सवनस्यातिरिच्यते शंसति धो दोराष्टो च ॥ ५ ॥ ऐकै
को वै जनतायामिंद्रः ॥ एकं वा एताविंद्रमभिसंसुनुतः ॥ यौ द्वौ संसुनुतः ॥ प्र
जापतिर्वा एष वितायते ॥ यद्यज्ञः ॥ तस्य ग्रावाणो दंताः ॥ अन्यतरं वा एते संसु
न्वतो निर्बप्सति ॥ पूर्वेणोपसृत्या देवतायुत्या इंद्रः ॥ पूर्वोपसृतस्यैवैश्रेयान्भवति ॥
एतिवं स्वाज्यानिभवंत्यभिजित्यै ॥ १ ॥ मरुत्वतीः प्रतिपदः ॥ मरुतो वै देवाना
मपराजितमायतनं ॥ देवानामेवानामेवापराजित आयतने यतंते ॥ उभे बृह
द्रथंतरे भवतः ॥ इयं वाव रथंतरं ॥ असौ बृहत् ॥ आभ्यामेवैनमंतरेति ॥ चा

चक्षुश्च मनसश्च ॥ प्राणाच्चापानाच्च ॥ दिवश्च पृथिव्याश्च ॥ २ ॥ सर्वस्माद्वित्ता
द्वैयात् ॥ अभिवर्तो ब्रह्मसामं भवति ॥ सुवर्गस्य लोकस्याभिवृत्त्यै ॥ अभिजि
द्भवति ॥ सुवर्गस्य लोकस्याभिजित्यै ॥ विश्वजिद्भवति ॥ विश्वस्य जित्यै ॥ यस्य भू
यांसो यज्ञक्रतव इत्याहुः ॥ स देवतां वृंक्त इति ॥ यद्यग्निष्टोमः सोमः परस्ता
त्स्यात् ॥ ३ ॥ उक्थ्यं कुर्वीत ॥ यद्युक्थ्यः स्यात् ॥ अतिरात्रं कुर्वीत ॥ यज्ञक्रतु
भिरेवास्य देवतां वृंक्ते ॥ यो वै छंदोभिरभिभवति ॥ स संसुन्वतोरभिभवति ॥
संवेशाय त्वोपवेशाय त्वेत्याह ॥ छंदांसि वै संवेश उपवेशाः ॥ छंदोभिरेवा
स्य छंदांस्यभिभवति ॥ इष्टर्गो वा ऋत्विजामध्वर्युः ॥ ४ ॥ इष्टर्गः खलु वै
पूर्वोऽध्वर्युः क्षीयते ॥ प्राणापानौ मृत्योर्मा पातमित्याह ॥ प्राणापानयोरेव श्रयते ॥

श्री२

श्री·ब्र·
४७

प्राणापानौमामासिष्टमित्याह ॥ नैनंपुरायुषःप्राणापानौजहितः ॥ आर्त्तिंवाएते
नियंति ॥ येषांदीक्षितानांप्रमीयते ॥ तेयदवर्जेयुः ॥ क्रूरकृतामिवैषांल्लोकःस्या
त् ॥ आहरदहेतिब्रूयात् ॥ ५ ॥ तंदक्षिणतोवेदेर्निधाय ॥ सर्पराज्ञियाऋग्भिस्स्तु
युः ॥ इयंवैसर्पतोराज्ञी ॥ अस्याएवैनंपरिददति ॥ व्यृद्धंतदित्याहुः ॥ यत्स्तुतम
ननुशस्त्रमिति ॥ होताप्रथमःप्राचीनावीती मार्जालीयंपरीयात् ॥ यामीरनुब्रुवन् ॥
सर्पराज्ञीनांकीर्तयेत् ॥ उभयोरेवैनंलोकयोःपरिददति ॥ ६ ॥ अथोधुवंत्येवै
नं ॥ अथोन्यंवास्मैन्ह्नुवते ॥ त्रिःपरियंति ॥ त्रयइमेलोकाः ॥ एभ्यएवैनंलोकेभ्यो
धुवते ॥ त्रिःपुनःपरियंति ॥ षट्संपद्यंते ॥ षड्वाऋतवः ॥ ऋतुभिरेवैनंधुवते ॥ अ
ग्नआयूंषिपवसइतिप्रतिपदंकुर्वीरन् ॥ रथंतरसामैषांसोमस्यात् ॥ आयु

॥ सां·ब्रू
४७

रेवात्मन्दधते ॥ अथोपाप्मानमेवविजहतोयंति ॥ ७ ॥ अभिजित्सैपृथिव्याश्वस्या
दध्वर्युर्ब्रूयाल्लोकयोःपरिददतिकुर्वीरंस्त्रीणिच ॥ ६ ॥ असुर्यंवाएतस्माद्वर्णं
कृत्वा ॥ पशवोवीर्यमपक्रामंति ॥ यस्ययूपोविरोहति ॥ त्वाष्ट्रंबहुरूपमालभेत ॥ त्व
ष्टावैरूपाणामीशे ॥ यएवरूपाणामीशे ॥ सोस्मिन्पशून्वीर्यंयच्छति ॥ नास्मात्पशवो
वीर्यमपक्रामंति ॥ आर्त्तिंवाएतेनियंति ॥ येषांदीक्षितानामग्निरुद्वायति ॥ १ ॥
यदाहवनीयउद्वायेत् ॥ यत्तंमंथेत् ॥ विच्छिंद्यात् ॥ भ्रातृव्यमस्मैजनयेत् ॥ यदाह
वनीयउद्वायेत् ॥ आग्नीध्रादुद्धरेत् ॥ यदाग्नीध्रउद्वायेत् ॥ गार्हपत्यादुद्धरेत् ॥
यद्गार्हपत्यउद्वायेत् ॥ अतएवपुनर्मंथेत् ॥ २ ॥ अत्रवावसनिलयंते ॥ यत्रख
लुवैनिलीनमुत्तमंपश्यंति ॥ तदेनमिच्छंति ॥ यस्माद्दारोरुद्वायेत् ॥ तस्यारणीकु

ब्रा॰ प्र॰ ४
४८

र्यात्॥ क्रुमुकमपि कुर्यात्॥ एषा वा अग्नेः प्रिया तनूः॥ यत्क्रुमुकः॥ प्रिययैवैनं
तनुवा समर्द्धयति॥ गार्हपत्यं मन्थति॥ ३॥ गार्हपत्यो वा अग्नेर्योनिः॥ स्वादेवैनं
योनेर्जनयति॥ नास्मै भ्रातृव्यं जनयति॥ यस्य सोममुपदस्येत्॥ सुवर्णं हिरण्यं
द्वेधा विच्छिद्य॥ ऋजीषेऽन्यदाधूनुयात्॥ जुहुयादन्यत्॥ सोममेवाभिषुणोति॥
सोमं जुहोति॥ सोमस्य वा अभिषूयमाणस्य प्रिया तनूरुदक्रामत्॥ ४॥ तत्सु
वर्णꣳ हिरण्यमभवत्॥ यत्सुवर्णꣳ हिरण्यं कुर्वति॥ प्रिययैवैनं तनुवा समर्द्धय
ति॥ यस्याक्रीतꣳ सोममपहरेयुः॥ क्रीणीयादेव॥ सैव ततः प्रायश्चित्तिः॥ यस्य क्री
तमपहरेयुः॥ आदाराꣳश्च फाल्गुनानि चाभिषुणुयात्॥ गायत्री यꣳ सोममा
हरत्॥ तस्य योऽꣳशुः परापतत्॥ ५॥ त आदारा अभवन्॥ इन्द्रो वृत्रमहन्॥ त

सो॰ ब्रा॰
४८

स्य वल्कः परापतत्॥ तानि फाल्गुनान्यभवन्॥ पशवो वै फाल्गुनानि॥ पशवः सो
मो राजा॥ यदादाराꣳश्च फाल्गुनानि चाभिषुणोति॥ सोममेव राजानमभिषु
णोति॥ शृते न श्रीतः सवने श्रीणीयात्॥ दध्ना माध्यंदिने॥ ६॥ नीतमिश्रेण
तृतीयसवने॥ अग्निष्टोमः सोमः स्याद्रथंतरसामा॥ य एवर्त्विजो वृता
स्युः॥ त एनं याजयेयुः॥ एकां गां दक्षिणां दद्यात्तेभ्य एव॥ पुनः सोमं
क्रीणीयात्॥ यज्ञेनैव तद्यज्ञमिच्छति॥ सैव ततः प्रायश्चित्तिः॥ सर्वा
भ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानमागुरते॥ यः सत्त्राया
गुरते॥ एतावान्वै पुरुषः॥ यावदस्य वित्तं॥ सर्ववेदसेन यजेत॥ स
र्वपृष्ठोऽस्य सोमः स्यात्॥ सर्वाभ्य एव देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आ

श्मानं निष्क्रीणीते॥७॥उद्वायति मंथेन्मंथत्यक्रात्पराप तन्मध्यंदिन आगुरते
पंचच॥७॥ पवमानः सुवर्जनः॥ पवित्रेण विचर्षणिः॥ यः पोता स पुनातु
मा॥ पुनंतु मा देवजनाः॥ पुनंतु मनवो धिया॥ पुनंतु विश्व आयवः॥ जात
वेदः पवित्रवत्॥ पवित्रेण पुनाहि मा॥ शुक्रेण देवदीद्यत्॥ अग्ने क्रत्वा
क्रतूꣳरनु॥९॥ यत्ते पवित्रमर्चिषि॥ अग्ने विततमंतरा॥ ब्रह्म तेन पुनीम
हे॥ उभाभ्यां देव सवितः॥ पवित्रेण सवेन च॥ इदं ब्रह्म पुनीमहे॥ वैश्वदे
वी पुनती देव्यागात्॥ यस्यै बह्वीस्तनुवो वीतपृष्ठाः॥ तया मदंतः सध
माद्येषु॥ वयꣳ स्याम पतयो रयीणां॥२॥ वैश्वानरो रश्मिभिर्मा पुना
तु॥ वातः प्राणेनेषिरो मयोभूः॥ द्यावापृथिवी पयसा पयोभिः॥ ऋ

तावरी यज्ञिये मा पुनीतां॥ बृहद्भिः सवितस्तृभिः॥ वर्षिष्ठैर्देव मन्मभिः॥
अग्ने दक्षैः पुनाहि मा॥ येन देवा अपुनत॥ येनापो दिव्यं कशः॥ तेन दिव्ये
न ब्रह्मणा॥३॥ इदं ब्रह्म पुनीमहे॥ यः पावमानीरध्येति॥ ऋषिभिः संभृ
तꣳ रसं॥ सर्वꣳ स पूतमश्नाति॥ स्वदितं मातरिश्वना॥ पावमानीर्यो
अध्येति॥ ऋषिभिः संभृतꣳ रसं॥ तस्मै सरस्वती दुहे॥ क्षीरꣳ सर्पि
र्मधूदकं॥ पावमानीः स्वस्त्ययनीः॥४॥ सुदुघा हि पयस्वतीः॥ ऋषि
भिः संभृतो रसः॥ ब्राह्मणेष्वमृतꣳ हितं॥ पावमानीर्दिशंतु नः॥ इमं लो
कमथो अमुं॥ कामान्त्समर्धयंतु नः॥ देवीर्देवैः समाभृताः॥ पावमानीः
स्वस्त्ययनीः॥ सुदुघा हि घृतश्चुतः॥ ऋषिभिः संभृतो रसः॥५॥ ब्रा
ह्मणेष्वमृतꣳ हितं॥ येन देवाः पवित्रेण॥ आत्मानं पुनते सदा॥ तेन सहस्र
धारेण॥ पावमान्यः पुनंतु मा॥ प्राजापत्यं पवित्रं॥ शतोद्यामꣳ हिरण्मयं॥

ब्रा०अ०

५०

तेनब्रह्मविदोवयं॥पूतंब्रह्मपुनीमहे॥इंद्रःसुनीतीसहमापुनातु॥सोमःस्वस्त्याव
रुणःसमीच्या॥यमोराजाप्रमृणाभिःपुनातुमा॥जातवेदामोर्जयंत्यापुनातु॥८॥
अनुरयीणांब्रह्मणास्वस्त्ययनीःसुदुघाहिघृतश्चुतऋषिभिःसंभृतारसः
पुनातुत्रीणिच॥२॥प्रजावैसत्रमासततपस्तप्यमानाअजुहृतीः॥देवाअपश्यं
चमसंघृतस्यपूर्णंस्वधां॥तमुपोदतिष्ठंतमजुहवुः॥तेनार्धमासऊर्जमवारुंधत
तस्मादर्धमासेदेवाइज्यंते॥पितरोपश्यंचमसंघृतस्यपूर्णंस्वधां॥तमुपोदतिष्ठं
तमजुहवुः॥तेनमास्यूर्जमवारुंधत॥तस्मान्मासिपितृभ्यःक्रियते॥मनुष्याअप
श्यंचमसंघृतस्यपूर्णंस्वधां॥१॥तमुपोदतिष्ठंतमजुहवुः॥तेनहूयीमूर्जमवारुंधत॥
तस्माद्विरह्नोमनुष्येभ्यउपह्रियते॥प्रातश्चसायंच॥पशवोपश्यंचमसंघृतस्यपूर्णंस्व
धां॥तमुपादतिष्ठंजुहवुः॥तेनत्रयीमूर्जमवारुंधत॥तस्मात्त्रिरह्नःपशवःप्रेरते॥प्रातः

तम

५०

जे४

संगवेसायं॥असुराअपश्यंचमसंघृतस्यपूर्णंस्वधां॥२॥तमुपोदतिष्ठन्तमजुहवुः॥
तेनसंवत्सरऊर्जमवारुंधत॥तेदेवाअमन्यंत॥अमीवाइदमभूवन्॥यदस्माकंस्वमइति॥
तएतानिचातुर्मास्यान्यपश्यन्॥तानिनिरवपन्॥तैरेवैषांतामूर्जमवृंजत॥ततो
देवाअभवन्॥परासुराः॥३॥यद्यते॥यामेवदेवाऊर्जमवारुंधत॥तांतेनावरुंधे॥
यत्पितृभ्यःकरोति॥यामेवपितरऊर्जमवारुंधत॥तांतेनावरुंधे॥यदावसथेन्नं
हरंति॥यामेवमनुष्याऊर्जमवारुंधत॥तांतेनावरुंधेतेः॥यद्दक्षिणांददाति॥४॥
यामेवपशवऊर्जमवारुंधत॥तांतेनावरुंधे॥यच्चातुर्मास्यैर्यजते॥यामेवासुरा
ऊर्जमवारुंधत॥तांतेनावरुंधे॥भवत्यात्मना॥परास्यभ्रातृव्योभवति॥विराजो
वाएषाविक्रांतिः॥यच्चातुर्मास्यानि॥वैश्वदेवेनास्मिँल्लोकेप्रत्यतिष्ठत्॥वरुण
प्रघासैरंतरिक्षे॥साकमेधैरमुष्मिँल्लोके॥एषहत्वावैतत्सर्वंभवति॥यएवंविद्वान्

श्चातुर्मास्यैर्यजते॥ ५॥ मनुष्या अपश्यंश्चमसं घृतस्य पूर्णं स्वधाम सुरा अपश्यं
चमसं घृतस्य पूर्णं स्वधामसुं दद्रीत्यतिष्ठन्नत्वारिच॥ ९॥ अग्निर्वावसंवत्सरः॥
आदित्यः परिवत्सरः॥ चंद्रमा इदावत्सरः॥ वायुरनुवत्सरः॥ यद्वैश्वदेवेन यजते॥
अग्निमेव तत्संवत्सरमाप्नोति॥ तस्माद्वैश्वदेवेन यजमानः॥ संवत्सरीणां स्वस्ति
माशास्त इत्याशासीत॥ यद्वरुणप्रघासैर्यजते॥ आदित्यमेव तत्परिवत्सरमाप्नोति॥
॥ १॥ तस्माद्वरुणप्रघासैर्यजमानः॥ परिवत्सरीणां स्वस्तिमाशास्त इत्याशासी
त॥ यत्साकमेधैर्यजते॥ चंद्रमसमेव तदिदावत्सरमाप्नोति॥ तस्मात्साकमेधैर्यजमा
नः॥ इदावत्सरीणां स्वस्तिमाशास्त इत्याशासीत॥ यत्पितृयज्ञेन यजते॥ देवानेव
तदन्ववस्यति॥ अथवा अस्य वायुश्चानुवत्सरश्चाप्रीतावुच्छिष्येते॥ यच्छुनासी
रीयेण यजते॥ २॥ वायुमेव तदनुवत्सरमाप्नोति॥ तस्माच्छुनासीरीयेण यजमानः॥

अनुवत्सरीणां स्वस्तिमाशास्त इत्याशासीत॥ संवत्सरं वा एष इप्सतीत्याहुः॥ य
श्चातुर्मास्यैर्यजत इति॥ एष ह त्वै संवत्सरमाप्नोति॥ य एवं विद्वांश्चातुर्मास्यैर्यज
ते॥ विश्वे देवाः समयजंत॥ तेग्निमेवायजंत॥ त एतं लोकमजयन्॥ ३॥ यस्मिन्न
ग्निः॥ यद्वैश्वदेवेन यजते॥ एतमेव लोकं जयति॥ यस्मिन्नग्निः॥ अग्नेरेव सायुज्य
मुपैति॥ यदा वैश्वदेवेन यजते॥ अथ संवत्सरस्य गृहपतिमाप्नोति॥ यदा संवत्सर
स्य गृहपतिमाप्नोति॥ अथ सहस्रयाजिनमाप्नोति॥ यदा सहस्रयाजिनमाप्नो
ति॥ ४॥ अथ गृहमेधिनमाप्नोति॥ यदा गृहमेधिनमाप्नोति॥ अथाग्निर्भव
ति॥ यदाग्निर्भवति॥ अथ गोर्भवति॥ एषा वै वैश्वदेवस्य मात्रा॥ एतद्वा एतेषा
मवमं॥ अतोतो वा उत्तराणि श्रेयांसि भवंति॥ यद्वैश्वदेवाः समयजंत॥ तद्वै

ब्रा०प्र०४
५२

श्वदेवस्य वैश्वदेवत्वं ॥ ५ ॥ अथादित्यो वरुणꣳ राजानं वरुणप्रघासैरयजन्त ॥
स एतंल्लोकमजयत् ॥ यस्मिन्नादित्यः ॥ य उ वरुणप्रघासैर्यजते ॥ एतमेव
लोकं जयति ॥ यस्मिन्नादित्यः ॥ आदित्यस्यैव सायुज्यमुपैति ॥ यद्वादित्यो
वरुणꣳ राजानं वरुणप्रघासैरयजन्त ॥ तद्वरुणप्रघासानां वरुणप्रघास
त्वं ॥ अथ सोमो राजा छंदाꣳसि साकमेधैरयजन्त ॥ ६ ॥ स एतंल्लोकमजय
त् ॥ यस्मिꣳश्चंद्रमा विभाति ॥ य उ साकमेधैर्यजते ॥ एतमेव लोकं जयति ॥
यस्मिꣳश्चंद्रमा विभाति ॥ चंद्रमस एव सायुज्यमुपैति ॥ सोमो वै चंद्रमाः ॥
एष ह त्वै साक्षात्सोमं भवति ॥ य एवं विद्वान्त्साकमेधैर्यजते ॥ यत्सोमश्च रा
जा छंदाꣳसि च समैधंत ॥ ७ ॥ तत्साकमेधानाꣳ साकमेधत्वं ॥ अथर्तवः पि

सांबु
५२

तरः प्रजापतिं पितरं पित्र्ययज्ञेनायजंत ॥ त एतंल्लोकमजयन् ॥ य
स्मिन्नृतवः ॥ य उ पित्र्ययज्ञेन यजते ॥ एतमेव लोकं जयति ॥ यस्मिन्नृ
तवः ॥ ऋतूनामेव सायुज्यमुपैति ॥ यद्वृतवः पितरः प्रजापतिं पि
तरं पित्र्ययज्ञेनायजंत ॥ तत्पित्र्ययज्ञस्य पित्र्ययज्ञत्वं ॥ ८ ॥ अ
थौषधय इमं देवं त्र्यंबकैरजंत प्रथेमहीति ॥ ततो वै ता अप्रथंत ॥
य एवं विद्वाꣳस्त्र्यंबकैर्यजते ॥ प्रथते प्रजया पशुभिः ॥ अथ वायुः
परमेष्ठिनꣳ शुनासीरीयेणायजत ॥ स एतंल्लोकमजयत् ॥
यस्मिन्वायुः ॥ य उ शुनासीरीयेण यजते ॥ एतमेव लोकं जय

य

ब्रा॰प्र॰
५३

ति॥यस्मिन्वायुः॥ ९ ॥ वायोरेव सायुज्यमुपैति॥ ब्रह्मवादिनो वदंति॥ प्रचा
तुर्मास्य याजी मीयता ३ न प्रमीयता ३ इति॥ जीवन्वा एष ऋतूनप्येति॥ यदिव
संता प्रमीयते॥ वसंतो भवंति॥ यदि ग्रीष्मे ग्रीष्मः॥ यदि वर्षासु वर्षाः॥ यदि शार
दि शारत्॥ यदि हेमन्हेमंतः॥ ऋतुर्भूत्वा संवत्सरमप्येति॥ संवत्सरः प्रजापतिः॥
प्रजापतिर्वा वैषः॥ १० ॥ परिवत्सरमाप्नोति शुनासीरीयेण यजते जय
न्त्सह स्वयाजिनमाप्नोति वैश्वदेवत्वं साकमेधैरयजत संमेधं तपितृय
ज्ञत्वं जयति यस्मिन्वायुर्हेमंत स्त्रीणि च॥ १० ॥ ॥ उभयेयुवं सुरा मसु
रस्छालिवै यस्य प्रातः सवन एकैको सुर्यपचमानः प्रजाविस त्रमा सता
ग्नि र्वाव संवत्सरो दृशा॥ १० ॥ ॥ उभये वा उर स्छात्सर्वाभिर्मध्यतो त्र वा
व ब्राह्मणषष्ठगृहमेधिनं षट्षष्टिः॥ ६६ ॥ ॥ ओम् ॥ ॥

सा॰ब्रा॰
५३

॥ हरिः ओम्॥ ॥ अग्नेः कृत्तिकाः॥ शुक्रं परस्ताज्ज्योतिरवस्तात्॥ प्रजापते रोहिणी॥
आपः परस्तादोषधयोवस्तात्॥ सोमस्येन्वकाचितता नि॥ परस्ताद्धयंतोवस्तात्॥
रुद्रस्य बाहू॥ मृगयवः परस्ता द्विक्षारोवस्तात्॥ अदित्यै पुनर्वसू॥ वातः परस्तादार्द्र
मवस्तात्॥ १ ॥ बृहस्पतेस्तिष्यः॥ जुह्वतः परस्ताद्यजमाना अवस्तात्॥ सर्पाणामा
श्रेषाः॥ अभ्यागछंतः परस्तादभ्यानृत्यंतोवस्तात्॥ पितृणां मघाः॥ रुदंतः परस्ता
दपभ्रंशोवस्तात्॥ अर्यम्णः पूर्वे फल्गुनी॥ जायापरस्तादृषभोवस्तात्॥ भग
स्योत्तरे॥ वहतवः परस्ताद्वहमाना अवस्तात्॥ २ ॥ देवस्य सवितुर्हस्तः॥ प्रस
वः परस्तात्सनिरवस्तात्॥ इंद्रस्य चित्रा॥ ऋतं परस्तात्सत्यमवस्तात्॥ वायो
र्निष्ट्या व्रततिः॥ परस्तादसिद्धिरवस्तात्॥ इंद्राग्नियोर्विशाखे॥ युगानि पर

स्तात्कृषमाणा अवस्तात्॥ मित्रस्यानूराधाः॥ अभ्यारोहत्परस्तादभ्यारूढमवस्ता
त्॥ ३॥ इंद्रस्य शतभिषक्॥ शृणत्परस्तात्प्रतिशृणंतो वस्तात्॥ निर्ऋत्यै मूलव
र्हणी॥ प्रतिभंजंतः परस्तात्प्रतिशृणंतो वस्तात्॥ अपां पूर्वा अषाढाः॥ वर्चः परस्ता
त्समितिरवस्तात्॥ विश्वेषां देवानामुत्तराः॥ अभिजयत्परस्तादभिजितमवस्तात्॥
विष्णोः श्रोणा पृछमानाः॥ परस्तात्पंथा अवस्तात्॥ ४॥ वसूनां श्रविष्ठाः॥ भूतं प
रस्ताद्भूतिरवस्तात्॥ इंद्रस्य शतभिषक्॥ विश्वव्यचाः परस्ताद्विश्वक्षितिरवस्तात्॥
अजस्यैकपदः पूर्वे प्रोष्ठपदाः॥ वैश्वानरं परस्ताद्वैश्वावसवमवस्तात्॥ अहेर्बुध्नि
यस्योत्तरे॥ अभिषिंचंतः परस्तादभिषुण्वंतो वस्तात्॥ पूष्णो रेवती॥ गावः पर
स्ताद्वत्सा अवस्तात्॥ अश्विनो रश्वयुजौ॥ ग्रामः परस्तात्सेनावस्तात्॥ यम

स्यापभरणीः॥ अपकर्षंतः परस्तादपवहंतो वस्तात्॥ पूर्णा पश्चाद्यत्ते देवा अदधुः॥ ५॥
आर्द्रमवस्ताद्यजमाना अवस्तादभ्यारूढमवस्तात्पंथा अवस्ताद्वत्सा अवस्तात्पंच
च॥ १॥ यत्पुण्यं नक्षत्रं॥ तद्बट् कुर्वीतोपव्युषं॥ यदा वै सूर्य उदेति॥ अथ नक्षत्रं नै
ति॥ यावति तत्र सूर्यो गछेत्॥ यत्र जघन्यं पश्येत्॥ तावति कुर्वीत यत्कारी स्यात्॥
पुण्याह एव कुरुते॥ एवं ह वै यज्ञेषुं च शतद्युम्नं च मात्स्यो निरवसाययांचकार॥ २॥
यो वै नक्षत्रियं प्रजापतिं वेद॥ उभयोरेनं लोकयोर्विदुः॥ हस्त एवास्य हस्तः॥ चित्रा
शिरः॥ निष्ट्या हृदयं॥ ऊरू विशाखे॥ प्रतिष्ठानूराधाः॥ एष वै नक्षत्रियः प्रजापतिः॥ य
एवं वेद॥ उभयोरेनं लोकयोर्विदुः॥ २॥ अस्मिंश्चामुष्मिंश्च॥ यां कामयेत दुहि
तरं प्रिया स्यादिति॥ तां निष्ट्यायां दद्यात्॥ प्रियैव भवति॥ नैव तु पुनरागछति॥

अभिजिन्नाम नक्षत्रं ॥ उपरिष्टादषाढानां ॥ अवस्ताच्छ्रोणायै ॥ देवासुराः संयत्ता आ
सन् ॥ ते देवास्तस्मिन्नक्षत्रेऽभ्यजयन् ॥ ३ ॥ यदभ्यजयन् ॥ तदभिजितोऽभिजित्वं ॥ यं
कामयेतानपजय्यं जयेदिति ॥ तमेतस्मिन्नक्षत्रे यातयेत् ॥ अनपजय्यमेव जयति ॥
पापपराजितमिव तु ॥ प्रजापतिः पशूनसृजत ॥ ते नक्षत्रं नक्षत्रमुपातिष्ठंत ॥ ते समा
वंत एवाभवन् ॥ ते रेवतीमुपातिष्ठंत ॥ ४ ॥ ते रेवत्यां प्राभवन् ॥ तस्माद्रेवत्यां पशूनां
कुर्वीत ॥ यत्किंचार्वाचीनं सोमात् ॥ प्रैव भवंति ॥ सलिलं वा इदमंतरासीत् ॥ यदत
रन् ॥ तत्तारकाणां तारकत्वं ॥ यो वा इह यजते ॥ अमुं स लोकं नक्षते ॥ तन्नक्षत्राणां
नक्षत्रत्वं ॥ ५ ॥ देवगृहा वै नक्षत्राणि ॥ य एवं वेद ॥ गृह्येव भवति ॥ यानि वा इमानि
पृथिव्याश्चित्राणि ॥ तानि नक्षत्राणि ॥ तस्मादश्लीलनामंश्चित्रे ॥ नावस्येन्न य

जेत ॥ यथा पापाहे कुरुते ॥ तादृगेव तत् ॥ देवनक्षत्राणि वा अन्यानि ॥ ६ ॥ यमनक्षत्राण्य
न्यानि ॥ कृत्तिकाः प्रथमं ॥ विशाखे उत्तमं ॥ तानि देवनक्षत्राणि ॥ अनूराधाः प्रथमं ॥ अप
भरणीरुत्तमं ॥ तानि यमनक्षत्राणि ॥ यानि देवनक्षत्राणि ॥ तानि दक्षिणेन परियंति ॥
यानि यमनक्षत्राणि ॥ ७ ॥ तान्युत्तरेण ॥ अन्वेषामरात्स्मेति ॥ तदनूराधाः ॥ ज्येष्ठमे
षामवधिष्मेति ॥ तज्ज्येष्ठघ्नी ॥ मूलमेषामवृक्षामेति ॥ तन्मूलबर्हणी ॥ यन्नासहंत ॥ तद
षाढाः ॥ यदश्लोणत् ॥ ८ ॥ तच्छ्रोणा ॥ यदशृणोत् ॥ तच्छ्रविष्ठाः ॥ यच्छतमभिषज्यन् ॥ तच्छ
तभिषक् ॥ प्रोष्ठपदेषूदयच्छंत ॥ रेवत्यामरवंत ॥ अश्वयुजोरयुंजत ॥ अपभरणीष्वपा
वहन् ॥ तानि वा एतानि यमनक्षत्राणि ॥ यान्येव देवनक्षत्राणि ॥ तेषु कुर्वीत यत्कारी
स्यात् ॥ पुण्याह एव कुरुते ॥ ९ ॥ चकारे यं वेदो भययोरेनं लोकयो विंदुरजनयन्रे

ब्रा०प्र०५
५६

वतीमुपातिष्ठंत नक्षत्र त्वमन्यानियानि यमनक्षत्राण्यश्लीलणद्यमनक्षत्राणित्रीणि
च॥ २ ॥दिवस्यसवितुः प्रातःप्रसवः प्राणः॥ वरुणस्यसायमासवोपानः॥ यत्प्रतीची
नंप्रातस्तनात्॥ प्राचीनं संगवात्॥ ततोदेवाअग्निष्टोमंनिरमिमत॥ तत्तदात्तवी
र्येनिर्मार्गः॥ मित्रस्यसंगवः॥ तत्पुण्यंतेजस्व्यहः॥ तस्मात्तर्हिपशवः समायंति॥ य
त्प्रतीचीनं संगवात्॥ १ ॥प्राचीनंमध्यंदिनात्॥ ततोदेवाउक्थ्यंनिरमिमत॥ त
त्तदात्तवीर्येनिर्मार्गः॥ बृहस्पतेर्मध्यंदिनः॥ तत्पुण्यंतेजस्व्यहः॥ तस्मात्तर्हितेक्ष्णि
ष्ठंतपति॥ यत्प्रतीचीनंमध्यंदिनात्॥ प्राचीनमपराह्णात्॥ ततोदेवाःषोडशिनं
निरमिमत॥ तत्तदात्तवीर्येनिर्मार्गः॥ २ ॥भगस्यापराह्णः॥ तत्पुण्यंतेजस्व्यहः॥
तस्मादपराह्णेकुमार्योभगमिच्छमानाश्चरंति॥ यत्प्रतीचीनमपराह्णात्॥ प्राची

सांबू
५६

नंसायात्॥ ततोदेवाअतिरात्रंनिरमिमत॥ तत्तदात्तवीर्येनिर्मार्गः॥ वरुणस्यसायं॥
तत्पुण्यंतेजस्व्यहः॥ तस्मात्तर्हिनानृतंवदेत्॥ ब्राह्मणोवाअष्टाविंशोनक्षत्राणां॥
समानःस्यान्हः पंचपुण्यानिनक्षत्राणि॥ चत्वार्यश्लीलानि॥ तानिनव॥ यच्चपर
स्तान्नक्षत्राणांयच्चावस्तात्॥ तान्येकादश॥ ब्राह्मणोद्वादशः॥ यएवंविद्वान्त्संवत्स
रंव्रतंचरति॥ संवत्सरेणैवास्यव्रतंगुप्तंभवति॥ समानःस्यान्हः पंचपुण्यानिनक्षत्रा
णि॥ चत्वार्यश्लीलानि॥ तानिनव॥ आग्नेयीरात्रिः॥ ऐंद्रमहः॥ तान्येकादश॥ आ
दित्योद्वादशः॥ यएवंविद्वान्त्संवत्सरंव्रतंचरति॥ संवत्सरेणैवास्यव्रतंगुप्तंभव
ति॥ ४ ॥ संगवात्षोडशिनंनिरमिमत तत्तदात्तवीर्येनिर्मार्गोवदेद्भवति समानः
स्यान्हः पंचपुण्यानिनक्षत्राण्यष्टौच॥ ३ ॥ ब्रह्मवादिनोवदंति॥ कतिपात्रा

णियज्ञंवहंतीति॥ त्रयोदशेति ब्रूयात्॥ सयद्ब्रूयात्॥ कुतुस्तानिनिरमिमीतेति॥
आत्मनइति॥ प्राणापानाभ्यामेवोपांशुं चांतर्यामंनिरमिमीत॥ १॥ व्यानादुपांशु
सवनं॥ वाचऐंद्रवायवं॥ दक्षक्रतुभ्यांमैत्रावरुणं॥ श्रोत्रादाश्विनं॥ चक्षुषः शुक्रा
मंथिनौ॥ आत्मनआग्रयणं॥ अंगेभ्यउक्थ्यं॥ आयुषोध्रुवं॥ प्रतिष्ठायाऋतुपात्रे॥
यज्ञंवावतंप्रजापतिर्निरमिमीत॥ सनिर्मितोनाध्रियत समम्लीयत॥ सएतान्प्रजा
पतिरपिवापानपश्यत्॥ तान्निरवपत्॥ तैर्वैसयज्ञमप्यवपत्॥ यदपिवापा
भवंति॥ यज्ञस्यधृत्याअसंव्लयाय॥ २॥ उपांशुंचांतर्यामंचनिरमिमीतामिमीत
षड्र्च॥ ४॥ ऋतमेवपरमेष्ठि॥ ऋतंनात्येतिकिंचन॥ ऋतेसमुद्रआहितः॥
ऋतेभूमिरियंश्रिता॥ अग्निस्तिग्मेनशोचिषा॥ तपआक्रांतमुष्णिहा॥ शि

रस्तपस्याहितं॥ वैश्वानरस्यतेजसा॥ ऋतेनास्यनिवर्तये॥ सत्येनपरिवर्तये॥
॥ १॥ तपसास्यानुवर्तये॥ शिवेनास्योपवर्तये॥ शग्मेनास्याभिवर्तये॥ तदृतंत
त्सत्यं॥ तद्व्रतंतच्छकेयं॥ तेनशकेयंतेनराध्यासं॥ यद्घर्मःपर्यवर्तयत्॥ अंतान्पृथि
व्यादिवः॥ अग्निरीशानओजसा॥ वरुणोधीतिभिःसह॥ २॥ इंद्रोमरुद्भिःस
खिभिःसह॥ अग्निस्तिग्मेनशोचिषा॥ तपआक्रांतमुष्णिहा॥ शिरस्तपःस्या
हितं॥ वैश्वानरस्यतेजसा॥ ऋतेनास्यनिवर्तये॥ सत्येनपरिवर्तये॥ तपसा
स्यानुवर्तये॥ शिवेनास्योपवर्तये॥ शग्मेनास्याभिवर्तये॥ तदृतंतत्सत्यं॥ तद्व्र
तंतच्छकेयं॥ तेनशकेयंतेनराध्यासं॥ योभस्याःपृथिव्यास्त्वचि॥ निवर्तय
त्योषधीः॥ अग्निरीशानओजसा॥ वरुणोधीतिभिःसह॥ इंद्रोमरुद्भिःसखि

भिः सह॥अग्निस्तिग्मेनशोचिषा॥ ४ ॥तपआक्रांतमुष्णिहा॥शिरस्तपस्या
हितं॥वैश्वानरस्यतेजसा॥ऋतेनास्यनिवर्तये॥सत्येनपरिवर्तये॥तपसा
स्यानुवर्तये॥शिवेनास्योपवर्तये॥शग्मेनास्याभिवर्तये॥तदृतंतत्सत्यं॥तद्
व्रतंतच्छकेयं॥तेनशकेयंतेनराध्यासं॥ ५ ॥एकंमासमुदसृजन्॥परमेष्ठीप्रजा
भ्यः॥तेनाग्निमह्नआवहत्॥अमृतंमर्त्येभ्यः॥प्रजामनुप्रजायसे॥तदुतेमर्त्या
मृतं॥येनमासाअर्धमासाः॥ऋतवःपरिवत्सराः॥येनतेतेप्रजापते॥ईजान
स्यन्यवर्तयन्॥ ६ ॥तेनाहमस्यब्रह्मणा॥निवर्तयामिजीवसे॥अग्निस्ति
ग्मेनशोचिषा॥तपआक्रांतमुष्णिहा॥शिरस्तपस्याहितं॥वैश्वानरस्यतेज
सा॥ऋतेनास्यनिवर्तये॥सत्येनपरिवर्तये॥तपसास्यानुवर्तये॥शिवेना

स्योपवर्तये॥शग्मेनास्याभिवर्तये॥तदृतंतत्सत्यं॥तद्व्रतंतच्छकेयं॥तेनशकेयंतेन
राध्यासं॥ ७ ॥परिवर्तयेसहाभिवर्तयउष्णिहाराध्यासंन्यवर्तयन्नुपवर्तयेचत्वा
रिच॥ ५ ॥देवावैयज्ञेकुर्वत॥तदसुराअकुर्वत॥तेसुराऊर्ध्वंपृष्ठेभ्योनापश्य
न्॥तेकेशानग्रेवपंत॥अथश्मश्रूणि॥अथोपपक्षौ॥ततस्तेवाचआयन्॥पराभ
वन्॥यस्यैवंवपंति॥अवाङेति॥ ९ ॥अथोपरैवभवति॥अथदेवाऊर्ध्वंपृष्ठेभ्यो
पश्यन्॥तउपपक्षावग्रेवपंत॥अथश्मश्रूणि॥अथकेशान्॥ततस्तेभवन्॥सुव
र्गंलोकमायन्॥यस्यैवंवपंति॥भवत्यात्मना॥अथोसुवर्गंलोकमेति॥ २ ॥अथै
तन्मनुर्वप्त्रेमिथुनमपश्यत्॥सश्मश्रूण्यग्रेवपत॥अथोपपक्षौ॥अथकेशान्॥
ततोवैसप्राजायतप्रजयापशुभिः॥यस्यैवंवपंति॥प्रप्रजयापशुभिर्मिथुनैर्जायते॥

ब्रा०प्र·
५९

देवासुराः संयत्ता आसन्॥ ते संवत्सरे व्यायच्छंत॥ तां देवाश्चातुर्मास्यैरेवाभिप्रा
युंजत॥ ३॥ वैश्वदेवेन चतुरो मासोऽवृंजतेंद्रराजानः॥ तान्छीर्षन्निचावर्तयंतप
रिच॥ वरुणप्रघासैश्चतुरो मासोऽवृंजत वरुणराजानः॥ तान्छीर्षन्निचावर्तयंतपरि
च॥ साकमेधैश्चतुरो मासोऽवृंजत सोमराजानः॥ तान्छीर्षन्निचावर्तयंतपरिच॥ या
संवत्सर उपजीवासीत्॥ तामेषामवृंजत॥ ततो देवा अभवन्॥ परासुराः॥ ४॥ य
एवंविद्वांश्चातुर्मास्यैर्यजते॥ भ्रातृव्यस्यैव मासो वृक्त्वा॥ शीर्षन्निचवर्तयतेप
रिच॥ येषा संवत्सर उपजीवा॥ वृंक्ते तां भ्रातृव्यस्य॥ क्षुधास्य भ्रातृव्यः पराभ
वति॥ लोहितायसेन निवर्तयते॥ यद्वा इमामग्निर्दहेत्तावागते निवर्तयति॥ ए
तद्वै देवानां रूपं हत्वा निवर्तयति॥ सा ततः श्वःश्वो भूयसी भवति॥ ५॥ प्रजायते॥

सा०
५९

८२

य एवंविद्वांल्लोहितायसेन निवर्तयते॥ एतद्वै देवरूपं कृत्वा निवर्तयते॥ स ततः श्व
श्वो भूयान्भवंतीति॥ प्रैव जायते॥ त्रेण्याशल्यानि वर्तयते॥ त्रीणि त्रीणि वै देवाना
मृक्थानि॥ त्रीणि छंदांसि॥ त्रीणि सवनानि॥ त्रय इमे लोकाः॥ ६॥ ऋध्यामेव तद्वी
र्य एषु लोकेषु प्रतितिष्ठति॥ यश्चातुर्मास्ययाज्यात्मनो नाध्येवेत॥ चतुर्षु चतुर्षु मा
सेषु निवर्तयेत॥ परोक्षमेव तद्देवेभ्य आत्मनो वदत्यखनाव्रस्काय॥ देवानां वा एष
आनीतः॥ यश्चातुर्मास्ययाजी॥ य एवंविद्वान्निचवर्तयतेपरिच॥ देवता एवाप्ये
ति॥ नास्य रुद्रः प्रजां पशूनभिमन्यते॥ ७॥ एते वै लयुंजता सुरा एतिलोकामन्य
ते॥ ८॥ आयुषः प्राणं संतनु॥ प्राणादपानं संतनु॥ अपानाद्व्यानं संतनु॥
व्यानाच्चक्षुः संतनु॥ चक्षुषः श्रोत्रं संतनु॥ श्रोत्रान्मनः संतनु॥ मनसो वाचं

संतनु॥ वाचआत्मानꣳसंतनु॥आत्मनः पृथिवीꣳ संतनु॥ पृथिव्याअंतरिक्षꣳसं
तनु॥अंतरिक्षाद्दिवꣳ संतनु॥दिवःसुवःसंतनु॥ १ ॥ पृथिव्याअंतरिक्षꣳसंतनु
द्वेच॥ ७ ॥ इंद्रोदधीचोअस्थभिः॥वृत्राण्यप्रतिष्कुतः॥जघाननवतीर्नव॥इच्छ
न्नश्वस्ययच्छिरः॥पर्वतेष्वपश्रितं॥तद्विदच्छर्यणावति॥अत्राहगोरमन्वत॥ना
मत्वष्टुरपीच्यं॥इत्थाचंद्रमसोगृहे॥इंद्रमिद्गाथिनोबृहत्॥ १ ॥इंद्रमर्केभि
रर्किणः॥इंद्रंवाणीरनूषत॥इंद्रइद्धर्योः सचा॥ संमिश्लआवचोयुजा॥इंद्रो
वज्रीहिरण्ययः॥इंद्रोदीर्घायचक्षसे॥आसूर्यꣳरोहयद्दिवि॥विगोभिरद्रि
मैरयत्॥ इंद्रवाजेषुनोअव॥ सहस्रप्रधनेषुच॥ २ ॥उग्रउग्राभिरूतिभिः॥
तमिंद्रंवाजयामसि॥ महेवृत्रायहंतवे॥ सवृषावृषभोभुवत्॥ इंद्रःसदामने

कृतः॥ओजिष्ठः सबलेहितः॥ द्युम्नीश्लोकी ससोम्यः॥गिरावज्रोनसंभृतः॥स
बलोअनपच्युतः॥ववक्षुरुग्रोअस्तृतः॥ ३ ॥ बृहच्चास्तृतः॥ ८ ॥देवासुराःसं
यत्ताआसन्॥ सप्रजापतिरिंद्रंज्येष्ठंपुत्रमपन्यधत्त॥ नेदेनमसुराबलीयाꣳ
सोहनन्निति॥प्रह्लादोहवैकायाधवः॥विरोचनꣳस्वंपुत्रमपन्यधत्त॥नेदेनं
देवाअहनन्निति॥तेदेवाअहन्ननिति॥तेदेवाः प्रजापतिमुपसमेत्योचुः॥ना
राजकस्ययुद्धमस्ति॥इंद्रमान्विच्छामेति॥तंयज्ञक्रतुभिरन्वैच्छन्॥ १ ॥तंयज्ञ
क्रतुभिर्नान्वविंदन्॥तमिष्टिभिरन्वैच्छन्॥तमिष्टिभिर्नान्वविंदन्॥तदिष्टीना
मिष्टित्वं॥ एष्टयोहवैनाम॥ ताइष्टयइत्याचक्षतेपरोक्षेण॥ परोक्षप्रियाइ
वहिदेवाः॥ तस्माएतमाग्नावैष्णमेकादशकपालंदीक्षणीयंनिरवपन्॥

ब्रा०प्र०
६३

तदंपहुत्वा तन्वत ॥ तान्पत्नीसंयाजांतउपानयन् ॥ २ ॥ ते तदंतमेव कृत्वोदद्रवन् ॥
ते प्रायणीयमभिसमारोहन् ॥ तदपहुत्या तन्वत ॥ तान्छंय्वंतउपानयन् ॥ ते तदंतमे
वकृत्वोदद्रवन् ॥ तआतिथ्यमभिसमारोहन् ॥ तदपहुत्या तन्वत ॥ तानिडांतउपा
नयन् ॥ ते तदंतमेवोदद्रवन् ॥ तस्मादेताएतदंताइष्टयः संतिष्ठंते ॥ ३ ॥ एवं ह
देवा अकुर्वत ॥ इति देवा अकुर्वत ॥ इत्युवैमनुष्याः कुर्वते ॥ ते देवाऊचुः ॥ यद्वाइद
मुच्चैर्यज्ञेनचराम ॥ तन्नोसुराः पाप्मानुविंदन्ति ॥ उपांशूपसदा चराम ॥ तथा नो सु
राः पाप्मा नानुवेत्स्यंतीति ॥ तउपांशूपसदमतन्वत ॥ तिस्रएव सामिधेनीरनूच्य ॥
॥ ४ ॥ स्रुवेणाघारमाघार्य ॥ तिस्रः पराचीराहुतीर्हुत्वा ॥ स्रुवेणोपसदं जुहवां
चक्रुः ॥ उग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहेति ॥ अशनयापिपासे ह

सांब
६१

ग्र

वाउग्रं वचः ॥ [illegible]रह स्म च त्वेषं वचः ॥ एतं ह वाव तच्चतुर्धाविहितं पाप्मानं देवा
अपजघ्निरे ॥ तथो एवैतद्देवं विद्या यजमानः ॥ तिस्रएव सामिधेनीरनूच्य ॥ स्रुवेणाघा
रमाघार्य ॥ ५ ॥ तिस्रः पराचीराहुतीर्हुत्वा ॥ स्रुवेणोपसदं जुहोति ॥ उग्रं वचो अपा
वधीं [illegible] त्वेषं वचो अपावधीं स्वाहेति ॥ अशनयापिपासे ह वाउग्रं वचः ॥ एनश्च वैरह
स्यं च त्वेषं वचः ॥ एतमेव तच्चतुर्धाविहितं पाप्मानं यजमानोपहते ॥ ते भिनीये वा हः
पशुमालभंत ॥ अह्न एव तद्देवा अवर्त्तिं पाप्मानं मृत्युमपजघ्निरे ॥ ते नाभिनीये वरात्रेः
प्राचरन् ॥ रात्रिया एव तद्देवा अवर्तिं पाप्मानं मृत्युमजघ्निरे ॥ ६ ॥ तस्मादभिनीये वा
हः पशुमालभेत ॥ अह्न एव तद्यजमानो वर्तिं पाप्मानं भ्रातृव्यानपदे नुते ॥ ते नाभिनी
ये वरात्रेः प्रचरेत ॥ रात्रिया एव तद्यजमानो वर्तिं पाप्मानं भ्रातृव्यानपनुदते ॥ सए

पं

ष उपवसथीये ह्येह्येते देवेभ्यः पशुरालभ्यते ॥ इयं वा अस्मिन्लोके यजमानः ॥ अस्थि च
मांसं च ॥ अस्थि चैव तेन मांसं च यजमानः संस्कुरुते ॥ ता वा एताः पंच देवताः ॥
अग्नीषोमावग्निर्मित्रावरुणौ ॥ ७ ॥ पंचपंचीवै यजमानः ॥ त्वङ्मांसं स्नावा
स्थि मज्जा ॥ एतमेवैतत्पंचधाविहितमात्मानं वरुणपाशान्मुंचति ॥ भेषजतायै नि
र्वरुणत्वाय ॥ तं सप्तभिश्छंदोभिः प्रातरद्धयन् ॥ तस्मात्सप्त चतुरुत्तराणि छंदांसि
प्रातरनुवाकेनूच्यंते ॥ तमेतयोपसमेत्योपासीदन् ॥ उपास्मिन्गायता नर इति ॥
तस्मादेतयाबहिष्पवमानमुपसद्यः ॥ ८ ॥ एतेन त्वेनयंस्तिष्ठंते नूच्यानूच्य
सुवर्णाघारमाघार्य रात्रिया एव तद्देवा अवर्तिं पाप्मानं मृत्युमपजघ्निरे मित्रा
वरुणौ न यंच ॥ ९ ॥ स समुद्र उत्तरतः प्राज्वलद्भूम्येतेन ॥ एष वाव स समुद्रः ॥

यच्चात्वालः ॥ एष उ वेव स भूम्यंतः ॥ यद्धिष्ण्यंतः ॥ तदेतत्त्रिशालं त्रिपुरुषं ॥ तस्मात्तं त्रि
वितस्तं खनंति ॥ स सुवर्णरजताभ्यां कुशीभ्यां परिगृहीत आसीत् ॥ तं यद्देवस्या अध्य
जनयन् ॥ तस्मादादित्यः ॥ १ ॥ अथ यत्सुवर्णरजताभ्यां कुशीभ्यां परिगृहीत आ
सीत् ॥ सास्य कौशिकता ॥ तं त्रिवृताभिप्रास्तुवत ॥ तं त्रिवृतादत्त ॥ तं त्रिवृताह
रन् ॥ यावती त्रिवृतो मात्रा ॥ तं पंचदशेनाभिप्रास्तुवत ॥ तं पंचदशेनाददत ॥ तं पंच
दशेनाहरन् ॥ यावती पंचदशस्य मात्रा ॥ २ ॥ तं सप्तदशेनाभिप्रास्तुवत ॥ तं स
प्तदशेनाददत ॥ तं सप्तदशेनाहरन् ॥ यावती सप्तदशस्य मात्रा ॥ तस्य सप्तद
शेन ह्रियमाणस्यैतेजोहरोऽपतत् ॥ तमेकविंशेनाभिप्रास्तुवत ॥ तमेकविंशे
नाददत ॥ तमेकविंशेनाहरन् ॥ यावत्येकविंशस्य मात्रा ॥ तेयत्त्रिवृतास्तुवते ॥ ३ ॥

आ० प्र०
६३

त्रिवृतैव तद्यजमानमाददते॥ तं त्रिवृतैव हरंति॥ यावती त्रिवृतो मात्रा॥ अग्निर्वै त्रिवृत्॥ यावद्वा अग्नेर्दहतो धूम उद्देत्यानुव्येति॥ तावती त्रिवृतो मात्रा॥ अग्नेरेवैनं तत्॥ मात्रांꣳ सायुज्यंꣳ सलोकतां गमयंति॥ अथ यत्पंचदशेन स्तुवते॥ पंचदशेनैव तद्यजमानमाददते॥ ४ ॥ तं पंचदशेनैव हरंति॥ यावती पंचदशस्य मात्रा॥ चंद्रमा वै पंचदशः॥ एष हि पंचदश्यामपक्षीयते॥ पंचदश्यामापूर्यते॥ चंद्रमस एवैनं तत्॥ मात्रांꣳ सायुज्यंꣳ सलोकतां गमयंति॥ अथ यत्सप्तदशेन स्तुवते॥ सप्तदशेनैव तद्यजमानमाददते॥ तꣳ सप्तदशेनैव हरंति॥ यावती सप्तदशस्य मात्रा॥ प्रजापतिर्वै सप्तदशः॥ प्रजापतेरेवैनं तत्॥ मात्रांꣳ सायुज्यंꣳ सलोकतां गमयंति॥ अथ यदेकविंꣳशेन स्तुवते॥ एकविंꣳशेनैव तद्यजमानमाद

सांब
६३

दते॥ तमेकविंꣳशेनैव हरंति॥ यावत्येकविंꣳशस्य मात्रा॥ असौ वा आदित्य एकविंꣳशः॥ आदित्यस्यैवैनं तत्॥ ६ ॥ मात्रांꣳ सायुज्यंꣳ सलोकतां गमयंति॥ ते कुम्भ्यौ॥ व्यघ्नन्॥ ते अहोरात्रे अभवतां॥ अहरेव सुवर्णाभवत्॥ रजता रात्रिः॥ स यदादित्य उदेति॥ एतामेव तत्सुवर्णां कुंभीमनुसंमेति॥ अथ यदस्तमेति॥ एतामेव तद्रजतां कुंभीमनुसंविशति॥ प्रह्लादो ह वै कायाधवः॥ विरोचनꣳ स्वं पुत्रमुदास्यत्॥ स प्रदरोऽभवत्॥ तस्मात्प्रदरादुदकं नाचामेत्॥ ७ ॥ आदित्यः पंचदशस्य मात्रा स्तुवते पंचदशेनैव तद्यजमानमादशेनैव हरंत्यादित्यस्यै वैनं तद्द्विशातिंच त्वारिंच॥ १० ॥ ये वै चत्वारः स्तोमाः॥ कृतं तत्॥ अथ ये पंच॥ कलिः सः॥ तस्माच्चतुष्टोमः॥ तच्चतुष्टोमस्य चतुष्टोमत्वं॥ त

तानि पंक्ति१

दाकुः॥ कतमानि ज्योतींषि॥ यएतस्य स्तोमा इति॥ त्रिवृत्पंचदशः सप्तदशएकविंशः॥ १॥ एतानि वाव तानि ज्योतींषि॥ यएतस्य स्तोमाः॥ सोब्रवीत्॥ सप्तदशेनह्रियमाणो व्यलेशिषि॥ भिषज्यत मेति॥ तमश्विनौ धानाभिरभिषज्यतां॥ पूषा करंभेण॥ भारती परिवापेण॥ मित्रावरुणौ पयस्यया॥ तदाहुः॥ २॥ यदश्विनोर्धानाः॥ पूष्णः करंभः॥ भारत्यै परिवापः॥ मित्रावरुणयोः पयस्याथ॥ कस्मादेतेषां हविषामिंद्रमेव यजंतीति॥ एताद्येनं देवता इति ब्रूयात्॥ एते ह विभिरभिषज्यंस्तस्मादिति॥ तं वसवोष्टाकपालेन प्रातःसवनेभिषज्यन्॥ रुद्रा एकादशकपालेन माध्यंदिने सवने॥ विश्वेदेवा द्वादशकपालेन तृतीयसवने॥ ३॥ सयदष्टाकपालान्प्रातःसवने कुर्यात्॥ एकादशकपालान्माध्यंदिने सवने॥ द्वादशकपालांस्तृतीयसवने॥ विलोमतद्यज्ञस्य क्रियेत॥ एकादशकपालानेव प्रातःसवने कुर्यात्॥ एकादशकपालान्माध्यंदिने सवने॥ एकादशकपालांस्तृतीयसवने॥ यज्ञस्य सलोमत्वाय॥ तदाहुः॥ यद्वसूनां प्रातःसवनं॥ रुद्राणां माध्यंदिनं सवनं॥ विश्वेषां देवानां तृतीयसवनं॥ अथ कस्मादेतेषां हविषामिंद्रमेव यजंतीति॥ एताद्येनं देवता इति ब्रूयात्॥ एते ह विभिरभिषज्यंस्तस्मादिति॥ ४॥ एकविंशआहुस्तृतीयसवने प्रातःसवनं पंच च॥ ११॥ तस्या वाचोवपादादभिभयुः॥ तमेतेषु सप्तसुछंदस्स्वश्रयन्॥ यदश्रयन्॥ तच्छ्रायंतीयस्य श्रायंतीयत्वं॥ यदवारयन्॥ तद्वारवंतीयस्य वारवंतीयत्वं॥ तस्या वा एवावपादादविभयुः॥ तस्मा एतानि सप्त चतुरुत्तराणि छंदांस्युपादधुः॥ तेषामति त्रीण्यरिच्यंत॥ न त्रीण्युदभवन्॥ १॥

ऐ॰आ॰प्र॰
६५

स बृहतीमेवास्पृशत्॥ द्वाभ्यामक्षराभ्यां॥ अहोरात्राभ्यामेव॥ तदाहुः॥ कतमा सा देवाक्षरा बृहती॥ यस्यां तत्प्रत्यतिष्ठत्॥ द्वादशपौर्णमास्यः॥ द्वादशाष्टकाः॥ द्वादशामावास्याः॥ एषा वाव सा देवाक्षरा बृहती॥ यस्यां तत्प्रत्यतिष्ठदिति॥ यानि वै छंदांसि सूर्यस्य त्वं तप यानि च नोदभवन्॥ तानि निर्वीर्याणि हीनान्यमन्यंत॥ साब्रवीद्बृहती॥ मामेव भूत्वा॥ मामुप संश्रयतेति॥ चतुर्भिरक्षरैरनुष्टुब्बृहतीं नोदभवत्॥ चतुर्भिरक्षरैः पंक्तिर्बृहतीमत्यरिच्यत॥ तस्यामेतानि चत्वार्यक्षराण्यपछिद्याादधात्॥ ३॥ ते बृहतीरेव भूत्वा॥ बृहतीमुपसमश्रयतां॥ अष्टाभिरक्षरैरुष्णिक्बृहतीं नोदभवत्॥ अष्टाभिस्त्रिष्टुब्बृहतीमत्यरिच्यत॥ तस्यामेतान्यष्टावक्षराण्यपछिद्यादधात्॥ ते बृहती एव भूत्वा॥ बृहतीमुप

२९

सांख्
६५

समश्रयतां॥ द्वादशभिरक्षरैर्गायत्री बृहतीं नोदभवत्॥ द्वादशभिरक्षरैर्जगती बृहतीमत्यरिच्यत॥ तस्यामेतानि द्वादशाक्षराण्यपछिद्यादधात्॥ ४॥ ते बृहती एव भूत्वा॥ बृहतीमुपसमश्रयतां॥ सोऽब्रवीत्प्रजापतिः॥ छंदांसि रथो मे भवत॥ युष्माभिरहमेतमध्वानमनुसंचराणीति॥ तस्य गायत्री च जगती च पक्षावभवतां॥ उष्णिक्च त्रिष्टुप्च प्रष्ट्यौ॥ अनुष्टुप्च पंक्तिश्च धुर्यौ॥ बृहत्येवोद्धिरभवत्॥ स एतं छंदोरथमास्थाय॥ एतमध्वानमनुसमचरत्॥ एतं ह वै छंदोरथमास्थाय॥

ग

एतमध्वानमनुसंचरति ॥ येनैष एतत्संचरति ॥ य एवं विद्वान्त्सोमेन
यजते ॥ य उ चैनमेवं वेद ॥ ५ ॥ अभवन्वा वसा देवाक्षरा बृहत्यद्धा
द्वादशाक्षराण्यपच्छिद्याद्धा दास्या यषट्च ॥ १२ ॥ अग्निः कृत्तिका
यत्पुण्यं देवस्य सवितुर्ब्रह्मवादिनः कत्यृतमेत देवा वा आयुषद्रुद्रोद
धीचो देवासुराः सप्रजापतिः स समुद्रोये वे चत्वारस्तस्यावाचो द्वा
दश ॥ १२ ॥ ६ ॥ अग्नेः कृत्तिका देवगृहा ऋतमेवं वैश्वदेवेन चा
तुरस्तेन दंतं पंचदशेन तेरहती द्विषष्टिः ॥ ६२ ॥ ओम् ॥

६ ॥ ६ ॥ ६ ॥ ६ श्री सांब सदाशिवार्पणमस्तु

॥ हरिः ओम् ॥ ॥ अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति ॥ ये प्रत्यंचः शम्या
या अवशीयंते ॥ तं नैर्ऋतमेककपालं ॥ इयं वा अनुमतिः ॥ इयं निर्ऋतिः ॥ नैर्ऋते
न पूर्वेण प्रचरति ॥ पाप्मानमेव निर्ऋतिं पूर्वां निरवदयते ॥ एककपालो भवति ॥
एकधैव निर्ऋतिं निरवदयते ॥ यदहुत्वा गार्हपत्य ईयुः ॥ १ ॥ रुद्रो भूत्वाग्नि
रनूत्थाय ॥ अध्वर्युं च यजमानं च हन्यात् ॥ वीहि स्वाहाहुतिं जुषाण इत्याह ॥
आहुत्यैवैनं शमयति ॥ नार्तिमार्छत्यध्वर्युर्न यजमानः ॥ एकोल्मुकेन यं
ति ॥ तद्धि निर्ऋत्यै भागधेयं ॥ इमां दिशं यंति ॥ एषा वै निर्ऋत्यै दिक् ॥ स्वायामेव
निर्ऋतिं निरवदयते ॥ २ ॥ स्वकृत इरिणे जुहोति प्रदरे वा ॥ एतद्वै निर्ऋत्या
रूपं ॥ आयतनं ॥ स्व एवायतने निर्ऋतिं निरवदयते ॥ एष ते निर्ऋते भाग इत्याह ॥

निर्ऋत्यै श एवैनां ॥ भूते हविष्मत्यसीत्याह ॥ भूतिमेवोपावर्तते ॥ मुंचेममंहस
इत्याह ॥ अंहस एवैनं मुंचति ॥ अंगुष्ठाभ्यां जुहोति ॥ ३ ॥ अंतत एव निर्ऋतिं
निरवदयते ॥ कृष्णं वासः कृष्णतूषं दक्षिणा ॥ एतद्वै निर्ऋत्यै रूपं ॥ रूपेणैव निर्ऋ
तिं निरवदयते ॥ अप्रतीक्षमायंति ॥ निर्ऋत्या अंतर्हित्यै ॥ स्वाहा नमो य इदं चका
रेति पुनरेत्य गार्हपत्ये जुहोति ॥ आहुत्यैव नमस्यंतो गार्हपत्यमुपावर्तंते ॥
आनुमतेनाष्टाचरति ॥ इयं वा अनुमतिः ॥ ४ ॥ इयमेवास्मै राज्यमनुमन्यते ॥
धेनुर्दक्षिणा ॥ इमामेव धेनुं कुरुते ॥ आदित्यं चरुं निर्वपति ॥ उभयीष्वेव प्रजा
स्वभिषिच्यते ॥ दैवीषु च मानुषीषु च ॥ वरो दक्षिणा ॥ वरो हि राज्यं समृध्यै ॥
आग्नावैष्णवमेकादशकपालं निर्वपति ॥ अग्निः सर्वा देवताः ॥ ५ ॥ विष्णुर्यज्ञः ॥

व

देवताश्चैव यज्ञं चावरुंधे ॥ वामनो वही दक्षिणा ॥ यद्वही ॥ तेनाग्नेयः ॥ यद्वामनः ॥
तेन वैष्णवः समृध्यै ॥ अग्नीषोमीयमेकादशकपालं निर्वपति ॥ अग्नीषोमाभ्यां
वा इंद्रो वृत्रमहन्निति ॥ यदग्नीषोमीयमेकादशकपालं निर्वपति ॥ ६ ॥ वार्त्रघ्न
मेवा विजित्यै ॥ हिरण्यं दक्षिणा समृध्यै ॥ इंद्रो वृत्रं हत्वा ॥ देवताभिश्चेंद्रियेण
च व्यार्ध्यत ॥ स एतमैंद्राग्नमेकादशकपालमपश्यत् ॥ तन्निरवपत् ॥ तेनैव स
देवताश्चेंद्रियं चावारुंध ॥ यदैंद्राग्नमेकादशकपालं निर्वपति ॥ देवताश्चैव ते
नेंद्रियं च यजमानोवरुंधे ॥ ऋषभो वही दक्षिणा ॥ ७ ॥ यद्वही ॥ तेनाग्नेयः ॥ यदृष
भः ॥ तेनैंद्रः समृध्यै ॥ आग्नेयमष्टाकपालं निर्वपति ॥ ऐंद्रं दधि ॥ यदाग्नेयो भवति ॥
अग्निर्वै यज्ञमुखं ॥ यज्ञमुखमेवर्द्धिं पुरस्ताद्धत्ते ॥ यदैंद्रं दधि ॥ ८ ॥ इंद्रियमे

ब्रा०प्र०
६८

वावरुंधे॥ ऋषभो वहो दक्षिणा॥ यद्वही॥ तेनाग्नेयः॥ यदृषभः॥ तेनैंद्रः समृध्यै॥
यावतीर्वै प्रजा ओषधीनामदुंता नामाश्नंन्॥ ताः पराभवन्॥ आग्रयणं भवति हु
ताद्याय॥ यजमानस्यापराभावाय॥ ९ देवा वा ओषधीषु पाजिमयुः॥ ता इंद्राग्नी
उदजयतां॥ तावेतमैंद्राग्नं द्वादशकपालं॥ निरवृणीतां॥ यदैंद्राग्नो भवत्युज्जित्यै॥
द्वादशकपालो भवति॥ द्वादशमासाः संवत्सरः॥ संवत्सरेणैवास्मा अन्नमवरुंधे॥
वैश्वदेवश्चरुर्भवति॥ वैश्वदेवं वा अन्नं॥ अन्नमेवास्मै स्वदयति॥ १० प्रथमजा व
त्सो दक्षिणा समृध्यै॥ सौम्यः श्यामाकं चरुं निर्वपति॥ सोमो वा अकृष्टपच्यस्य रा
जा॥ अकृष्टपच्यमेवास्मै स्वदयति॥ वासो दक्षिणा॥ सौम्यं हि देवतया वासः समृ
ध्यै॥ सरस्वत्यै चरुं निर्वपति॥ सरस्वते चरुं॥ मिथुनमेवावरुंधे॥ मिथुनौ गावौ द

सां ब्रा
६८

क्षिणा समृध्यै॥ एति वा एष यज्ञमुखादृध्याः॥ योग्नेर्देवताया एति॥ अष्टावेतानि हवीं
षि भवंति॥ अष्टाक्षरा गायत्री॥ गायत्रोग्निः॥ तेनैव यज्ञमुखादृध्या अग्नेर्देवतायै
नैति॥ ११ इषुर्निरवदयते गुष्ठाभ्यां जुहोत्यनुमतिं देवता निर्वपति वही दक्षिणा
यदैंद्रं दध्यपराभावाय स्वदयति गौ दक्षिणा समृध्यै षट्च ॥ वैश्वदेवेन वै प्र
जापतिः प्रजा असृजत॥ ताः सृष्टा न प्राजायंत॥ सोग्निरकामयत॥ अहमिमाः प्र
जनयेयमिति॥ स प्रजापतये शुचमदधात्॥ सोशोचत् प्रजामिच्छमानः॥ तस्मा
द्यं च प्रजा भुनक्ति यं च न॥ तावुभौ शोचतः प्रजामिच्छमानौ॥ तास्वग्निमप्यसृ
जत्॥ ता अग्निरध्यैत्॥ १ सोमो रेतोदधात्॥ सविता प्राजनयत्॥ सरस्वती
वाचमदधात्॥ पूषापोषयत्॥ ते वा एते त्रिः संवत्सरस्य प्रयुज्यंते॥ ये देवाः पुष्टिप

वै

श्रा०प्र
६९

तयः॥ संवत्सरो वै प्रजापतिः॥ संवत्सरेणैवास्मै प्रजाः प्राजनयत्॥ ताः प्रजा जाताम
रुतोघ्नन्॥ अस्मानपि न प्रायुक्षतेति॥ २॥ स एतं प्रजापतिर्मारुतꣳ सप्तकपाल
मपश्यत्॥ तन्निरवपत्॥ ततो वै प्रजाभ्योऽकल्पत॥ यन्मारुतो निरुप्यते॥ यज्ञस्य
क्लृप्त्यै॥ प्रजानामघाताय॥ सप्तकपालो भवति॥ सप्तगणा वै मरुतः॥ गणश एव
वास्मै विशं कल्पयति॥ स प्रजापतिरशोचत्॥ ३॥ याः पूर्वाः प्रजा असृक्षि॥ मरु
तस्ता अवधिषुः॥ कथमपराः सृजेयेति॥ तस्य शुष्म आण्डं भूतं निरवर्तत॥ तद्व्युद
हरत्॥ तदपोषयत्॥ तत्प्राजायत॥ आण्डस्य वा एतद्रूपं॥ यदामिक्षा॥ यद्व्युद्धरति॥
॥ ४॥ प्रजा एव तद्यजमानः पोषयति॥ वैश्वदेव्यामिक्षा भवति॥ वैश्वदेव्यो वै
प्रजाः॥ प्रजा एवास्मै प्रजनयति॥ वाजिनमानयति॥ प्रजास्वेव प्रजातासु रेतो

सां बु
६९

दधाति॥ द्यावापृथिव्य एककपालो भवति॥ प्रजा एव प्रजाता द्यावापृथिवीभ्यामुभ
यतः परिगृह्णाति॥ देवासुराः संयत्ता आसन्॥ सोऽग्निरब्रवीत्॥ ५॥ मामग्रे यजत॥
मया मुखेनासुराञ्जेष्यथेति॥ मां द्वितीयमिति सोमोऽब्रवीत्॥ मया राज्ञा जेष्यथेति॥
मां तृतीयमिति सविता॥ मया प्रसूता जेष्यथेति॥ मां चतुर्थमिति सरस्वती॥ इन्द्रि
यं वोऽहं धास्यामीति॥ मां पञ्चममिति पूषा॥ मया प्रतिष्ठया जेष्यथेति॥ ६॥ तेऽग्नि
ना मुखेनासुरानजयन्॥ सोमेन राज्ञा॥ सवित्रा प्रसूताः॥ सरस्वतीन्द्रियमदधा
त्॥ पूषा प्रतिष्ठासीत्॥ ततो वै देवा व्यजयन्त॥ यदेतानि हवीꣳषि निरुप्यन्ते वि
जित्यै॥ नोत्तरवेदिमुपवपति॥ पशवो वा उत्तरवेदिः॥ अजाता इव ह्येतर्हि पश
वः॥ ७॥ ऐदित्यशोचद्युद्धुरस्यब्रवीत्प्रतिष्ठया जेष्यथेत्येतर्हि पशावः॥ २॥

त्रिवृद्बर्हिर्भवति ॥ माता पिता पुत्रः ॥ तदेव तन्मिथुनं ॥ उल्बं गर्भो जरायु ॥ तदेव तन्मि
थुनं ॥ त्रेधा बर्हिः सन्नद्धं भवति ॥ त्रय इमे लोकाः ॥ एष्वेव लोकेषु प्रतितिष्ठति ॥ एक
धा पुनः सन्नद्धं भवति ॥ एक इव ह्ययं लोकः ॥ १ ॥ अस्मिन्नेव तेन लोके प्रतितिष्ठ
ति ॥ प्रस्तरो भवति ॥ प्रथमजामेव पुष्टिमवरुंधे ॥ प्रथमजो वत्सो दक्षिणा समृध्यै ॥
पृषदाज्यं गृह्णाति ॥ पशवो वै पृषदाज्यं ॥ पशूनेवावरुंधे ॥ पंचगृहीतं भवति ॥ पां
क्ता हि पशवः ॥ बहुरूपं भवति ॥ २ ॥ बहुरूपा हि पशवः समृध्यै ॥ अग्निं मंथंति ॥
अग्निमुखा वै प्रजापतिः प्रजा असृजत ॥ यदग्निं मंथंति ॥ अग्निमुखा एव तत्प्र
जा यजमानः सृजते ॥ न पत्न्या जाऽज्यं ते ॥ न वानूयाजाः ॥ अष्टौ हवींꣳषि ॥ द्वा
वाघारौ ॥ द्वावाज्यभागौ ॥ ३ ॥ त्रिꣳशत्संपद्यंते ॥ त्रिꣳशदक्षरा विराट् ॥ अन्नं

विराट् ॥ विराजैवान्नाद्यमवरुंधे ॥ यजमानो वा एककपालः ॥ तेज आज्यं ॥ यदेकक
पाल आज्यमानयति ॥ यजमानमेव तेजसा समर्धयति ॥ यजमानो वा एककपा
लः ॥ पशव आज्यं ॥ ४ ॥ यदेककपाल आज्यमानयति ॥ यजमानमेव पशुभिः
समर्द्धयति ॥ यदल्पमानयेत् ॥ अल्पा एनं पशवो भुंजंत उपतिष्ठेरन् ॥ यद्बह्वा
नयेत् ॥ बहव एनं पशवो भुंजंत उपतिष्ठेरन् ॥ बह्वानीयाविः पृष्ठं कुर्यात् ॥ बह
व एवैनं पशवो भुंजंत उपतिष्ठंते ॥ यजमानो वा एककपालः ॥ यदेककपालस्या
वद्येत् ॥ ५ ॥ यजमानस्यावद्येत् ॥ उद्वा माद्येद्यजमानः ॥ प्र वा मीयेत ॥ सकृदे
व होतव्यः ॥ सकृदिव हि सुवर्गो लोकः ॥ हुत्वाभिजुहोति ॥ यजमानमेव सुवर्गं लो
कं गमयित्वा ॥ तेजसा समर्द्धयति ॥ यजमानो वा एककपालः ॥ सुवर्गो लोक आहव

ब्रा॰प्र॰
७१
५

नीयः॥ ६॥ यदेककपालमाहवनीये जुहोति॥ यजमानमेव सुवर्गं लोकं गमयति॥
यदुत्तेन जुहुयात्॥ सुवर्गाल्लोकाद्यजमानमवविध्येत्॥ स्रुचा जुहोति॥ सुवर्ग
स्य लोकस्य समष्ट्यै॥ यत्प्राङ्पद्येत॥ देवलोकमभिजयेत्॥ यद्दक्षिणा पितृलोकं॥
यत्प्रत्यक्॥ ७॥ रक्षांसि यज्ञं हन्युः॥ यदुदङ्॥ मनुष्यलोकमभिजयेत्॥ प्र
तिष्ठितो होतव्यः॥ एककपालं वै प्रतितिष्ठन्तं द्यावापृथिवी अनुप्रतितिष्ठतः॥ द्या
वापृथिवी ऋतवः॥ ऋतून्यज्ञः॥ यज्ञं यजमानः॥ यजमानं प्रजाः॥ तस्मात्प्रतिष्ठि
तो होतव्यः॥ ८॥ वाजिनं यजति॥ अग्निर्वायुः सूर्यः॥ ते वै वाजिनः॥ तानेव त
द्यजति॥ अथो खल्वाहुः॥ छंदांसि वै वाजिन इति॥ तान्येव तद्यजति॥ ऋक्सा
मे वा इंद्रस्य हरी सोमपानौ॥ तयोः परिधय आधानं॥ वाजिनं भागधेयं॥ ९॥

सां ब्रू
७१

यदप्रहृत्य परिधीन्जुहुयात्॥ अंतराधानाभ्यां घासं प्रयच्छेत्॥ प्रहृत्य परिधीन्जु
होति॥ निराधानाभ्यामेव घासं प्रयच्छति॥ बर्हिषि विषिंचन्वाजिनमानयति॥ प्रजा
वै बर्हिः॥ रेतो वाजिनं॥ प्रजास्वेव रेतो दधाति॥ समुपहूय भक्षयंति॥ एतत्सोम
पीथा ह्येते॥ अथो आत्मन्नेव रेतो दधते॥ यजमान उत्तमो भक्षयति॥ पशवो वै
वाजिनं॥ यजमान एव पशून्प्रतिष्ठापयंति॥ १०॥ लोको बहुरूपं भवत्याज्यभा
गावाज्यमवद्यो दाहवनीयः प्रत्यक्तस्मात्प्रतितो होतव्यो भागधेयमेते चत्वा
रिच॥ ३॥ प्रजापतिः सविता भूत्वा प्रजा असृजत॥ ता एनमत्यमन्यंत॥ ता अ
स्मादपाक्रामन्॥ ता वरुणो भूत्वा प्रजा वरुणेनाग्राहयत्॥ ताः प्रजा वरुणगृही
ताः॥ प्रजापतिं पुनरुपाधावन्नाथमिच्छमानाः॥ स एतान्प्रजापतिर्वरुणप्रघा

सानपश्यत्॥ तान्निरवपत्॥ तैर्वै स प्रजा वरुणपाशादमुंचत्॥ यद्वरुणप्रघासा
निरुप्यंते॥ १ ॥प्रजानामवरुणग्राहाय॥ तासां दक्षिणो बाहुर्न्यक्न आसीत्॥
सव्यः प्रसृतः॥ स एतां द्वितीयां दक्षिणतो वेदिमुदहन्॥ ततो वै स प्रजानां दक्षिणं
बाहुं प्रासारयत्॥ यद्द्वितीयां दक्षिणतो वेदिमुद्धंति॥ प्रजानामेव तद्यजमानो द
क्षिणं बाहुं प्रसारयति॥ तस्माच्चातुर्मास्ययाज्यमुष्मिंल्लोक उभया बाहुः॥ यु
क्ताभिजितंं ह्यस्य॥ पृथुमात्राद्वेदी असंभिन्ने भवतः॥ २ ॥तस्मात्पृथुमात्रं व्यंसो॥
उत्तरस्यां वेद्यामुत्तरवेदिमुपवपति॥ पशवो वा उत्तरवेदिः॥ पशूनेवावरुंधे॥
अथो यज्ञपरुषो नंतरित्यै॥ एतद्ब्राह्मणान्येव पंच हवींषि॥ अथैष ऐंद्राग्नो
भवति॥ प्राणापानौ वा एतौ देवानां॥ यदिंद्राग्नी॥ यदैंद्राग्नो भवति॥ ३ ॥

प्राणापानावेवावरुंधे॥ ओजो बलं वा एतौ देवानां॥ यदिंद्राग्नी॥ यदैंद्राग्नो भवति॥
ओजो बलमेवावरुंधे॥ मारुत्यामिक्षा भवति॥ वारुण्यामिक्षा॥ मेषी च मेषश्च भव
तः॥ मिथुनादेव प्रजा वरुणपाशान्मुंचति॥ लोमशौ भवतो मेध्यत्वाय॥ ४ ॥शमी
पर्णान्युपवपति॥ घासमेवाभ्यामपियच्छति॥ प्रजापतिमन्नाद्यं नोपानमत्॥
स एतेन शतेध्मेन हविषान्नाद्यमवारुंध॥ यत्परःशतानि शमीपर्णानि भवंति॥
अन्नाद्यस्यावरुध्यै॥ सौम्यानि वै करीराणि॥ सौम्या खलु वा आहुतिर्दिवो वृष्टिं
च्यावयति॥ यत्करीराणि भवंति॥ सौम्ययैव वाहुत्या दिवो वृष्टिमवरुंधे॥ काय एक
कपालो भवति॥ प्रजानां कत्वाय॥ प्रतिपूरुषं करंभपात्राणि भवंति॥ जाता
एव प्रजा वरुणपाशान्मुंचति॥ एकमतिरिक्तं॥ जनिष्यमाणा एव प्रजा वरुणपा

श्रा०प्र०
७२

शान्मुंचति ॥ ५ ॥ निरुप्यंते भवतोभवति मेध्यत्वाय रुध्रेषट्च ॥ ४ ॥ उत्तरस्यां वेद्या
मुन्यानिहवींषिसादयति ॥ दक्षिणायांमारुती ॥ अपधुरमेवैनायुनक्ति ॥ अथोओ
जमेवासामवहरति ॥ तस्माद्ब्राह्मणश्चक्षत्राच्चविशोन्यतोपक्रमिणीः ॥ मारुत्यापूर्व
याप्रचरति ॥ अनृतमेवावयजते ॥ वारुण्योत्तरया ॥ अंततएववरुणमवयजते ॥
यद्देवाध्वर्युः करोति ॥ १ ॥ तत्प्रतिप्रस्थाताकरोति ॥ तस्माद्यच्छ्रेयान्करोति ॥
तत्पापीयान्करोति ॥ पत्नींवाचयति ॥ मेध्यामेवैनांकरोति ॥ अथोतपएवैना
मुपनयति ॥ यज्जारंसंतंनप्रब्रूयात् ॥ प्रियंज्ञातिंरुंध्यात् ॥ असौमेपश्चुरि
तिनिर्दिशेत् ॥ निर्दिश्यैवैनंवरुणपाशेनग्राहयति ॥ २ ॥ प्रघास्यान्हवाम
हइतिपत्नीमुदानयति ॥ अहूतैवैनां ॥ यत्पत्नीपुरोनुवाक्यामनुब्रूयात् ॥

सां०बू
७२

निर्वीर्योयजमानःस्यात् ॥ यजमानोन्वाह ॥ आत्मन्नेववीर्यंधत्ते ॥ उभौयाज्यां
सवीर्यत्वाय ॥ यज्ञामेयदरण्यइत्याह ॥ यथोदितमेववरुणमवयजते ॥ यज
मानदेवत्योवाआहवनीयः ॥ ३ ॥ भ्रातृव्यदेवत्योदक्षिणः ॥ यदाहवनीयेजुहु
यात् ॥ यजमानंवरुणपाशेनग्राहयेत् ॥ दक्षिणेग्नौजुहोति ॥ भ्रातृव्यमेव
वरुणपाशेनग्राहयति ॥ शूर्पेणजुहोति ॥ अन्नमेववरुणमवयजते ॥ शीर्ष
न्नधिनिधायजुहोति ॥ शीर्षतएववरुणमवयजते ॥ प्रत्यङ्तिष्ठंजुहोति ॥ ४ ॥
प्रत्यङ्ङेववरुणपाशान्निर्मुच्यते ॥ अक्रन्कर्मकर्मकृत इत्याह ॥ देवानृणंनिर
वदाय ॥ अनृणागृहानुपप्रैतीति वावैतदाह ॥ वरुणगृहीतंवाएतद्यज्ञस्य ॥
यद्यजुषागृहीतस्यातिरिच्यते ॥ तुषाश्चनिष्कासश्च ॥ तुषैश्चनिष्कासेन

चावभृथमवैति ॥ वरुणगृहीतेनैवयवरुणमवयजते ॥ अपोवभृथमवैति ॥ ५ ॥
अप्सुवैवरुणः ॥ साक्षादेववरुणमवयजते ॥ प्रतियुतोवरुणस्यपाशइत्याह ॥
वरुणपाशादेवनिर्मुच्यते ॥ अप्रतीक्षमायंति ॥ वरुणस्यांतर्हित्यै ॥ एधोस्येधि
षीमहीत्याह ॥ समिधैवाग्निंनमस्यंतउपायंति ॥ तेजोसितेजोमयिधेही
त्याह ॥ तेजएवात्मन्धत्ते ॥ ६ ॥ कुरोतियाहुत्याहवनीयस्तिष्ठंजुहोत्यपो
वभृथमवैतिधत्ते ॥ ७ ॥ देवासुराःसंयत्ताआसन् ॥ सोग्निरब्रवीत् ॥ ममे
यमनीकवतीतनूः ॥ तांप्रीणीत ॥ अथासुरानभिभविष्यथेति ॥ तेदेवाअग्न
येनीकवतेपुरोडाशमष्टाकपालंनिरवपन् ॥ सोग्निरनीकवान्त्स्वेनभाग
धेयेनप्रीतः ॥ चतुर्धानीकान्यजनयत ॥ ततोदेवाअभवन् ॥ परासुराः ॥ १ ॥

भागधेयेन

यदग्नयेनीकवतेपुरोडाशमष्टाकपालंनिर्वपति ॥ अग्निमेवानीकवंतंस्वे
नभागधेयेनप्रीणाति ॥ सोग्निरनीकवान्त्स्वेनप्रीतः ॥ चतुर्धानीकानिजनय
ते ॥ असौवाआदित्योग्निरनीकवान् ॥ तस्यरश्मयोनीकानि ॥ साकंसूर्येणो
द्यतानिर्वपति ॥ साक्षादेवास्माअनीकानिजनयति ॥ तेसुराःपराजितायंतः ॥
द्यावापृथिवीउपाश्रयन् ॥ २ ॥ तेदेवामरुद्भ्यःसांतपनेभ्यश्चरुंनिरवपन् ॥
तांद्यावापृथिवीभ्यामेवोभयतःसमतपन् ॥ यन्मरुद्भ्यःसांतपनेभ्यश्चरुंनि
र्वपति ॥ द्यावापृथिवीभ्यामेवतदुभयतोयजमानोभ्रातृव्यान्त्संतपति ॥
मध्यंदिनेनिर्वपति ॥ तर्हिहितेक्ष्णिष्ठंतपति ॥ चरुर्भवति ॥ सर्वतएवैनान्
त्संतपति ॥ तेदेवाश्वोविजयिनःसंतः ॥ सर्वासांदुग्धेगृहमेधीयंचरुंनिरवपन् ॥

ब्रा०प्र०
७५

॥ ३ ॥ आशिताएवाद्योपवसाम ॥ कस्यवाहेदं ॥ कस्यवाश्वोभवितेति ॥ सश्च
तोभवत् ॥ तस्याकृतस्युनाश्नंन् ॥ नुहिदेवाअकृतस्याश्नंति ॥ तेब्रुवन् ॥ कस्मा
इमंहोष्यामइति ॥ मरुद्भ्योगृहमेधिभ्यइत्यब्रुवन् ॥ तंमरुद्भ्योगृहमेधिभ्योजुहवुः ॥ ४ ॥
ततोदेवाअभवन् ॥ परासुराः ॥ यस्यैवंविदुषोमरुद्भ्योगृहमेधिभ्योगृहेजुह्वति ॥
भवत्यात्मना ॥ परास्यभ्रातृव्योभवति ॥ यद्वैयज्ञस्यपाकत्राक्रियते ॥ पश्चव्यं
तत् ॥ पाकत्रावाएतत्क्रियते ॥ यन्नेध्माबर्हिर्भवति ॥ नसामिधेनीरन्वाह ॥ ५ ॥
नप्रयाजाइज्यंते ॥ नानूयाजाः ॥ यएवंवेद ॥ पशुमान्भवति ॥ आज्यभागौय
जति ॥ यज्ञस्यैवचक्षुषीनांतरेति ॥ मरुतोगृहमेधिनोयजति ॥ भागधेये
नैवैनान्त्समर्धयति ॥ अग्निंस्विष्टकृतंयजति प्रतिष्ठित्यै ॥ इडांतोभवति ॥

सां०ब्रा०
७५

पशवोवाइडा ॥ पशुष्वेवोपरिष्टात्प्रतितिष्ठति ॥ ६ ॥ असुरभ्यश्चयन्गृहमेधीयं
चरुन्जुहवुरन्वाहेडांतोभवतीद्वेच ॥ ६ ॥ यत्पत्नीगृहमेधीयस्याश्नीया
त् ॥ गृहमेध्येवस्यात् ॥ वित्तस्ययज्ञस्त्वृध्येत ॥ यन्नाश्नीयात् ॥ अगृहमेधीस्या
त् ॥ नास्ययज्ञोव्यृध्येत ॥ प्रतिवेशंपचेयुः ॥ तस्याश्नीयात् ॥ गृहमेध्येवभवति ॥
नास्ययज्ञोव्यृध्यते ॥ १ ॥ तेदेवागृहमेधीयेष्ट्वा ॥ आशितात्भवन् ॥ आंज
नाभ्यंजत ॥ अनुवत्सानवासयन् ॥ तेभ्योसुराःक्षुधंप्राहिण्वन् ॥ सादेवेषुलो
कमवित्वा ॥ असुरान्पुनरगच्छत् ॥ गृहमेधीयेनेष्ट्वा ॥ आशिताभवंति ॥ आंज
तेभ्यंजते ॥ २ ॥ अनुवत्सान्वासयंति ॥ भ्रातृव्यायैवतद्यजमानःक्षुधंप्रहि
णोति ॥ तेदेवागृहमेधीयेनेष्ट्वा ॥ इंद्रायनिष्कासन्निदधुः ॥ अस्मानेवश्वइंद्रो

ब्रा०प्र०
७६

निहितभागउपावर्तितेति॥ नाग्निंद्रोनिहितभागउपावर्तत॥ गृहमेधीयेनेष्ट्वा॥
इंद्रायनिष्कासन्निदध्यात्॥ इंद्रएवैनंनिहितभाउपावर्तते॥ गार्हपत्येजुहोति॥
॥ ३ ॥ भागधेयेनैवैनं समर्धयति॥ ऋषभमाह्वयति॥ वृषट्कारएवास्यसः॥ अ
थोइंद्रियमेवतद्वीर्यंयजमानोभ्रातृव्यस्यवृंक्ते॥ इंद्रोवृत्रं हत्वा॥ परांपरावत
मगच्छत्॥ अपाराधमितिमन्यमानः॥ सोब्रवीत्॥ कइदंवेदिष्यतीति॥ तेब्रुवन्म
रुतोवरंवृणामहै॥ ४ ॥ अथवयंवेदाम॥ अस्मभ्यमेवप्रथमं हविर्निरुप्या
तादिति॥ तएनमध्यक्रीडन्॥ तत्क्रीडिनांक्रीडित्वं॥ यन्मरुद्भ्यः क्रीडिभ्यः प्र
थमं हविर्निरुप्यतेविजित्यै॥ साकंसूर्येणोद्यतानिर्वपति॥ एतस्मिन्वैलो
कइंद्रोवृत्रमहन्त्समृध्यै॥ एतद्ब्राह्मणान्येवपंचहवींषि॥ एतद्ब्राह्मणऐंद्राग्नः॥

सांव
७६

अथैषऐंद्रश्चरुर्भवति॥ ५ ॥ उद्धारंवाएतमिंद्र उदहरत॥ वृत्रं हत्वा॥ अ
न्यासुदेवतास्वधि॥ यदेषऐंद्रश्चरुर्भवति॥ उद्धारमेवतंयजमानउद्धरते॥ अन्या
सुप्रजास्वधि॥ वैश्वकर्मणएककपालोभवति॥ विश्वान्येवतेनकर्माणियज
मानोवरुंधे॥ ६ ॥ ऋध्यतेभ्यंजतेजुहोति रण्णामहेभवत्स्विष्टोच॥ ७ ॥ वैश्व
देवेनवैप्रजापतिः प्रजाअसृजत॥ तावरुणप्रघासैर्वरुणपाशादमुंचत्॥ सा
कमेधैः प्रत्यस्थापयत्॥ त्र्यंबकैरुद्रंनिरवादयत॥ पितृयज्ञेनसुवर्गंलोकमग
मयत्॥ यद्वैश्वदेवेनयजते॥ प्रजाएवतद्यजमानः सृजते॥ तावरुणप्रघा
सैर्वरुणपाशान्मुंचति॥ साकमेधैः प्रतिष्ठापयति॥ त्र्यंबकैरुद्रंनिरवदय
ते॥ ८ ॥ पितृयज्ञेनसुवर्गंलोकंगमयति॥ दक्षिणतः प्राचीनावीती निर्वप

श्री०प्र०
७७

ति॥ दक्षिणा वृद्धिपितृणां॥ अनादृत्य तत्॥ उत्तरत एवोपवीय निर्वपेत्॥ उभ
ये हि देवाश्च पितरश्चेज्यंते॥ अथोय देव दक्षिणा ऊर्द्धं धिश्रयति॥ तेनेदक्षिणा
वृत्॥ सोमाय पितृमते पुरोडाशं षट्कपालं निर्वपति॥ संवत्सरो वै सोमः पितृमा
न्॥ २॥ संवत्सरमेव प्रीणाति॥ पितृभ्यो बर्हिषद्भ्यो धानाः॥ मासा वै पितरो ब
र्हिषदः॥ मासानेव प्रीणाति॥ यस्मिन्वा ऋतौ पुरुषः प्रमीयते॥ सोस्यामुष्मिंल्लो
के भवति॥ बहुरूपा धाना भवंति॥ अहोरात्राणामभिजित्यै॥ पितृभ्योग्निष्वात्ते
भ्यो मंथं॥ अर्धमासा वै पितरोग्निष्वात्ताः॥ ३॥ अर्धमासानेव प्रीणाति॥ अभि
वान्यायै दुग्धे भवति॥ सा हि पितृदेवत्यं दुहे॥ यत्पूर्णं॥ तन्मनुष्याणां॥ उपर्यर्धो दे
वानां॥ अर्धः पितृणां॥ अर्ध उपमंथति॥ अर्धो हि पितृणां॥ एकयोपमंथति॥ ४॥

सां०वृ०
७७

एका हि पितृणां॥ दक्षिणोपमंथति॥ दक्षिणा वृद्धि पितृणां॥ अनारभ्योपमंथति॥
तद्धि पितृन् गच्छति॥ इमां दिशं वेदिमुद्धंति॥ उभये हि देवाश्च पितरश्चेज्यंते॥ चतु
स्रक्तिर्भवति॥ सर्वा ह्यनुदिशः पितरः॥ अखाता भवति॥ ५॥ खाता हि देवानां॥
मध्यतोग्निराधीयते॥ अंततो हि देवानामाधीयते॥ नषडुयानि ध्मा इध्मा इवति
व्यावृत्त्यै॥ परिश्रयति॥ अंतर्हितो हि मनुष्यलोकात्॥ यत्परुषि दिनं॥ तद्देवा
नां॥ यदंतरा॥ तन्मनुष्याणां॥ ६॥ यत्समूलं॥ तत्पितृणां॥ समूलं बर्हिर्भवति व्या
वृत्त्यै॥ दक्षिणा स्तृणाति॥ दक्षिणा वृद्धि पितृणां॥ त्रिः पर्येति॥ तृतीये वा इतो
लोके पितरः॥ तानेव प्रीणाति॥ त्रिः पुनः पर्येति॥ षट् संपद्यंते॥ ७॥ षड्वा
ऋतवः॥ ऋतूनेव प्रीणाति॥ यत्प्रस्तरं यजुषा गृह्णीयात्॥ प्रमायुकोयजमा

नःस्यात्॥ यन्नगृह्णीयात्॥ अनायतनःस्यात्॥ तूष्णीमेवन्यस्येत्॥ नप्रमा
युकोभवति॥ नानायतनः॥ यत्रीन्परिधीन्परिदध्यात्॥ ८ ॥ मृत्युनायजमा
नंपरिगृह्णीयात्॥ यन्नपरिदध्यात्॥ रक्षांसियज्ञंहन्युः॥ द्वौपरिधीपरिदधा
ति॥ रक्षसामपहत्यै॥ अथोमृत्योरेवयजमानमुत्सृजति॥ यत्रीणित्रीणिहु
वींष्युदाहरेयुः॥ त्रयस्त्रयएषांसाकंप्रमीयेरन्॥ एकैकमनूचीनान्युदाह
रंति॥ एकैकएवैषामन्वंचःप्रमीयंते॥ कशिपुकशिपव्याय॥ उपबर्हणमु
पबर्हण्याय॥ आंजनमांजन्याय॥ अभ्यंजनमभ्यंजन्याय॥ यथाभागमेवैना
न्प्रीणाति॥ ९ ॥ निरवदयतेपितृमानग्निष्वात्ताएकयोपमंथतस्वात्ताभव
तिमनुष्याणांपद्यंतेपरिदध्यान्मीयंतेपंचच॥ ८ ॥ अग्नयेदेवेभ्यःपितृ

भ्यःसमिध्यमानायानुब्रूहीत्याह॥ उभयेहिदेवाश्चपितरश्चेज्यंते॥ एकामन्वाह॥
एकाहिपितॄणां॥ त्रिरन्वाह॥ त्रिर्हिदेवानां॥ आघारावाघारयति॥ यज्ञपरुषोरनंतरि
त्यै॥ नार्षेयंवृणीते॥ नहोतारं॥ १ ॥ यदार्षेयंवृणीत॥ यद्धोतारं॥ प्रमायुकोयजमा
नःस्यात्॥ प्रमायुकोहोता॥ तस्मान्नवृणीते॥ यजमानस्यहोतुर्गोपीथाय॥ अपबर्हि
षःप्रयाजान्यजति॥ प्रजावैबर्हिः॥ प्रजाएवमृत्योरुत्सृजति॥ आज्यभागौयजति॥ २ ॥
यज्ञस्यैवचक्षुषीनांतरेति॥ प्राचीनावीतीसोमंयजति॥ पितृदेवत्याहि॥ एषाहुतिः॥
पंचकृत्वोवद्यति॥ पंचह्येतादेवताः॥ द्वेपुरोनुवाक्ये॥ याज्यादेवता॥ वषट्कारः॥ ताए
वप्रीणाति॥ संततमवद्यति॥ ३ ॥ ऋतूनांसंतत्यै॥ द्वेदेवेभ्यःपूर्वयापुरोनुवाक्य
याह॥ प्रणयतिद्वितीयया॥ गमयतियाज्यया॥ तृतीयेवाइतोलोकेपितरः॥ अह्न

एवैनान्पूर्वयापुरोनुवाक्ययात्यानयति॥ रात्रियेद्वितीयया॥ एवैनान्याज्ययाग
मयति॥ दक्षिणतोवदाय॥ उदङतिक्रामतिव्यावृत्त्यै॥ ४ ॥ओंस्वधेत्याश्रावयति॥
अस्तुस्वधेतिप्रत्याश्रावयति॥ स्वधानमइतिवषट्करोति॥ स्वधाकारोहिपितृ
णां॥ सोममग्रेयजति॥ सोमप्रयाजाहिपितरः॥ सोमंपितृमंतंयजति॥ संवत्स
रोवैसोमःपितृमान्॥ संवत्सरमेवतद्यजति॥ पितृन्बर्हिषदोयजति॥ ५ ॥
येवैयज्वानः॥ तेपितरोबर्हिषदः॥ तानेवतद्यजति॥ पितृनग्निष्वात्तान्यजति॥
येवाअयज्वानोगृहमेधिनः॥ तेपितरोग्निष्वात्ताः॥ तानेवतद्यजति॥ अग्निंक
व्यवाहनंयजति॥ यएवपितृणामग्निः॥ तमेवतद्यजति॥ ६ ॥अथोयथाग्निं
स्विष्टकृतंयजति॥ तादृगेतत्॥ एतत्तेततयेचत्वामन्वितितिसृषुसृक्तीषुनिद

धाति॥ तस्मादातृतीयात्पुरुषान्नामनगृह्णंति॥ एतावंतोहीज्यंते॥ अत्रपितरो
यथाभागंमंदध्वमित्याह॥ हीकाहिपितरः॥ उदंचोनिष्क्रामंति॥ एषावैमनुष्या
णांदिक्॥ स्वामेवतद्दिशमनुनिष्क्रामंति॥ ७ ॥आहवनीयमुपतिष्ठंते॥ न्येवास्मै
तह्नुवते॥ यत्तस्याहवनीये॥ अथान्यत्रचरंति॥ आतमितोरुपतिष्ठंते॥ अग्निंसु
वोपद्रष्टारंकृत्वा॥ पितृन्निरवदयंते॥ अंतंवाएतेप्राणानांगच्छंति॥ यंआतमितो
रुपतिष्ठंते॥ सुसंदृशंत्वावयमित्याह॥ ८ ॥प्राणोवैसुसंदृक्॥ प्राणमेवात्म
न्दधते॥ योजान्विंद्रतेहरीइत्याह॥ प्राणमेवपुनरयुक्त॥ अक्षन्नमीमदंतहीति
गार्हपत्यमुपतिष्ठंते॥ अक्षन्नमीमदंताथत्वोपतिष्ठामहइतिवावैतदाह॥ अ
मीमदंतपितरोसोम्या इत्यभिप्रपद्यंते॥ अमीमदंतपितरोथत्वाभिप्रपद्यामह

ब्रा०त्र०
८०

इति वा एतेन दाह ॥ अपः परिषिंचति ॥ मार्जयत्येवैनान् ॥ ९ ॥ अथो तर्पयत्येव ॥
तृप्यति प्रजया पशुभिः ॥ य एवं वेद ॥ अप बर्हिषावनूयाजौ यजति ॥ प्रजा वै बर्हिः ॥
प्रजा एव मृत्योरुत्सृजति ॥ चतुरः प्रयाजान्यजति ॥ द्वावनूयाजौ ॥ षट् संपद्यंते ॥ ष
ड्वा ऋतवः ॥ १० ॥ ऋतूनेव प्रीणाति ॥ न पत्न्यन्वास्ते ॥ न संयाजयंति ॥ यत्पत्न्यन्वा
सीत ॥ यत्संयाजयेयुः ॥ प्रमायुका स्यात् ॥ तस्मान्नान्वास्ते ॥ न संयाजयंति ॥ प
त्नियै गोपीथाय ॥ ११ ॥ होतारमाज्यभागीयजति संततमवद्यति व्याहृत्यै बर्हिष
दो यजति तमेव तद्यजत्यनुनिष्क्रामंत्याहिनान्तृतवो नवच ॥ ९ ॥ प्रतिपूरुष
मेककपालान्निर्वपति ॥ जाता एव प्रजा रुद्रान्निरवदयते ॥ एकमतिरिक्तं ॥
जनिष्यमाणा एव प्रजा रुद्रान्निरवदयते ॥ एककपाला भवंति ॥ एकधैव रुद्रं

सां०बु
८०

निरवदयते ॥ नाभिघारयति ॥ यदभिघारयेत् ॥ अंतरवचारिणꣳ रुद्रं कुर्यात् ॥ एको
ल्मुकेन यंति ॥ स ॥ तद्धि रुद्रस्य भागधेयं ॥ इमां दिशं यंति ॥ एषा वै रुद्रस्य दिक् ॥ स्वा
यामेव दिशि रुद्रं निरवदयते ॥ रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत ॥ असौ ते प
शुरिति निर्दिशेद्यं द्विष्यात् ॥ यमेव द्वेष्टि ॥ तमस्मै पशुं निर्दिशति ॥ यदि न द्विष्यात् ॥
आखुस्ते पशुरिति ब्रूयात् ॥ २ ॥ न ग्राम्यान्पशून्हिनस्ति ॥ नारण्यान् ॥ चतुष्प
थे जुहोति ॥ एष वा अग्नीनां पड्बीशो नाम ॥ अग्निवत्येव जुहोति ॥ मध्यमेन पर्णेन जु
होति ॥ स्रुग्घ्येषा ॥ अथो खलु ॥ अंतमेनैव होतव्यं ॥ अंतत एव रुद्रं निरवदयते ॥ ३ ॥
एष ते रुद्र भागः सह स्वस्राम्बिकयेत्याह ॥ शरद्वा अस्याम्बिका स्वसा ॥ तया वा एष हिन
स्ति ॥ यꣳ हिनस्ति ॥ तयैवैनꣳ सह शमयति ॥ भेषजं गव इत्याह ॥ यावंत एव ग्राम्याः
पशवः ॥ तेभ्यो भेषजं करोति ॥ अवाम्ब रुद्रमदिमहीत्याह ॥ आशिषमेवैतामाशास्ते ॥ ४ ॥

ब्रा०प्र०६
८१

त्र्यंबकं यजामहइत्याह ॥ मृत्योर्मुक्षीय मामृतादिति वावैतदाह ॥ उत्किरंति ॥ भगस्य
लीप्संते ॥ मूते कृत्वासजंति ॥ यथा जनं यते वसं करोति ॥ तादृगेव तत् ॥ एष ते रुद्र भाग
इत्याह निरवत्त्यै ॥ अप्रतीक्षमायंति ॥ अपः परिषिंचति ॥ रुद्रस्यांतर्हित्यै ॥ प्रवाए
तेऽस्माल्लोकाच्च्यवंते ॥ ये त्र्यंबकैश्चरंति ॥ आदित्यं चरुं पुनरेत्य निर्वपति ॥ इयं वा
अदितिः ॥ अस्यामेव प्रतितिष्ठंति ॥ ८ ॥ यं तिब्रूयान्निरवदयते शास्तिसिंच
तिषट्च ॥ १० ॥ ॥ अनुमत्यै वैश्वदेवेन ताः सृष्टास्त्रिवृत्प्रजापतिः सावि
तोत्तरस्यां देवासुराः सोऽग्निर्यपत्नीवैश्वदेवेन तावरुणप्रघासैरग्नये देवेभ्यः
पितृभ्यः प्रतिपूरुषं दश ॥ २० ॥ ॥ अनुमत्यै प्रथमजो वत्सो बहु
रूपा हि पुरावः त्तस्मात्प्रथमात्रेय दग्नये नीकवत तऽद्वारं वा अग्नये देवेभ्यः
प्रतिपूरुषं पंच सप्ततिः ॥ ७८ ॥ सांब ॥ ३७मू ॥ राम ॥

सांब
८१

८१

॥ हरिः ओम् ॥ ॥ एतद्ब्राह्मणान्येव पंच हवींषि ॥ अथैंद्राग्नशुनासीरीयपुरोडाशं
द्वादशकपालं निर्वपति ॥ संवत्सरो वा इंद्रः शुनासीरः ॥ संवत्सरेणैवास्मा अन्नमवरुं
धे ॥ वायव्यं पयो भवति ॥ वायुर्वै वृष्ट्यै प्रदापयिता ॥ स एवास्मै वृष्टिं प्रदापयति ॥
सौर्य एककपालो भवति ॥ सूर्येण वा अमुष्मिंल्लोके वृष्टिर्धृता ॥ स एवास्मै वृष्टिं नि
यच्छति ॥ १ ॥ द्वादशगवं सीरं दक्षिणा समृद्ध्यै ॥ देवासुराः संयत्ता आसन् ॥ ते
देवा अग्निमब्रुवन् त्वया वीरेणासुरानभिभवामेति [illegible] सोऽब्रवीत् [illegible] त्रेधा हेमंत
[illegible] ॥ स त्रेधात्मानं व्यकुरुत ॥ अग्निं तृतीयं ॥ रुद्रं तृतीयं ॥ वरुणं
तृतीयं ॥ २ ॥ सोऽब्रवीत् ॥ क इदं तुरीयमिति ॥ अहमितींद्रोऽब्रवीत् ॥ सं तु सृजाव
हा इति ॥ तौ समसृजेतां ॥ स इंद्रस्तुरीयमभवत् ॥ यदिंद्रस्तुरीयमभवत् ॥ तदिंद्र
तुरीयस्येंद्रतुरीयत्वं ॥ ततो वै देवा व्यजयंत ॥ यदिंद्रतुरीयं निरुप्यते विजित्यै ॥ ३ ॥

वद्दिनी धेनुर्दक्षिणा॥ यद्दूहिनी॥ तेनाग्नेयी॥ यच्छ्रोणा॥ तेन रौद्री॥ यद्धेनुः॥ तेनैन्द्री॥ य
यत्स्त्री सती दान्ता॥ तेन वारुणी समृद्ध्यै॥ प्रजापतिर्यज्ञमसृजत॥ ४ ॥ तꣳ सृष्टꣳ
रक्षाꣳस्यजिघाꣳसन्॥ स एताः प्रजापतिरात्मनो देवता निरमिमीत॥ ताभिर्वै स दि
ग्भ्यो रक्षाꣳसि प्राणुदत॥ यत्पञ्चावत्तीयं जुहोति॥ दिग्भ्य एव तद्यजमानो रक्षाꣳ
सि प्रणुदते॥ समूढꣳ रक्षः संदग्धꣳ रक्ष इत्याह॥ रक्षाꣳस्येव संदहति॥ अग्नये र
क्षोघ्ने स्वाहेत्याह॥ देवताभ्य एव विजिग्यानाभ्यो भागधेयं करोति॥ प्रष्टिवाही र
थो दक्षिणा समृद्ध्यै॥ ५ ॥ इन्द्रो वृत्रꣳ हत्वा॥ असुरान्पराभाव्य॥ नमुचिमासुरं
नालभत॥ तꣳ शच्याऽगृह्णात्॥ तौ समलभेताम्॥ सोऽस्मादभिशुनतरोऽभवत्॥
सोऽब्रवीत्॥ संधाꣳ संदधावहै॥ अथ त्वाऽवस्रक्ष्यामि॥ न मा शुष्केण नार्द्रेण हनः॥
॥ ६ ॥ न दिवा न नक्तमिति॥ स एतमपां फेनमसिञ्चत्॥ न वा एष शुष्को नार्द्रो

व्युष्टाऽऽसीत्॥ अनुदितः सूर्यः॥ न वा एतद्दिवा न नक्तम्॥ तस्यैतस्मिन्लोके॥ अपां
फेनेन शिर उदवर्तयत्॥ तदेनमन्ववर्तत॥ मित्रद्रुगिति॥ ७ ॥ स एतानपामा
र्गानजनयत्॥ तान् जुहोत्॥ तैर्वै स रक्षाꣳस्यपाहत॥ यदपामार्गहोमो भवति॥
रक्षसामपहत्यै॥ एकोल्मुकेन यन्ति॥ तद्धि रक्षसां भागधेयम्॥ इमां दिशं यन्ति॥
दिक्॥ एषा वै रक्षसां दिक्॥ स्वायामेव दिशि रक्षाꣳसि हन्ति॥ ८ ॥ स्वकृत इरिणे जु
होति प्रदरे वा॥ एतद्वै रक्षसामायतनम्॥ स्व एवायतने रक्षाꣳसि हन्ति॥ पर्ण
मयेन स्रुवेण जुहोति॥ ब्रह्म वै पर्णः॥ ब्रह्मणैव रक्षाꣳसि हन्ति॥ देवस्य त्वा स
वितुः प्रसव इत्याह॥ सवितृप्रसूत एव रक्षाꣳसि हन्ति॥ हतꣳ रक्षोऽवधिष्म
रक्ष इत्याह॥ रक्षसाꣳ स्तृत्यै॥ यद्वस्ते तद्दक्षिणा निरवत्यै॥ अप्रतीक्षमायन्ति॥

ब्रा०प्र०
८२

रक्षसामंतर्हित्यै॥ ९ ॥यच्छति वरुणं ततीयंविजित्या असृजत समृध्यैहनो
मित्र दुर्गति हंतिरुत्स्यै त्रीणि च॥ १ ॥धात्रेपुरोडाशं द्वादशकपालं निर्वपति॥
संवत्सरो वै धाता॥ संवत्सरेणे वास्मै प्रजाः प्रजनयति॥ अन्वेवास्मा अनुमति
र्मन्यते॥ राते राका॥ प्रसिनीवाली जनयति॥ प्रजास्वेव प्रजाता सु कुहूवा चं
दधाति॥ मिथुनौ गावौ दक्षिणा समृध्यै॥ आग्नावैष्णवमेकादशकपालं निर्व
ति॥ ऐंद्रावैष्णवमेकादशकपालं॥ १ ॥वैष्णवं त्रिकपालं॥ वीर्यं वा अग्निः॥
वीर्य मिंद्रः॥ वीर्यं विष्णुः॥ प्रजा एव प्रजाता वीर्ये प्रतिष्ठापयति॥ तस्मात्प्रजा वी
र्यावती॥ वामन ऋषभो वही दक्षिणा॥ यद्वही॥ तेनाग्नेयः॥ यदृषभः॥ २ ॥ते
नैंद्रः॥ यद्वामनः॥ तेन वैष्णवः समृध्यै॥ अग्नीषोमीयमेकादशकपालं निर्वपति॥

सां ब्रू
८२

इंद्रासोमीयमेकादशकपालं॥ सौम्यं चरुं॥ सोमो वै रेतोधाः॥ अग्निः प्रजानां प्रज
नयिता॥ वृद्धानामिंद्रः प्रदापयिता॥ सोम एवास्मै रेतो दधाति॥ ३ ॥अग्निः प्रजां
प्रजनयति॥ वृद्धामिंद्रः प्रजनयति॥ बभ्रुर्दक्षिणा समृध्यै॥ सोमापौष्णं चरुं निर्वप
ति॥ ऐंद्रापौष्णं चरुं॥ सोमो वै रेतोधाः॥ पूषा पशूनां प्रजनयिता॥ वृद्धानामिंद्रः
प्रदापयिता॥ सोम एवास्मै रेतो दधाति॥ पूषा पशून्प्रजनयति॥ ४ ॥वृद्धानिं
द्रः प्रयच्छति॥ पौष्णश्चरुर्भवति॥ इयं वै पूषा॥ अस्यामेव प्रतितिष्ठति॥ श्यामोद
क्षिणा समृध्यै॥ बहु वै पुरुषो मेध्यमुपगच्छति॥ वैश्वानरं द्वादशकपालं निर्वपति॥
संवत्सरो वा अग्निर्वैश्वानरः॥ संवत्सरेणैवैनं स्वदयति॥ हिरण्यं दक्षिणा॥ ५ ॥
पवित्रं वै हिरण्यं॥ पुनात्येवैनं॥ बहु वै राजन्योऽनृतं करोति॥ उपजाम्येहरते ५

श्री०अ०
८४

जिनाति ब्राह्मणं॥ वदत्यनृतं॥ अनृते खलु वै क्रियमाणे वरुणो गृह्णाति॥ वारु
णं यवमयं चरुं निर्वपति॥ वरुणपाशादेवैनं मुंचति॥ अश्वो दक्षिणा॥ वारुणो
हि देवतयाश्वः समृध्यै॥ ६ ॥ ऐंद्रावैष्णवमेकादशकपालं यदृषभो दधाति
पूषा पशून्प्रजनयति हिरण्यं दक्षिणा दक्षिणेकं च॥ २ ॥ रत्निनामेतानि
हवीꣳषि भवंति॥ एते वै राष्ट्रस्य प्रदातारः॥ एते पादातारः॥ य एव राष्ट्रस्य प्रदा
तारः॥ ये पादातारः॥ त एवास्मै राष्ट्रं प्रयच्छंति॥ राष्ट्रमेव भवति॥ यत्समाहृत्य
निर्वपेत्॥ अरत्निनः स्युः॥ यथायथं निर्वपति रत्नित्वाय॥ १ ॥ यत्सद्यो निर्व
पेत्॥ यावतीमेकेन हविषाशिषमवरुंधे॥ तावतीमवरुंधीत॥ अन्वहं निर्व
पति॥ भूयसीमेवाशिषमवरुंधे॥ भूयसो यज्ञक्रतूनुपैति॥ बार्हस्पत्यं चरुं

सा०ब्रा०
८४

निर्वपति ब्रह्मणो गृहे॥ मुखत एवास्मै ब्रह्म सꣳश्यति॥ अथो ब्रह्मन्नेव क्षत्र
मन्वारंभयति॥ शितिपृष्ठो दक्षिणा समृध्यै॥ २ ॥ ऐंद्रमेकादशकपालꣳ रा
जन्यस्य गृहे॥ इंद्रियमेवावरुंधे॥ ऋषभो दक्षिणा समृध्यै॥ आदित्यं चरुं म
हिष्यै गृहे॥ इयं वा अदितिः॥ अस्यामेव प्रतितिष्ठति॥ धेनुर्दक्षिणा समृध्यै॥
भगाय चरुं वावातायै गृहे॥ भगमेवास्मिन्दधाति॥ विचित्तगर्भा पष्ठौही
दक्षिणा समृध्यै॥ ३ ॥ नैर्ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां व्रीहीणां न
खनिर्भिन्नं॥ पाप्मानमेव नैर्[illegible]वदयते॥ कृष्णा कूटा दक्षिणा समृ

श्रीतिनिरे ३

ध्यै॥ आग्नेयमष्टाकपालꣳ सेनान्यो गृहे॥ सेनामेवास्य सꣳश्यति॥ हिरण्यं
दक्षिणा समृध्यै॥ वारुणं दशकपालꣳ सूतस्य गृहे॥ वरुणसवमेवावरुंधे॥

महानिरष्टो दक्षिणा समृद्ध्यै ॥ मारुतꣳ सप्तकपालं ग्रामण्यो गृहे ॥ अन्नं वै म
रुतः ॥ अन्नमेवावरुंधे ॥ पृश्निर्दक्षिणा समृद्ध्यै ॥ सावित्रं द्वादशकपालं क्षत्तु
गृहे प्रसूत्यै ॥ उपध्वस्तो दक्षिणा समृद्ध्यै ॥ आश्विनं द्विकपालꣳ संग्रहीतुर्गृ
हे ॥ अश्विनौ वै देवानां भिषजौ ॥ ताभ्यामेवास्मै भेषजं करोति ॥ सवात्यौ द
क्षिणा समृद्ध्यै ॥ पौष्णं चरुं भागदुघस्य गृहे ॥ ५ ॥ अन्नं वै पूषा ॥ अन्न
मेवावरुंधे ॥ श्यामो दक्षिणा समृद्ध्यै ॥ रौद्रं गावीधुकं चरुमक्षावापस्य गृहे ॥
अंतत एव रुद्रं निरवदयते ॥ शबल उद्वारो दक्षिणा समृद्ध्यै ॥ द्वादशैतानि ह
वीꣳषि भवंति ॥ द्वादश मासाः संवत्सरः ॥ संवत्सरेणैवास्मै राष्ट्रमवरुंधे ॥ रा
ष्ट्रमेव भवति ॥ ६ ॥ यन्न प्रतिनिर्वपेत् ॥ रत्निन आशिषो वरुंधीरन् ॥ प्र

तिनिर्वपति ॥ इंद्राय सुत्राम्णे पुरोडाशमेकादशकपालं ॥ इंद्रायाꣳहोमुचे ॥
आशिष एवावरुंधे ॥ अयन्नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादित्याह ॥ आ
शिषमेवैतामाशास्ते ॥ मैत्राबार्हस्पत्यं भवति ॥ श्वेतायै श्वेतवत्सायै दुग्धे ॥
॥ ७ ॥ बार्हस्पत्ये मैत्रमपिदधाति ॥ ब्रह्म चैवास्मै क्षत्रं च समीची दधाति ॥ अ
थो ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति ॥ बार्हस्पत्येन पूर्वेण प्रचरति ॥ मुखत एवा
स्मै ब्रह्म सꣳश्यति ॥ अथो ब्रह्मन्नेव क्षत्रमन्वारंभयति ॥ स्वयंकृता वेदिर्भव
ति ॥ स्वयंदिनं बर्हिः ॥ स्वयंकृत इध्मः ॥ अनभिजितस्याभिजित्यै ॥ तस्माद्रा
ष्ट्रामरण्यमभिजितं ॥ सैव श्वेता श्वेतवत्सा दक्षिणा समृद्ध्यै ॥ ८ ॥ रत्निला
यस्समृद्ध्यै पष्ठौही दक्षिणा समृद्ध्यै ग्रामण्यो गृहे भागदुघस्य गृहे भवति दुग्धे

ब्रा०त्र०
८६

भिजित्यै चे॥ ३ ॥देवसुवामेतानि हवींषि भवंति॥एतावंतो वै देवानां सवाः॥ तएवास्मैसवान्प्रयच्छंति॥तएनं सुवंते॥अग्निरेवैनं गृहपतीनां सुवते॥सो मोवनस्पतीनां॥रुद्रः पशूनां॥बृहस्पतिर्वाचां॥इंद्रोज्येष्ठानां॥मित्रः सत्यानां॥ ॥ १ ॥वरुणोधर्मपतीनां॥एतदेव सर्वंभवति॥सविता त्वाप्रसवानां सुवतामि मिति हस्तं गृह्णाति प्रसूत्यै॥येदेवा देवसुवस्थेत्याह॥यथाय जुरेवैतत्॥म हते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्याह॥आशिषमेवैतामा शास्ते॥एष वो भरता राजा सोमो स्माकं ब्राह्मणानां राजेत्याह॥तस्मात्सोम राजानो ब्राह्मणाः॥प्रति त्यं नाम राज्यमधायीत्याह॥ २ ॥राज्यमेवास्मिन्प्र तिदधाति॥स्वांतनुवं वरुणो अशिश्रेदित्याह॥वरुणसवमेवावरुंधे॥शुचेर्मि

सां०ब्रा
८६

त्रस्य व्रत्या अभूमेत्याह॥शुचिमेवैनं व्रत्यं करोति॥अमन्महि महत ऋतस्य ना मेत्याह॥मनुत एवैनं॥सर्वे व्राता वरुणस्याभूवन्नित्याह॥सर्वव्रातमेवैनं करो ति॥विमित्र एवैररातिमतारीदित्याह॥ ३ ॥अरातिमेवैनं तारयति॥असूषु दंत यज्ञिया ऋतेनेत्याह॥स्वदयत्येवैनं॥व्युत्रितो जरिमाणं न आनडित्याह॥ आयुरेवास्मिन्दधाति॥द्वाभ्यां विमृष्टे॥द्विपाद्यजमानः प्रतिष्ठित्यै॥अग्नीषो मीयस्यैकादशकपालस्य देवसुवां च हविषामग्नये स्विष्टकृते समवद्य ति॥देवताभिरेवैनमुभयतः परिगृह्णाति॥विष्णुक्रमान्क्रमते॥विष्णुरेव भू त्वेमान्लोकानभिजयति॥ ४ ॥सत्या नामधायीत्याहतारीदित्याहक्रमत ए कं च॥ ४ ॥अर्थेतस्थेति जुहोति॥आहुत्यैवैनानिष्क्रीय गृह्णाति॥अथोह

विष्ठूतानामेवाभिघृतानां गृह्णाति॥ वहंतीनां गृह्णाति॥ एता वा अपाꣳ राष्ट्रं॥
राष्ट्रमेवास्मै गृह्णाति॥ अथो श्रियमेवैनमभिवर्द्धंति॥ अपांपतिरसीत्याह॥ मिथु
नमेवाकः॥ वृषास्यूर्मिरित्याह॥ १ ॥ ऊर्मिमंतमेवैनं करोति॥ वृषसेनोसीत्याह॥
सेनामेवास्य सꣳश्यति॥ व्रजक्षितस्थेत्याह॥ एता वा अपां विशः॥ विशमेवास्मै प
र्यूहति॥ मरुतामोजस्थेत्याह॥ अन्नं वै मरुतः॥ अन्नमेवावरुंधे॥ सूर्यवर्चस
स्थेत्याह॥ २ ॥ राष्ट्रमेव वर्चस्व्यकः॥ सूर्यत्वचसस्थेत्याह॥ सत्यं वा एतत्॥
यद्वर्षति॥ अनृतं यदातपति वर्षति॥ सत्यानृते एवावरुंधे॥ नैनꣳ सत्यानृते उ
दितेहिꣳस्तः॥ य एवं वेद॥ मांदास्थेत्याह॥ राष्ट्रमेव ब्रह्मवर्चस्व्यकः॥ ३ ॥ वाशा
स्थेत्याह॥ राष्ट्रमेव वश्यकः॥ शक्करीस्थेत्याह॥ पशवो वै शक्करीः॥ पशूनेवाव

रुंधे॥ विश्वभृतस्थेत्याह॥ राष्ट्रमेव पयस्व्यकः॥ जनभृतस्थेत्याह॥ राष्ट्रमेवेंद्रिया
व्यकः॥ अग्निस्तेजस्यास्थेत्याह॥ ४ ॥ राष्ट्रमेव तेजस्व्यकः॥ अपामोषधीनाꣳ
रसस्थेत्याह॥ राष्ट्रमेव मधव्यमकः॥ सारस्वतं ग्रहं गृह्णाति॥ एषा वा अपां पृष्ठं॥
यत्सरस्वती॥ पृष्ठमेवैनꣳ समानानां करोति॥ षोडशभिर्गृह्णाति॥ षोडशकलो
वै पुरुषः॥ यावानेव पुरुषः॥ तस्मिन्वीर्यं दधाति॥ षोडशभिर्जुहोति षोडशभिर्गृ
ह्णाति॥ द्वात्रिꣳशत्संपद्यंते॥ द्वात्रिꣳशदक्षरानुष्टुप्॥ वागनुष्टुप् सर्वाणि छंदाꣳ
सि॥ वाचैवैनꣳ सर्वेभिश्छंदोभिरभिषिंचति॥ ५ ॥ ऊर्मिरित्याह सूर्यवर्चस
स्थेत्याह ब्रह्मवर्चस्यकस्तेजस्यास्थेत्याहेव पुरुषः षट्च॥ ५ ॥ देवीरापः सं
मधुमतीर्मधुमतीभिः सृज्यध्वमित्याह॥ ब्राह्मणैवैनाः सꣳसृजति॥ अनाधृ

ष्टाः सीदतेत्याह ॥ ब्रह्मणैवैनाः सादयति ॥ अंतरा होतुश्च धिष्णियं ब्राह्मणाछं॒सिनश्च सादयति ॥ आग्नेयो वै होता ॥ ऐंद्रो ब्राह्मणाछं॒सी ॥ तेजसा चैवेंद्रियेण चोभयतो राष्ट्रं परिगृह्णाति ॥ हिरण्येनोत्पुनाति ॥ आर्द्रं ह्येतत् ॥ हि पवित्राभ्यामुत्पुनंति व्यावृत्त्यै ॥ १ ॥ शतमानं भवति ॥ शतायुः पुरुषः शतेंद्रियः ॥ आयुष्येवेंद्रिये प्रतितिष्ठति ॥ अनिभृष्टमसीत्याह ॥ अनिभृष्टं॒ ह्येतत् ॥ वाचो बंधुरित्याह ॥ वाचो ह्येष बंधुः ॥ तपोजा इत्याह ॥ तपोजा ह्येतत् ॥ सोमस्य दात्रमसीत्याह ॥ २ ॥ सोमस्य ह्येतद्दात्रं ॥ शुक्रा वः शुक्रेणोत्पुनामीत्याह ॥ शुक्रा ह्यापः ॥ शुक्रं॒ हिरण्यं ॥ चंद्राश्चंद्रेणेत्याह ॥ चंद्रा ह्यापः ॥ चंद्रं॒ हिरण्यं ॥ अमृता अमृतेनेत्याह ॥ अमृता ह्यापः ॥ अमृतं॒ हिरण्यं ॥ ३ ॥ स्वाहा राजसूयाये

त्याह ॥ राजसूयाय ह्येनाउत्पुनाति ॥ सधमादो द्युम्निनीरूर्ज एता इति वारुण्यर्चा गृह्णाति ॥ वरुणसवमेवावरुंधे ॥ एकया गृह्णाति ॥ एकधैव यजमाने वीर्यं दधाति ॥ क्षत्रस्योल्बमसि क्षत्रस्य योनिरसीति तार्प्यं चोष्णीषं च प्रयच्छति सयोनित्वाय ॥ एकशतेन दर्भपुंजीलैः पवयति ॥ शतायुर्वै पुरुषः शतवीर्यः ॥ आत्मैकशतः ॥ ४ ॥ यावानेव पुरुषः ॥ तस्मिन्वीर्यं दधाति ॥ दध्याशयति ॥ इंद्रियमेवावरुंधे ॥ उदुंबरमाशयति ॥ अन्नाद्यस्यावरुध्यै ॥ शष्पाण्याशयति ॥ सुराबलिमेवैनं करोति ॥ आविद एता भवंति ॥ आविदमेवैनं गमयंति ॥ ५ ॥ अग्निरेवैनं गार्हपत्येनावति ॥ इंद्र इंद्रियेण ॥ पूषा पशुभिः ॥ मित्रावरुणौ प्राणापानाभ्यां ॥ इंद्रो वृत्राय वज्रमुदयछत् ॥ स दिवमलिखत् ॥ सोऽर्यम्णः पंथा अभवत् ॥ स आविन्ने

ब्रा०प्र०
८९

द्यावापृथिवी धृतव्रते इति द्यावापृथिवी उपाधावत् ॥ स आभ्यामेव प्रसूत इंद्रो वृत्रा
य वज्रं प्राहरत् ॥ आविन्ने द्यावापृथिवी धृतव्रते इति यदाह ॥ ६ ॥ आभ्यामे
व प्रसूतो यजमानो वज्रं भ्रातृव्याय प्रहरति ॥ आविन्ना देव्यदितिर्विश्वरूपीत्याह ॥
इयं वै देव्यदितिर्विश्वरूपी ॥ अस्यामेव प्रतितिष्ठति ॥ आविन्नोयमसावामुष्याय
णोस्यां विश्यस्मिन्राष्ट्र इत्याह ॥ विशैवैनꣳ राष्ट्रेण समर्धयति ॥ महते क्षत्राय म
हत आधिपत्याय महते जानराज्यायेत्याह ॥ आशिषमेवैतामाशास्ते ॥ एष वो भर
ता राजा सोमोस्माकं ब्राह्मणानाꣳ राजेत्याह ॥ तस्मात्सोमराजानो ब्राह्मणाः ॥
॥ ७ ॥ इंद्रस्य वज्रोसि वार्त्रघ्न इति धनुः प्रयच्छति विजित्यै ॥ शत्रुबाधनास्स्थेती
षून् ॥ शत्रूनेवास्य बाधंते ॥ पात मा प्रत्यंचं पात मा तिर्यंचं मन्वंमा पातेत्याह ॥

सां०ब्र०
८९

तिस्रो वै शरव्याः ॥ प्रतीची तिरश्च्यनूची ॥ ताभ्य एवैनं पांति ॥ दिग्भ्यो मा पातेत्याह ॥
दिग्भ्य एवैनं पांति ॥ विश्वाभ्यो मा नाष्ट्राभ्यः पातेत्याह ॥ अपरिमितादेवैनं पांति ॥
हिरण्यवर्णावुषसां विरोक इति त्रिष्टुभा बाहू उद्गृह्णाति ॥ इंद्रियं वै वीर्यं त्रिष्टुप् ॥
इंद्रियमेव वीर्यमुपरिष्टादात्मन्धत्ते ॥ ८ ॥ व्याघ्रत्वेदात्मसीत्याहामृतꣳ हि
रण्यमेकशतो गमयंत्याह ब्राह्मणा नाष्ट्राभ्यः पातेत्याह चत्वारिस्व ॥ ६ ॥ दिशो
व्यास्थापयति ॥ दिशामभिजित्यै ॥ यदनुप्रक्रामेत् ॥ अभि दिशो जयेत् ॥ उत्तु मा
द्येत् ॥ मनसानुप्रक्रामति ॥ अभि दिशो जयति ॥ नोन्माद्यति ॥ समिधमातिष्ठेत्या
ह ॥ तेज एवावरुंधे ॥ १ ॥ उग्रामातिष्ठेत्याह ॥ इंद्रियमेवावरुंधे ॥ उदीचीमाति
ष्ठेत्याह ॥ पशूनेवावरुंधे ॥ ऊर्ध्वामातिष्ठेत्याह ॥ सुवर्गमेव लोकमभिजयति ॥ अ
× विराजमातिष्ठेत्याह ॥ अन्नाद्यमेवावरुंधे ॥

ब्रा०प्र०
९०

नृजिह्वीति॥ सुवर्गस्यलोकस्य समष्ट्यै॥ २ ॥मारुतएषभवति॥अन्नंवैमरुतः॥
अन्नमेवावरुंधे॥एकविꣳशतिकपालोभवति प्रतिष्ठित्यै॥यो॑रण्येनुवाक्योगणः॥
तंमध्यतउपदधाति॥ ग्राम्यैरेवपशुभिरारण्यान्पशून्परिगृह्णाति॥ तस्माद्ग्रा
म्यैःपशुभिरारण्याःपशवःपरिगृहीताः॥पृथिर्वैन्यः॥अभ्यषिच्यत॥ ३ ॥
सराष्ट्रन्नाभवत्॥ सएतानिपार्थान्यपश्यत्॥तान्यजुहोत्॥तैर्वैसराष्ट्रम
भवत्॥यत्पार्थानिजुहोति॥राष्ट्रमेवभवति॥ बार्हस्पत्यंपूर्वेषामुत्तमंभवति॥
ऐंद्रमुत्तरेषांप्रथमं॥ब्रह्मंचैवास्मैक्षत्रंचसमीचीदधाति॥अथोब्रह्मन्नेव
क्षत्रंप्रतिष्ठापयति॥ ४ ॥षट्पुरस्तादभिषेकस्यजुहोति॥षडुपरिष्टात्॥
द्वादशसंपद्यंते॥द्वादशमासाःसंवत्सरः॥संवत्सरःखलुवैदेवानांपूः॥देवानां

सांबु
९०

मेवपुरंमध्यतोव्यवसर्पति॥नस्यनकुतश्चनोपाव्याधोभवति॥भूतानामवेष्टीर्जु
होति॥अत्रात्रवैमृत्युर्जायते॥यत्रयत्रैवमृत्युर्जायते॥ततएवैनमवयजते॥त
स्माद्राजसूयेनेजानः सर्वमायुरेति॥सर्वेह्यस्यमृत्यवोवेष्टाः॥तस्माद्राजसू
येनेजानोनाभिचरितवै॥प्रत्यगेनमभिचारस्तृणुते॥ ५ ॥रुंधेसमष्ट्याअभिषि
च्यतस्थापयतिजायतेपंचच॥ ७ ॥सोमस्यत्विषिरसितवेवमेत्विषिर्भूयादिति
शार्दूलचर्मोपस्तृणाति॥यैवसोमेत्विषिः॥याशार्दूले॥तामेवावरुंधे॥मृत्योर्वाए
षवर्णः॥यच्छार्दूलः॥अमृतꣳहिरण्यं॥अमृतमसिमृत्योर्मापाहीतिहिरण्यमुपा
स्यति॥अमृतमेवमृत्योरंतर्धत्ते॥शतमानंभवति॥ १ ॥शतायुःपुरुषःशतेंद्रियः॥
आयुष्येवेंद्रियेप्रतितिष्ठति॥दिद्योन्मापाहीत्युपरिष्टादधिनिदधाति॥उभयत
एवास्मैशर्मदधाति॥अवेष्टादंदशूकाइतिक्लीबꣳसीसेनविध्यति॥दंदशूकानेवाव

यजन्ते ॥ तस्मात्क्लीबं दंदशूका दंःशूकाः ॥ निरस्तं नमुचेः शिर इति लोहितायसं
निरस्यति ॥ पाप्मानमेव नमुचिं निरवदयते ॥ प्राणा आत्मनः पूर्वेऽभिषिच्या इत्या
हुः ॥ २ ॥ सोमो राजा वरुणः ॥ देवा धर्मसुवश्च ये ॥ ते ते वाचः सुवन्तां ते ते प्राणः
सुवन्तामित्याह ॥ प्राणानेवात्मनः पूर्वानभिषिंचति ॥ यद्ब्रूयात् ॥ अग्नेस्त्वा तेज
साभिषिंचामीति ॥ तेजस्व्येव स्यात् ॥ दुश्चर्मा तु भवेत् ॥ सोमस्य त्वा द्युम्नेनाभि
षिंचामीत्याह ॥ सौम्यो वै देवतया पुरुषः ॥ ३ ॥ स्वयैवैनं देवतयाभिषिंचति ॥
अग्नेस्तेजसेत्याह ॥ तेज एवास्मिन्दधाति ॥ सूर्यस्य वर्चसेत्याह ॥ वर्च एवास्मिन्दधा
ति ॥ इंद्रस्येंद्रियेणेत्याह ॥ इंद्रियमेवास्मिन्दधाति ॥ मित्रावरुणयोर्वीर्येणेत्या
ह ॥ वीर्यमेवास्मिन्दधाति ॥ मरुतामोजसेत्याह ॥ ४ ॥ ओज एवास्मिन्दधाति ॥
क्षत्राणां क्षत्रपतिरसीत्याह ॥ क्षत्राणामेवैनं क्षत्रपतिं करोति ॥ अति दिवस्पाहि

त्याह ॥ अत्यन्यान्पाहीति वावैतदाह ॥ समाववृत्रन्नधरागुदीचीरित्याह ॥ राष्ट्रमेवा
स्मिन्ध्रुवमकः ॥ उच्छेषणेन जुहोति ॥ उच्छेषणभागो वै रुद्रः ॥ भागधेयेनैव रुद्रं नि
रवदयते ॥ ५ ॥ उदङ् परेत्याग्नीध्रे जुहोति ॥ एषा वै रुद्रस्य दिक् ॥ स्वायामेव
दिशि रुद्रं निरवदयते ॥ रुद्र यत्ते क्रयी परं नामेत्याह ॥ यद्वा अस्य क्रयी परं ना
म ॥ तेन वा एष हिनस्ति ॥ यं हिनस्ति ॥ तेनैवैनं सह शमयति ॥ तस्मै हुतमसि
यमेष्टमसीत्याह ॥ यमादेवास्य मृत्युमवयजते ॥ ६ ॥ प्रजापते न त्वदेतान्यन्य
इति तस्यै गृहे जुहुयात् ॥ यंकामयेत [illegible]प्रजास्यादिति ॥ राष्ट्रमेवास्यै प्रजाभ
वति ॥ पर्णमयेनाध्वर्युरभिषिंचति ॥ ब्रह्मवर्चसमेवास्मिन्त्विषिं दधाति ॥ औ
दुंबरेण राजन्यः ॥ ऊर्जमेवास्मिन्नन्नाद्यं दधाति ॥ आश्वत्थेन वैश्यः ॥ विशमेवा

स्यै

राष्ट्रमस्यै

॥ब्रा०प्र०॥
॥९२॥

स्मिन्पुष्टिं दधाति॥ नय्यग्रोधेन जन्यैः॥ मित्राण्येवास्मै कल्पयति॥ अथो प्रतिष्ठित्यै॥
॥ ७ ॥ भवस्याक्रुः पुरुष ओजसे त्वाहन्निर्वदयन्तेयजतेजन्यां हुत्व ॥ ८ ॥ इंद्रस्य
वज्रोसि वार्त्रघ्न इति रथमुपावहरति विजित्यै॥ मित्रावरुणयोस्त्वा प्रशास्त्रोः प्र
शिषा युनज्मीत्याह॥ ब्रह्मणैवैनं देवताभ्यां युनक्ति॥ प्रष्टिवाहिनं युनक्ति॥ प्रष्टि
वाही वै देवरथः॥ देवरथमेवास्मै युनक्ति॥ त्रयोश्वा भवन्ति॥ रथश्चतुर्थः॥ द्वौ सव्ये
ष्ठसारथी॥ षट् संपद्यन्ते॥ १ ॥ षड्वा ऋतवः॥ ऋतुभिरेवैनं युनक्ति॥ विष्णुक्रमा
न्क्रमते॥ विष्णुरेव भूत्वेमान्लोकानभिजयति॥ यः क्षत्रियः प्रतिहितः॥ सो
न्वारभते॥ राष्ट्रमेव भवति॥ त्रिष्टुभान्वारभते॥ इंद्रियं वै त्रिष्टुक्॥ इंद्रियमेवा
यजमाने दधाति॥ २ ॥ मरुतां प्रसवे जेषमित्याह॥ मरुद्भिर्वै वप्र सूतउज्जय

॥ सां बृ॥
॥९२॥

ति॥ आप्तं मनइत्याह॥ यदेवमनसेप्सीत्॥ तदाप्त॥ राजन्यं जिनाति॥ अनाक्रां
तएवाक्रमते॥ विवाएष इंद्रियेण वीर्येण व्यृध्यते॥ यो राजन्यं जिनाति॥ समृद्धमिंद्रिये
ण वीर्येणेत्याह॥ ३ ॥ इंद्रियमेव वीर्यमात्मन्धत्ते॥ पशूनां मन्युरसि तवेव मेम
न्युर्भूयादिति वाराहीउपानहावुपमुंचते॥ पशूनां वा एष मन्युः॥ यद्वराहः॥ तेनै
व पशूनां मन्युमात्मन्धत्ते॥ अभिवादय ॥ सुषुवाणं कामयते॥ तस्येश्वरं इंद्रियं वीर्यमा
दातोः॥ वाराही उपानहावुपमुंचते॥ अस्या एवांतर्धत्ते॥ इंद्रियस्य वीर्यस्यानादा
त्यै॥ ४ ॥ नमो मात्रे पृथिव्या इत्याहानात्यै॥ इयदस्यायुरस्यायुर्मे धेहीत्याह॥
आयुरेवात्मन्धत्ते॥ ऊर्गस्यूर्जं मे धेहीत्याह॥ ऊर्जमेवात्मन्धत्ते॥ युङ्ङसि वर्चोसि व
र्चो मयि धेहीत्याह॥ वर्च एवात्मन्धत्ते॥ एकधा ब्रह्मण उपहरति॥ एकधैव यज
मान आयुरूर्जं वर्चो दधाति॥ रथविमोचनीया जुहोति प्रतिष्ठित्यै॥ ५ ॥ त्रयोश्वा

भवंति॥ रथश्चतुर्थः॥ तस्माच्चतुर्जुहोति॥ यदुभौसहावतिष्ठेतां॥ समानंलोकमियातां॥
सहसंग्रहीत्रारथवाहनेरथमादधाति॥ सुवर्गादेवैनंलोकादंतर्दधाति॥ हंसः शुचिषदि
त्यादधाति॥ ब्रह्मणैवैनमुपावहरति॥ ब्रह्मणा दधाति॥ अतिछंदसा दधाति॥ अतिछंदावैसर्वा
णिछंदांसि॥ सर्वेभिरेवैनंछंदोभिरादधाति॥ वर्ष्मवाएषाछंदसां॥ यदतिछंदाः॥ यदतिछंद
सादधाति॥ वर्ष्मैवैनंसमानानांकरोति॥ ६ ॥ पर्यनेदधातिवीर्येणेत्याह॥ नास्मैप्रतिष्ठित्यैब्रह्म
णादधातिसत्तचे॥ ९ ॥ मित्रोसिवरुणोसीत्याह॥ मैत्रंवाअहः॥ वारुणीरात्रिः॥ अहोरात्राभ्यामे
वैनमुपावहरति॥ मित्रोसिवरुणोसीत्याह॥ मैत्रोवैदक्षिणः॥ वारुणः सव्यः॥ वैश्वदेव्यामिक्षा॥
स्वमेवैनौभागधेयमुपावहरति॥ समहंविश्वैर्देवैरित्याह॥ १ ॥ वैश्वदेव्योवैप्रजाः॥ ताएवाद्याः
कुरुते॥ क्षत्रस्यनाभिरसिक्षत्रस्ययोनिरसीत्यधीवासमास्तृणाति सयोनित्वाय॥ स्योनामासी
दसुषदामासीदेत्याह॥ यथायजुरेवैतत्॥ मात्वाहिंसीन्मामाहिंसीदित्याहाहिंसा
यै॥ निषसादधृतव्रतोवरुणःपस्त्यास्वासाम्राज्यायसुक्रतुरित्याह॥ साम्राज्यमेवै

नंसुक्रतुंकरोति॥ ब्रह्मा३न्त्वंराजन्ब्रह्मासिसवितासिसत्यसवइत्याह॥ सवितारमेवैनंस
त्यसवंकरोति॥ ब्रह्मा३न्त्वंराजन्ब्रह्मासीन्द्रोसिसत्यौजाइत्याह॥ इंद्रमेवैनंसत्यौजसंकरो
ति॥ ब्रह्मा३न्त्वंराजन्ब्रह्मासिमित्रोसिसुशेवइत्याह॥ मित्रमेवैनंसुशेवंकरोति॥ ब्रह्मा३न्त्वं
राजन्ब्रह्मासिवरुणोसिसत्यधर्मेत्याह॥ वरुणमेवैनंसत्यधर्माणंकरोति॥ सवितासिसत्य
सवइत्याह॥ गायत्रीमेवैतेनाभिव्याहरति॥ इंद्रोसिसत्यौजाइत्याह॥ त्रिष्टुभमेवैतेनाभिव्या
हरति॥ ३ ॥ मित्रोसिसुशेवइत्याह॥ जगतीमेवैतेनाभिव्याहरति॥ सत्यमेताइदेवताः॥
सत्यमेतानिछंदांसि॥ सत्यमेवावरुंधे॥ वरुणोसिसत्यधर्मेत्याह॥ अनुष्टुभमेवैतेनाभि
व्याहरति॥ सत्यानृतेवाअनुष्टुप्॥ सत्यानृतेवरुणः॥ सत्यानृतेएवावरुंधे॥ ४ ॥ नै
नंसत्यानृतेउदितेहिंस्तः॥ यएवंवेद॥ इंद्रस्यवज्रोसिवार्त्रघ्नइतिस्फ्यंप्रयच्छति॥ व
ज्रोवैस्फ्यः॥ वज्रेणैवास्माअवरपरंरंधयति॥ एवंहितच्छ्रेयः॥ यदस्माएतेराध्येयुः॥ दि
शोभ्ययंराजाभूदितिपंचाक्षान्प्रयच्छति॥ एतेवैसर्वेयाः॥ अपराजायिनमेवैनंकरोति॥ ५॥

ब्रा॰प्र॰
९४

ओदनमुद्ब्रुवते॥ परमेष्ठी वा एषः॥ यदोदनः॥ परमामेवैनꣳ श्रियंगमयति॥ सुश्लोकाꣳ३ सुमंगलाꣳ३ सत्यराजा३न् इत्याह॥ आशिषमेवैतामाशास्ते॥ शौनःशेपमाख्यापयते॥ वरुणपाशादेवैनं मुंचति॥ परःशतं भवति॥ शतायुः पुरुषः शतेंद्रियः॥ आयुष्येवेंद्रिये प्रतितिष्ठति॥ मारुतस्य चैककपालस्य वैश्वदेव्यै चामिक्षाया अग्नये स्विष्टकृते समवद्यति॥ देवताभिरेवैनमुभयतः परिगृह्णाति॥ अपांनप्त्रे स्वाहोर्जोनप्त्रे स्वाहाऽग्नये गृहपतये स्वाहेति तिस्र आहुतीर्जुहोति॥ त्रय इमे लोकाः॥ एष्वेव लोकेषु प्रतितिष्ठति॥ ९॥ देवैरित्याह सत्यसवं करोति त्रिष्टुभमेवैनेनाभिव्याहरति सत्यानृते एवावरुंधे करोति शतं क्रियः षट्च॥ १०॥ एतद्ब्राह्मणान्येव त्रीणि नांदेव सुवामर्थेनोदेवीर्दिशः सोमस्येंद्रस्य मित्रोऽसि दश॥ १०॥ एतद्ब्राह्मणान्येव पंचत्रिकपालमन्नं वै पूषावाशा दिशा उरद्रूपेरेत्य ब्रह्मा३न्त्वꣳ राजन् चतुःषष्टिः॥ ६४॥ ॥ ॥
॥ ॥ ॥ ॥ श्रीसांबसदाशिवार्पणमस्तु॥ ॥ श्रीराम॥ ॥

सां॰ब्रू॰
९४

हविः ॐ नमः॥ वरुणस्य सुषुवाणस्य दशधेंद्रियं वीर्यं परापतत्॥ तत्सꣳ सृद्भिरनुसमसर्पत्॥ तत्सꣳ सृपाꣳ सꣳसृत्वं॥ अग्निनादेवेन प्रथमेऽहन्नन्वप्युंक्त॥ सरस्वत्या वाचा द्वितीये॥ सवित्रा प्रसवेन तृतीये॥ पूष्णा पशुभिश्चतुर्थे॥ बृहस्पतिना ब्रह्मणा पंचमे॥ इंद्रेणा देवेन षष्ठे॥ वरुणेन स्वया देवतया सप्तमे॥ १॥ सोमेन राज्ञाऽष्टमे॥ त्वष्ट्रा रूपेण नवमे॥ विष्णुना यज्ञेनाप्नोत्॥ यत्सꣳ सृपो भवंति॥ इंद्रियमेव तद्वीर्यं यजमान आप्नोति॥ पूर्वापरा वेदिर्भवति॥ इंद्रियस्य वी

र्यस्यावरुध्यै ॥ पुरस्तादुपसदाꣳ सौम्येन प्रचरति ॥ सोमो वै रेतोधाः ॥ रेत एव तद्दधाति ॥ अंतरात्याग्रेण ॥ रेत एव हितं त्वष्टा रूपाणि विकरोति ॥ उपरिष्टाद्वैष्णवेन ॥ यज्ञो वै विष्णुः ॥ यज्ञ एवांततः प्रतितिष्ठति ॥ २ ॥ सप्त मे दधाति पंच च ॥ ३ ॥ जामि वा एतत्कुर्वंति ॥ यत्सद्यो दीक्षयंति सद्यः सोमं क्रीणंति ॥ पुंडरिस्रजां प्रयच्छत्यजामित्वाय ॥ अंगिरसः सुवर्गं लोकं यंतः ॥ अप्सु दीक्षातपसी प्रावेशयन् ॥ तत्पुंडरीकमभवत् ॥ यत्पुंडरिस्रजां प्रयच्छति ॥ साक्षादेव दीक्षातपसी अवरुंधे ॥ दशभिर्वत्स

तरैः सोमं क्रीणाति ॥ दशाक्षरा विराट् ॥ ३ ॥ अन्नं विराट् ॥ विराजैवान्नाद्यमवरुंधे ॥ मुष्कराभवंति सेंद्रत्वाय ॥ दशपेयो भवति ॥ अन्नाद्यस्यावरुध्यै ॥ शतं ब्राह्मणाः पिबंति ॥ शतायुः पुरुषः शतेंद्रियः ॥ आयुष्येवेंद्रिये प्रतितिष्ठति ॥ सप्तदशꣳ स्तोत्रं भवति ॥ सप्तदशः प्रजापतिः ॥ २ ॥ प्रजापतेराप्त्यै ॥ प्राकाशावध्वर्यवे ददाति ॥ प्रकाशमेवैनं गमयति ॥ स्रजमुद्गात्रे ॥ व्येवास्मै वासयति ॥ रुक्मꣳ होत्रे ॥ आदित्यमेवास्मा उन्नयति ॥ अश्वं प्रस्तोतृप्रतिहर्तृभ्यां ॥ प्राजापत्यो वा अश्वः ॥ प्रजा

पतेराप्त्यै ॥ ३ ॥ द्वादशपष्ठौही ब्रह्मणे ॥ आयुरेवावरुंधे ॥ वशां मैत्रा
वरुणाय ॥ राष्ट्रमेवव्रत्यकः ॥ ऋषभं ब्राह्मणाच्छंसिने ॥ राष्ट्रमे
वेंद्रियाव्यकः ॥ वाससी नेष्टापोतृभ्यां ॥ पवित्रे एवास्यैते ॥ स्थू
रियवाचितमच्छावाकाय ॥ अंतत एव वरुणमवयजते ॥ ४ ॥
अनड्वाहमग्नीधे ॥ वह्निर्वा अनड्वान् ॥ वह्निरग्नीत् ॥ वह्निनै
व वह्नि यज्ञस्यावरुंधे ॥ इंद्रस्य सुषुवाणस्य त्रेधेंद्रियं वीर्यं परापत
तत् ॥ भृगुस्तृतीयमभवत् ॥ श्रायंतीयं तृतीयं ॥ सरस्वती तृ
तीयं ॥ भार्गवो होता भवति ॥ श्रायंतीयं ब्रह्मसामं भवति ॥ वा

वारवंतीयमग्निष्टोमसामं ॥ सारस्वतीरपो गृह्णाति ॥ इंद्रियस्य वीर्य
स्यावरुध्यै ॥ श्रायंतीयं ब्रह्मसामं भवति ॥ इंद्रियमेवास्मिन्वीर्यं
श्रयति ॥ वारवंतीयमग्निष्टोमसामं ॥ इंद्रियमेवास्मिन्वीर्यं वारय
ति ॥ ६ ॥ विराड्जापति सर्वः प्रजापतेराप्त्यै यजते ब्रह्मसामं भवति

प्र

सप्तच ॥ २ ॥ ईश्वरो वा एष दिशोनून्मदितोः ॥ यं दिशोनुव्यास्थाप
यंति ॥ दिशामवेष्टयो भवंति ॥ दिक्ष्वेव प्रतितिष्ठत्यनुन्मादाय ॥
पंचदेवतायजति ॥ पंच दिशः ॥ दिक्ष्वेव प्रतितिष्ठति ॥ हविषो
हविष इष्ट्वा बार्हस्पत्यमभिघारयति ॥ यजमानदेवत्यो वै बृह

ब्राह्म० प्र०
९७

स्पतिः ॥ यजमानमेव तेजसा समर्धयति ॥ १ ॥ आदित्यां मल्हां गर्भि
णीमालभते ॥ मारुतीं पृश्निं पष्ठौहीं ॥ विशं चैवास्मै राष्ट्रं च समी
ची दधाति ॥ आदित्यया पूर्वया प्रचरति ॥ मारुत्योत्तरया ॥ रा
ष्ट्र एव विशमनुबध्नाति ॥ उच्चैरादित्याया आश्रावयति ॥ उपांशु
मारुत्यै ॥ तस्माद्राष्ट्रं विशमतिवदति ॥ गर्भिण्यादित्या भवति ॥ २ ॥
इंद्रियं वै गर्भः ॥ राष्ट्रमेवेंद्रियाव्यकः ॥ अगर्भा मारुती ॥ विड्वै मरु
तः ॥ विशमेव निरिंद्रियामकः ॥ देवासुराः संयत्ता आसन् ॥ ते
देवा अश्विनोः पूषन्वाचः सत्यं संनिधाय ॥ अनृतेनासुरा

शिव
९७

नभ्यभवन् ॥ तेऽश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निरवपन् ॥ ततो वै
ते वाचः सत्यमवारुंधत ॥ ३ ॥ यदश्विभ्यां पूष्णे पुरोडाशं द्वादशकपा
लं निर्वपति ॥ अनृतेनैव भ्रातृव्यानभिभूय ॥ वाचः सत्यमवरुं
धे ॥ सरस्वते सत्यवाचे चरुं ॥ पूर्वमेवोदितं ॥ उत्तरेणाभिगृणाति ॥
सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालं प्रसूत्यै ॥ दूतान्प्रहि
णोति ॥ आविदएता भवंति ॥ आविदमेवैनं गमयंति ॥ अथो दूते
भ्य एव न छिद्यते ॥ तिसृधन्वं शुष्कदृतिर्दक्षिणा समृध्यै ॥ ४ ॥
अर्धपलिभवत्सरुंधत गमयंति दूत्वे ॥ ५ ॥ आग्नेयमष्टाकपालं
निर्वपति ॥ तस्माच्छिशिरे कुरुपंचालाः प्राञ्चो यांति ॥ सौम्यं चरुं ॥

ब्रां०प्र०
१९

तस्माद्वसंतं व्यवसायादयंति ॥ सावित्रं द्वादशकपालं ॥ तस्मात्पुरस्ता
द्यवानां सवित्रा विरुंधते ॥ बार्हस्पत्यं चरुं ॥ सवित्रैव विरुध्य ॥ ब्रह्म
णा यवानादधते ॥ त्वाष्ट्रमष्टाकपालं ॥ १ ॥ रूपाण्येव तेन कुर्वते ॥ वै
श्वानरं द्वादशकपालं ॥ तस्माज्जघन्ये नैदाघे प्रत्यंचः कुरुपंचा
ला यांति ॥ सारस्वतं चरुं निर्वपंति ॥ तस्मात्प्रावृषि सर्वा वाचो वदंति ॥
पौष्णेन व्यवस्यंति ॥ मैत्रेण कृषंते ॥ वारुणेन विधृता आसते ॥
क्षैत्रपत्येन पाचयंते ॥ आदित्येनादधते ॥ २ ॥ मासि मास्येतानि
हवींषि निरुप्याणीत्याहुः ॥ तेनैवर्तून्प्रयुंक्त इति ॥ अथो खल्वाहुः ॥
कः संवत्सरं जीविष्यतीति ॥ षडेव पूर्वेद्युर्निरुप्याणि ॥ षडुत्तरेद्युः ॥

१९

शिव

तेनैवर्तून्प्रयुंक्ते ॥ दक्षिणो रथवाहनवाहः पूर्वेषां दक्षिणा ॥ उत्तर उत्तरे
षां ॥ संवत्सरस्यैवांतौ युनक्ति ॥ सुवर्गस्य लोकस्य समष्ट्यै ॥ ३ ॥ त्वा
ष्ट्रमष्टाकपालं दधते पुनत्येके च ॥ ४ ॥ इंद्रस्य सुषुवाणस्य दशधेंद्रि
यं वीर्यं परापतत् ॥ स यत्प्रथमं निरष्ठीवत् ॥ तत्कुलमभवत् ॥ यद्द्वि
तीयं ॥ तद्बदरं ॥ यत्तृतीयं ॥ तत्कर्कंधु ॥ यन्नस्तः ॥ स सिंहः ॥
यदक्ष्योः ॥ ३ ॥ स शार्दूलः ॥ यत्कर्णयोः ॥ स वृकः ॥ य ऊर्ध्वः ॥ स सो
मः ॥ या वाची ॥ सा सुरा ॥ त्रयाः सक्तवो भवंति ॥ इंद्रियस्यावरुध्ये ॥
त्रयाणि लोमानि ॥ २ ॥ त्विषिमेवावरुंधे ॥ त्रयो ग्रहाः ॥ वीर्यमे

वावरुंधे॥नाम्नादश्यामी॥नववैपुरुषेप्राणाः॥नाभिर्दशमी॥प्राणा
इंद्रियंवीर्यं॥प्राणानेवेंद्रियंवीर्यंयजमानआत्मन्धत्ते॥सीसेन
क्लीबाच्छष्पाणिक्रीणाति॥नवाएतदयोनहिरण्यं॥३॥यत्सी
सं॥नस्त्रीनपुमान्॥यत्क्लीबः॥नसोमोनसुरा॥यत्सौत्रामणी
समृध्यै॥स्वाद्वींत्वास्वादुनेत्याह॥सोममेवैनांकरोति॥सोमोस्य
श्विभ्यांपच्यस्वसरस्वत्यैपच्यस्वेंद्रायसुत्राम्णेपच्यस्वेत्याह॥
एताभ्योह्येषादेवताभ्यःपच्यते॥तिस्रःसꣳसृष्टावसति॥४॥
तिस्रोहिरात्रीःक्रीतःसोमोवसति॥पुनातुतेपरिस्रुतमिति

यजुषापुनातिव्यावृत्त्यै॥पवित्रेणपुनाति॥पवित्रेणहिसोमंपुनंति॥
वारेणशश्वतातनेत्याह॥वारेणहिसोमंपुनंति॥वायुःपूतःपवि
त्रेणेतिनेतयापुनीयात्॥वृद्धाह्येषा॥अतिपवितस्यैतयापु
नीयात्॥कुविदंगेत्यनिरुक्तयाप्राजापत्ययागृह्णाति॥५॥अ
निरुक्तःप्रजापतिः॥प्रजापतेराप्त्यै॥एकयर्चागृह्णाति॥एकधै
वयजमानेवीर्यंदधाति॥आश्विनंधूम्रमालभते॥अश्विनौवैदे
वानांभिषजौ॥ताभ्यामेवास्मैभेषजंकरोति॥सारस्वतंमेषं॥
वाग्वैसरस्वती॥वाचैवैनंभिषज्यति॥ऐंद्रमृषभꣳसेंद्रत्वाय॥६॥

श्रौं॰सू॰प्र॰
१००

अक्ष्योर्लोमानिहिरण्यंवसतिग्रह्णांतिभिषज्यत्येकंच॥५॥
यत्त्रिषुयूपेष्वालभेत॥ बहिर्धास्मादिंद्रियंवीर्यंदध्यात्॥ भ्रा
तृव्यमस्मैजनयेत्॥ एकयूपआलभते॥ एकधैवास्मिन्निंद्रि
यंवीर्यंदधाति॥ नास्मैभ्रातृव्यंजनयति॥ नैतेषांपशूनांपुरोडा
शाभवंति॥ ग्रहपुरोडाशाह्येते॥ एवं सुराममश्विनेतिस
र्वदेवत्येयाज्यानुवाक्येवाभवतः॥ सर्वाएवदेवताःप्रीणाति॥४॥
ब्राह्मणंपरिक्रीणीयादुच्छेषणस्यपातारं॥ ब्राह्मणोह्याहुत्या
उच्छेषणस्यपाता॥ यदिब्राह्मणंनाविंदेत्॥ वल्मीकवपा

५०

शिव

यामवनयेत्॥ सैवततःप्रायश्चित्तिः॥ यद्वैसौत्रामण्यैव्यृद्धं॥ त
दस्यैसमृद्धं॥ नानादेवत्याःपशवश्चपुरोडाशाश्चभवंतिसमृद्ध्यै
ऐंद्रःपशूनामुत्तमोभवति॥ ऐंद्रःपुरोडाशानांप्रथमः॥२॥ इंद्रि
येएवास्मैसमीचीदधाति॥ पुरस्तादनूयाज्यानांपुरोडाशैःप्रच
रति॥ पशवोवैपुरोडाशाः॥ पशूनेवावरुंधे॥ ऐंद्रमेकादशकपा
लंनिर्वपति॥ इंद्रियमेवावरुंधे॥ सावित्रंद्वादशकपालंप्रसू
त्यै॥ वारुणंदशकपालं॥ अंततएववरुणमवयजते॥ वडबा
दक्षिणा॥३॥ उतवाएषाश्वंसूते॥ उताश्वतरं॥ उतसोमउत

ब्रा०प्र०
१०१

सुरा॥ यत्सौत्रामणी समध्ये॥ बार्हस्पत्यंपशुंचतुर्थमतिपवित्रस्या
लभते॥ब्रह्मवैदेवानांबृहस्पतिः॥ब्रह्मणैव यज्ञस्यव्यृद्धमपि
वपति॥पुरोडाशवानेषपशुर्भवति॥न ह्येतस्यमहं गृह्णंति॥ सो
मप्रतीकाः पितरस्तृप्णुतेतिशतातृण्णायां समवनयति॥७॥श
तायुः पुरुषः शतेंद्रियः॥ आयुष्येवेंद्रियेप्रतितिष्ठति॥दक्षिणेग्नौ
जुहोति॥ पापवस्यसस्य व्यावृत्त्यै॥ हिरण्यमंतरा धारयति॥
पूतामेवैनां जुहोति॥ शतमानंभवति॥शतायुः पुरुषः शतेंद्रि
यः॥ आयुष्येवेंद्रियेप्रतितिष्ठति॥ यत्रैवशतातृण्णां धारयति॥

१०१
श्रिव

८॥ तस्मिन्दधाति प्रतिष्ठित्यै॥ पितृन्वाएतस्येंद्रियंवीर्यंगच्छति॥
यं सोमोतिपवते॥पितृणां याज्यानुवाक्याभिरुपतिष्ठते॥य
देवास्यपितृनिंद्रियंवीर्यंगच्छति॥तदेवावरुंधे॥तिसृभिरुप
तिष्ठते॥तृतीयेवाइतोलोके पितरः॥तानेवप्रीणाति॥अथोत्रीणि
वैयज्ञस्येंद्रियाणि॥अध्वर्युर्होता ब्रह्मा॥तउपतिष्ठंते॥यान्ये
वयज्ञस्येंद्रियाणि॥तैरेवास्मैभेषजंकरोति॥९॥प्रीणातिप्रथ
मोदक्षिणासमवनयति धारयतींद्रियाणि कृत्वा स्वि॥१०॥अ
ग्निष्टोममग्रआहरति॥यज्ञमुखंवा अग्निष्टोमः॥यज्ञमुख

ब्रा० प्र०
१०२

मेवारभ्यस्तद्‌ माक्रमते ॥ अथैषोऽभिषेचनीयश्चतुस्त्रिꣳशपवमा
नो भवति ॥ त्रयस्त्रिꣳशद्वै देवताः ॥ ता एवाप्नोति ॥ प्रजापतिश्चतु
स्त्रिꣳशः ॥ तमेवाप्नोति ॥ सꣳशरषꣳ स्तोमानामयथापूर्वं ॥ य
द्विषमाः स्तोमाः ॥ १ ॥ ए तावान्वै यज्ञः ॥ यावान्पवमानाः ॥ अंत
श्लेषणं त्वा अन्यत् ॥ यत्समाः पवमानाः ॥ तेनासꣳशरः ॥ तेन
यथापूर्वं ॥ आत्मनैवाग्निष्टोमेन र्ध्नोति ॥ आत्मना पुण्यो भवति ॥ १०२
प्रजा वा उक्थानि ॥ पशव उक्थानि ॥ यदुक्थो भवत्यनुसंतत्यै ॥ २ ॥
स्तोमाः पशव उक्थान्येकं च ॥ ७ ॥ उप त्वा जामयो गिर इति प्रति शिव

पद्वति ॥ वाग्वै वायुः ॥ वाच एवैषोऽभिषेकः ॥ सर्वासामेव प्रजानाꣳ सूय
ते ॥ सर्वा एनं प्रजा राजेति वदंति ॥ एतमु त्यं दश क्षिप इत्याह ॥ आ
दित्या वै प्रजाः ॥ प्रजानामेवैतेन सूयते ॥ यंति वा एते यज्ञमुखा
त् ॥ ये सं भार्या अक्रन् ॥ १ ॥ यदाह पवस्व वाचो अग्रिय इति ॥ ते
नैव यज्ञमुखान्न यंति ॥ अनुष्टुक्प्रथमा भवति ॥ अनुष्टुगुत्तमा ॥
वाग्वा अनुष्टुक् ॥ वाचैव प्रयंति ॥ वाचोद्यंति ॥ उद्वती भवंति ॥
उद्वद्वा अनुष्टुभो रूपं ॥ आनुष्टुभो राजन्यः ॥ २ ॥ तस्मादुद्वती
भवंति ॥ सोऽर्यनुष्टुगुत्तमा भवति ॥ सुवर्गस्य लोकस्य संतत्यै ॥

योवैस वादेति ॥ नैनꣳ सवडुपनमति ॥ यः सामभ्य एति ॥ पापीन्सु
षुवाणोभवति ॥ एतानि खलु वै सामानि ॥ यत्पृष्ठानि ॥ यत्पृष्ठा
निभवंति ॥ ३ ॥ तैरेव सवान्नैति ॥ यानिदेवराजानाꣳ सामानि ॥
तैरमुष्मिन्लोके ऋध्नोति ॥ यानि मनुष्यराजानाꣳ सामानि ॥
तैरस्मिन्लोके ऋध्नोति ॥ उभयोरेव लोकयोर्ऋध्नोति ॥ देवलो
केच मनुष्यलोकेच ॥ एकविꣳशोभिषेचनीयस्योत्तमोभव
ति ॥ एकविꣳशः केशवपनीयस्य प्रथमः ॥ सप्तदशो दशपेयः ॥ ४ ॥
विड्वा एकविꣳशः ॥ राष्ट्रꣳ सप्तदशः ॥ विश एवैतन्मध्यतोभि

षिच्यंते ॥ तस्माद्वा एष विशां प्रियः ॥ विशो हि मध्यतोभिषिच्यते ॥ यद्वा
एनमदो दिशोनुव्यास्थापयंति ॥ तत्सुवर्गं लोकमभ्यारोहति ॥ यदि
मं लोकं न प्रत्यवरोहेत् ॥ अतिजनं वेयात् ॥ उद्वा माद्येत् ॥ यद्दृष
प्रतीचीनस्तोमोभवति ॥ इममेव तेन लोकं प्रत्यवरोहति ॥ अथो
अस्मिन्नेव लोके प्रतितिष्ठत्यनुन्मादाय ॥ ५ ॥ अर्कत्राजन्यो भवं
तिदशपेयोमाघेत्रीणि च ॥ ८ ॥ इर्वैयंरजता ॥ असौ हरिणी ॥ यद्रुक्मौ
भवतः ॥ आभ्यामेवैनमुभयतः परिगृह्णाति ॥ वरुणस्य वा अभि
षिच्यमानस्यापः ॥ इंद्रियं वीर्यं निरघ्नन् ॥ तत्सुवर्णꣳ हिरण्य

मभवत्॥ यद्रुक्ममंतर्दधाति॥ इंद्रियस्य वीर्यस्यानिर्घाताय॥ शतमा
नो भवति शतक्षरः॥ शतायुः पुरुषः शतेंद्रियः॥ आयुष्येवेंद्रिये
प्रतितिष्ठति॥ आयुर्वै हिरण्यं॥ आयुष्या एवैनमभ्यतिक्षरंति॥ ते
जो वै हिरण्यं॥ तेजस्या एवैनमभ्यतिक्षरंति॥ वर्चो वै हिरण्यं॥
वर्चस्या एवैनमभ्यतिक्षरंति॥ १॥ शतक्षरो शेचे॥ ९॥ अप्रतिष्ठितो
वा एष इत्याहुः॥ यो राजसूयेन यजत इति॥ यदा वा एष एतेन द्विरा
त्रेण यजते॥ अथ प्रतिष्ठा॥ अथ संवत्सरमाप्नोति॥ यावंति संवत्स
रस्याहोरात्राणि॥ तावतीरेतस्य स्तोत्रीयाः॥ अहोरात्रेष्वेव प्रतिति
ष्ठति॥ अग्निष्टोमः पूर्वमहर्भवति॥ अतिरात्र उत्तरं॥ १॥ नानैवा

होरात्रयोः प्रतितिष्ठति॥ पौर्णमास्यां पूर्वमहर्भवति॥ व्यष्टकायामुत्तरं॥
नानैवार्धमासयोः प्रतितिष्ठति॥ अमावास्यायां पूर्वमहर्भवति॥ उद्दृष्ट उ
त्तरं॥ नानैव मासयोः प्रतितिष्ठति॥ अथो खलु॥ य एव समानपक्षे पुण्याहे
स्यातां॥ तयोः कार्यं प्रतिष्ठित्यै॥ २॥ अपशव्यो द्विरात्र इत्याहुः॥ द्वे ह्येते
छंदसी॥ गायत्रं च त्रैष्टुभं च॥ जगतीमंतर्यंति॥ न ते न जगतीकृतेत्याहुः॥
यदेनां तृतीयसवने कुर्वंतीति॥ यदा वा षडहीनस्याहर्भजते॥ साङ्कस्यवाम
न॥ अथैव जगतीकृता॥ अथ पशव्यः॥ व्युष्टिर्वा एष द्विरात्रः॥ य एवं वि
द्वान्द्विरात्रेण यजते॥ व्येवास्मा उच्छति॥ अथो तम एवापहते॥ अग्निष्टो
ममंतत आहरंति॥ अग्निः सर्वा देवताः॥ देवतास्वेव प्रतितिष्ठति॥ ३॥ उत्त
रं प्रतिष्ठित्यै पशव्यः सप्तत्व॥ १०॥ वरुणस्य जामीश्वर आग्नेयमिंद्रस्य पत्रिष
ग्निष्ठोममुपलैयर्वै रजता प्रतिष्ठितो दश॥ १०॥ वरुणस्य यदभिभ्यां यात्रिषुतस्मा

१०७

ब्रा॰ प्रथमअष्टकसमाप्तः शुभं भवतु श्रीगणानं

६९॥ ६९॥

१०

अथब्राह्मणाद्वितीयाष्टकप्रारंभः॥छ॥हेरंब

अ॰ द्वि॰ ॥१॥

श्रीगणेशायनमः॥ ॥श्रीसरस्वत्यैनमः॥ ॥हरिः ओम्॥ ॥अंगिरसोवै
सत्रमासत।तेषांपृश्निर्घर्मधुगासीत्।सर्जीषेणाजीवन्।तेब्रुवन्।कस्मिंनुस
त्रमास्महे।येस्या ओषधीर्नजनयामइति।तेदिवोवृष्टिमसृजंत।यावंतस्तोकाअ
वापद्यंत।तावतीरोषधयोजायंत।ताजाताःपितरोविषेणालिंपन्।।१।।तासांज
ग्ध्वारुप्यंत्यैत्।तेब्रुवन्।कइदमित्थमकरिति।वयंभागधेयमिछमानाइति
पितरोब्रुवन्।किंवोभागधेयमिति।अग्निहोत्रएवनोप्यास्त्वित्यब्रुवन्।तेभ्यए
तद्भागधेयंप्रायछन्।यद्धुत्वानिमार्ष्टि।ततोवैतओषधीरस्वदयन्।यएवंवेद।
॥२॥स्वदंतेस्माओषधयः।तेवत्समुपावासृजन्।इदंनोहव्यंप्रदापयेति।सो ॥२॥
ब्रवीद्वृणै।दशमारात्रीर्जातंनदोहन्।आसंगवंमात्रासहचराणीति।त

स्माद्वत्संजातंदशरात्रीर्नदुहंति।आसंगवंमात्रासहचरति।वारेणह्यवृत।त
स्माद्वत्सःसंसृष्टधयःरुद्रोघातुकः।अतिहिसंधांधयति॥३॥अलिंपन्वैद्घा
क तुएकंच॥१॥ ॥प्रजापतिरग्निमसृजत।तंप्रजाअन्वसृज्यंत।तमभागमुपा
स्त।सोस्यप्रजाभिरपाक्रामत्।तमवरुरुत्समानोन्वैत्।तमवरुधंनाशक्नोत्।
सतपोतप्यत।सोग्निरुपारमत।तात्पिवैस्यप्रजापतिरिति।सरराटादुदमृष्ट॥१॥
तद्धृतमभवत्।तस्माद्यस्यदक्षिणतःकेशाउन्मृष्टाः।तांज्येष्ठलक्ष्मीप्राजाप
त्येत्याहुः।यद्रराटादुदमृष्ट।तस्माद्रराटेकेशानसंति।तदग्नौप्रागृह्णात्।तव्द्य
चिकित्सत्।जुहवानी३माहौषा३मिति।तद्विचिकित्सायैजन्म।यएवंविद्वा
न्विचिकित्सति॥२॥वसीयएवचेतयैते।तंवागभ्यवदज्जुहुधीति।सोब्रवीत्। स्य॰

कस्त्वमसीति। स्वेवतेवागित्यब्रवीत्। सोजुहोत्स्वाहेति। तत्स्वाहाकारस्यजन्म। य
एवंस्वाहाकारस्यजन्मवेद। करोतिस्वाहाकारेणवीर्यं। यस्यैवंविदुषःस्वाहाका
रेणजुह्वति॥ ३॥ भोगायैवास्यहुतंभवति। तस्याआहुत्यैपुरुषमसृजत। द्विती
यमजुहोत्। सोश्वमसृजत। तृतीयमजुहोत्। सगामसृजत। चतुर्थमजुहोत्।
सोविमसृजत। पंचममजुहोत्। सोजामसृजत॥ ४॥ सोग्निरबिभेत्। आहुती
भिर्वैमाप्नोतीति। सप्रजापतिंपुनःप्राविशत्। तंप्रजापतिरब्रवीत्। जायस्वे
ति। सोब्रवीत्। किंभागधेयमभिजनिष्यइति। तुभ्यमेवेदंहूयाताइत्यब्रवीत्।
सएतद्भागधेयमभ्यजायत। यदग्निहोत्रं॥ ५॥ तस्मादग्निहोत्रमुच्यते। तद्धू ॥२॥
यमानमादित्योब्रवीत्। माहौषीः। उभयोर्वैनावेतदिति। सोब्रवीत्। कथंनौहो ष्यंतीति

ष्यंतीति। सायमेवतुभ्यंजुहवान्। प्रातर्मह्यमित्यब्रवीत्। तस्मादग्नयेसायंहूय
ते। सूर्यायप्रातः॥ ६॥ आग्नेयीवैरात्रिः। ऐंद्रमहः। यदनुदितेसूर्येप्रातर्जुहुयात्।
उभयमेवाग्नेयंस्यात्। उदितेसूर्येप्रातर्जुहोति। तथाग्नयेसायंहूयते। सूर्याय
प्रातः। रात्रिंवाअनुप्रजाःप्रजायंते। अन्हाप्रतितिष्ठंति। यत्सायंजुहोति॥ ७॥ प्रै
वतेनजायते। उदितेसूर्येप्रातर्जुहोति। प्रत्येवतेनतिष्ठति। प्रजापतिरकामयत
प्रजायेयेति। सएतदग्निहोत्रंमिथुनमपश्यत्। तदुदितेसूर्येजुहोत्। यजुषान्य
त्। तूष्णीमन्यत्। ततोवैसप्राजायत। यस्यैवंविदुषउदितेसूर्येग्निहोत्रंजुह्व
ति॥ ८॥ प्रैवजायते। अथोयथादिवाप्रजानन्नेति। तादृगेवतत्। अथोखल्वा
हुः। यस्यवैद्वौपुण्यौगृहेवसतः। यस्तयोरन्यंराधयत्यन्यन्न। उभौवावस

ब्रा॰ द्वि॰
॥ ३ ॥

तार्ष्टं छतीति। अग्निं वावादित्यः सायं प्रविशति। तस्मादग्निर्दूरान्नक्तं ददृशे।
उभे हि तेजसी संपद्येते॥ ९॥ उद्यन्तं वावादित्यमग्निरनुसमारोहति। तस्माद्धूम
एवाग्नेर्दिवा ददृशे। यदग्नये सायं जुहुयात्। आ सूर्याय वृश्च्येत। यत्सूर्याय प्रा
तर्जुहुयात्। आग्नये वृश्च्येत। देवताभ्यः समदं दध्यात्। अग्निर्ज्योतिर्ज्योतिः सू
र्यः स्वाहेत्येव सायं होतव्यं। सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातः। तथोभाभ्यां
सायं हूयते॥ १०॥ उभाभ्यां प्रातः। न देवताभ्यः समदं दधाति। अग्निर्ज्योतिरि
त्याह। अग्निर्वै रेतोधाः। प्रजा ज्योतिरित्याह। प्रजा एवास्मै प्रजनयति। सूर्यो
ज्योतिरित्याह। प्रजास्वेव प्रजातासु रेतो दधाति। ज्योतिरग्निः स्वाहेत्याह। प्रजा ॥ २ ॥
एव प्रजाता अस्यां प्रतिष्ठापयति॥ ११॥ तूष्णीमुत्तरामाहुतिं जुहोति। मिथु

नत्वाय प्रजात्यै। यदुदिते सूर्ये प्रातर्जुहुयात्। यथातिथये प्रद्रुताय शून्यायावस
थायाहार्यं हरन्ति। तादृगेव तत्। क्वाह तं तस्तद्भवतीत्याहुः। यस्तन्न वेद। यस्मै तद्धर
न्तीति। तस्माद्यदोषसं जुहोति। तदेव संप्रति। अथो यथा प्रार्थमोषसं परिवेवेष्टि। ता
दृगेव तत्॥ १२॥ असृष्टं विचिकित्सति जुव्हस्यजामसृजताग्निहोत्रं सूर्याय प्रातर्जु
होति जुव्हति संपद्येते हूयते स्थापयति संप्रतिहुव ॥ २ ॥ ॥ रुद्रो वा एषः। य
दग्निः। पत्नी स्थाली। यन्मध्येऽग्नेरधिश्रयेत्। रुद्राय पत्नीमपिदध्यात्। प्रमायुका
स्यात्। उदीचोऽङ्गारान्निरूह्याधिश्रयति। पत्नियै गोपीथाय। व्यन्तान्करोति। तथा प
त्यप्रमायुका भवति॥ १३॥ घर्मो वा एषोऽशान्तः। अहरहः प्रवृज्यते। यदग्निहोत्रं।
प्रतिषिञ्चेत्पशुकामस्य। शान्तमिव हि पशव्यं। न प्रतिषिञ्चेद्ब्रह्मवर्चसकामस्य।

ब्रा॰ द्वि॰
॥४॥

समिद्धमिव हि ब्रह्मवर्चसं। अथो खलु। प्रतिषिच्यमेव। यत्प्रतिषिंचति॥२॥ तत्पशव्यं।
यज्जुहोति। तद्ब्रह्मवर्चसि। उत्सयमेवाकः। प्रच्युतं वा एतदस्माल्लोकात्। अगतं देवलोकं।
यच्छृतꣳ हविरनभिघारितं। अभिद्योतयति। अस्त्यैवेनद्धारयति। अथो देवत्रैवैनद्गम
यति॥३॥ पर्यग्निकरोति। रक्षसामपहत्यै। त्रिः पर्यग्निकरोति। त्र्यावृद्धि यज्ञः। अथो
मेध्यत्वाय। यत्प्राचीनमुद्वासयेत्। यजमानꣳ शुचार्पयेत्। यद्दक्षिणा। पितृदेवत्यꣳ
स्यात्। यत्प्रत्यक्॥४॥ पत्नीꣳ शुचार्पयेत्। उदीचीनमुद्वासयति। एषा वै देवमनुष्या
णाꣳ शांता दिक्। तामेवैनदनूद्वासयति शांत्यै। वर्त्म करोति। यज्ञस्य संतत्यै। निष्ट
पति। उपैव तत्स्तृणाति। चतुरुन्नयति। चतुष्पादः पशवः॥५॥ पशूनेवावरुंधे। ॥४॥
सर्वान्पूर्णानुन्नयति। सर्वे हि पुण्या राद्धाः। अनूचउन्नयति। प्रजाया अनूचीनत्वा

य। अनूच्येवास्य प्रजा धुर्काभवति। संमृशति व्यावृत्त्यै। नाहोष्यन्नुपसादयेत्। यदहो
ष्यन्नुपसादयेत्। यथान्यस्मा उपनिधाय॥६॥ अन्यस्मै प्रयच्छति। तादृगेव तत्। आ
स्मै वृश्च्येत। यदेव गार्हपत्येधिश्रयति। तेन गार्हपत्यं प्रीणाति। अग्निरबिभेत्। आहुत
यो मात्येष्यंतीति। स एताꣳ समिधमपश्यत्। तामाधत्त। ततो वा अग्नावाहुतयोध्रि
यंत॥७॥ यदेनꣳ समयच्छत्। तत्समिधः समित्वं। समिधमादधाति। सममेवैनं य
च्छति। आहुतीनां धृत्यै। अथो अग्निहोत्रमेव ध्मवत्करोति। आहुतीनां प्रतिष्ठित्यै।
ब्रह्मवादिनो वदंति। यदेकाꣳ समिधमाधाय द्वे आहुती जुहोति। अथ कस्याꣳ स
मिधि द्वितीयामाहुतिं जुहोतीति॥८॥ यद्द्वे समिधावादध्यात्। भ्रातृव्यमस्मै ज
नयेत्। एकाꣳ समिधमाधाय। यजुषान्यामाहुतिं जुहोति। उभे एव समिद्वती

ब्रा॰ द्वि॰
॥५॥

आहुतीर्जुहोति। ना स्मै भ्रातृव्यं जनयति। आदीप्तायां जुहोति। समिद्धमिव हि ब्रह्मवर्च्च सं। अथो यथाऽतिथिं ज्योतिष्कृत्वा परिवेवेष्टि। तादृगेव तत्। चतुरुन्नयति। द्विर्जुहोति। तस्माद्द्विपाच्चतुष्पादमत्ति। अथो द्विपद्येव चतुष्पदः प्रतिष्ठापयति॥१॥ भवे तिप्रतिषिंचति गमयति प्रत्यक्षमेवाव उपनिधायाधियं तेतितत्र ब्रह्मारिच॥३॥ ॥

॥उत्तरावतीं वै देवा आहुतिमजुहवुः अवाचीमसुराः ततो देवा अभवन्। परासुराः। यं कामयेत वसीयान्त्स्यादिति। कनीयस्तस्य पूर्वं हुत्वा। उत्तरं भूयो जुहुयात्। एषा वा उत्तरावत्याहुतिः। तां देवा अजुहवुः। ततस्तेऽभवन्॥२॥ यस्यैवं जुह्वति। भवत्येव। यं कामयेत पापीयान्त्स्यादिति। भूयस्तस्य पूर्वं हुत्वा। उत्तरं कनीयो जु ॥५॥ हुयात्। एषा वा अवाच्याहुतिः। तामसुरा अजुहवुः। ततस्ते पराभवन्। यस्यैवं जुह्व

ति। परैव भवति॥२॥ हुत्वोपसादयत्यजामित्वाय। अथो व्यावृत्त्यै। गार्हपत्यं प्रतीक्षते। अननुध्यायिनमेवैनं करोति। अग्निहोत्रस्य वै स्थाणुरस्ति। तं यऋच्छेत्। यज्ञस्थाणुमृच्छेत्। एष वा अग्निहोत्रस्य स्थाणुः। यत्पूर्वाहुतिः। तां यदुत्तरयाभिजुहुयात्॥३॥ यज्ञस्थाणुमृच्छेत्। अतिहाय पूर्वामाहुतिं जुहोति। यज्ञस्थाणुमेव परिवृणक्ति। अथो भ्रातृव्यमेवाप्त्वातिक्रामति। अवाचीनं सायमुपमार्ष्टि। रेत एव तद्दधाति। ऊर्ध्वं प्रातः। प्रजनयत्येव तत्। ब्रह्मवादिनो वदन्ति। चतुरुन्नयति॥४॥ द्विर्जुहोति। अथ क्व द्वे आहुती भवत इति। अग्नौ वैश्वानर इति ब्रूयात्। एष वा अग्निर्वैश्वानरः। यद्ब्राह्मणः। हुत्वा द्विः प्राश्नाति। अग्नावेव वैश्वानरे द्वे आहुती जुहोति। द्विर्जुहोति। द्विर्निमार्ष्टि। द्विः प्राश्नाति॥५॥ षट्संपद्यन्ते। षड्वा ऋतवः। ऋतूनेव प्रीणाति। ब्रह्मवादिनो वद

ब्रा॰द्वि॰

॥६॥

ति। किंदेवत्यमग्निहोत्रमिति। वैश्वदेवमितिब्रूयात्। यद्यजुषाजुहोति। तदैंद्राग्नं। यत्तूष्णीं। तत्प्राजापत्यं॥ ६॥ यान्निमार्ष्टि। तदोषधीनां। यद्द्वितीयं। तत्पितॄणां। यत्प्राश्नाति। तद्गर्भाणां। तस्माद्गर्भा अनश्नंतो वर्धंते। यदाचामति। तन्मनुष्याणां। उदङ्पर्यावृत्याचामति॥ ७॥ आत्मनो गोपीथाय। निर्णेनेक्ति शुध्यै। निष्टपति स्वगाकृत्यै। उद्दिशति। सप्तर्षीनेव प्रीणाति। दक्षिणा पर्यावर्तते। स्वमेव वीर्यमनुपर्यावर्तते। तस्माद्दक्षिणोर्ध आत्मनो वीर्यावत्तरः। अथो आदित्यस्यैवावृतमनुपर्यावर्तते। हुत्वोपसमिंधे॥ ८॥ ब्रह्मवर्चसस्य समिध्यै। न बर्हिरनुप्रहरेत्। असंस्थितो वा एष यज्ञः। यदग्निहोत्रं। यदनुप्रहरेत्। यज्ञं विच्छिंद्यात्। तस्मान्नानुप्रहृत्यं। यज्ञस्य संतत्यै। अपो निनयति। अवभृथस्यैव रूपमकः॥ ९॥ अभवप्रभ ॥६॥

वति जुहुया न्नयति मार्ष्टि द्वि प्राश्नाति प्राजापत्यमाचामती धे कः॥ ४॥ ॥

ब्रह्मवादिनो वदंति। अग्निहोत्रप्रायणा यज्ञाः। किंप्रायणमग्निहोत्रमिति। वत्सो वा अग्निहोत्रस्य प्रायणं। अग्निहोत्रं यज्ञानां। तस्य पृथिवी सदः। अंतरिक्षमाग्नीध्रं। द्यौर्हविर्धानं। दिव्या आपः प्रोक्षणयः। ओषधयो बर्हिः॥ १॥ वनस्पतय इध्मः। दिशः परिधयः। आदित्यो यूपः। यजमानः पशुः। समुद्रोऽवभृथः। संवत्सरः स्वगाकारः। तस्मादाहिताग्नेः सर्वमेव बर्हिष्यं दत्तं भवति। यत्सायं जुहोति। रात्रिमेव तेन दक्षिण्यां कुरुते। यत्प्रातः॥ २॥ अहरेव तेन दक्षिण्यं कुरुते। यत्ततो ददाति। सा दक्षिणा। यावंतो वै देवा अहुतमादन्। ते पराऽभवन्। त एतदग्निहोत्रं सर्वस्यैव समवदाया जुहवुः। तस्मादाहुः। अग्निहोत्रं वै देवा गृहाणां निष्कृतिमपश्यन्निति। यत्सायं जुहोति। रात्रिया

ब्रा॰द्वि॰

॥७॥

एवतद्धुताद्याय॥३॥यजमानस्यापराभावाय।यस्मातः अन्हएवतद्धुताद्याय।यजमा
नस्यापराभावाय।यत्ततोश्नाति।हुतमेवतत्।द्वयोःपयसाजुहुयात्पशुकामस्य।ए
तद्वाअग्निहोत्रंमिथुनं।यएवंवेद।प्रप्रजयापशुभिर्मिथुनैर्जायते॥४॥इमामेवपूर्वया

मु॰

दुहे।अमूमुत्तरया।अधिश्रित्योत्तरमानयति।योनावेवतद्रेतःसिंचतिप्रजनने।आज्येन
जुहुयात्तेजस्कामस्य।तेजोवाआज्यं।तेजस्व्येवभवति।पयसापशुकामस्य।एतद्वैप
शूनांरूपं।रूपेणैवास्मैपशूनवरुंधे॥५॥पशुमानेवभवति।दध्नेंद्रियकामस्य।
इंद्रियंवैदधि।इंद्रियाव्येवभवति।यवाग्वाग्रामकामस्यौषधावैमनुष्याः।भागधेयेनै
वास्मैसजातानवरुंधे।ग्राम्येवभवति।अयज्ञोवाएषः।योसामा॥६॥चतुरुन्नयति।॥७॥
चतुरक्षरंरथंतरं।रथंतरस्यैषवर्णः।उपरीवहरति।अंतरिक्षंवामदेव्यं।वामदेव्य

स्यैषवर्णः।द्विर्जुहोति।द्व्यक्षरंबृहत्।बृहतएषवर्णः।अग्निहोत्रमेवतत्सामन्वत्करोति॥
॥७॥योवाअग्निहोत्रस्योपसदोवेद।उपैनमुपसदोनमंति।विंदतउपसत्तारं।उन्नीयो
पसादयति।पृथिवीमेवप्रीणाति।होष्यन्नुपसादयति।अंतरिक्षमेवप्रीणाति।हुत्वोप
सादयति।दिवमेवप्रीणाति।एतावाअग्निहोत्रस्योपसदः॥८॥यएवंवेद।उपैनमु
पसदोनमंति।विंदतउपसत्तारं।योवाअग्निहोत्रस्याश्रावितंप्रत्याश्रावितं।होतारं
ब्रह्माणंवषट्कारंवेद।तस्यत्वेवहुतं।प्राणोवाअग्निहोत्रस्याश्रावितं।अपानःप्रत्याश्रा
वितं।मनहोता।चक्षुर्ब्रह्मा।निमेषोवषट्कारः॥९॥यएवंवेद।तस्यत्वेवहुतं।सायंया
वानश्चवैदेवाःप्रातर्यावाणश्चाग्निहोत्रिणोगृहमागच्छंति।तान्यन्नतर्पयेत्।प्रजया
स्यपशुभिर्वितिष्ठेरन्।यत्तर्पयेत्।तृप्ताएनंप्रजयापशुभिस्तर्पयेयुः।सजूर्देवैःसायं

यावभिरिति सायं समस्यति। सजूर्देवैः प्रातर्यावभिरिति प्रातः। ये चैव देवाः सायंयावा
नो ये च प्रातर्यावाणः॥२०॥ तानेवोभयांस्तर्पयति। त एनं तृप्ताः प्रजया पशुभिस्तर्प
यंति। अरुणो ह स्माहौपवेशिः। अग्निहोत्र एवाहं सायंप्रातर्वज्रं भ्रातृव्येभ्यः प्रह
रामि। तस्मान्मत्पापीयांसो भ्रातृव्या इति। चतुरुन्नयति। द्विर्जुहोति। समित्सप्तमी॥
सप्तपदा शक्वरी। शक्वरी वज्रः। अग्निहोत्र एव तत्सायंप्रातर्वज्रं यजमानो भ्रातृव्या
य प्रहरति। भवत्यात्मना। परास्य भ्रातृव्यो भवति॥२१॥ बर्हिः प्रातर्हुतावाघाय जायते
रुंधे सामाकरोत्येतावा अग्निहोत्रस्योपसदो वषट्कारश्च प्रातर्यावाणो वज्रस्त्री
णि च॥५॥ ॥प्रजापतिरकामयतात्मन्वन्मे जायेतेति। सोऽजुहोत्। तस्यात्मन्वद
सृजत। अग्निर्वायुरादित्यः। तेऽब्रुवन्। प्रजापतिरहौषीदात्मन्वन्मे जायेतेति। तस्य ॥९॥
वयमजनिष्महि। जायतामात्मन्वदिति ते जुहवुः। प्राणानामग्निः। तन्वै वायुः॥१॥

चक्षुष आदित्यः। तेषां हुताद् जायत गौरेव। तस्यै पयसि व्यायच्छंत। मम हुताद् जनिम
मेति। ते प्रजापतिं प्रश्नमायन्। स आदित्योऽग्निमब्रवीत्। यतरो नौ जयात्। तन्नौ सह
सदिति। कस्य के होषीदिति प्रजापतिरब्रवीत्। कस्य क इति। प्राणानामहमित्यग्निः
॥२॥ तन्वा अहमिति वायुः। चक्षुषोऽहमित्यादित्यः। य एव प्राणानामहौषीत्। तस्य
हुतादजनीति। अग्नेर्हुतादजनीति। तदग्निहोत्रस्याग्निहोत्रत्वं। गौर्वा अग्निहोत्रं। य ए
वं वेद गौरग्निहोत्रमिति। प्राणापानाभ्यामेवाग्निं समर्धयति। अव्यर्धुकः प्राणापाना
भ्यां भवति॥३॥ य एवं वेद। तौ वायुरब्रवीत्। अनु माभजतमिति। यदेव गार्हपत्येऽधि
श्रित्याहवनीयमभ्युद्द्रवान्। तेन त्वा प्रीणानित्यब्रूतां। तस्माद्यद्गार्हपत्येऽधिश्रित्या
हवनीयमभ्युद्द्रवति। वायुमेव तेन प्रीणाति। प्रजापतिर्देवताः सृजमानः। अग्निमे

आ॰द्वि॰ ॥९॥

सदेवतानांप्रथममसृजत।सोन्यदालंभ्यमवित्वा॥४॥प्रजापतिमग्निपर्यावर्तत।सम
त्योरबिभेत्।सोमुमादित्यमात्मनोनिरमिमीत।तंहुत्वापराङ्पर्यावर्तत।ततोवैसम
त्युमपाजयत।अपमृत्युंजयति।यएवंवेद।तस्माद्यस्यैवंविदुषः।उतैकाहमुतद्व्यहन्न
जुह्वति।हुतमेवास्यभवति।असौह्यादित्योग्निहोत्रं॥५॥तनुर्वैवायुरग्निर्भवत्यवित्वा
भवत्येकच॥६॥ ॥रौद्रंगवि।वायव्यमुपसृष्टं।आश्विनंदुह्यमानं।सौम्यंदुग्धं।
वारुणमधिश्रितं।वैश्वदेवाबिंदवः।पौष्णमुदंतं।सारस्वतंविष्यंदमानं।मैत्रंशरः।
धातुरुद्वासितं।बृहस्पतेरुन्नीतं।सवितुःप्रक्रांतं।द्यावापृथिव्यंह्रियमाणं।ऐंद्राग्न
मुपसन्नं।अग्नेःपूर्वाहुतिः।प्रजापतेरुत्तरा।ऐंद्रंहुतं॥१॥उद्वासितंसप्तच॥७॥ ॥ ॥९॥
दक्षिणतउपसृजति।पितृलोकमेवतेनजयति।प्राचीमावर्तयति।देवलोकमेवते

नजयति।उदीचीमावृत्यदोग्धि।मनुष्यलोकमेवतेनजयति।पूर्वौदुह्याज्ज्येष्ठस्यज्येष्ठिने
यस्य।योवागतश्रीस्यात्।अपरौदुह्यात्कनिष्ठस्यकानिष्ठिनेयस्य।योवाबुभूषेत्॥१॥
नसंमृशति।पापवस्यसस्यव्यावृत्त्यै।वायव्यंवाएतदुपसृष्टं।आश्विनंदुह्यमानं।मैत्रंदु पं२
ग्धं।अर्यम्णउद्वास्यमानं।त्वाष्ट्रमुन्नीयमानं।बृहस्पतेरुन्नीतं।सवितुःप्रक्रांतं।द्यावा
पे पृथिव्यंह्रियमाणं॥७॥ऐंद्राग्नमुपसादितं।सर्वाभ्योवाएषदेवताभ्योजुहोति।योग्नि
होत्रंजुहोति।यथाखलुवैधेनुंतीर्थेतर्पयति।एवमग्निहोत्रीयजमानंतर्पयति।तृप्य
तिप्रजयापशुभिः।प्रसुवर्गंलोकंजानाति।पश्यतिपुत्रं।पश्यतिपौत्रं।प्रप्रजयापशु
भिर्मिथुनैर्जायते।यस्यैवंविदुषोग्निहोत्रंजुह्वति।यउचैनदेवंवेद॥२॥बुभूषेधि
यमाणंजायतेद्वेच॥८॥ ॥त्रयोवैप्रैयमेधाआसन्।तेषांत्रिरेकोग्निहोत्रमजु

श्रा·द्वि:
॥१०॥

होत। द्विरेकः। स ह्रदेकः। तेषां यस्त्रिस्जुहोत। स ऋचा जुहोत। यो द्विः। स यजुषा। यः स
कृत्। स तूष्णीं॥१॥ यश्च यजुषा जुहोति यश्च तूष्णीं। तावुभावार्ध्नुतां। तस्माद्यजुषाहुतिः
पूर्वा होतव्या। तूष्णीमुत्तरा। उभे एव धिःअवरुंधे। अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सा
यं जुहोति। रेत एव तद्दधाति। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः। रेत एव हितं
प्रजनयति। रेतो वा एतस्य हितं न प्रजायते॥२॥ यस्याग्निहोत्रमहुतं सूर्योऽभ्युदे
ति। यद्यंतेस्यात्। उन्नीय प्राङुदाद्रवेत्। स उपसाद्यातमितोरासीत। स यदा ता
म्येत्। अथ भूः स्वाहेति जुहुयात्। प्रजापतिर्वै भूतः। तमेवोपासरत्। स एवैनं त
त उन्नयति। नार्तिमार्छति यजमानः॥३॥ तूष्णीं जायते यजमानः॥४॥ ॥ ॥१०॥
यदग्निमुद्धरति। वसवस्तर्ह्यग्निः। तस्मिन्यस्य तथा विधे जुह्वति। वसुष्वेवास्या

श्रा

ग्निहोत्रं हुतं भवति। निहितो धूपायं छेते। रुद्रास्तर्ह्यग्निः। तस्मिन्यस्य तथा विधे
जुह्वति। रुद्रेष्वेवास्याग्निहोत्रं हुतं भवति। प्रथमामिध्ममर्चिरालभते। आदित्यास्त
र्ह्यग्निः॥१॥ तस्मिन्यस्य तविधे जुह्वति। आदित्येष्वेवास्याग्निहोत्रं हुतं भवति।
सर्व एव सर्वज्ञा इध्म आदीप्तो भवति। विश्वेदेवास्तर्ह्यग्निः। तस्मिन्यस्य तथा वि
धे जुह्वति। विश्वेष्वेवास्य देवेष्वग्निहोत्रं हुतं भवति। नितरामार्चिरुपावैति लोहि
नीकेव भवति। इंद्रस्तर्ह्यग्निः। तस्मिन्यस्य तथा विधे जुह्वति। इंद्र एवास्याग्निहोत्रं
हुतं भवति॥२॥ अंगारा भवंति। तेभ्योंऽगारेभ्योऽर्चिरुदेति। प्रजापतिस्तर्ह्यग्निः।
तस्मिन्यस्य तथा विधे जुह्वति। प्रजापतावेवास्याग्निहोत्रं हुतं भवति। शरोंऽगा
रा अध्यूहंते। ब्रह्म तर्ह्यग्निः। तस्मिन्यस्य तथा विधे जुह्वति। ब्रह्मन्नेवास्याग्नि

ब्रा॰ द्वि॰
॥११॥

होत्रं हुतं भवति। वसुषु रुद्रेष्वादित्येषु विश्वेषु देवेषु। इडे प्रजातो ब्रह्मन्न्। अपरिव
र्गमेवास्यैता सु देवता सु हुतं भवति। यस्यैवं विदुषोऽग्निहोत्रं जुह्वति। यउचैनदेवं वे
द॥३॥ आदित्यास्त्वर्ध्वग्निरिं इ एवास्याग्निहोत्रं हुतं भवति देवेषु चत्वारि च॥१०॥
॥ऋतं त्वा सत्येन परिषिंचामीति सायं परिषिंचति। सत्यं त्वर्तेन परिषिंचामीति प्रातः।
अग्निर्वा ऋतं। असावादित्यः सत्यं। अग्निमेव तदादित्येन सायं परिषिंचति। अग्निना
दित्यं प्रातः सः। यावदहोरात्रे भवतः। तावदस्य लोकस्य। नार्त्तिर्न रिष्टिः। नांतो न प
र्यंतोऽस्ति। यस्यैवं विदुषोऽग्निहोत्रं जुह्वति। यउचैनदेवं वेद॥१॥ अस्ति ह्येव॥११॥ ॥
अंगिरसः प्रतिरग्निं रुद्र उत्तरावती ब्रह्मवादिनोऽग्निहोत्र प्रायणाय ह्राः प्रजापति ॥११॥
रकामयतास न्वद्रौ द्रंगाविदक्षिणतस्त्वयोवेयदग्निम् ऋतं त्वैकादश॥२१॥ ॥

अंगिरसः प्रवतेन पशून्नेवयन्निमार्ष्टियो वा अग्निहोत्रस्य दक्षिणातः षष्टिः॥ ६०॥
॥ ॥ॐम्॥ ॥छ॥ ॥छ॥ ॥हरिः ओम्॥ ॥प्रजापतिरका
मयत प्रजाः सृजेयेति। स एतं दशहोतारमपश्यत्। तं मनसानुद्रुत्य दर्भस्तंबे जुहोत्।
ततो वै स प्रजा असृजत। ता अस्मात्सृष्टा अपाक्रामन्। ता ग्रहेणागृह्णात्। तद्ग्रहस्य ग्र
हत्वं। यः कामयेत प्रजायेयेति। स दशहोतारं मनसानुद्रुत्य दर्भस्तंबे जुहुयात्। प्रजा
पतिर्वै दशहोता॥१॥ प्रजापतिरेव भूत्वा प्रजायते। मनसा जुहोति। मन इव हि प्रजा
पतिः। प्रजापतेराप्त्यै। पूर्णया जुहोति। पूर्ण इव हि प्रजापतिः। प्रजापतेराप्त्यै। न्यूनया
जुहोति। न्यूनाद्धि प्रजापतिः प्रजा असृजत। प्रजानां सृष्ट्यै॥२॥ दर्भस्तंबे जुहोति।
द्वि॰ एतस्माद्वै योनेः प्रजापतिः प्रजा असृजत। यस्मादेव योनेः प्रजापतिः प्रजा असृजत।

तस्मादेवयोनेः प्रजायते। ब्राह्मणो दक्षिणत उपास्ते। ब्राह्मणो वै प्रजानामुपद्रष्टा। उप
द्रष्टुमत्येव प्रजायते। ग्रहीभवति। प्रजानां सृष्टानां धृत्यै। यं ब्राह्मणं विद्यां विद्वांसं य
शो नर्छेत॥३॥ सोऽरण्यं परेत्य। दर्भस्तम्बमुद्ग्रथ्य। ब्राह्मणं दक्षिणतो निषाद्य। चतुर्होतॄ
न्व्याचक्षीत। एतद्वै देवानां परमं गुह्यं ब्रह्म। यच्चतुर्होतारः। तदेव प्रकाशं गमयति। तदे
नं प्रकाशं गतं। प्रकाशं प्रजानां गमयति। दर्भस्तम्बमुद्ग्रथ्य व्याचष्टे॥४॥ अग्निवान्वै
दर्भस्तम्बः। अग्निवत्येव व्याचष्टे। ब्राह्मणो दक्षिणत उपास्ते। ब्राह्मणो वै प्रजानामु
पद्रष्टा। उपद्रष्टुमत्येवैनं यश ऋच्छति। ईश्वरं तं यशोऽर्तोरित्याहुः। यस्यान्ते व्याचष्ट
इति। वरस्तस्मै देयः। यदेवैनं तत्रोपनमति। तदेवावरुन्धे॥५॥ अग्निमादधानो
दशहोत्रारणिमवदध्यात्। प्रजातमेवैनमाधत्ते। तेनैवोद्धुत्याग्निहोत्रं जुहुयात्।

प्रजातमेवैनं जुहोति। हविर्निर्वप्स्यन्दशहोतारं व्याचक्षीत। प्रजातमेवैनं निर्वपति।
सामिधेनीरनुवक्ष्यन्दशहोतारं व्याचक्षीत। सामिधेनीरेव सृष्ट्वाऽऽरभ्य प्रतनुते। अथो य
ज्ञो वै दशहोता। यज्ञमेव तनुते॥६॥ अभिचरन्दशहोतारं जुहुयात्। नव वै पुरुषे प्रा
णाः। नाभिर्दशमी। सप्राणमेवैनमभिचरति। एतावद्वै पुरुषस्य स्वं। यावत्प्राणाः।
यावदेवास्यास्ति। तदभिचरति। स्वकृत इरिणे जुहोति प्रदरे वा। एतद्वा अस्यै निर्ऋति
गृहीतं। निर्ऋतिगृहीत एवैनं निर्ऋत्या ग्राहयति। यद्वाचः क्रूरं। तेन वषट्करोति। वाच ए
वैनं क्रूरेण प्रवृश्चति। ताजगार्तिमार्छति॥७॥ दशहोतास्तेष्याक्छेव्याचष्टे रुधएव
तनुते निर्ऋतिगृहीतं पंच च॥१॥ ॥ प्रजापतिरकामयत दर्शपूर्णमासौ सृजे
येति। स एतं चतुर्होतारमपश्यत्। तं मनसानुद्रुत्याहवनीये जुहोत्। ततो वै स दर्श

पूर्णमासावसृजत। तावस्मात्सृष्टावपाक्रामतां॥ तौ ग्रहेणागृह्णात्। तद्ग्रहस्य ग्रहत्वं। दर्श
पूर्णमासावालभमानः स्वर्तुर्होतारं मनसानुद्रुत्याहवनीये जुहुयात्। दर्शपूर्णमासावे
वसृष्ट्वारभ्य प्रतनुते॥१॥ ग्रहो भवति। दर्शपूर्णमासयोः सृष्टयोर्धृत्यै। सोऽकामय
त चातुर्मास्यानि सृजेयेति। स एतं पंचहोतारमपश्यत्। तं मनसानुद्रुत्याहवनीये जुहो
त्। ततो वै स चातुर्मास्यान्यसृजत। तान्यस्मात्सृष्टान्यपाक्रामन्॥ तानि ग्रहेणागृह्णात्।
तद्ग्रहस्य ग्रहत्वं। चातुर्मास्यान्यालभमानः॥२॥ पंचहोतारं मनसानुद्रुत्याहवनीये
जुहुयात्। चातुर्मास्यान्येव सृष्ट्वारभ्य प्रतनुते। ग्रहो भवति। चातुर्मास्यानां सृष्टानां
धृत्यै। सोऽकामयत पशुबंधं सृजेयेति। स एतं षड्ढोतारमपश्यत्। तं मनसानुद्रुत्या ॥१३॥
हवनीये जुहोत्। ततो वै स पशुबंधमसृजत। सोऽस्मात्सृष्टोऽपाक्रामत्। तं ग्रहेणागृह्णात्।

॥३॥ तद्ग्रहस्य ग्रहत्वं। पशुबंधेन यक्ष्यमाणः। षड्ढोतारं मनसानुद्रुत्याहवनीये जुहु
यात्। पशुबंधमेव सृष्ट्वारभ्य प्रतनुते। ग्रहो भवति। पशुबंधस्य सृष्टस्य धृत्यै। सोऽकाम
यत सौम्यमध्वरं सृजेयेति। स एतं सप्तहोतारमपश्यत्। तं मनसानुद्रुत्याहवनीये जु
होत्। ततो वै स सौम्यमध्वरमसृजत॥४॥ सोऽस्मात्सृष्टोऽपाक्रामत्। तं ग्रहेणागृह्णात्। त
द्ग्रहस्य ग्रहत्वं। दीक्षिष्यमाणः। सप्तहोतारं मनसानुद्रुत्याहवनीये जुहुयात्। सौम्यमेवा
ध्वरं सृष्ट्वारभ्य प्रतनुते। ग्रहो भवति। सौम्यस्याध्वरस्य सृष्टस्य धृत्यै। देवेभ्यो वै यज्ञो
न प्राभवत्। तमेतावच्छः समभरन्॥५॥ यत्संभाराः। ततो वै तेभ्यो यज्ञः प्राभवत्। यत्सं
भारा भवंति। यज्ञस्य प्रभूत्यै। आतिथ्यमासाद्य व्याचष्टे। यज्ञमुखं वा आतिथ्यं। मुख
त एव यज्ञं संभृत्य प्रतनुते। अयज्ञो वा एषः। योऽपत्नीकः। न प्रजाः प्रजायेरन्। पत्नी

आ॰ द्वि॰
॥१४॥

व्याचष्टे। यज्ञमेवाकः। प्रजानां प्रजननाय। उपसंस्तुयाद्व्याचष्टे। एतद्वै पत्नीनामायतनं।
स्व एवैना आयतने व्यवकल्पयति॥६॥ तन्नुत आलम्भमानो गृह्णाद सृजतान्तरञ्जायेरन्व
द्वै॥२॥ ॥प्रजापतिरकामयत प्रजायेयेति। स तपोऽतप्यत। स त्रिवृतं स्तोम
मसृजत। तं पंचदशः स्तोमो मध्यत उदतृणत्। तौ पूर्वपक्षश्चापरपक्षश्चाभव
तां। पूर्वपक्षं देवा अन्वसृज्यंत। अपरपक्षमन्वसुराः। ततो देवा अभवन्। परासुराः।
यं कामयेत वसीयान्स्यादिति॥३॥ तं पूर्वपक्षे याजयेत्। वसीयानेव भवति। यं काम
येत पापीयान्स्यादिति। तमपरपक्षे याजयेत्। पापीयानेव भवति। तस्मात्पूर्वपक्षो
परपक्षात्करुण्यतरः। प्रजापतिर्वै दशहोता। चतुर्होता पंचहोता। पंचहोता षड्ढोता। ॥२५॥
ऋतवः संवत्सरः॥२॥ प्रजाः पत्नीवदिमे लोकाः। य एवं प्रजापतिं बहोर्भूयांसं वेद। सप्तहोता

बहोरेव भूयान्भवति। प्रजापतिर्देवासुरानसृजत। स इंद्रमपि नासृजत। तं देवा अब्रुवन्
न्। इंद्रं नो जनयेति। सोऽब्रवीत्। यथाहं युष्मांस्तपसासृक्षि। एवमिंद्रं जनयध्वमि
ति॥३॥ ते तपोऽतप्यंत। त आत्मन्निंद्रमपश्यन्। तमब्रुवन्। जायस्वेति। सोऽब्रवीत्। किं
भागधेयमभिजनिष्य इति। ऋतून्संवत्सरं। प्रजाः पशून्। इमान्लोकानित्यब्रुवन्।
तं वै माहुत्या प्रजनयतेत्यब्रवीत्॥४॥ तं चतुर्होत्रा प्राजनयन्। यः कामयेत वीरोम
आजायेतेति। स चतुर्होतारं जुहुयात्। प्रजापतिर्वै चतुर्होता। प्रजापतिरेव भूत्वा प्रजा
यते। जजनदिंद्रमिंद्रियाय स्वाहेति ग्रहेण जुहोति। आस्य वीरो जायते। वीरं देवा ए
तयाहुत्या प्राजनयन्। आदित्याश्चांगिरसश्च सुवर्गे लोकेऽस्पर्धंत। वयं पूर्वे सुवर्गं लो
कमियामवयं पूर्व इति॥५॥ त आदित्या एतं पंचहोतारमपश्यन्। तं पुरा प्रातरनुवाका

ब्रा॰द्वि॰

॥१५॥

दाग्नीध्रेजुहवुः। ततोवैतेपूर्वेसुवर्गंलोकमायन्। यः सुवर्गकामस्स्यात्। सपंचहोतारंपुरा
प्रातरनुवाकाद्दाग्नीध्रेजुहुयात्। संवत्सरोवैपंचहोता। संवत्सरः सुवर्गोलोकः। संव
त्सरएवर्तुषुप्रतिष्ठाय। सुवर्गंलोकमेति। तेध्रुवन्नंगिरसआदित्यान्॥६॥ क्वस्थ। क्वव
स्स्थोहव्यंवक्ष्यामइति। छंदस्स्वित्यब्रुवन्। गायत्रियांत्रिष्टुभिजगत्यामिति। तस्माच्छं
दःसुसद्भ्य आदित्येभ्यः। आंगिरसीःप्रजाहव्यंवहंति। वहंत्यस्मैप्रजाबलिं। ऐनमप्रति
ख्यातंगच्छति। यएवंवेद। द्वादशमासाःपंचर्तवः। त्रयइमेलोकाः। असावादित्यएक
विंशः। एतस्मिन्वाएषश्रितः। एतस्मिन्प्रतिष्ठितः। यएवमेतंश्रितंप्रतिष्ठितंवेद।
प्रत्येवतिष्ठति॥७॥ स्थादितिसंवत्सरोजनयध्वमितीत्यब्रवीत्पूर्वद्वत्यादित्यान्त्त ॥१५॥
वषड्॥३॥ ॥प्रजापतिरकामयतप्रजायेयेति। सएतंदशहोतारमपश्यत्।

तेनदशधात्मानंविधाय। दशहोत्रातप्यत। तस्यचित्तिस्स्रुगासीत्। चित्तमाज्यं।
तस्यैतावत्येववागासीत्। एतावान्यज्ञक्रतुः। सचतुर्होतारमसृजत। सोनंदत्॥१॥ अ
सृक्षिवाइममिति। तस्यसोमोहविरासीत्। सचतुर्होत्रातप्यत। सोताम्यत्। सभूरिति
व्याहरत्। सभूमिमसृजत। अग्निहोत्रंदर्शपूर्णमासौयजूंषि। सद्वितीयमतप्यत।
सोताम्यत्। सभुवइतिव्याहरत्॥२॥ सोंतरिक्षमसृजत। चातुर्मास्यानिसामानि। स
तृतीयमतप्यत। सोताम्यत्। ससुवरितिव्याहरत्। सदिवमसृजत। अग्निष्टोममु
क्थ्यमतिरात्रमृचः। एतावैव्याहृतयइमेलोकाः। इमान्खलुवैलोकाननुप्रजाःपश ४॥
वश्छंदांसिप्राजायंत। यएवमेताःप्रजापतेःप्रथमाव्याहृतीःप्रजातावेद॥३॥ प्र
जयापशुभिर्मिथुनैर्जायते। सपंचहोतारमसृजत। सहविर्नाविंदत। तस्मैसोम

ब्रा·द्वि·
॥२६॥

स्तनुवं प्रायच्छत। एतत्ते हविरिति। स पंचहोत्रातप्यत। सोताम्यत। स प्रत्यङ्ङबाधत। सो
सुरानसृजत। तदस्याप्रियमासीत्॥४॥ तद्दुर्वर्णं हिरण्यमभवत्। तद्दुर्वर्णस्य हि
रण्यस्य जन्म। स द्वितीयमतप्यत। सोताम्यत। स प्राङबाधत। स देवानसृजत। तदस्य
प्रियमासीत्। तत्सुवर्णं हिरण्यमभवत्। तत्सुवर्णस्य हिरण्यस्य जन्म। य एवं सुव
र्णस्य हिरण्यस्य जन्म वेद॥५॥ सुवर्ण आत्मना भवति। दुर्वर्णोस्य भ्रातृव्यः। तस्मात्सु
वर्णं हिरण्यं भार्यं। सुवर्ण एव भवति। ऐनं प्रियं गच्छति नाप्रियं। स सप्तहोतारमसृ
जत। स सप्तहोत्रैव सुवर्गं लोकमैत्। त्रिणवेन स्तोमेनैभ्यो लोकेभ्योऽसुरान्प्राणु
दत। त्रयस्त्रिंशेन प्रत्यतिष्ठत्। एकविंशेन रुचमधत्त॥६॥ सप्तदशेन प्राजाय ॥२६॥
त। य एवं विद्वान्सोमेन यजते। सप्तहोत्रैव सुवर्गं लोकमेति। त्रिणवेन स्तोमेनैभ्यो

स्य स्य

लोकेभ्यो भ्रातृव्यान्प्रणुदते। त्रयस्त्रिंशेन प्रतितिष्ठति। एकविंशेन रुचं धत्ते। सप्त
दशेन प्रजायते। तस्मात्सप्तदशः स्तोमो न निर्हृत्यः। प्रजापतिर्वै सप्तदशः। प्रजापति
मेव मध्यतो धत्ते प्रजात्यै॥७॥ भर्नं दद्युर्वृक्षति व्याहरद्दासीद्दोधत्त प्रजात्यै॥८॥
॥ देवा वै वरुणमयाजयन्। स यस्यै यस्यै देवतायै दक्षिणामनयत्। तामव्लीनात्।
ते ब्रुवन्। व्यावृत्य प्रतिगृह्णाम। तथा नो दक्षिणा न व्लेष्यतीति। ते व्यावृत्यागृह्णन्। त
तो वै तान्दक्षिणा नाव्लीनात्। य एवं विद्वान्व्यावृत्य दक्षिणां प्रतिगृह्णाति नैनं दक्षिणा
व्लीनाति॥९॥ राजा त्वा वरुणो नयतु देवि दक्षिणेऽग्नये हिरण्यमित्याह। आग्नेयं वै हि
रण्यं। स्वयैवैनद्देवतया प्रतिगृह्णाति। सोमाय वास इत्याह। सौम्यं वै वासः। स्वयैवै
नद्देवतया प्रतिगृह्णाति। रुद्राय गामित्याह। रौद्री वै गौः। स्वयैवैनां देवतया प्रतिगृह्णा

प्रत्य

ब्रा॰द्वि॰
॥१७॥

ति।वरुणायाश्वमित्याह॥२॥वारुणोवाअश्वः।स्वयैवैनंदेवतयाप्रतिगृह्णाति।प्रजा
पतयेपुरुषमित्याह।प्राजापत्योवैपुरुषः।स्वयैवैनंदेवतयाप्रतिगृह्णाति।मनवेतल्प
मित्याह।मानवोवैतल्पः।स्वयैवैनंदेवतयाप्रतिगृह्णाति।उत्तानायांगीरसायानइत्या
ह।इयंवाउत्तानआंगीरसः॥३॥अनयैवैनत्प्रतिगृह्णाति।वैश्वानर्यर्चारथंप्रतिगृ
ह्णाति।वैश्वानरोवैदेवतयारथः।स्वयैवैनंदेवतयाप्रतिगृह्णाति।तेनामृतत्वमश्या
मित्याह।अमृतमेवात्मन्धत्ते।वयोदात्रइत्याह।वयएवैनंकृत्वा।सुवर्गंलोकंगमय
ति।मयोमह्यमस्तुप्रतिग्रहीत्रइत्याह॥४॥यद्वैशिवं।तन्मयः।आत्मनएवैषापरी
त्तिः।कइदंकस्माअदादित्याह।प्रजापतिर्वैकः।सप्रजापतयेददाति।कामः ॥१७॥
कामायेत्याह।कामेनहिददाति।कामेनप्रतिगृह्णाति।कामोदाताकामःप्रतिग्रही

म

तेत्याह॥५॥कामोहिदाता।कामःप्रतिग्रहीता।कामःसमुद्रमाविशेत्याह।समुद्रइव
हिकामः।नेवहिकामस्यांतोस्ति।नसमुद्रस्य।कामेनत्वाप्रतिगृह्णामीत्याह।येनकामेन
प्रतिगृह्णाति।सएवैनममुष्मिँल्लोकेकामआगच्छति।कामैतत्तएषातेकामदक्षिणेत्याह।
कामएवतद्यजमानोमुष्मिँल्लोकेदक्षिणामिच्छति।नप्रतिग्रहीतरि।यएवंविद्वान्दक्षि
णांप्रतिगृह्णाति।अनृणामेवैनांप्रतिगृह्णाति॥६॥ईनात्वश्वमित्याहांगीरसःप्रतिग्र
हीत्रइत्याहप्रतिग्रहीतेत्याहदक्षिणेत्याहचत्वारिच॥५॥ ॥अंतोवाएषयज्ञस्य।
यद्दशममहः।दशमेहन्त्सर्पराज्ञियाऋग्भिस्तुवंति।यज्ञस्यैवांतंगत्वा।अन्नाद्यमवरुंधते।
तिसृभिस्तुवंति।त्रयइमेलोकाः।एभ्यएवलोकेभ्योन्नाद्यमवरुंधत्ते।पृश्निवतीर्भवंति।
अन्नंवैपृश्नि॥२॥अन्नमेवावरुंधत्ते।मनसाप्रस्तौति।मनसोद्गायति।मनसाप्रतिह

ब्रा॰ द्वि॰

॥१२८॥

रति। मनेइव हि प्रजापतिः। प्रजापतेराप्त्यै। देवा वै सर्पाः। तेषामियꣳ राज्ञी। यत्सर्पराज्ञिया
ऋग्भिस्तुवंति। अस्यामेव प्रतितिष्ठंति॥२॥ चतुर्होतॄन्होता व्याचष्टे। स्तुतमनुशꣳसति
शांत्यै। अंतो वा एष यज्ञस्य। यद्दशममहः। एतत्खलु वै देवानां परमं गुह्यं ब्रह्म। यच्चतुर्हो
तारः। दशमेहꣳश्चतुर्होतॄन्व्याचष्टे होताव्यान्व्याचष्टे। यज्ञस्यैवांतं गत्वा। परमं देवानां
गुह्यं ब्रह्मावरुंधे। तदेव प्रकाशं गमयति। तदेनं प्रकाशं गतं। प्रकाशं प्रजानां गमयति।
वाचं यच्छति। यज्ञस्य धृत्यै। यजमानदेवत्यं वा अहः। भ्रातृव्यदेवत्या रात्रिः। अहा रा
त्रिं ध्यायेत्। भ्रातृव्यस्यैव तल्लोकं वृंक्ते। यद्दिवा वाचं विसृजेत्। अहर्भ्रातृव्यायोच्छिꣳ
तृ
षेत्। यन्नक्तं विसृजेत्। रात्रिं भ्रातृव्यायोच्छिꣳषेत्। अधिवृक्षसूर्ये वाचं विसृजति। ए
तावंतमेवास्मै लोकमुच्छिꣳषति। यावदादित्योस्तमेति॥४॥ ऋग्भितिष्ठंति गमयति ॥१२८॥
शिꣳषेत्पंच च॥६॥ ॥प्रजापतिः प्रजा असृजत। ताः सृष्टाः समश्लिष्यन्।

ता रूपेणानुप्राविशत्। तस्मादाहुः। रूपं वै प्रजापतिरिति। ता नाम्नानुप्राविशत्। तस्मा
दाहुः। नाम वै प्रजापतिरिति। तस्मादप्यामित्रौ संगत्य। नाम्ना चेद्ध्वयेते॥१॥ मित्रमेव भ
वतः। प्रजापतिर्देवासुरानसृजत। स इंद्रमपि नासृजत। तं देवा अब्रुवन्। इंद्रं नो जनयेति।
स आत्मन्निंद्रमपश्यत्। तमसृजत। तं त्रिष्टुग्वीर्यं भूत्वानुप्राविशत्। तस्य वज्रः पंचदशो
हस्त आपद्यत। तेनोदयच्छासुरानभ्यभवत्॥२॥ य एवं वेद। अभि भ्रातृव्यान्भवति। ते दे
वा असुरैर्विजित्य। सुवर्गं लोकमायन्। तेमुष्मिन्लोके व्यक्षुध्यन्। तेब्रुवन्। अमुतः प्रदा
नं वा उपजिजीविमेति। ते सप्तहोतारं यज्ञं विधायायास्यं। आंगीरसं प्राहिण्वन्। एते
नामुत्र कल्पयेति॥३॥ तस्य वा इयं कॢप्तिः। यदिदं किंच। य एवं वेद। कल्पतेस्मै। स वा अ
यं मनुष्येषु यज्ञः सप्तहोता। अमुत्र सद्भ्यो देवेभ्यो हव्यं वहति। य एवं वेद। उपैनं यज्ञो

श्रा·द्विः
॥१९॥

नेमति। सोमन्यत। अभिवा इमैस्माल्लोकादमुंलोकंकमिष्यंत इति। सवाचस्पते हृदितिव्या
हरत्। तस्मात्पुत्रो हृदयं। तस्मादस्माल्लोकादमुंलोकंनाभिकामयंते। पुत्रो हि हृदयं॥
॥४॥ हृयैते अस्य वल्कल्प्ययंतीतिचत्वारिच॥ ७॥ ॥ देवावैचतुर्होतृभिर्यज्ञमत
न्वत। ते विपाप्मनाभ्रातृव्येणाजयंत। अभिसुवर्गंलोकमजयन्। यएवंविद्वांश्चतु
र्होतृभिर्यज्ञंतनुते। विपाप्मनाभ्रातृव्येणाजयते। अभिसुवर्गंलोकंजयति। षड्ढोत्रा
प्रायणीयमासादयति। अमुष्मैवैलोकायषड्ढोता। घ्नंतिखलुवाएतत्सोमं। यदभि
षुण्वंति॥ २॥ ऋजुधैवैनममुंलोकंगमयति। चतुर्होत्रातिथ्यं। यज्ञोवैचतुर्होता।
यज्ञमेवालम्भते। पंचहोत्रापशुमुपसादयति। सुवर्ग्योवैपंचहोता। यजमानःप ॥१९॥
शुः। यजमानमेवसुवर्गंलोकंगमयति। ग्रहान्गृहीत्वासप्तहोतारंजुहोति। इंद्रियंवै

सप्तहोता॥ २॥ इंद्रियमेवात्मन्धत्ते। योवैचतुर्होतृननुसवनंतर्पयति। तृप्यतिप्रजयापशु
भिः। उपैनंसोमपीथोनमति। बहिष्पवमानेदशहोतारंव्याचक्षीत। माध्यंदिनेपवमा
नेचतुर्होतारं। आर्भवेपवमानेपंचहोतारं। पितृयज्ञेषड्ढोतारं। यज्ञायज्ञियस्यस्तोत्रेस
प्तहोतारं। अनुसवनमेवैनांस्तर्पयति॥ ३॥ तृप्यतिप्रजयापशुभिः। उपैनंसोमपी
थोनमति। देवाश्चतुर्होतृभिःसत्रमासत। ऋद्धिपरिमितंयशस्कामाः। तेऽब्रुवन्।
यन्नःप्रथमंयशऋच्छात्। सर्वेषांनस्तत्सहासदिति। सोमश्चतुर्होत्रा। अग्निःपंचहो
त्रा। धाताषड्ढोत्रा॥ ४॥ इंद्रःसप्तहोत्रा। प्रजापतिर्दशहोत्रा। तेषांसोमंराजानंय
श आर्छत्। तन्न्यकामयत। तेनापाक्रामत्। तेनप्रलायमचरत्। तंदेवाःप्रैषैःप्रैष
मैछन्। तत्प्रैषाणांप्रैषत्वं। निविद्भिर्न्यवेदयन्। तन्निविदांनिवित्त्वं॥ ५॥ आप्रीभिराव

ब्रा·द्वि·
॥२०॥

भुवन्। तदाप्रीणा मा प्रित्वं। तमघ्नन्। तस्य यज्ञो व्यग्रहृत। ते ग्रहा अभवन्। तद्ग्रहाणां ग्र-
हत्वं। यस्यैवं विदुषो ग्रहा गृह्यंते। तस्य त्वेव गृहीताः। ते ब्रुवन्। यो वै नः श्रेष्ठोऽभूत्। ॥६॥ त-
मवधिष्म। पुनरिमं सुवामहा इति। तं छंदोभिरसुवंत। तच्छंदसां छंदस्त्वं। साम्ना सम-
नयन्। तत्साम्नः सामत्वं। उक्थैरुदस्थापयन्। तदुक्थानामुक्थत्वं। य एवं वेद। प्रत्येव
तिष्ठति ॥७॥ सर्वमायुरेति। सोमो वै यज्ञः। य एवं विद्वान्सोममागच्छति। यज्ञ एवैनमग-
च्छति। तस्मादाहुः। यश्चैवं वेद यश्च न। तावुभौ सोममागच्छतः। सोमो हि यज्ञः। तं त्वा वयश-
च्छतीत्याहुः। यः सोमे सोमं प्राहेति। तस्मात्सोमे सोमः प्रोच्यः ॥ [illegible] यज्ञ एवैनमग-
ति ॥८॥ अभिषुण्वंति सप्तहोता तर्पयति षड्ढोत्रा निवित्वमस्त्राति च्छतिप्राहेति द्वैव ॥९॥
॥ इदं वा अग्रे नैव किंचनासीत्। न द्यौरासीत्। न पृथिवी। नांतरिक्षं। तदसदेव सन्मनो ॥२०॥
कुरुत स्यामिति। तदतप्यत। तस्मात्तेपानाद्धूमोऽजायत। तद्भूयोऽतप्यत। तस्मात्तेपा-

नादग्निरजायत। तद्भूयोऽतप्यत ॥१॥ तस्मात्तेपानाज्ज्योतिरजायत। तद्भूयोऽतप्यत। तस्मा-
त्तेपानादर्चिरजायत। तद्भूयोऽतप्यत। तस्मात्तेपानान्मरीचयोऽजायंत। तद्भूयोऽतप्यत। त-
स्मात्तेपानादुदारा अजायंत। तद्भूयोऽतप्यत। तदभ्रमिव समहन्यत। तद्वस्तिमभिनत् ॥
॥२॥ स समुद्रोऽभवत्। तस्मात्समुद्रस्य न पिबंति। प्रजननमिव हि मन्यंते। तस्मा-
त्पशोर्जायमानादापः पुरस्ताद्यंति। तद्दशहोतान्वसृज्यत। प्रजापतिर्वै दशहोता।
प
य एवं तपसो वीर्यं विद्वांस्तप्यते। भवत्येव। तद्वा इदमापः सलिलमासीत्। सोऽरोदी-
त्प्रजापतिः ॥३॥ स कस्मा अज्ञि। यद्यस्या प्रतिष्ठाया इति। यदप्स्ववापद्यत। सा पृथि-
व्यभवत्। यद्व्यमृष्ट। तदंतरिक्षमभवत्। यदूर्ध्वमुदमृष्ट। सा द्यौरभवत्। यदरोदीत्।
तदनयो रोदस्त्वं ॥४॥ य एवं वेद। नास्य गृहे रुदंति। एतद्वा एषां लोकानां जन्म। य एव

ब्रा॰ द्वि॰

॥२१॥

मेषां लोकानां जन्म वेद। नैषु लोकेष्वार्तिमार्छति। स इमां प्रतिष्ठामविंदत। स इमां प्रति
ष्ठां वित्वाकामयत प्रजायेयेति। स तपोतप्यत। सोंतर्वानभवत्। स जघनादसुरान
सृजत॥८॥ तेभ्यो मृन्मये पात्रेन्नमदुहत्। यास्य सा तनूरासीत्। तामपाहत। सा तमि
भवत्। सोकामयत प्रजायेयेति। स तपोतप्यत। सोंतर्वानभवत्। स प्रजननादेव प्रजा
असृजत। तस्मादिमाभूयिष्ठाः। प्रजननाध्येना असृजत॥ ९॥ ताभ्यो दारुमये पात्रे
पयोदुहत्। यास्य सा तनूरासीत्। तामपाहत। सा ज्योत्स्नाभवत्। सोकामयत प्रजा
येयेति। स तपोतप्यत। सोंतर्वानभवत्। स उपपक्षाभ्यामेवर्तूनसृजत। तेभ्यो रजते
पात्रे घृतमदुहत्। यास्य सा तनूरासीत्॥७॥ तामपाहत। सौहोरात्रयोः संधिरभ ॥२१॥
वत्। सोकामयत प्रजायेयेति। स तपोतप्यत। सोंतर्वानभवत्। स मुखाद्देवानसृज

त। तेभ्यो हरिते पात्रे सोममदुहत। यास्य सा तनूरासीत्। तामपाहत। तदहरभवत्॥
॥८॥ एते वै प्रजापतेर्दोहाः। य एवं वेद। दुह एव प्रजाः। दिवा वै नोभूदिति। तद्देवानां दे
वत्वं। य एवं देवानां देवत्वं वेद। देववानेव भवति। एतद्वा अहोरात्राणां जन्म। य एव
महोरात्राणां जन्म वेद। नाहोरात्रेष्वार्तिमार्छति॥९॥ असतोधि मनोसृज्यत। म
नः प्रजापतिमसृजत। प्रजापतिः प्रजा असृजत। तद्वा इदं मनस्येव परमं प्रतिष्ठि
तं। यदिदं किंच। तदेतच्छ्वोवस्यसन्नाम ब्रह्म। व्युच्छंती व्युच्छंत्यस्मै वस्यसी वस्यसी
व्युच्छति। प्रजायते प्रजया पशुभिः। प्र परमेष्ठिनो मात्रामाप्नोति। य एवं वेद॥१०॥
अग्निस्जायत तद्गर्योतप्यता मिनदरोदीत्प्रजापतीरोदस्त्वमसृतां असृजत घृतम
दुहद्यास्य सा तनूरासीदहरभवदहच्छति वेद॥२॥ ॥प्रजापतिरिंद्रमसृज

ते॰ ५

जं

ब्रा॰ द्वि॰
॥२२॥

तानुजावरं देवानां। तं प्राहिणोत्। परेहि। एतेषां देवानामधिपतिरेधीति। तं देवा अब्रुवन्।
कस्त्वमसि। वयं वै त्वच्छ्रेयांसः स्म इति। सोऽब्रवीत्। कस्त्वमसि वयं वै त्वच्छ्रेयांसः स्म इति
मा देवा अवोचन्निति। अथ वा इदं तर्हि प्रजापतौ हर आसीत्॥ १॥ यदस्मिन्नादित्ये।
तदेनमब्रवीत्। एतन्मे प्रयच्छ। अथाहमेतेषां देवानामधिपतिर्भविष्यामीति। को ऽहं
स्यामित्यब्रवीत्। एतत्प्रदायेति। एतत्स्यादित्यब्रवीत्। यदेतद्ब्रवीषीति। को ह वै नाम
प्रजापतिः। य एवं वेद॥ २॥ विदुरेनं नाम्ना। तदस्मै रुक्मं कृत्वा प्रत्यमुञ्चत्। ततो वा इन्द्रो
देवानामधिपतिरभवत्। य एवं वेद। अधिपतिरेव समानानां भवति। सोऽमन्यत।
किं किं वा अकरमिति। स चन्द्रमसमाहरेति प्रालपत्। तच्चन्द्रमसश्चन्द्रमस्त्वं। य एवं ॥२२॥
वेद॥ ३॥ चन्द्रवानेव भवति। तं देवा अब्रुवन्। सुवीर्यो मर्या यथा गोपायत इति। त

सूर्यस्य सूर्यत्वं। य एवं वेद। नैनं दभ्नोति। कश्चिन्। वा इदमिन्द्रियं प्रत्यस्थादिति। तदिन्द्रस्य इन्द्र
स्येन्द्रत्वं। य एवं वेद। इन्द्रियाव्येव भवति॥ ४॥ अयं वा इदं परमोऽभूदिति। तत्परमेष्ठिनः प
रमेष्ठित्वं। य एवं वेद। परमामेव काष्ठां गच्छति। तं देवाः समन्तं पर्यविशन्। वसवः पुरस्ता
त्। रुद्रा दक्षिणतः। आदित्याः पश्चात्। विश्वेदेवा उत्तरतः। अंगिरसः प्रत्यंचं॥ ५॥ सा
ध्याः परांचं। य एवं वेद। उ येनं समानाः संविशन्ति। स प्रजापतिरेव भूत्वा प्रजा आवय
त्। ता अस्मै नातिष्ठन्तान्नाद्याय। तामुखं पुरस्तात्पश्यन्तीः। दक्षिणतः पर्यायन्। स
दक्षिणतः पर्यवर्तत। तामुखं पुरस्तात्पश्यन्तीः। मुखं दक्षिणतः॥ ६॥ पश्चात्पर्याय
न्। स पश्चात्पर्यवर्तत। तामुखं पुरस्तात्पश्यन्तीः। मुखं दक्षिणतः। मुखं पश्चात्। उ
त्तरतः पर्यायन्। स उत्तरतः पर्यवर्तत। तामुखं पुरस्तात्पश्यन्तीः। मुखं दक्षिणतः।

३ य
२ य
य १

ब्रा॰द्वि॰
कृ॰
॥२३॥
ति

मुखंपश्चात्॥७॥मुखमुत्तरतः।ऊर्ध्वाउदायन्। सउपरिष्टान्यवर्तयत। ताःसर्वतोमुखो
भूत्वायत। ततोवैतस्मैप्रजाअतिष्ठंतान्नाद्याय। यएवंविद्वान्परिचवर्तयतेनिच।प्र
जापरिवभूत्वाप्रजाअत्ति॥ तिष्ठंतेस्मैप्रजाअन्नाद्याय।अन्नादएवभवति॥८॥आ
सीन्वेदंचंद्रमस्त्वंयएवंवेदेंद्रियाव्येवभवतिप्रत्यंचंमुखंदक्षिणतोमुखंपश्चान्न
वच॥१०॥ ॥प्रजापतिरकामयतबहोर्भूयान्स्यामिति। सएतंदशहोतारम
पश्यत्। तंप्रायुंक्त। तस्यप्रयुक्तिबहोर्भूयानभवत्। यःकामयेतबहोर्भूयान्स्या
मिति। सदशहोतारंप्रयुंजीत। बहोरेवभूयान्भवति। सोकामयतवीरोमआजा
येतेति। सदशहोतुश्चतुर्होतारंनिरमिमीत। तंप्रायुंक्त॥१॥तस्यप्रयुक्तींद्रोजा ॥२॥
यत। यःकामयेतवीरोमआजायेतेति। सचतुर्होतारंप्रयुंजीत। आस्यवीरोजाय

ते। सोकामयतपशुमान्स्यामिति। सचतुर्होतुःपंचहोतारंनिरमिमीत। तंप्रायुं
क्त। तस्यप्रयुक्तिपशुमानभवत्। यःकामयेतपशुमान्स्यामिति। सपंचहोता
रंप्रयुंजीत॥२॥ पशुमानेवभवति। सोकामयततर्त्तवोमेकल्पेरन्निति। सपंचहो
तुःषड्ढोतारंनिरमिमीत। तंप्रायुंक्त। तस्यप्रयुक्त्यर्तवोस्माअकल्पंत। यःका
मयेततर्त्तवोमेकल्पेरन्निति। सषड्ढोतारंप्रयुंजीत। कल्पंतेस्माऋतवः। सोका
मयतसोमपःसोमयाजीस्यां।आमेसोमपःसोमयाजीजायेतेति॥३॥सष
ड्ढोतुःसप्तहोतारंनिरमिमीत। तंप्रायुंक्त। तस्यप्रयुक्तिसोमपःसोमयाज्यभ
वत्। आस्यसोमपःसोमयाज्यजायत। यःकामयेतसोमपःसोमयाजीस्यां।
आमेसोमपःसोमयाजीजायेतेति। ससप्तहोतारंप्रयुंजीत। सोमपएवसो

ब्रा॰ द्वि॰ ॥२४॥

मयाजी भवति। आस्य सोमपः सोमयाजी जायते। स वा एष पशुः पंचधा प्रतितिष्ठति॥७॥
पद्भिर्मुखेन। ते देवाः पशून्वित्वा। सुवर्गं लोकमायन्। तेऽमुष्मिंल्लोके व्यक्षुध्यन्। तेऽब्रुव
न्। अमुतः प्रदानं वा उपजिजीविमेति। ते सप्तहोतारं यज्ञं विधायायास्यं। आंगीरसं प्रा
हिण्वन्। एतेनामुत्र कल्पयेति। तस्य वा इयं क्लृप्तिः॥८॥ यदिदं किंच। य एवं वेद। कल्प
तेऽस्मै। स वा अयं मनुष्येषु यज्ञः सप्तहोता। अमुत्र सद्भ्यो देवेभ्यो हव्यं वहति। य एवं वेद।
उपैनं यज्ञो नमति। यो वै चतुर्होतॄणां निदानं वेद। निदानवान्भवति। अग्निहोत्रं वै दश
होतुर्निदानं। दर्शपूर्णमासौ चतुर्होतुः। चातुर्मास्यानि पंचहोतुः। पशुबंधः षड्ढोतुः। सौ
म्योऽध्वरः सप्तहोतुः। एतद्वै चतुर्होतॄणां निदानं। य एवं वेद। निदानवान्भवति॥९॥ अ ॥२४॥
मिमीत तं प्रायुंक्त पंचहोतारं प्रयुंजीत जायतेतितिष्ठति क्लृप्तिर्दशहोतुर्निदानं स

सप्त॥११॥ ॥प्रजापतिरकामयत प्रजाः सृजेयेति प्रजापतिरकामयत दर्शपूर्णमासौ सृ
जेयेति प्रजापतिरकामयत प्रजायेयेति स तपः स त्रिवृतं प्रजापतिरकामयत प्रजायेय
ति स एतं दशहोतारं तेन दशधात्मानं देवा वै वरुणमेतौ वै प्रजापतिः स्ताः सृष्टाः समस्कि
ष्यं देवा वै चतुर्होतृभिरिदं वा अग्रे प्रजापतिरिंद्रं प्रजापतिरकामयत बहोर्भूयानेकादश॥
॥१२॥ ॥प्रजापतिस्तद्गृहस्य प्रजापतिरकामयतानयैवेनस्तस्य वा इयं क्लृप्तिस्त
स्मात्तेपानाज्योतिर्यदस्मिन्नादित्ये स षड्ढोतुः सप्तहोतारं त्रिः सप्तति॥७३॥ ॥
॥ओम्॥ छ॥ ॥छ॥ ॥हरिः ओम्॥ ॥ब्रह्मवादिनो वदंति। किंचतुर्हो
तॄणां चतुर्होतृत्वमिति। यद्देवेषु चतुर्धा होतारः। तेन चतुर्होतारः। तस्माच्चतुर्होतार उच्यंते।
तच्चतुर्होतॄणां चतुर्होतृत्वं। सोमो वै चतुर्होता। अग्निः पंचहोता। धाता षड्ढोता। इंद्रः स
सहोता॥१॥ प्रजापतिर्दशहोता। य एवं चतुर्होतॄणामृद्धिं वेद। ऋध्नोत्येव। य एषामेवं

च

ब्रा·द्वि· बंधुतां वेद। बंधुमान् भवति। य एषामेवं कॢप्तिं वेद। कल्पंतेस्मै। य एषामेवमायतनं वेद। आ
॥२५॥ यतनवान् भवति। य एषामेवं प्रतिष्ठां वेद॥२॥ प्रत्येव तिष्ठति। ब्रह्मवादिनो वदंति। दशहो
ता चतुर्होता। पंचहोता षड्ढोता सप्तहोता। अथ कस्माच्चतुर्होतार उच्यंत इति। इंद्रो वै चतुर्हो
ता। इंद्रः खलु वै श्रेष्ठो देवतानामुपदेशनात्। य एवमिंद्रꣳ श्रेष्ठं देवतानामुपदेशनाद्वे
द। वसिष्ठः समानानां भवति। तस्माच्छ्रेष्ठमायंतं प्रथमेनैवानुबुध्यंते। अयमागन्। अ
यमवासादिति। कीर्तिरस्य पूर्वा गच्छति जनतामायतः। अथो एनं प्रथमेनैवानुबुध्य
ते। अयमागन्। अयमवासादिति॥३॥ सप्तहोता प्रतिविदं बुध्यंते षट्च॥१॥ ॥ घ्नं
दक्षिणां प्रतिग्रहीष्यन्त्सप्तदशहृत्वोपान्यात्। आत्मानमेव समिंधे। तेजसे वीर्याय।
अथो प्रजापतिरेवैनां भूत्वा प्रतिगृह्णाति। आत्मनो नार्त्यै। यद्येनमार्त्विज्याद्वृतꣳ सं ॥२५॥
तं निर्हरेरन्। आग्नीध्रे जुहुयाद्दशहोतारं। चतुर्गृहीतेनाज्येन। पुरस्तात्प्रत्यङ् तिष्ठन्।

प्रतिलोमं विग्राहं॥१॥ प्राणानेवास्योपदासयति। यद्येनं पुनरुपशिक्षेयुः। आग्नीध्र ए
व जुहुयाद्दशहोतारं। चतुर्गृहीतेनाज्येन। पश्चात्प्राङासीनः। अनुलोममविग्राहं।
प्राणानेवास्मै कल्पयति। प्रायश्चित्ती वाग्घोतेत्यृतुमुख ऋतुमुखे जुहोति। ऋतूनेवा
स्मै कल्पयति। कल्पंतेस्मा ऋतवः॥२॥ कॢप्ता अस्मा ऋतव आयंति। षड्ढोता वै भूत्वा
प्रजापतिरिदꣳ सर्वमसृजत। स मनोसृजत। मनसोधि गायत्रीमसृजत। तद्गायत्रीं य
श आर्छत्। तामालभत। गायत्रिया अधि छंदाꣳस्यसृजत। छंदोभ्योधि साम। त
त्साम यश आर्छत्। तदालभत॥३॥ साम्नोधि यजूꣳष्यसृजत। यजुर्भ्योधि विष्णुं।
तद्विष्णुं यश आर्छत्। तमालभत। विष्णोरध्योषधीरसृजत। ओषधीभ्योधि सोमं।
तत्सोमं यश आर्छत्। तमालभत। सोमादधि पशूनसृजत। पशुभ्योधींद्रं॥४॥ तदिं

ब्रा॰द्वि॰२

॥२६॥

द्रूयत्रीआर्च्छत्। तदेनंनातिप्राच्यवत। इंद्रइवयशस्वीभवति। यएवंवेद। नैनंयशोतिप्रच्य
वते। यद्वाइदं किंच। तत्सर्वमुत्तानएवांगीरसः प्रत्यगृह्णात्। तदेनंप्रतिगृहीतन्नाहिनत्। य
त्किंचप्रतिगृह्णीयात्। तत्सर्वमुत्तानस्त्वांगीरसः प्रतिगृह्णात्वित्येवप्रतिगृह्णीयात्। इयं
वाउत्तानआंगीरसः। अनयैवैनत्प्रतिगृह्णाति। नैनंहिनस्ति। बर्हिषाप्रतीयाद्गांवाश्वंवा।
एतद्वैपशूनांप्रियंधाम। प्रियेणैवैनंधाम्नाप्रत्येति॥५॥ ॥ विग्राहमृतवस्तदा
लभंतेद्गृह्णीयात्वद्व॥२॥ ॥ योवाअविद्वान्निवर्तयते। विशीर्षासपाप्मामुष्मि
ल्लोकेभवति। अथयोविद्वान्निवर्तयते। सशीर्षाविपाप्मामुष्मिन्लोकेभवति। देवता
वैसमपुष्टिकामान्यवर्तयंत। अग्निश्चपृथिवीच। वायुश्चांतरिक्षंच। आदित्यश्चद्यौश्च
चंद्रमाः। अग्निर्न्यवर्तयत। सहसोस्वमपुष्यत्॥१॥ पृथिवींन्यवर्तयत। सौषधीभिर्व ॥२६॥
नस्पतिभिरपुष्यत्। वायुर्न्यवर्तयत। समरीचीभिरपुष्यत्। अंतरिक्षंन्यवर्तयत। तद्व

द्वयोभिरपुष्यत। आदित्योन्यवर्तयत। सरश्मिभिरपुष्यत। द्यौर्न्यवर्तयत। सानक्षत्रैर
पुष्यत्। चंद्रमान्यवर्तयत। सोहोरात्रैरर्धमासैर्मासैरृतुभिः संवत्सरेणापुष्यत। ता
न्योषान्पुष्यति। यांस्तेपुष्यन्। यएवंविद्वान्निचवर्तयतेपस्वि॥२॥ अपुष्यन्नक्षत्रै
रपुष्यत्संवच्च॥३॥ ॥ तस्यवाअग्नेर्हिरण्यंप्रतिजग्रहुषः। अर्धमिंद्रियस्या
पाक्रामत्। तदेतेनैवप्रात्यगृह्णात्। तेनवैसोर्धमिंद्रियस्यात्मन्नुपाधत्त। अर्धमिंद्रि
यस्यात्मन्नुपाधत्ते। यएवंविद्वान्हिरण्यंप्रतिगृह्णाति। अथयोविद्वान्प्रतिगृह्णाति।
अर्धमस्येंद्रियस्यापक्रामति। तस्यवैसोमस्यवासःप्रतिजग्रहुषः। तृतीयमिंद्रि
यस्यापाक्रामत्॥१॥ तदेतेनैवप्रत्यगृह्णात्। तेनवैसतृतीयमिंद्रियस्यात्मन्नुपा
धत्त। तृतीयमिंद्रियस्यात्मन्नुपाधत्ते। यएवंविद्वान्वासःप्रतिगृह्णाति। अथयोवि

ब्रा॰ हि॰

॥२७॥

द्वान्प्रतिगृह्णाति। तृतीयस्यैमिंद्रियस्यापक्रामति। तस्यैवेरुद्रस्य गांप्रतिजयगृहुषः। चतुर्थमिंद्रियस्यापाक्रामत्। तामेतेनैवप्रत्ययगृह्णात्। तेनैवैसचतुर्थमिंद्रियस्यात्मन्नुपाधत्त॥२॥ चतुर्थमिंद्रियस्यात्मन्नुपाधत्ते। यएवंविद्वान्गांप्रतिगृह्णाति। अथयोविद्वान्प्रतिगृह्णाति। चतुर्थमस्येंद्रियस्यापक्रामति। तस्यैवेवरुणस्याश्वंप्रतिजयगृहुषः। पंचमामिंद्रियस्यापाक्रामत्। तमेतेनैवप्रत्यगृह्णात्। तेनैवैसपंचमामिंद्रियस्यात्मन्नुपाधत्त। पंचममिंद्रियस्यात्मन्नुपाधत्ते। यएवंविद्वानश्वंप्रतिगृह्णाति॥३॥ अथयोविद्वान्प्रतिगृह्णाति। पंचममस्येंद्रियस्यापक्रामति। तस्यवैप्रजापतेःपुरुषंप्रतिजयगृहुषः। षष्ठमिंद्रियस्यापाक्रामत्। तमेतेनैवप्रत्यगृह्णात्। तेनैवैषष्ठमिंद्रियस्यात्मन्नुपाधत्त। षष्ठमिंद्रियस्यात्मन्नुपाधत्ते।

॥२७॥

स

यएवंविद्वान्पुरुषंप्रतिगृह्णाति। अथयोविद्वान्प्रतिगृह्णाति। षष्ठमस्येंद्रियस्यापक्रामति॥४॥ तस्यवैमनोस्तल्पंप्रतिजयगृहुषः। सप्तमामिंद्रियस्यापाक्रामत्। तमेतेनैवप्रत्यगृह्णात्। तेनैवैससप्तममिंद्रियस्यात्मन्नुपाधत्त। सप्तमिंद्रियस्यात्मन्नुपाधत्ते। यएवंविद्वांस्तल्पंप्रतिगृह्णाति। अथयोविद्वान्प्रतिगृह्णाति। सप्तममस्येंद्रियस्यापक्रामति। तस्यवाउत्तानस्यांगीरस्याप्राणंप्रतिजयगृहुषः। अष्टमामिंद्रियस्यापाक्रामत्॥५॥ तदेतेनैवप्रत्यगृह्णात्। तेनैवैसोष्टममिंद्रियस्यात्मन्नुपाधत्त। अष्टममिंद्रियस्यात्मन्नुपाधत्ते। यएवंविद्वान्प्राणंप्रतिगृह्णाति। अथयोविद्वान्प्रतिगृह्णाति। अष्टममस्येंद्रियस्यापक्रामति। यद्वाइदंकिंच। तत्सर्वमुत्तानएवांगीरसःप्रत्यगृह्णात्। तदेनंप्रतिगृहीतंनादिनत्। यत्किंचप्रतिगृह्णीयात्। तत्सर्वं

म२

ब्रा॰ द्वि॰
॥२९॥

मुत्तानस्त्वांगीरसःप्रतिगृह्णात्वित्येवप्रतिगृह्णीयात्।द्वयंवाउत्तानआंगीरसः।अन
येवैनस्प्रतिगृह्णाति।नैनंहिनस्ति॥६॥ततीमिंद्रियस्यापाक्रामच्चतुर्थमिंद्रिय
स्यात्मन्नुपाधत्ताश्वंप्रतिगृह्णातिषष्ठमस्येंद्रियस्याप क्रामत्यष्टममिंद्रियस्यापाक्रा
मत्प्रतिगृह्णीयाच्चत्वारिच॥५॥ ॥ब्रह्मवादिनोवदंति।यद्दशहोतारःसत्र
मासत।केनतेगृहपतिनार्ध्नुवन्।केनप्रजाअसृजंतेति।प्रजापतिनावैतेगृहपति
नार्ध्नुवन्।तेनप्रजाअसृजंत।यच्चतुर्होतारःसत्रमासत।केनतेगृहपतिनार्ध्नुवन्।
केनौषधीरसृजंतेति।सोमेनवैतेगृहपतिनार्ध्नुवन्॥१॥तेनौषधीरसृजंत।यत्पं
चहोतारःसत्रमासत।केनतेगृहपतिनार्ध्नुवन्।केनेभ्योलोकेभ्योसुरान्प्राणुदं ॥२९॥
त।केनैषांपशूनवृंजतेति।अग्निनावैतेगृहपतिनार्ध्नुवन्।तेनेभ्योलोकेभ्योसुरा

न्प्राणुदंत।तेनैषांपशूनवृंजत।यत्षड्ढोतारःसत्रमासत।केनतेगृहपतिनार्ध्नुवन्॥२॥
केनर्तूनकल्पयंतेति।धात्रावैतेगृहपतिनार्ध्नुवन्।तेनर्तूनकल्पयंत।यत्सप्तहोतारःस
त्रमासत।केनतेगृहपतिनार्ध्नुवन्।केनसुवरायन्।केनेमान्लोकान्समतन्वन्निति।अ
र्यम्णावैतेगृहपतिनार्ध्नुवन्।तेनसुवरायन्।तेनेमान्लोकान्समतन्वन्निति॥३॥
एतेवैदेवागृहपतयः।तान्यएवंविद्वान्।अप्यन्यस्यगार्हपतेदीक्षते।अवांतरमेवस
त्रिणामृध्नोति।योवाअर्यमणंवेद।दानकामाअस्मैप्रजाभवंति।यज्ञोवाअर्यमा।
आर्यावसतिरितिवैतमाहुर्यंप्रशंसंति।आर्यावसतिर्भवति।यएवंवेद॥४॥क
स्वंवेद।यद्वाइदंकिंच।तत्सर्वंचतुर्होतारः।चतुर्होतृभ्योयज्ञोनिर्मितः।सयएवंवि धि२
द्वान्विवदेत।अहमेवभूयोवेद।यश्चतुर्होतृन्वेदेति।सह्येवभूयोवेद।यश्चतुर्होत

न्वेद। यो वै चतुर्होतॄणां होतॄन्वेद। सर्वासु प्रजास्वन्नमत्ति॥५॥ सर्वा दिशोऽभिजय
ति। प्रजापतिर्वै दशहोतॄणां होता। सोमश्चतुर्होतॄणां होता। अग्निः पञ्चहोतॄणां
होता। धाता षड्ढोतॄणां होता। अर्यमा सप्तहोतॄणां होता। एते वै चतुर्होतॄणां हो
तारः। तान्य एवं वेद। सर्वासु प्रजास्वन्नमत्ति। सर्वा दिशोऽभिजयति॥६॥ आ ध्रुवन्ना
ध्रुवान्नित्येवं वेदाति सर्वा दिशोऽभिजयति॥५॥ ॥प्रजापतिः प्रजाः सृष्ट्वा व्य
स्रंसत। स हृदयं भूतोऽशयत्। आत्मन्हा३ इत्यह्वयत्। आपः प्रत्यशृण्वन्। ता अग्नि
होत्रेणैव यज्ञक्रतुनोपपर्यावर्तन्त। ताः कुसिन्धमुपौहन्। तस्मादग्निहोत्रस्य यज्ञ
क्रतोः। एक ऋत्विक्। चतुर्होतोऽह्वयत्। अग्निर्वायुरादित्यश्चन्द्रमाः॥१॥ ते प्रत्यशृ ॥२९॥
ण्वन्। ते दर्शपूर्णमासाभ्यामेव यज्ञक्रतुनोपपर्यावर्तन्त। त उपौहंश्चत्वार्यङ्गानि।

तस्माद्दर्शपूर्णमासयोर्यज्ञक्रतोः चत्वार ऋत्विजः। पञ्चहोतोऽह्वयत्। पशवः प्रत्यशृ
ण्वन्। ते चातुर्मास्यैरेव यज्ञक्रतुनोपपर्यावर्तन्त। त उपौहन्लोम छवीं मांसमस्थिम
ज्जानं। तस्माच्चातुर्मास्यानां यज्ञक्रतोः॥२॥ पञ्च ऋत्विजः। षड्ढोतोऽह्वयत्। ऋतवः प्रत्य
शृण्वन्। ते पशुबन्धेनैव यज्ञक्रतुनोपपर्यावर्तन्त। त उपौहन्स्तनावाण्डौ शिश्नमवाञ्चं
प्राणं। तस्मात्पशुबन्धस्य यज्ञक्रतोः षड् ऋत्विजः। सप्तहोतोऽह्वयत्। होत्राः प्रत्य
शृण्वन्। ताः सौम्येनैवाध्वरेण यज्ञक्रतुनोपपर्यावर्तन्त॥३॥ ता उपौहन्सप्त शीर्ष
ण्यान्प्राणान्। तस्मात्सौम्यस्याध्वरस्य यज्ञक्रतोः सप्त होत्राः प्राचीर्वषट्कुर्वन्ति।
दशहोतोऽह्वयत्। तपः प्रत्यशृणोत्। तत्कर्मणैव संवत्सरेण सर्वैर्यज्ञक्रतुभिरुपप
र्यावर्तत। तत्सर्वमात्मानमपरिवर्गमुपौहत। तस्मात्संवत्सरे सर्वे यज्ञक्रतवोऽवरु

ब्रा॰ द्वि॰ २

॥३०॥

ध्यंते। तस्माद्दशहोता चतुर्होता। पंचहोता षड्ढोता सप्तहोता। एकहोत्रे बलिं हरंति। हरंत्य
स्मै प्रजा बलिं। एनमप्रतिख्यातं गच्छति। य एवं वेद॥४॥ चंद्रमाश्चातुर्मास्यानां यज्ञक्र
तोरध्वर्युरेण यज्ञक्रतुनोपपर्यावर्तंत सप्तहोता चत्वारि च॥५॥ ॥प्रजापतिः पुरु
षमसृजत। सोऽग्निरब्रवीत्। ममायमन्नमस्त्विति। सोऽबिभेत्। सर्वं वै मायं प्रधक्ष्यती
ति। स एतांश्चतुर्होतृनात्मस्परणानपश्यत्। तानजुहोत्। तैर्वै स आत्मानमस्पृणो
त्। यदग्निहोत्रं जुहोति। एकहोतारमेव तद्यज्ञक्रतुमाप्नोत्यग्निहोत्रं॥१॥ कुसिंधं वा
त्मनस्पृणोति। आदित्यस्य च सायुज्यं गच्छति। चतुरुन्नयति। चतुर्होतारमेव तद्यज्ञ
क्रतुमाप्नोति दर्शपूर्णमासौ। चत्वारि वा आत्मनोऽङ्गानि स्पृणोति। आदित्यस्य च सा ॥३०॥
युज्यं गच्छति। चतुरुन्नयति। समित्पंचमी। पंचहोतारमेव तद्यज्ञक्रतुमाप्नोति चातु

र्मास्यानि। लोमच्छवीं मांसमस्थिमज्जानं॥२॥ तानि वात्मनस्पृणोति। आदित्यस्य च
ज्यं २ सायुछंगति। चतुरुन्नयति। द्विर्जुहोति। षड्ढोतारमेव तद्यज्ञक्रतुमाप्नोति पशुबंधं। आत्म
नो वांगो शिष्नमवांचं प्राणं। तानि वात्मनस्पृणोति। आदित्यस्य च सायुज्यं गच्छति। च
तुरुन्नयति। द्विर्जुहोति॥३॥ समित्सप्तमी। सप्तहोतारमेव तद्यज्ञक्रतुमाप्नोति सौम्य
मध्वरं। सप्त वात्मनः शीर्षण्यान्प्राणान्स्पृणोति। आदित्यस्य च सायुज्यं गच्छति।
चतुरुन्नयति। द्विर्जुहोति। द्विर्निमार्ष्टि। द्विः प्राश्नाति। दशहोतारमेव तद्यज्ञक्रतुमा
प्नोति संवत्सरं। सर्वं वात्मानमपरिवर्गं स्पृणोति। आदित्यस्य च सायुज्यं गच्छ
ति॥४॥ अग्निहोत्रं मज्जानं द्विर्जुहोत्यपरिवर्गमात्मनः स्पृणोत्येकं च॥७॥ ॥
प्रजापतिरकामयत प्रजायेयेति। स तपोऽतप्यत। सोऽन्तर्वानभवत्। स हरितः श्यावो

आ॰ द्वि॰
॥३१॥

सवत्। तस्मात्स्त्र्यंतर्वत्नी। हरिणीसती श्यावाभवति। सविजायमानोगर्भेणाताम्य
त्। सतांतः कृष्णश्यावोभवत्। तस्मात्तांतः कृष्णः श्यावोभवति। तस्यासुरेवाजीवत्॥
॥१॥ तेनासुनासुरानसृजत। तदसुराणामसुरत्वं। यएवमसुराणामसुरत्वंवेद। अ
सुमानेवभवति। नैनमसुर्जहाति। सोसुरान्सृष्ट्वापितेवामन्यत। तदनुपितॄनसृज
त। तत्पितॄणांपितृत्वं। यएवंपितॄणांपितृत्वंवेद। पितेवैवस्वानांभवति॥२॥ यंत्य
स्यपितरोहवं। सपितॄन्सृष्ट्वामनस्यत्। तदनुमनुष्यानसृजत। तन्मनुष्याणांमनु
ष्यत्वं। यएवंमनुष्याणांमनुष्यत्वंवेद। मनस्व्येवभवति। नैनंमनुर्जहाति। तस्मै
मनुष्यान्ससृजानाय। दिवादेवत्राभवत्। तदनुदेवानसृजत। तद्देवानांदेवत्वं। ॥३२॥
यएवंदेवानांदेवत्वंवेद। दिवाहवास्यदेवत्राभवति। तानिवाएतानिचत्वार्यंभांः

सु +

सि। देवामनुष्याःपितरोसुराः। तेषुसर्वेष्वंभोनभइवभवति। यएवंवेद॥४॥ अजी
वत्स्वानांभवतिदेवानसृजतसप्तच॥८॥ ॥ब्रह्मवादिनोवदंति। योवा
इमंविद्यात्। यतोयंपवते। यदभिपवते। यदभिसंपवते। सर्वमायुरियात्। नपुरा
युषःप्रमीयेत। पशुमान्स्यात्। विंदेतप्रजां। योवाइमंवेद॥१॥ यतोयंपवते। यद
भिपवते। यदभिसंपवते। सर्वमायुरेति। नपुरायुषःप्रमीयते। पशुमान्भवति।
विंदतेप्रजां। अद्भ्यःपवते। अपोभिपवते। अपोभिसंपवते॥२॥ अस्याःपवते।
इमामभिपवते। इमामभिसंपवते। अग्नेःपवते। अग्निमभिपवते। अग्निमभि
संपवते। अंतरिक्षात्पवते। अंतरिक्षमभिपवते। अंतरिक्षमभिसंपवते। आदि
त्यात्पवते॥३॥ आदित्यमभिपवते। आदित्यमभिसंपवते। द्योःपवते। दिवमभि

रि +

ब्रा॰ द्वि॰ २ + पूतमुपहरंति। ७ श्रि

पवते। दिवमभिसंपवते। दिग्भ्यः पवते। दिक्ष्वोपवते। दिक्ष्वोभिसंपवते। स यत्पुरस्ता
॥३२॥ द्वाति। प्राण एव भूत्वा पुरस्ताद्वाति ॥४॥ तस्मात्पुरस्ताद्वांतं सर्वाः प्रजाः प्रतिनंदंति। प्रा
णो हि प्रियः प्रजानां। प्राण इव प्रियः प्रजानां भवति। य एवं वेद। स वा एष प्राण एव।
अथ यद्दक्षिणतो वाति। मातरिश्वैव भूत्वा दक्षिणतो वाति। तस्माद्दक्षिणतो वांतं वि
द्यात्। सर्वा दिश आवाति ॥५॥ सर्वा दिशोनु विवाति। सर्वा दिशोनुसंवातीति। स
वा एष मातरिश्वैव। अथ यत्पश्चाद्वाति। पवमान एव भूत्वा पश्चाद्वाति। पूतमस्मा आ
हरंति। पूतमश्नाति। य एवं वेद। स वा एष पवमान एव ॥६॥ अथ यदुत्तरतो वाति। सवि
तेव भूत्वोत्तरतो वाति। सवितेव स्वानां भवति। य एवं वेद। स वा एष सवितेव। ते य एनं
पुरस्तादायंतमुपवदंति। य एवास्य पुरस्तात्पाप्मानः। तांस्ते पघ्नंति। पुरस्तादितरा ॥३२॥
न्पाप्मनः सचंते। अथ य एनं दक्षिणत आयंतमुपवदंति ॥७॥ य एवास्य दक्षिणतः

पाप्मानः तांस्तेपघ्नंति। दक्षिणत इतरान्पाप्मनः सचंते। अथ य एनं पश्चादायंतमु
पवदंति। य एवास्य पश्चात्पाप्मानः। तांस्तेपघ्नंति। पश्चादितरान्पाप्मनः सचंते। अथ
य एनमुत्तरत आयंतमुपवदंति। य एवास्योत्तरतः पाप्मानः। तांस्तेपघ्नंति। ॥८॥ उ
त्तरत इतरान्पाप्मनः सचंते। तस्मादेवं विद्वान्। वीवेन्नत्येत्। प्रेव चंक्रमेत्। व्यस्येवाक्ष्यौ ते +
भाषेत। मंदयेदिव। क्राथयेदिव। शृंगायेतेव। उत मोपवदेयुः। उत मे पाप्मानमपहन्यु
रिति। स यां दिशं संनिमिष्यन्स्यात्। यदा तां दिशं वातो वायात्। अथ प्रवेयात्। प्रवा
धावयेत्। सा तमेव रदितं व्यूढं गंधमाभिप्रच्यते। आस्य तं जनपदं पूर्वा कीर्तिर्गच्छति।
दानकामा अस्मै प्रजा भवंति। य एवं वेद ॥९॥ वेद संपवत आदित्यात्पवते वात्यावात्ये
ष पवमान एव दक्षिणत आयंतमुपवदंति य एवास्योत्तरतः पाप्मानः स्तांस्तेपघ्नंती

ब्रा.द्वि.२

त्यष्टौच॥९॥ ॥प्रजापतिःसोमंराजानमसृजत। तंत्रयोवेदाअन्वसृज्यंत। तान्ह
॥३३॥ स्तेकुरुत। अथहसीतासावित्री। सोमंराजानंचकमे। श्रद्धामुसकमे। साहपितरंप्र
जापतिमुपससार। तंहोवाच। नमस्तेअस्तुभगवः। उपत्वायानि॥१॥ प्रत्वापद्ये। सो
मंवैराजानंकामये। श्रद्धामुसकामयतइति। तस्याउहस्थागरमलंकारंकल्पयित्वा।
दशहोतारंपुरस्ताद्व्याख्याय। चतुर्होतारंदक्षिणतः। पंचहोतारंपश्चात्। षड्ढोतार
मुत्तरतः। सप्तहोतारमुपरिष्टात्। संभारैश्चपत्निभिश्चमुखेलंकृत्य॥२॥ आस्यार्ध
वव्राज। तांहोदीक्ष्योवाच। उपमावर्तस्वेति। तंहोवाच। भोगंतुमआचक्ष्व। एत
न्मआचक्ष्व। यत्तेपाणाविति। तस्याउहत्रीन्वेदान्प्रददौ। तस्मादुहस्त्रियोभोगमे ॥३३॥
वहारयंते। सयःकामयेतप्रियःस्यामिति॥३॥ यंवाकामयेतप्रियःस्यादिति। त

स्माएतंस्थागरमलंकारंकल्पयित्वा। दशहोतारंपुरस्ताद्व्याख्याय। चतुर्होतारंद
क्षिणतः। पंचहोतारंपश्चात्। षड्ढोतारमुत्तरतः। सप्तहोतारमुपरिष्टात्। संभारैश्च
पत्निभिश्चमुखेलंकृत्य। आस्यार्धंव्रजेत्। प्रियोहैवभवति॥४॥ अयान्यलंकृत्यस्या
मितिभवति॥१०॥ ॥ब्रह्मात्मन्वदसृजत। तदकामयत। समात्मनापद्येयेति।
आत्मन्नात्मन्नित्यामंत्रयत। तस्मैदशमंहूतःप्रत्यशृणोत्। सदशहूतोभवत्। दश
हूतोहवैनामैषः। तंवाएतंदशहूतंसंतं। दशहोतेत्याचक्षतेपरोक्षेण। परोक्षप्रियाइव
हिदेवाः॥१॥ आत्मन्नात्मन्नित्यामंत्रयत। तस्मैसप्तमंहूतःप्रत्यशृणोत्। ससप्तहूतो
भवत्। सप्तहूतोहवैनामैषः। तंवाएतंसप्तहूतंसंतं। सप्तहोतेत्याचक्षतेपरोक्षेण।
परोक्षप्रियाइवहिदेवाः। आत्मन्नात्मन्नित्यामंत्रयत। तस्मैषष्ठंहूतःप्रत्यशृणोत्।

ब्रा॰ द्वि॰ २

॥३४॥

सषड्ढूतोऽभवत्॥ २॥ षड्ढूतो ह वै नामैषः। तं वा एतं षड्ढूतं संतं। षड्ढोतेत्याचक्षते परोक्षे
ण। परोक्षप्रिया इव हि देवाः। आत्मन्नात्मन्नित्यामंत्रयत। तस्मै पंचमं हूतः प्रत्यशृ
णोत्। स पंचहूतोऽभवत्। पंचहूतो ह वै नामैषः। तं वा एतं पंचहूतं संतं। पंचहोतेत्याच
क्षते परोक्षेण॥ ३॥ परोक्षप्रिया इव हि देवाः। आत्मन्नात्मन्नित्यामंत्रयत। तस्मै चतु
र्थं हूतः प्रत्यशृणोत्। स चतुर्हूतोऽभवत्। चतुर्हूतो ह वै नामैषः। तं वा एतं चतुर्हूतं सं
तं। चतुर्होतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः। तमब्रवीत्। त्वं वै मे नेदि
ष्ठं हूतः प्रत्यश्रौषीः। त्वयैनानाख्यातार इति। तस्मान्नु हैनांश्चतुर्होतार इत्याच
क्षते। तस्माच्छुश्रूषुः पुत्राणां हृद्यतमः। नेदिष्ठो हृद्यतमः। नेदिष्ठो ब्रह्मणो भवति। ॥३४॥
य एवं वेद॥ ४॥ देवाः षड्ढूतोऽभवत्पंचहोतेत्याचक्षते परोक्षेणाश्रौषीस्त्वं॥ २॥ ॥

॥ ब्रह्मवादिनः किं दक्षिणां यो वा अविद्वां तस्य वा अग्नेर्हिरण्यं ब्रह्मवादिनो यद्द्वादशहोतारः
प्रजापतिर्व्यस्त्रं प्रजापतिः पुरुषं प्रजापतिरकामयत प्रजायेयेति स तपः सोऽतप्यत ब्रह्म
वादिनो यो वा इमं विद्यात्प्रजापतिः सोमं राजानं ब्रह्मात्मन्वदे कादश॥ ११॥ ॥
ब्रह्मवादिनस्त्वं वोस्ये अग्नेर्हिरण्यं यद्द्वादशं किं च प्रजापतिरकामयत स तपः सोऽतप्य
य एवास्य दक्षिणतः पंचाशत्॥ ५०॥ ॥ॐ म्॥ ॥ छ॥ ॥ छ॥ ॥
॥ हरिः ओम्॥ ॥ जुष्टो दमूना अतिथिर्दुरोणे। इमं नो यज्ञमुप याहि विद्वान्। विश्वा
अग्ने अभियुजो विहत्य। शत्रूयतामाभरा भोजनानि। अग्ने शर्धमहते सौभगाय। तव
मूर्भि तिष्ठा द्युम्नान्युत्तमानि संतु। सं जास्पत्यं सुयममा कृणुष्व। शत्रूयतामभि तिष्ठा महांसि। अग्ने योनौ
भितो जनः। वृको वारो जिघांसति॥ १॥ तां स्त्वं वृत्रहं जहि। वस्वस्मभ्यमाभर। अग्ने

ब्रा॰ द्वि॰ ४

॥ ३५ ॥

योनौ स्मिदासति। समानोयश्वनिष्प्यः। इध्मस्येवप्रक्षायतः। मातस्योछेषिर्किंचन। त्वमिंद्रा
भिभूरसि। देवोविज्ञातवीर्यः। वृत्रहापुरुचेतनः। अपप्राचइंद्रविश्वाँ अमित्रान्॥ १॥
अपापाचोअभिभूतेनुदस्व। अपोदीचोअपशूराधराचउरो। यथातवशर्मन्मदेम।
तमिंद्रंवाजयामसि। महेवृत्रायहंतवे। सवृषावृषभोभुवत्। युजेरथंगवेषणंहरिभ्यां।
उपब्रह्माणिजुजुषाणमस्थुः। विबाधिष्टास्यरोदसीमहित्वा। इंद्रोवृत्राण्यप्रतिज
घन्वान्॥ ३॥ हव्यवाहमभिमातिषाहं। रक्षोहणंपृतनासुजिष्णुं। ज्योतिष्मंतंदीद्यतंपु
रंधिं। अग्निंस्विष्टकृतमाहुवेम। स्विष्टमग्नेअभितत्पृणाहि। विश्वादेवपृतनाअभि
ष्य। उरुन्नः पंथांप्रदिशन्विभाहि। ज्योतिष्मद्धेह्यजरन्नआयुः। त्वामग्नेहविष्मंतः। दे ॥ ३५ ॥

स

वंमर्तासईडते॥ ४॥ मन्येत्वाजातवेदसं। सहव्यावक्ष्यानुषक्। विश्वानिनोदुर्गहाजात

वेदः। सिंधुंननावादुरितातिपर्षि। अग्नेअत्रिवन्मनसागृणानः। अस्माकंबोध्यविताततनूनां। पूषागाअन्वेतुनः। पूषारक्षत्वर्वतः। पूषावाजंसनोतुनः। पूषेमाआशाअनुवे
दसर्वाः॥ ५॥ सोअस्माँ अभयतमेननेषत्। स्वस्तिदाअघृणिः सर्ववीरः। अप्रयुच्छ
न्पुरएतुप्रजानन्। त्वमग्नेसप्रथाअसि। जुष्टोहोतावरेण्यः। त्वयायज्ञंवितन्वते। अग्नी
रक्षांसिसेधति। शुक्रशोचिरमर्त्यः। शुचिःपावकईड्यः। अग्नेरक्षोणोअंहसः॥ ६॥
प्रतिष्मदेवरीषतः। तपिष्ठैरजरोदह। अग्नेहंसिन्यत्रिणं। दीद्यन्मर्त्येष्वा। स्वेक्षयेशु
चिव्रत। आवातवाहिभेषजं। विवातवाहियद्रपः। त्वंहिविश्वभेषजः। देवानांदूत
ईयसे। द्वाविमौवातौवातः॥ ७॥ आसिंधोरापरावतः। दक्षंमेअन्यआवातु। परान्यो
वातुयद्रपः। यददोवाततेगृहे। अमृतस्यनिधिर्हितः। ततोनोदेहिजीवसे। ततोनो

धेहि भेषजं। ततो नो मह आवह। वात आवातु भेषजं। शंभूर्मयोभूर्नो हृदे॥८॥ प्रण आ
यूंषि तारिषत्। त्वमग्ने अयासि। अयासन्मनसा हितः। अयासन्हव्यमूहिषे। अया
नो धेहि भेषजं। उड्डशो अग्निराहुतः। स्वाहाकृतः पिपर्तु नः। स्वगा देवेभ्य इदं नमः।का
मोभूतस्य भव्यस्य। सम्राडेको विराजति॥९॥ सइदं प्रति पप्रथे। ऋतू नुत्सृजते
वशी। कामस्तदग्रे समवर्तताधि। मनसो रेतः प्रथमं यदासीत्। सतो बंधुमसति
निरविंदन्। हृदि प्रतीष्या कवयो मनीषा॥ त्वया मन्यो सरथमारुजंतः। हर्षमाणा
सो धृषता मरुत्वः। तिग्मेषव आयुधा सं शिशानाः। उपप्रयंति नरो अग्निरूपाः॥
॥१०॥ मन्युर्भगो मन्युरेवास देवः। मन्युर्होता वरुणो विश्ववेदाः। मन्युं विश ईळते ॥३६॥
देवयंतीः। पाहि नो मन्यो तपसा श्रमेण। त्वमग्ने व्रतपा असि शुचिः। देवाँ आसादया।

इह। अग्ने हव्याय वोढवे। व्रता नु बिभ्रद्व्रतपा अदाभ्यः। यजा नो देवाँ अजरः सुवी
रः। दधद्रत्नानि सुविदानो अग्ने। गोपाय नो जीवसे जातवेदः॥११॥ जिघांसत्यमि
त्रौ जघन्वानीउते सर्वाँ अंहसो वातो दूरे राजत्यग्निरूपाः सुविदानो अग्न एकं च।
॥१॥ ॥ चक्षुषो हेते मनसो हेते। वाचो हेते ब्रह्मणो हेते। यो माघायुरभिदास
ति। तमग्ने मेन्यामेनिं कृणु। यो मा चक्षुषा यो मनसा। यो वाचा ब्रह्मणाघायुरभि
दासति। तयाग्ने त्वं मेन्या। अमुममेनिं कृणु। यत्किंचासौ मनसा यच्च वाचा। यज्ञै
र्जुहोति यजुषा हविर्भिः॥१॥ तन्मृत्युर्निरृत्या संविदानः। पुरा दिष्टादाहुतीरस्य
हंतु। यातुधाना निरृतिरादु रक्षः। ते अस्य घ्नंत्वनृतेन सत्यं। इंद्रेषिता आज्यमस्य म
थ्नंतु। मा तत्समृद्धि यदसौ करोति। हन्मि ते हं कृतं हविः। यो मे घोरमचीकृतः। अ

श्रा॰ हि॰ ४

यौ चो त उभौ बाहू । अपनह्याम्यास्ये ॥ २ ॥ अपनह्यामि ते बाहू । अपनह्याम्यास्यं ।

॥ २७ ॥ अग्नेर्देवस्य ब्रह्मणा । सर्वं ते वधिषं कृतं । पुरामुष्य वषट्कारात् । यज्ञं देवेषु नस्कृधि ।
स्विष्टमस्माकं भूयात् । मास्मान्प्रापन्नरातयः । अंति दूरे सतो अग्ने । भ्रातृव्यस्या
भिदासतः ॥ ३ ॥ वषट्कारेण वज्रेण । कृत्यां हन्मि कृतामहं । यो मा नक्तं दिवा सा
यं । प्रातश्चाह्नो निपीयति । अद्या तमिंद्र वज्रेण । भ्रातृव्यं पादयामसि । इंद्रस्य
गृहोसि तं त्वा । प्रपद्ये सगुः साश्वः । सह यन्मे अस्ति तेन । ईडे अग्निं विपश्चितं ॥ ४ ॥
गिरा यज्ञस्य साधनं । श्रुष्टीवानं धितावानं । अग्ने शाके मते वयं । यमं देवस्य वा
जिनः । अति द्वेषांसि तरेम । अवतं मा समनसौ समोकसौ । सचेतसौ सरे ॥ ३७ ॥
तसौ । उभौ मामवतं जातवेदसौ । शिवौ भवतमद्य नः । स्वयं कृण्वानः सुगमप्रया

वं ॥ ५ ॥ तिग्मशृंगो वृषभः शोशुचानः । प्रत्नं सधस्थमनु पश्यमानः । आ तंतुमग्नि
र्दिव्यं ततान । त्वं नस्तंतुरुत सेतुरग्ने । त्वं पंथा भवसि देवयानः । त्वयाग्ने पृष्ठं वयमा
रुहेम । अथा देवैः सधमादं मदेम । उदुत्तमं मुमुग्धि नः । वि पाशं मध्यमं चृत । अवाधमा
नि जीवसे ॥ ६ ॥ वयं सोम व्रते तव । मनस्तनूषु बिभ्रतः । प्रजावंतो अशीमहि । इं
पी । द्राणी देवी सुभगा सुपत्नी । उदंशेन पतिविद्ये जिगाय । त्रिंशदस्या जघनं योज
नानि । उपस्थ इंद्रं स्थविरं बिभर्ति । सेना ह नाम पृथिवी धनंजया । विश्वव्यचा अ
दितिः सूर्यत्वक् । इंद्राणी देवी प्रासहा ददाना ॥ ७ ॥ सा नो देवी सुहवा शर्म यच्छतु ।
आ त्वाहार्षमंतरभूः । ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वांछंतु । मा
त्वद्राष्ट्रमधिभ्रशत् । ध्रुवा द्यौर्ध्रुवा पृथिवी । ध्रुवं विश्वमिदं जगत् । ध्रुवा ह पर्वता

त्वे। ध्रुवो राजा विशामयं। इहैवैधि माव्यथिष्ठाः॥ ८॥ पर्वत इवाविचाचलिः। इंद्र इवे
ह ध्रुवस्तिष्ठ। इह राष्ट्रमु धारय। अभितिष्ठ पृतन्यतः। अधरे संतु शत्रवः। इंद्र इवत्रेह
तिष्ठ। अपः क्षेत्राणि संजयन्। इंद्र एणामदीधरत्। ध्रुवं ध्रुवेण हविषा। तस्मै देवा अ
धिब्रुवन्। अयं च ब्रह्मणस्पतिः॥ ९॥ हविर्ष्मिरास्यमसि द्रासतो विपश्चितम प्रयावं
जीवसे ददाना व्यथिष्ठा ब्रवन्नेके च॥ २॥ ॥जुष्टीनरो ब्रह्मणा वः पितृणां। अ
क्षमव्ययन्नाकिला रिषाथ। यच्छक्वरीषु बृहता रवेण। इंद्रे शुष्ममदधाथा वसिष्ठाः॥
पावका नः सरस्वती। वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः। सरस्वत्यभि नो ने
षि वस्यः। मापस्फरीः पयसा मा न आधक्। जुषस्व नः सख्या वेश्या च॥ १॥ मा त्वत्क्षे ॥३८॥
त्राण्यरणा गन्म। वृंजे हविर्नमसा बर्हिरग्नौ। अयामि स्रुग्घृतवती सुवृक्तिः। अम्य

क्षि सद्म सदने पृथिव्याः। अश्रायि यज्ञः सूर्ये न चक्षुः। इहार्वाचमति ह्वये। इंद्रं जैत्राय
जेतवे। अस्माकमस्तु केवलः। अर्वाचमिंद्रममुतो हवामहे। यो गोजिद्धनजिदश्वजि
द्यः॥ १॥ इमं नो यज्ञं विहवे जुषस्व। अस्य कुर्मो हरिवो मेदिनं त्वा॥ असंमृष्टो जायसे मा
त्रोः शुचिः। मंद्रः कविरुदतिष्ठो विवस्वतः। घृतेन त्वावर्धयन्नग्न आहुत। धूमस्ते के
तुरभवद्दिवि श्रितः॥ अग्निरग्रे प्रथमो देवतानां। संयातानामुत्तमो विष्णुरासीत्। यज
मानाय परिगृह्य देवान्। दीक्षयेदं हविरागच्छतं नः॥ १॥ अग्निश्च विष्णो तप उत्तमं
महः। दीक्षापालेभ्यो वनतं हि शक्रा। विश्वैर्देवैर्यज्ञियैः संविदानौ। दीक्षामस्मै य
जमानाय धत्तं। प्र तद्विष्णुस्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु
त्रिषु विक्रमणेषु। अधिक्षियंति भुवनानि विश्वा। नूमर्तो दयते सनिष्यन्यः। विष्णव

आ॰ द्वि॰ ८
॥३२॥

उरुगायाय यद्दात्रात् ॥४॥ प्र यः सत्रा वा मनसा यजाते। एतावंतं नर्यमा विवासात्। विचक्र
मे पृथिवीमेष एतां। क्षेत्राय विष्णुर्मनुषे दशस्यन्। ध्रुवासो अस्य कीरयो जनासः। उरु
क्षितिं सुजनिमा चकार। त्रिर्देवः पृथिवीमेष एतां। विचक्रमे शतर्चसं महित्वा। प्र विष्णु
रस्तु तवसस्तवीयान्। त्वेषं ह्यस्य स्थविरस्य नाम ॥५॥ होतारं चित्ररथमध्वरस्य।
यज्ञस्य यज्ञस्य केतुं रुशंतं। प्रत्यर्धिं देवस्य देवस्य मह्ना। श्रिया त्वग्निमतिथिं जना
नां। आ नो विश्वाभिरूतिभिः सजोषाः। ब्रह्म जुषाणो हर्यश्व याहि। वरीवृजत् स्थ
विरेभिः सुशिप्र। अस्मे दधद्वृषणं शुष्ममिंद्र। इंद्रः स्वर्षा जनयन्नहानि। जिगा
योशिग्भिः पृतना अभिष्टिः ॥६॥ प्रारोचयन्मनवे केतुमह्नां। अविंदज्ज्योतिर्बृहते ॥३५॥
रणाय। आश्विना ववसे निर्ह्वये वां। आ नूनं यातं सुकृताय विप्रा। प्रातर्युक्तेन सु

वृता रथेन। उपागच्छतमवसागतं नः। अविष्टं धीष्वश्विना न आसु। प्रजावद्रेतो अह्रयं नो
अस्तु। आ वां तोके तनये तूतुजानाः। सुरत्नासो देववीतिं गमेम ॥७॥ त्वं सोम क्रतुभिः
सुक्रतुर्भूः। त्वं दक्षैः सुदक्षो विश्ववेदाः। त्वं वृषा वृषत्वेभिर्महित्वा। द्युम्नेभिर्द्युम्न्यभवो
नृचक्षाः। आषाळ्हं युत्सु पृतनासु पप्रिं। स्वर्षामप्सां वृजनस्य गोपां। भरेषुजां सुक्षि
तिं सुश्रवसं। जयंतं त्वामनु मदेम सोम। भवा मित्रो न शेव्यो घृतासुतिः। विभूतद्यु
म्न एवया उ सप्रथाः ॥८॥ अधा ते विष्णो विदुषा चिदर्ध्यः। स्तोमो यज्ञस्य राध्यो हवि
ष्मतः। यः पूर्व्याय वेधसे नवीयसे। सुमज्जानये विष्णवे ददाशति। यो जातमस्य मह
तो महि ब्रवीत्। सेदु श्रवोभिर्युज्यं चिदभ्यसत्। तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य
गर्भं हविषा पिपर्तन। आस्य जानंतो नाम चिद्विवक्तन। बृहत्ते विष्णो सुमतिं भजा

श्री॰हि॰४

॥४०॥

महे॥९॥इमाधानाघृतस्नुवः।हरीइहोपवक्षतः।इंद्रं सुखतमेरथे।एषब्रह्माप्रतेमहे।
विदथेशंसिषं हरी।यऋत्वियःप्रतेवन्वे।वनुषोहर्यतंमदं।इंद्रोनोघृतनेयः।हरिभि
श्चारुसेचते।श्रुतोगणआत्वाविशंतु॥१०॥हरिवर्पसंगिरः।आचर्षणिप्रावृषभोज
नानां।राजाकृष्टीनांपुरुहूतइंद्रः।स्तुतश्रवस्यंनवसोपमद्रिक्।युक्त्वाहरीवृषणा
याह्यर्वाङ्।प्रयस्सिंधवःप्रसवंयदायन्।आपःसमुद्रंरथ्येवजग्मुः।अतश्चिदिं
द्रःसहसोवरीयान्।यदीं सोमःपृणातिदुग्धोअंशुः।कृयामासित्वेंद्रयाह्यर्वाङ्॥११॥
अरंतेसोमस्तनुवेभवाति।तातकृतोमादयस्वासुतेषु।प्रास्मान्अवपृतनासुप्रयु
त्सु।इंद्रायसोमाःप्रदिवोविदानाःऋभुर्येभिर्वृषपर्वाविहायाः।प्रयम्यमाणान्प्र ॥४०॥
तिषूगृभाय।इंद्रपिबवृषधूतस्यवृष्णः।अहेडमानउपयाहियज्ञं।तुभ्यंपवंतइंद

वःसुतासः।गावोनवज्रिन्स्वमोकोअच्छ॥१२॥इंद्रागहिप्रथमोयज्ञियानां।यातेका
कुत्सुकृतायावरिष्ठा।ययाशश्वत्पिबसिमध्वऊर्मिं।तयापाहिप्रतेअध्वर्युरस्थात्।
संतेवज्रोवर्ततामिंद्रगव्युः।प्रातर्युजाविबोधय।अश्विनावेहगच्छतं।अस्यसोमस्य
पीतये।प्रातर्यावाणाप्रथमायजध्वं।पुरागृध्रादररुषःपिबाथः।प्रातर्हियज्ञमश्वि
नादधाते।प्रशंसंतिकवयःपूर्वभाजः।प्रातर्यजध्वमश्विनाहिनोत।नसायमस्ति
देवयाअजुष्टं।उतान्योअस्मद्यजतेविचायः।पूर्वःपूर्वोयजमानोवरीयान्॥१३॥चा
श्वजिघागच्छतन्नोदाशूंनामासिध्रीगेमेमसप्रयामजामहेविशंयात्यर्वाऊछपि
बाथःषड्॥३॥ ॥नक्तंजातास्योषधे।रामेकृष्णेअसिक्नि च।इदंरजनिर
जय।किलासंपलितंचयत्।किलासंचपलितंच।निरितोनाशयापृषत्।अनस्वा

ऋग्०खि० ४
॥४१॥

अभूतांवर्णः परास्वेतानिपातय। असितंतेनिलयनं। आस्थानमसितंतव॥२॥अ
सिक्निर्यस्योषधे। निर्हितोनाशयापृषत्। आस्थिजस्यकिलासस्य। तनूजस्यच
यत्वचि। दूष्यया कृतस्यब्रह्मणा। लक्ष्मश्वेतमनीनशं। सरूपानामतेमाता। सरूपा
नामतेपिता। सरूपास्योषधेसा। सरूपमिदंकृधि॥३॥ शुनं हुवेममघवानमिं
द्रं। अस्मिन्भरेनृतमंवाजसातौ। शृण्वंतमुग्रमूतयेसमत्सु। घ्नंतंवृत्राणिसंजितं
धनानां। धूनुथद्यांपर्वतांदाशुषेवसु। निवोवनाजिहतेयामनोभिया। कोपयथपृ
थिवींपृश्निमातरः। शुभेयदुग्राःपृषतीरयुग्ध्वं। प्रवेपयंतिपर्वतान्। विविंचंति
वनस्पतीन्॥३॥ प्रोवारतमरुतोदुर्मदाइव। देवासःसर्वयाविशा। पुरुत्राहिसद् ॥४१॥
ऋ०सि। विभ्वोविश्वा अनुप्रभु। समत्सुत्वाहवामहे। समत्स्वग्निमवसे। वाजयंतोह

वामहे। वाजेषुचित्रराधसं। संगच्छध्वं संवदध्वं। संवोमनांसिजानतां॥४॥ देवाभा
गंयथापूर्वे। संजानानाउपासत। समानोमंत्रःसमितिःसमानी। समानंमनःसहचित्त
मेषां। समानंकेतोअभिसंरभध्वं। संज्ञानेनवोहविषायजामः। समानीवआकूतिः।
समानाहृदयानिवः। समानमस्तुवोमनः। यथावःसुसहासति॥५॥ संज्ञानंनस्वेभिः।
संज्ञानमरणेभिः। संज्ञानमश्विनायुवं। इहास्मासुनियच्छतं। संज्ञानंमेबृहस्पतिः। संज्ञा
नं सविताकरत्। संज्ञानमश्विनायुवं। इहमह्यंनियच्छतं। उपच्छायामिवघृणेः। अग
न्मछर्मतिवयं॥६॥ अग्नेहिरण्यसंदृशः। अदब्धेभिःसवितःपायुभिष्टुं। शिवेभिर
द्यपरिपाहिनोगयं। हिरण्यजिह्वःसुवितायनव्यसे। रक्षामाकिर्नोअघशंसईशत।
मदेमदेहिनोददुः। यूथागवामृजुक्रतुः। संगृभायपुरूशता। उभयाहस्त्यावसु। शि
शीहिरायआभर॥७॥ शिप्रिन्वाजानांपते। शचीवस्तवदंसना। आतून इंद्रभाजय।

हि

श्रा॰ द्वि॰ ४
॥४२॥

गोष्वश्वेषु शुभ्रिषु। सहस्रेषु तुवीमघ। यद्देवा देवहेडनं। देवासश्चकृमा वयं। आदित्यास्त
स्मान्मायूयं। ऋतेस्यर्तेन मुंचत। ऋतस्यर्तेनादित्याः॥९॥ यजत्रा मुंचतेह मा। यद्वै वीर्यं
शवाहसः। आशिक्षंतो न त्रो किम। मेदस्वता यजमानाः। स्रुचाज्येन जुह्वतः। अकामा वो
विश्वे देवाः। शिक्षंतो नोप शेकिम। यदि दिवा यदि नक्तं। एन एनस्यो करत। भूतं मा तस्मा
द्भव्यं च॥९॥ द्रुपदादिव मुमुक्तु। द्रुपदादिवेन्मुमुचानः। स्विन्नः स्नात्वी मलादिव। पूतं
पवित्रेणेवाज्यं। विश्वे मुंचंतु मेनसः। उद्वयं तमसस्परि। पश्यंतो ज्योतिरुत्तरं। देवं देवत्रा
सूर्यं। अगन्म ज्योतिरुत्तमं॥१०॥ नवल्ल धिवनस्पतीं जानताम सतिवयंमरा दिस्याश्च
नवश्च॥४॥ ॥ वृषा सोमऽंशुः पवते हविष्मान्त्सोमः। इंद्रस्य भाग ऋतयुः शता ॥४२॥
तायुः। समा वृषाणं वृषभः कृणोतु। प्रियं विश्वाऽं सर्ववीरंऽ सुवीरं। कस्य वृषा सुते सचा।
नियुत्वान्वृषभो रणत्। वृत्रहा सोमपीतये। यस्ते शृंग वृषो नपात्। प्रणपात्कुंडपाय्यः।

न्यस्मिन्दध्र आमनः॥१॥ तंः सध्रीचीरूतयो वृष्णियानि। पौंस्यानि नियुतः सश्चुरिंद्रं।
समुद्रन्न सिंधव उक्थशुष्माः। उरुव्यचसं गिर आ विशंति। इंद्राय गिरो अनिशितसर्गाः।
अपः प्रेरयन्सगरस्य बुध्नात्। यो अक्षेणेव चक्रिया शचीभिः। विष्वक्तस्तंभ पृथिवीमुत द्यां।
अक्षोदयच्छवसा क्षामबुध्नं। वार्णवासस्तविषीभिरिंद्रः॥२॥ हृदान्यो भ्रातृत्वामाम
ओजः। अवाभिनत्ककुभः पर्वतानां। आनो अग्ने सुकेतुना। रयिं विश्वायुपोषसं। मार्डीकं धे श्वा
हि जीवसे। त्वंः सोम महे भगं। त्वं यून ऋतायते। दक्षं दधासि जीवसे। रथं युंजते मरु
तः शुभे सुखं। सूरो न मित्रावरुणा गविष्टिषु॥३॥ रजांसि चित्रा विचरंति तन्यवः। दि
वः सम्राजा पयसा न उक्षितं। वाचं सु मित्रावरुणा विरावतीं। पर्जन्यश्चित्रां वदति
त्विषीमतीं। अभ्रा वसत मरुतः सुमायया। द्यां वर्षयत मरुणामरेपसं। अयुक्त सप्त
शुंध्युवः। सूरो रथस्य नप्त्रियः। ताभिर्याति स्वयुक्तिभिः। वहिष्ठेभिर्विहरन्यासि तंतुं।

श्री·ह्रि·४

॥४३॥

॥४॥ अव व्ययेन सितं देव वस्वः दविध्वतो रश्मयः सूर्यस्य। चर्मेवावाधुस्तमो अप्स्वंतः॥ पर्ज
न्याय प्रगायत। दिवस्पुत्राय मीढुषे। स नो यवसमिच्छतु। अच्छा वद तवसं गीर्भिराभिः स्तु
हि पर्जन्यं नमसा विवास। कनिक्रदद्वृषभो जीरदानुः रेतो दधात्वोषधीषु गर्भं॥ ५॥
यो गर्भमोषधीनां। गवां कृणोत्यर्वतां। पर्जन्यः पुरुषीणां। तस्मा इदास्ये हविः। जुहोता म
धुमत्तमं। इडां नः संयतं करत्। तिस्रो यदग्ने शरदस्त्वामित्। शुचिं घृतेन शुचयः सपर्यान्।
नामानि चिद्दधिरे यज्ञियानि। असूदयंत तन्वः सुजाताः॥६॥ इंद्रेश्च नः शुनासीरौ। इमं
यज्ञमिमिक्षतं। गर्भं धत्तं स्वस्तये। ययोरिदं विश्वं भुवनमाविवेश। ययोरासन्नं देवा निहि
तोमहश्च। शुनासीरावृतुभिः संविदानौ। इंद्रवंतौ हविरिदं जुषेथां। आघा ये अग्निमिंध
ते। स्तृणंति बर्हिरानुषक्। येषामिंद्रो युवा सखा। अग्न इंद्र सदिना। हथो वृत्राण्यप्रति। ॥४३॥
युवं हि स्थ स्वर्हतमा। याभ्यां स्वरजयन्नग्र एव। या वातस्थतुर्भुवनस्य मध्ये। प्रवर्ष

णी वृषणा वज्रबाहू। अग्नी इंद्रा वृत्रणा हुवे वां॥७॥ मन इंद्रो गविष्ठिषु तं तुं गर्भं सुजाताः
सखा सस्तव॥५॥ ॥उत नः प्रिया प्रियासु। सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्याभू
त्। इमा जुह्वाना युष्मदा नमोभिः। प्रति स्तोमं सरस्वति जुषस्व। तव शर्मन्प्रियतमे
दधानाः उपस्थेयाम शरणं न वृक्षं। त्रीणि पदा विचक्रमे। विष्णुर्गोपा अदाभ्यः। ततो
धर्माणि धारयन्॥१॥ तदस्य प्रियमभिपाथो अश्यां। नरो यत्र देवयवो मदंति। उरुक्रमस्य
स हि बंधुरित्था। विष्णोः पदे परमे मध्व उत्सः। कत्वा दा अस्तु श्रेष्ठः। अद्य त्वा वन्वन्सुरेक्णाः॥
मर्त आनाश सुवृक्तिं। इमा ब्रह्म ब्रह्मवाह। प्रियात आ बर्हिः सीद। वीहि सूर पुरोडाशं॥२॥
उप नः सूनवो गिरः। शृण्वंत्वमृतस्य ये। सुमृडीका भवंतु नः। अद्या नो देव सवितः प्र
जावत्सावीः सौभगं। परा दुःष्वप्न्यं सुव। विश्वानि देव सवितर्दुरितानि परा सुव।

श्रा॰ द्वि॰ ॥५५॥

यद्भद्रं तन्न आसुव। शुचिमर्कैर्बृहस्पतिं॥३॥ अध्वरेषु नमस्यत। अनाम्योज आचके। या
धारयंत देवाः सुदक्षा दक्षपितारः। असुर्याय प्रमहसा। सदूत्स्येति सुधित ओकसि स्वे।
तस्मा इडा पिन्वते विश्वदानी। तस्मै विशः स्वयमेवानमंति। यस्मिन्ब्रह्मा राजनि पूर्व ए
ति। स कूतिमिंद्र सच्युतिं। सच्युतिं जघनच्युतिं॥४॥ कनात्काभा न आसरः। प्रयप्स्यं
निवस [struck] क्ष्यो। विनइंद्र मृधो जहि। कनीखुनद्दिव सापयन्। अभिनः सुष्टितिं न
य। प्रजापतिः स्त्रियां यशः। मुष्कयोरदधात्सपं। कामस्य तृप्तिमानंदं। तस्याग्ने भा
जयेह मा। मोदः प्रमोद आनंदः॥५॥ मुष्कयोर्निहितः सपः। स त्वेव कामस्य तृप्याणि।
दक्षिणानां प्रतिग्रहे। मनसश्चित्तमाकूतिं। वाचः सत्यमशीमहि। पशूनां रूपमन्न
स्य। यशः श्रीः श्रयतां मयि। यथाहमस्या अतृपं स्त्रियै पुमान्। यथा स्त्री तृप्यति पुं ॥५५॥
सि प्रिये प्रिया। एवं भगस्य तृप्याणि॥६॥ यज्ञस्य काम्यः प्रियः। ददामीत्यग्निर्वदति।

तथेति वायुराह तत्। हंतेति सत्यं चंद्रमाः। आदित्यः सत्यमोमिति। आपस्तत्सत्यमाभरन्।
यशो यज्ञस्य दक्षिणा। असौ मे कामः समृध्यतां। न हि स्पशमविदन्नन्यमस्मात्। वैश्वान
रात्पुर एतारमग्नेः॥७॥ अथेममन्थनमृतममूराः। वैश्वानरं क्षेत्रजित्याय देवाः। येषामि
मे पूर्वे अर्मास आसन्। अयूपाः सद्म विभृता पुरूणि। वैश्वानर त्वया ते नुत्ताः। पृथिवीम
न्यामभितस्थुर्जनासः। पृथिवीं मातरं महीं। अंतरिक्षमुपब्रुवे। बृहतीमूतये दिवं। विश्वं
बिभर्ति पृथिवी॥८॥ अंतरिक्षं वि पप्रथे। दुहे द्यौर्बृहती पयः। न ता नशंति न दभाति तस्क
रः। नैना अमित्रो व्यथिरा दधर्षति। देवांश्च याभिर्यजते ददाति च। ज्योगित्ताभिः स
चते गोपतिः सह। न ता अर्वा रेणुककाटो अश्नुते। न संस्कृतत्रमुप यंति ता अभि। उरु
गायमभयं तस्य ता अनु। गावो मर्तस्य विचरंति यज्वनः॥९॥ रात्री व्यख्यदायती।

अ॰ द्वि॰ पुरुत्रा देव्यक्षभिः। विश्वा अधि श्रियो धित। उप तं गाद्दूवाकरं हरणीषद्गु हितं दिवः। रात्री

॥४५॥ रेतामर्न्नाग्युषी। देवीमाचमजनयंत देवाः। तां विश्वरूपाः पशवो वदंति। सानो मंद्रेषमूर्जं

दुहाना। धेनुर्वागस्मानुप सुष्टुतैतु॥२०॥ यद्वाग्वदंत्यविचेतनानि। राष्ट्री देवानां

निषसाद मंद्रा। चतस्र ऊर्जं दुदुहे पयांसि। क्व स्विदस्याः परमं जगाम। गौरीर्मिमाय

सलिलानि तक्षती। एकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी। सह

स्राक्षरा परमे व्योमन्। तस्याः समुद्रा अधि विक्षरंति। तेन जीवंति प्रदिशश्चतस्रः॥

॥२१॥ ततः क्षरत्यक्षरं। तद्विश्वमुपजीवति। इंद्रा सू राजनयन्विश्वकर्मा। मरुत्वां

अस्तु गणवान्सजातवान्। अस्य स्नुषा श्वशुरस्य प्रशिष्टिं। सपत्ना वाचं मनसा उपा ॥४५॥

सतां। इंद्रः सुरो अतरद्रजांसि। स्नुषा सपत्ना श्वशुरोयमस्तु। अयं शत्रूंजयतु ज

हृषाणः। अयं वाजं जयतु वाजसातौ। अग्निः स्वत्रप्रदनिम्म ष्टमोजः। सहस्त्रियो दी

प्यतामप्रयुच्छन्। विभ्राजमानः समिधान उग्रः। आंतरिक्षमरुहदगंद्यां॥२२॥ धा

रयन्पुरोडाशं बृहस्पतिं जप नच्युतिमानंदो भगास्यत प्याण्यग्नेः पृथिवीय ज्वन ए

वु प्रादिशश्च तस्रः। वाजसातौ नत्वाम्स्वि॥८॥ ॥ वृषास्यंशुर्वृषभाय ग

ृघसे। वृषायमुग्रो नृचक्षसे। दिव्यः कर्मण्यो हितो बृहन्नाम। वृषभस्य या क

कुत्। विषूवान्विष्णो भवतु। अयं यो मामको वृषा। अथो इंद्र इव देवेभ्यः। वि ब्रवी

तु जनेभ्यः। आयुष्मंतं वर्चस्वंतं। अथो अधिपतिं विशां॥१॥ अस्याः पृथिव्या अ

ध्यक्षं। इममिंद्र वृषभं कृणु। यः सुश्रृंगः सुवृषभः। कल्याणो द्रोण आहितः। का

र्षीवलप्रगाणेन। वृषभेण यजामहे। वृषभेणा यजमानाः। अक्रूरेणेव सर्पिषा। स

अ॰ द्वि॰ ४

॥४६॥

धश्च सर्वा इंद्रेण। पृतना अजयाम सि॥२॥ यस्यायमस्वप्नो हविः। इंद्रो यच परिणी
यते। जयाति शत्रुमायंतं। अथो हंति पृतन्यतः। नणामहप्रणी रसत्। अय उद्भिंद
तामसत्। इंद्रस्तुभिंतनुवामेरयस्व। नीचा विश्वा अभितिष्ठाभिमातीः॥ निष्टपी
त्वा बाधं यो नो अस्ति। उरुं कृणु हि जीरदानो॥३॥ प्रेह्यभि प्रेहि प्रभरा सहस्व। मा
विवेनो विस्तृणु ष्वा जनेषु। + नोलोकं + उदीडितो वृष भाति छशुभैः। इंद्र त्राश्च सुरो अ
स्माकयुध्य। अग्ने जेतात्वं जय। शत्रून्त्सहस ओजसा। विश्वा न्यान्वमधोनुद। एतेते
स्तोमं तुविजात विप्रः। रथं न धीरः स्वपा अतक्षं। यदीदग्ने प्रति त्वं देव हर्याः॥४॥ सु
वर्वतीरुप एना जयेम। योहृतेनाभिमानितः। इंद्र जैत्राय जज्ञिषे। स नः संकासु ॥४६॥
पारय। पृतनासाह्येषु स्व। इंद्रो जिगाय पृथिवीं। अंतरिक्षं सुवर्महत्। वृत्रहा पु

रुच्येतनः। इंद्रो जिगाय सहसा सहांसि। इंद्रो जिगाय पृतना नि विश्वा॥५॥ इंद्रो जातो
विपुरो रुरोज। स नः पुरस्पाव रिवः कृणोतु। अयं कल्लुरग्न सीतः। विश्वजिदुद्भित्सो
मः। ऋषि र्विप्रः काव्येन। वायुरग्ने गायन्नप्रीः। साकं गन्मनसा यज्ञं। शिवो नियुद्भिः शि
वि
यु
वाभिः॥ वायो स्तुक्रो अया मिते। मध्वो अग्रं दिविष्टिषु॥६॥ आयाहि सोमपीतये। स्वारु
होदेव नित्वता। इममिंद्र वर्धय क्षत्रियाणां। अयं विशां विशपति रस्तु राजा। अस्मा इं
द्रमहि वर्चांसि धेहि। अवर्च संकृणुहि शत्रुमस्य। इममाभज ग्रामे अश्वेषु गोषु। नि
रमुं भज यो मित्रो अस्य। वर्ष्मन्क्षत्रस्य ककुभिः श्रयस्व। ततो न उग्रो विभजा वसूनि।
॥७॥ अस्मै द्यावापृथिवी भूरि वामं। संदुहाथां घर्मदुघेव धेनुः। अयं राजा प्रियइंद्र
स्य भूयात्। प्रियो गवामोषधीनामुतापां। युनज्मि त उत्तरावंतमिंद्रं। येन जयासि न
पराजयासै। स त्वा करेक वृषभं स्वानां। अथो राजन्नुत्तमं मानवानां। उत्तरस्त्वमधरे

ब्रा॰ द्वि॰ ४

॥४७॥

तेसपत्नाः। एषह्याइंद्रसखाजिगीवान्॥८॥ विश्वाआशाःपृतनाःसंजयन्जयन्। अभि
मातीयतःसहस्व। तुभ्यंभरंतिक्षितयोयविष्ठ। बलिमग्नेअंतितओतदूरात्। आभं
दिष्ठस्यसुमतिंचिकिद्धि। बृहत्तेअग्नेमहिशर्मभद्रं। योदेह्योअनमयद्वधस्नैः। योअर्यप
त्नीरुषसश्चकार। सनिरुध्यानहुषोयह्वोअग्निः। विशश्चक्रेबलिहृतःसहोभिः॥९॥
प्रसद्योअग्नेअत्येष्यन्यान्। आविर्यस्मैचारुतरोबभूथ। ईडेन्योवपुष्योविभावा। प्रियो
विशामतिथिर्मानुषीणां। ब्रह्मज्येष्ठावीर्यासंभृतानि। ब्रह्माग्रेज्येष्ठंदिवमाततान।
ऋतस्यब्रह्मप्रथमोतजज्ञे। तेनार्हतिब्रह्मणास्पर्धितुंकः। ब्रह्मस्रुचोघृतवतीः। ब्रह्म
णास्वरवोमिताः॥१०॥ ब्रह्मयज्ञस्यतंतुः। ऋत्विजोयेहविष्कृतः। शृंगाणीवेच्छृंगि
णांसंददृश्रिरे। चषालवंतःस्वरवःपृथिव्यां। तेदेवासःस्वरवस्तस्थिवांसः। न ॥४७॥
मःसखिभ्यःसन्नान्मावगात। अभिभूरग्निरतरद्रजांसि। स्पृधोविहत्यपृतना

अभिश्रीः। जुषाणोअस्यआहुतिंमामहिष्ट। हत्वासपत्नान्वरिवस्करन्नः। ईशानंत्वाभुवना
नामभिश्रियं। स्तौम्यग्नउरुकृतंसुवीरं। हविर्जुषाणःसपत्नाँअभिभूरसि। जहिशत्रू
न्रपमृधोनुदस्व॥११॥ विश्वायेजेमसिजीरदानोहर्याविश्वादिविष्णुषुवसूनिजि
गीवान्त्सहोभिर्मितानेश्वलारिव॥७॥ ॥सप्रत्नवन्नवीयसा। अग्नेद्युम्नेन
नः॥ अग्निर्नो देवः सुविते दधातु॥ प्रजापते रोहिणी वेतु पत्नी॥ विश्वरू
पा बृहती चित्रभानुः॥ १ ॥ सा नो यज्ञस्य सुविते दधातु॥ यथा जीवेम
शरदः सवीराः॥ रोहिणी देव्युदगात्पुरस्तात्॥ विश्वा रूपाणि प्रतिमो
दमाना॥ प्रजापतिꣳ हविषा वर्धयंती॥ प्रिया देवानामुपयातु यज्ञं॥ सो
मो राज्ञा मृगशीर्षेण आगन्॥ शिवं नक्षत्रं प्रियमस्य धाम॥ आप्याय
मानो बहुधा जनेषु॥ रेतः प्रजां यजमाने दधातु॥ २ ॥ यत्ते नक्षत्रं मृ

ति
॥ १ ॥

गशीर्षमस्ति॥ प्रियꣳ राजन्प्रियतमं प्रियाणां॥ तस्मै ते सोम हवि
षा विधेम॥ शं न एधि द्विपदे शं चतुष्पदे॥ आर्द्रया रुद्रः प्र
थमान एति॥ श्रेष्ठो देवानां पतिरघ्नियानां॥ नक्षत्रमस्य
स्य हविषा विधेम॥ मा नः प्रजाꣳ रीरिषन्मोत वीरान्॥ हेति
रुद्रस्य परिणो वृणक्तु॥ आर्द्रा नक्षत्रं जुषताꣳ हविर्नः॥ प्र
मुंचमानौ दुरितानि विश्वा॥ अपाघशꣳसन्नुदतामरातिं॥ पु
नर्नो देव्यदितिः स्पृणोतु॥ पुनर्वसू नः पुनरेतां यज्ञं॥ पुनर्नो देवा
अभियंतु सर्वे॥ पुनः पुनर्वो हविषा यजामः॥ एवा न देव्यदितिर

ब्राह्मण

॥ ३ ॥

नवी॥ विश्वस्य भर्त्री जगतः प्रतिष्ठा॥ पुनर्वसू हविषा वर्धयन्ती॥ प्रियं
देवानामप्येतु पाथः॥४॥ बृहस्पतिः प्रथमं जायमानः॥ तिष्यं नक्षत्रम
भिसंबभूव॥ श्रेष्ठो देवानां पृतनासु जिष्णुः॥ दिशोऽनु सर्वा अभयन्नो
अस्तु॥ तिष्यः पुरस्तादुत मध्यतो नः॥ बृहस्पतिर्नः परिपातु पश्चात्॥
बाधेतां द्वेषो अभयं कृणुतां॥ सुवीरस्य पतयः स्याम॥ इदं
सर्पेभ्यो हविरस्तु जुष्टं॥ आश्रेषा येषामनुयन्ति चेतः॥५॥ ये अं
तरिक्षं पृथिवीं क्षियन्ति॥ ते नः सर्पासो हवमागमिष्ठाः॥ ये रोच
ने सूर्यस्यापि सर्पाः॥ ये दिवं देवीमनुसंचरन्ति॥ येषामाश्रेषा अ
नुयन्ति कामं॥ तेभ्यः सर्पेभ्यो मधुमज्जुहोमि॥ उपहूताः पित ॥ २

रोऽयेम घास्मे॥ मनोजवसः सुकृतः सुकृत्याः॥ ते नो नक्षत्रे हवमाग
मिष्ठाः॥ स्वधाभिर्यज्ञं प्रयतं जुषन्तां॥६॥ ये अग्निदग्धा येऽनग्नि
दग्धाः॥ येऽमुं लोकं पितरः क्षियन्ति॥ याँश्च विद्म याँ उ च न प्र
विद्म॥ मघासु यज्ञं सुकृतं जुषन्तां॥ गवां पतिः फल्गुनीनाम
सि त्वं॥ तदर्यमन् वरुण मित्र चारु॥ तं त्वा वयं सनितारं स
नीनां॥ जीवा जीवन्तमुप संविशेम॥ येनेमा विश्वा भुवनानि संजिता॥
यस्य देवा अनुसंयन्ति चेतः॥७॥ अर्यमा राजाऽजरस्तुविष्मान्॥ फ
ल्गुनीनामृषभो रोरवीति॥ श्रेष्ठो देवानां भगवो भगासि॥ तत्त्वा
विदुः फल्गुनीस्तस्य वित्तात्॥ अस्मभ्यं क्षत्रमजरं सुवीर्यं॥

ब्रा०ता०

॥४॥

गोमदश्ववदुपसंनुदेह ॥ भगोहदाता भग इत्सदाता ॥ भगोदेवीः फलुनीराविवेश ॥ भगस्येत्तं प्रसवं गमेम ॥ यत्रदेवैः सधमादं मदेम ॥ ८ ॥ आयातु देवः सविता पयातु ॥ हिरण्ययेन सुवृता रथेन ॥ वहन्हस्तꣳ सुभगं विद्मनापसं ॥ प्रयच्छन्तं पपुरि पुण्यमच्छ ॥ हस्तः प्रयच्छत्वमृतं वसीयः ॥ दक्षिणेन प्रतिगृभ्णीम एनत् ॥ दातारमद्य सविता विदेय ॥ यो नो हस्ताय प्रसुवाति यज्ञं ॥ त्वष्टा नक्षत्रमभ्येति चित्रां ॥ सुभꣳ ससं युवतिꣳ रोचमानां ॥ ९ ॥ निवेशयन्नमृतान्मर्त्याꣳश्च ॥ रूपाणि पिꣳशन्भुवनानि विश्वा ॥

॥४॥

तन्नस्त्वष्टा तदु चित्रा विचष्टां ॥ तन्नक्षत्रं भूरिदा अस्तु मह्यं ॥ तन्नः प्रजां वीरवतीꣳ सनोतु ॥ गोभिर्नो अश्वैः समनक्तु यज्ञं ॥ वायुर्नक्षत्रमभ्येति निष्ट्यां ॥ तिग्मशृङ्गो वृषभो रोरुवाणः ॥ समीरयन्भुवना मातरिश्वा ॥ अप द्वेषाꣳसि नुदतामरातीः ॥ १० ॥ तन्नो वायुस्तदु निष्ट्या शृणोतु ॥ तन्नक्षत्रं भूरिदा अस्तु मह्यं ॥ तन्नो देवासो अनुजानन्तु कामं ॥ यथा तरेम दुरितानि विश्वा ॥ दूरमस्मच्छत्रवो यन्तु भीताः ॥ तदिन्द्राग्नी कृणुतां तद्विशाखे ॥ तन्नो देवा अनुमदन्तु यज्ञं ॥ पश्चात्पुरस्तादभयं नो अस्तु ॥ नक्षत्राणामधिपत्नी विशाखे ॥ श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ ॥ ११ ॥

ब्रा॰ त

॥ ८ ॥

विषूचः शत्रूनपबाधमानौ ॥ अप क्षुधं नुदतामरातिं ॥ पूर्णा पश्चा
दुत पूर्णा पुरस्तात् ॥ उन्मध्यतः पौर्णमासी जिगाय ॥ तस्यां देवा
अधि संवसंतः ॥ उत्तमे नाक इह मादयंतां ॥ पृथ्वी सुवर्चा अदितिः
सजोषाः ॥ पौर्णमास्युदगाच्छोभमाना ॥ आप्याययंती दुरितानि वि
श्वा ॥ उरुं दुहां यजमानाय यज्ञं ॥ १२ ॥ चित्रभानु यजमाने ददातु हवि
र्नेपाथश्चेतो जुषंतां चेतो मदे मरो चंद्रमा नाम राजा गोपो यज्ञं ॥ १ ॥
ऋध्यास्म हव्यैर्नमसोपसद्य ॥ मित्रं देवं मित्रधेयं नो अस्तु ॥ अनूरा
धान् हविषा वर्धयंतः ॥ शतं जीवेम शरदः सवीराः ॥ चित्रं नक्षत्रमु
दगात् पुरस्तात् ॥ अनूराधा स इति यद्वदंति ॥ ते मित्र एति पथिभि

ती

श्रे

॥ ५ ॥

रंत

र्देवयानैः ॥ हिरण्ययैर्वितते अंतरिक्षे ॥ इंद्रो ज्येष्ठामनु नक्षत्रमेति ॥ यस्
मिन् वृत्रं वृत्रतूर्ये ततार ॥ १ ॥ तस्मिन् वयममृतं दुहानाः ॥ क्षु
धं तरेम दुरितिं दुरिष्टिं ॥ पुरंदराय वृषभाय धृष्णवे ॥ अषाढाय
सहमानाय मीढुषे ॥ इंद्राय ज्येष्ठा मधुमद्दुहाना ॥ उरुं कृणोतु यजमा
नाय लोकं ॥ मूलं प्रजां वीरवतीं विदेय ॥ पराच्येतु निरृतिः पराचा ॥
गोभिर्नक्षत्रं पशुभिः समक्तं ॥ अहर्भूयाद्यजमानाय मह्यं ॥ २ ॥
अहर्नो अद्य सुविते दधातु ॥ मूलं नक्षत्रमिति यद्वदंति ॥ पराचीं
वाचा निरृतिं नुदामि ॥ शिवं प्रजायै शिवमस्तु मह्यं ॥ या दिव्या
आपः पयसा संबभूवुः ॥ या अंतरिक्ष उत पार्थिवीर्याः ॥

श्री०तै०१

१।६५।।

२।।

ता सोम पाढा भनुयंति कामं ॥ तान आप शंस्योना भवंतु ॥ याश्च कूप्या याश्च नाद्याः समुद्रियाः ॥ याश्च वैशंतीरुत प्रासचीर्याः ॥ यासाम षाढा मधुभक्षयंति ॥ तान आपः शंस्योना भवंतु ॥ तन्नो विश्वे उपशृण्वंतु देवाः ॥ तदषाढा अभिसंयंतु यज्ञं ॥ तन्नक्षत्रं प्रथतां पशुभ्यः ॥ कृषिर्वृष्टिर्यजमानाय कल्पतां ॥ शुभ्राः कन्या युवतयः सुपेशसः ॥ कर्मकृतः सुकृतो वीर्यावतीः ॥ विश्वान्देवान् हविषा वर्धयंतीः ॥ अषाढाः काममुपयांतु यज्ञं ॥४॥ यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत् ॥ अमुं च लोकमिदमू च सर्वं ॥ तन्नो नक्षत्रमभिजिद्विजित्य ॥ श्रियं दधात्वहृणीयमानं ॥ उभौ लोकौ ब्रह्मणा संजितेमौ ॥ ॥५॥

यु

तन्नो नक्षत्रमभिजिद्विचष्टां ॥ तस्मिन्वयं पृतनाः संजयेम ॥ तन्नो देवासो अनुजानंतु कामं ॥ शृण्वंति श्रोणाममृतस्य गोपां ॥ पुण्यामस्या उपशृणोमि वाचं ॥६॥ महीं देवीं विष्णुपत्नीमजूर्यां ॥ प्रतीचीमेनां हविषा यजामः ॥ त्रेधा विष्णुरुरुगायो विचक्रमे ॥ महीं दिवं पृथिवीमंतरिक्षं ॥ तच्छ्रोणैति श्रव इच्छमाना ॥ पुण्यं श्लोकं यजमानाय कृण्वती ॥ अष्टौ देवा वसवः सोम्यासः ॥ चतस्रो देवीरजराः श्रविष्ठाः ॥ ते यज्ञं पांतु रजसः पुरस्तात् ॥ संवत्सरीणममृतं स्वस्ति ॥६॥ यज्ञं नः पांतु वसवः पुरस्तात् ॥ दक्षिणतोऽभियंतु श्रविष्ठाः ॥ पुण्यं नक्षत्र

श्र

ब्रा० त० १

॥ ७ ॥

मभि संविशरम॥ मा नो अरातिरघशꣳसागन्॥ क्षत्रस्य राजा वरुणो
ऽधिराजः॥ नक्षत्राणाꣳ शतभिषग्वसिष्ठः॥ तौ देवेभ्यः कृणुतो
दीर्घमायुः॥ शतꣳ सहस्रा भेषजानि धत्तः॥ यज्ञं नो राजा वरुण उपया
तु॥ तं नो विश्वे अभिसंयन्तु देवाः॥ ७॥ तन्नो नक्षत्रꣳ शतभिष
ग्जुषाणं॥ दीर्घमायुः प्रतिरद्भेषजानि॥ अज एकपादुदगात्पुर
स्तात्॥ विश्वा भूतानि प्रतिमोदमानः॥ तस्य देवाः प्रसवं यन्ति स
र्वे॥ प्रोष्ठपदासो अमृतस्य गोपाः॥ विभ्राजमानः समिधान उग्रः॥
आन्तरिक्षमरुहदगं द्याम्॥ तꣳ सूर्यं देवमजमेकपादं॥ प्रोष्ठप
दासो अनुयन्ति सर्वे॥ ८॥ अहिर्बुध्नियः प्रथमान एति॥

॥ ८ ॥

श्रेष्ठो देवानामुत मानुषाणां॥ तं ब्राह्मणाः सोमपाः सोम्यासः॥ प्रोष्ठ
पदासो अभिरक्षन्ति सर्वे॥ चत्वार एकमभि कर्म देवाः॥ प्रोष्ठ
पदास इति यान्वदन्ति॥ ते बुध्नियं परिषद्यꣳ स्तुवन्तः॥ अहिꣳ रक्षन्
ति नमसोपसद्य॥ पूषा रेवत्यन्वेति पन्थां॥ पुष्टिपती पशुपा वाजा
जेवस्त्यौ॥ इमानि हव्या प्रयता जुषाणा॥ सुगैर्नो
यानैरुपयातां यज्ञं॥ क्षुद्रान्पशून्रक्षतु रेवती नः॥ गावो नो
अश्वाꣳ अन्वेतु पूषा॥ अन्नꣳ रक्षन्तौ बहुधा विरूपं॥ वाजꣳ स
नुतां यजमानाय यज्ञं॥ तदश्विनावश्वयुजोपयातां॥ शुभं गमि
ष्ठौ सुयमेभिरश्वैः॥ स्वं नक्षत्रꣳ हविषा यजन्तौ॥ मध्वासं

ब्रा०८०१

॥८॥

एतौ यजुषा समक्तौ ॥१०॥ यो देवा म्रैभिषजौ हव्यवाहौ वि
श्वस्य दूतावमृतस्य गोपौ ॥ तौ नक्षत्रं जुजुषाणोपयातां ॥ मनोश्वि
भ्यां कृणुमोश्वयुग्भ्यां ॥ अप पाप्मानं भरणीर्भरंतु ॥ तद्यमो रा
जा भगवान्विचष्टां ॥ लोकस्य राजा महतो महान्हि ॥ सुगं नः पं
थामभयं कृणोतु ॥ यस्मिन्नक्षत्रे यम एति राजा ॥ यस्मिन्नेन
मभ्यषिंचंत देवाः ॥ तदस्य चित्रं हविषा यजाम ॥ अप पाप्मा
नं भरणीर्भरंतु ॥ निवेशनी यच्चै देवा अदधुः ॥३३॥ तु ता

पा २ रमहं प्रसचीयौ वियुक्तं वाचास्वामि देवा अनुयंतिसर्वे वाजे
बतस्तो समक्तौ देवारत्नेरिणि च ॥३॥ नवोनवो भवति जा ॥८॥

यमानोय मादित्या अंशुमाप्याययंति ॥ ये विरूपे समनसा संव्ययंती ॥
समानं तंतुं परितातनाते ॥ विभू प्रभू अनुभू विश्वतो हुवेमे ते नक्ष
त्रे हव मागमेतं ॥ वयं देवी ब्रह्मणा संविदानाः ॥ सुरत्नासो देववीतिं
दधानाः ॥ अहोरात्रे हविषा वर्धयंतः ॥ ~~[illegible]~~ अति
पाप्मानमतिमुक्त्या गमेम ॥ प्रत्युवदृश्यायती ॥ व्युच्छंती दुहिता
दिवः ॥ अपो मही वृणुते चक्षुषा ॥ तमो ज्योतिष्कृणोति सूनरी ॥ उदुस्रियाः सच
ते सूर्यः ॥ सचा उद्यन्नक्षत्रमर्चिमत् ॥ तवेदुषो व्युषि सूर्यस्य च ॥ संभक्तेन
गमेमहि ॥ तन्नो नक्षत्रमर्चिमत् ॥ भानुमत्तेज उच्चरत् ॥ उप यज्ञमिहा

श्री०८०१

॥१९॥

गमत्तु॥ मिनक्षत्राय देवाय ॥ इन्द्रायेन्दुं हवामहे ॥ स नः सविता सुवत्सनिं पुष्टिदां
वीरवत्तमं ॥ इदु त्यं चित्रं ॥ अदितिर्न उरुष्यतु महीमूषु मातरं ॥ इदं विष्णुः प्रतद्विष्णुः ॥
अग्निर्मूर्धा भुवः ॥ अनु नो द्यानुमतिरन्विदनुमते त्वं ॥ हव्यवाहं स्विष्टं ॥ आ॥२॥
पृसंगमाद्विष्टं ॥ २॥ अग्निर्वा अकामयत ॥ अन्नादो देवानां स्यामिति ॥ स एत
तमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपत् । ततो वै सोऽन्नादो देवाना
मभवत् । अग्निर्वै देवानामन्नादः ॥ यथा ह वा अग्निर्देवानामन्नादः ॥ एवं ह वा एष मनु
डा उचैनदे ष्याणां भवति ॥ य एवं वेदो यो जुहोति ॥ अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा ।
अंबायै स्वाहा दुलायै स्वाहा ॥ नितत्न्यै स्वाहाभ्रयन्त्यै स्वाहा ॥ मेघयन्त्यै स्वा
हा वर्षयन्त्यै स्वाहा ॥ चुपुणीकायै स्वाहेति ॥१॥ प्रजापतिः प्रजा असृजत ॥

य एतेन हविषा यजते

॥९॥

ता अस्मात्सृष्टाः पराचीरायन् । तासां रोहिणीमभ्यध्या
यत् । सोऽकामयत । उप मावर्तेरन् । समेनया गच्छेयेति ।
स एतं प्रजापतये रोहिण्यै चरुं निरवपत् । ततो वै ता एनमु
पावर्तन्त । समेनया गच्छत । उप ह वा एनं प्रियमावर्तन्ते ।
संप्रियेण गच्छते । य एतेन हविषा यजते । य उ चैनदेवं
वेद ॥ सो ऽत्र जुहोति । प्रजापतये स्वाहा रोहिण्यै स्वाहा । रोच
मानायै स्वाहा प्रजाभ्यः स्वाहेति ॥ २ ॥ सोमो वा अकामयत ।
ओषधीनां राज्यमभिजयेयमिति । स एतं सोमाय
मृगशीर्षाय श्यामाकं चरुं पयसि निरवपत् । ततो वै

सओषधीनाꣳराज्यमभ्यजयत्। समानानाꣳहवैराज्यमभिज
यति। यएतेनहविषायजते। यउचैनदेवंवेद। सोत्रजुहोति॥
सोमायस्वाहा। मृगशीर्षायस्वाहा। इन्वकाभ्यःस्वाहा। ओषधीः
भ्यःस्वाहा॥ राज्यायस्वाहा। अभिजित्यैस्वाहेति॥ २॥ रुद्रोवाअ
कामयत। पशुमान्स्यामिति। सएतꣳरुद्रायार्द्रायैप्रैयंग
वंचरुंपयसिनिरवपत्। ततोवैसपशुमानभवत्। पशुमान्हवै
भवति। यएतेनहविषायजते। यउचैनदेवंवेद। सोत्रजुहोति।
रुद्रायस्वाहा। आर्द्रायैस्वाहा। पिन्वमानायैस्वाहा। पशुभ्यःस्वाहेति॥ ४॥ ॥ १० ॥

ऋक्षावाइयमलोमकासीत्। साकामयत। ओषधीभिर्वनस्पति
भिःप्रजायेयेति। सैतमदित्यैपुनर्वसुभ्यांचरुंनिरवपत्। ततोवा
इयमोषधीभिर्वनस्पतिभिःप्राजायत॥ प्रजायतेहवैप्रजयापशु
भिः। यएतेनहविषायजते। यउचैनदेवंवेद। सोत्रजुहोति। अदि
त्यैस्वाहा। पुनर्वसुभ्यांस्वाहा। भूत्यैस्वाहा। प्रजात्यैस्वाहेति॥ ८॥
बृहस्पतिर्वाअकामयत। ब्रह्मवर्चसीस्यामिति। सएतंबृहस्प
तयेतिष्यायनैवारंचरुंपयसिनिरवपत्। ततोवैसब्रह्मवर्च
स्यभवत्। ब्रह्मवर्चसीहवैभवति। यएतेनहविषायजते।
यउचैनदेवंवेद। सोत्रजुहोति। बृहस्पतयेस्वाहा। तिष्याय

ब्राह्म०न   ×भ्रातृव्यर्द्धितम×

स्वाहा॥ य स्वाहेति॥६॥ देवासुराः संयत्ता आसन्। ते देवाः सर्पेभ्य आश्रेषाभ्य
आज्यं करंभं निरवपन्। तानेताभिरेव देवताभिरुपानयन्। एताभिर्ह
वै देवताभिर्द्विषंतं भ्रातृव्यमुपनयति। य एतेन हविषा यजते।
य उ चैनदेवं वेद। सोऽत्र जुहोति। सर्पेभ्यः स्वाहा। आश्रेषाभ्यः स्वाहा।
दंदशूकेभ्यः स्वाहेति॥७॥ पितरो वा अकामयंत॥ पितृलोक

॥११॥

ऋध्नुयामेति। त एतं पितृभ्यो मघाभ्यः पुरोडाशं षट्कपालं
निरवपन्। ततो वै ते पितृलोक आर्ध्नुवन्। पितृलोके ह
वा ऋध्नोति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जु
होति। पितृभ्यः स्वाहा। मघाभ्यः स्वाहा। अनघाभ्यः स्वाहा। अगदाभ्यः

॥११॥

स्वाहा। अरुंधतीभ्यः स्वाहेति॥८॥ अर्यमा वा अकामयत॥

पशुमान्स्यामिति॥ स एतमर्यम्णे फल्गुनीभ्यां चरुं निरवपत्॥ ततो वै स
पशुमानभवत्॥ पशुमान्ह वै भवति॥ य एतेन हविषा यजते॥ य उ चैनदे
वं वेद॥ सोऽत्र जुहोति॥ अर्यम्णे स्वाहा फल्गुनीभ्यां स्वाहा॥ पशुभ्यः स्वाहेति॥९॥
भगो वा अकामयत॥ भगी श्रेष्ठी देवानां स्यामिति॥ स एतं भगाय पूर्वफल्गुनी
भ्यां चरुं निरवपत्॥ ततो वै स भगी श्रेष्ठी देवानामभवत्॥ भगी ह वै श्रे
ष्ठी समानानां भवति॥ य एतेन हविषा यजते॥ य उ चैनदेवं वेद॥ सोऽत्र जुहोति॥ भगा
य स्वाहा फल्गुनीभ्यां स्वाहा॥ श्रैष्ठ्याय स्वाहेति॥१०॥ सविता वा अकामयत॥ श्र
न्मे देवा दधीरन्॥ सविता स्यामिति॥ स एतं सवित्रे हस्ताय पुरोडाशं द्वादशकपालं निर
वपन्नाशिनं॥ ततो वै श्रद्धा अदधत॥ सविताभवत्॥ श्रद्धा अस्मिन्मनुष्या

बा०१०२

॥१२॥

ददते॥ सुवि वासंमा नानो अ व स्ति॥ य ए तेनेन हविषा यजते॥ य उचे नदेवं वेदा। सोचं जुहोति॥ सविचे स्वाहाह स्वाय॥ स्वाहा ददते स्वाहा प्रणते॥ स्वाहा प्रयच्छ ते स्वाहा होप्र तिग्रभ्य ते स्वाहेति॥१२॥ एवा अ कामयत॥ विचं प्रजां विंदेयेति॥ स एत मचि चाये पुरो डाशं मष्टा कपालं निरवपत्॥ ततो वै स विचं प्रजामविंदत॥ विंदत वैप्रत्र

ए

जां विंदते य एतेन हविषा यजते॥ य उचैन देवं वेदा सोचं जुहोति॥ च स्वाहा चि आ ये स्वाहा॥ चै आय स्वाहेति॥१३॥ वायु वा अ कामयत॥ कामचारमे लो के ष्वभि जयेयमिति॥ स एत द्रू पये ऽ नि स्पाये ग स्पेदु पं पयो निरवपत्॥ कामचार एवा एषु लो केष्वभि जयति य एतेन हविषा यजते॥ य उचे देवं वेदा। सो चं जुहोति॥ [illegible] वाय वे स्वाहा नि स्पाये स्वाहा॥ कामचारी य स्वाहा भि जित्ये स्वाहे

॥१२॥

× हो प्र जाये स्वा ×

१२

ति॥१३॥ इंद्राग्नी वा अ कामयेतां॥ श्रैष्ठं देवानामभि जये वेति॥ ता वेतमिंद्राग्नि

× द्राग्नि भ्यां [illegible] भ्यां पुरोडाशं मेकादश कपालं निरवपतां॥ ततो वै + [illegible] ×

तौ श्रै × विशि खा × श्रै देवानामभ्यजयतां॥ श्रै [illegible] वै समानामभि वति॥ × नामज

य एतेन हविषा यजते॥ य उचैन देवं वेदा सो चं जुहोति॥ इंद्राग्नि भ्यां स्वाहा। नि रा खाभ्यां स्वाहा॥ श्रै ष्ठा य स्वाहा भि जित्यै स्वाहेति॥१४॥ अ यै न सौर्य स्मा स्मा आ ज्यं नि

र्वपति॥ कामो वै पौर्ण मासी॥ कामम आज्यः कामेनैव कामं समर्धयति॥ क्षिप्र मेनं स काम उपनमति॥ येन कामेन यजते॥ सो चं जुहोति॥ पौर्ण मास्यै स्वा हा कामा य स्वाहा ग त्यै स्वाहेति॥१५॥ मि त्रो वा अ कामयत॥ मित्र धेय मेषु लो

के ष्वभि जयेयमिति॥ स एत मि त्राया नूराध भ्य श्च रुं निरवपत्॥ ततो वै सामि

श्री०१०२०३
॥१२३॥

मित्राय ... स्वाहा॥

भ्यश्च यमे पुल्लोके॰भ्यजयतां॥ मित्रधेयं ह वा एषु लोकेष्वभिजयति॥ य एतेन
हविषा यजते॥ य उ चैनदेवं वेद। सो॰त्र जुहोति॥ मित्राय स्वाहा। अनूरा
धेभ्यः स्वाहा॥ मित्रधेयाय स्वाहा। अभिजित्यै स्वाहेति॥ २॥ इन्द्रो वा अका
मयत। ज्यैष्ठ्यं देवानामभिजयेयमिति॥ स एतमिन्द्राय ज्येष्ठायै पुरो
डाशमेकादशकपालं निरवपन्महाव्रीहीणां॥ ततो वै स ज्यैष्ठ्यं दे
नां देवानामभ्यजयत्॥ ज्यैष्ठ्यं ह वै समानानामभिजयति॥ य एतेन हविषा यज
ते॥ य उ चैनदेवं वेद॥ सो॰त्र जुहोति॥ इन्द्राय स्वाहा। ज्येष्ठायै स्वाहा॥ ज्यैष्ठ्याय स्वाहा। अभि
जित्यै स्वाहेति॥ ३॥ प्रजापतिर्वा अकामयत। मूलं प्रजां विन्देयेति॥ स एतं प्र
जापतये मूलाय चरुं निरवपत्॥ ततो वै स मूलं प्रजामविन्दत॥ मूलं ह वै प्रजां विन्दते॥

२५

॥१३१॥
१२

य एतेन हविषा यजते॥ य उ चैनदेवं वेद॥ सो॰त्र जुहोति॥ प्रजापतये स्वाहा। मूलाय
स्वाहा॥ प्रजायै स्वाहेति॥ ४॥ आपो वा अकामयन्त॥ समुद्रं काममभिजयेमेति।
ता एतमद्भ्यो षाढाभ्यश्चरुं निरवपन्॥ ततो वै ताः समुद्रं काममभ्यजयन्॥ समुद्रं
ह वै काममभिजयति॥ य एतेन हविषा यजते॥ य उ चैनदेवं वेद॥ सो॰त्र जुहोति॥
अद्भ्यः स्वाहा। षाढाभ्यः स्वाहा॥ समुद्राय स्वाहा। कामाय स्वाहा॥ अभिजित्यै स्वाहे
ति॥ ५॥ विश्वे वै देवा अकामयन्त॥ अनपजय्यं जयेमेति॥ त एतं विश्वेभ्यो
देवेभ्यो षाढाभ्यश्चरुं निरवपन्॥ ततो वै ते नपजय्यमजयन्॥ अनपजय्यं ह
जयति॥ य एतेन हविषा यजते॥ य उ चैनदेवं वेद॥ सो॰त्र जुहोति॥ विश्वेभ्यो
देवेभ्यः स्वाहा। षाढाभ्यः स्वाहा। अनपजय्याय स्वाहा। जित्यै स्वाहेति॥ ६॥ ब्रह्म वा
अकामयत॥ ब्रह्मलोकमभिजयेयमिति॥ तदेतं ब्रह्मणे भिजिते चरुं निरवपत्॥

श्रा०१८०९
॥२९॥

१३

ततो वै स ब्रह्मलोकमभ्यजयत् ॥ ब्रह्मलोको ह वा अस्याभिजितो भवति ॥ य एतेन
हविषा यजते । य उ चैनदेवं वेद ॥ सोऽत्र जुहोति ॥ ब्रह्मणे स्वाहाऽभिजिते स्वाहा ॥ ब्र
ह्मलोकाय स्वाहाऽभिजित्यै स्वाहेति ॥ ६ ॥ विष्णुर्वा अकामयत ॥ पुण्यं श्लो
कं शृण्वीय ॥ न मा पापी कीर्तिरागच्छेदिति ॥ स एतं विष्णवे श्रोणायै पुरोडाशं
त्रिकपालं निरवपत् ॥ ततो वै स पुण्यं श्लोकमशृणुत ॥ नैनं पापी कीर्तिरागच्छ
त् ॥ पुण्यं ह वै श्लोकं शृणुते ॥ नैनं पापी कीर्तिरागच्छति । य एतेन हविषा
यजते ॥ य उ चैनदेवं वेद ॥ सोऽत्र जुहोति ॥ विष्णवे स्वाहा श्रोणायै स्वाहा ॥ श्लो
काय स्वाहा श्रुतायै स्वाहेति ॥ ७ ॥ वसवो वा अकामयन्त ॥ अग्निं देवतानां परीया
मेति ॥ त एतं वसुभ्यः श्रविष्ठाभ्यः पुरोडाशमष्टाकपालं निरवपन् ॥ ततो वै ते अग्निं देवतानां पर्यायन्
॥ अग्रं ह वै समानानां पर्येति ॥ य एतेन हविषा यजते ॥ य उ चैनदेवं वेद ॥ सोऽत्र जुहोति ॥
वसुभ्यः स्वाहा श्रविष्ठाभ्यः स्वाहा ॥ अग्रीयाय स्वाहा परीत्यै स्वाहेति ॥ ८ ॥

॥१४॥
१३

॥ इन्द्रो वा अकामयत ॥ दृढोऽशिथिलः स्यामिति ॥ स एतं वरुणाय शतभिषजे भे
षजेभ्यः पुरोडाशं दशकपालं निरवपत् कृष्णानां व्रीहीणाम् ॥ ततो वै स दृढो
ऽशिथिलोऽभवत् ॥ दृढो ह वा अशिथिलो भवति ॥ य एतेन हविषा यजते ॥ य उ चैन
देवं वेद ॥ सोऽत्र जुहोति ॥ वरुणाय स्वाहा शतभिषजे स्वाहा ॥ भेषजेभ्यः स्वाहेति ॥ अ
जो वा एकपादकामयत ॥ तेजस्वी ब्रह्मवर्चसी स्यामिति ॥ स एतमजायैकपदे प्रोष्ठ
पदेभ्यः पुरोडाशं निरवपत् ॥ ततो वै स तेजस्वी ब्रह्मवर्चस्यभवत् ॥ तेजो ह वै ब्रह्मवर्चसी भव स्वी
ति ॥ य एतेन हविषा यजते ॥ य उ चैनदेवं वेद ॥ सोऽत्र जुहोति ॥ अजायैकपदे स्वाहा
प्रोष्ठपदेभ्यः स्वाहा ॥ तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहेति ॥ १० ॥ अहिर्वै बुध्नियोऽकाम
यत ॥ इमां प्रतिष्ठां विन्देयेति ॥ स एतमहये बुध्नियाय प्रोष्ठपदेभ्यः अक्ष्णो निरवपत् ॥
ततो वै स इमां प्रतिष्ठामभवत् ॥ इमां ह वै प्रतिष्ठां विन्दति ॥ य एतेन हविषा पुरोडाशं भूमिकपालं

ब्रा० तै० यजंते॥ यदुचैनदेवंवेद॥ सोत्र जुहोति॥ अहये बुध्नियाय स्वाहा॥ प्रोष्ठपदेभ्यः

॥७५॥ स्वाहा॥ प्रतिष्ठायै स्वाहेति॥ २२॥ पूषा वा अकामयत॥ पशुमान्स्यामिति॥

स एतं पूष्णे रेवत्यै चरुं निरवपत्॥ ततो वै स पशुमानभवत्॥ पशुमान्ह

वै भवति॥ य एतेन हविषा यजते॥ य उ चैनदेवं वेद॥ सोत्र जुहोति॥ पू

ष्णे स्वाहा॥ रेवत्यै स्वाहा॥ पशुभ्यः स्वाहेति॥ २३॥ अश्विनौ वा अकामये

तां॥ श्रोत्रस्विनावबधिरौ स्यावेति॥ तावेतमश्विभ्यामश्व

युग्भ्यां पुरोडाशं द्विकपालं निरवपतां॥ ततो वै तौ श्रोत्रस्विना

वबधिरावभवतां॥ श्रोत्रस्वी ह वा अबधिरो भवति॥ य एतेन हवि

षा यजते॥ य उ चैनदेवं वेद॥ सोत्र जुहोति॥ अश्विभ्यां स्वाहा॥

अश्वयुग्भ्यां स्वा

हा॥

श्रोत्राय स्वाहा॥ श्रुत्यै स्वाहेति॥ १३॥ यमो वा अकामयत॥ पितृणां राज्यमभि

जयेयमिति॥ स एतं यमायापभरणीभ्यश्चरुं निरवपत्॥ ततो वै स पितृणां

राज्यमभ्यजयत्॥ समानानां ह वै राज्यमभिजयति॥ य एतेन हविषा यजते॥

य उ चैनदेवं वेद॥ सोत्र जुहोति॥ यमाय स्वाहा॥ अपभरणीभ्यः स्वाहा॥ राज्याय

स्वाहा॥ अभिजित्यै स्वाहेति॥ १४॥ अथैतदमावास्याया आज्यं निर्वपति॥ का

मो वा अमावास्या॥ काम आज्यं॥ कामेनैव कामं समर्धयति॥ क्षिप्रमेनं

स काम उपनमति॥ येन कामेन यजते॥ सोत्र जुहोति॥ अमावास्यायै स्वाहा॥

कामाय स्वाहा॥ आगत्यै स्वाहेति॥ १५॥ ॥ चंद्रमा वा अकामयत॥ अहोरात्रा

नर्धमासान्मासानृतून्त्संवत्सरमाप्त्वा॥ चंद्रमसः सायुज्यं सलोकतामा

मुयामिति॥ सएतंचंद्रमसेप्रतीदृश्यायैपुरोडाशंपंचदशकपालंनिरवपत्॥
ततोवैसोहोरात्रानर्धमासान्मासानृतून्त्संवत्सरमाप्त्वा॥ चंद्रमसः सायु
ज्यꣳसलोकतामाप्नोत्॥ अहोरात्रान्हवाअर्धमासान्मासानृतून्त्संवत्स
रमाप्त्वा॥ चंद्रमसः सायुज्यꣳसलोकतामाप्नोति॥ यएतेनहविषायज
ते॥ यउचैनदेवंवेद॥ सोत्रजुहोति॥ चंद्रमसेस्वाहाप्रतीदृश्यायैस्वाहा॥
अहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा॥ मासेभ्यः स्वाहर्तुभ्यः स्वाहा॥
संवत्सरायस्वाहेति॥ १ ॥ अहोरात्रेवाअकामयेतां॥ अत्यहोरात्रेमुच्ये
वहि॥ ननावहोरात्रेआप्नुयातामिति॥ तेएतमहोरात्राभ्यांचरुंनिरव
पतां॥ द्वयानांव्रीहीणां॥ शुक्लानांचकृष्णानांच॥ सवात्योर्दुग्धे॥ श्वेता

यैचकृष्णायैच॥ ततोवैतेअत्यहोरात्रेअमुच्येते॥ नैअहोरात्रेआप्नुतां॥ अतिहवा
अहोरात्रेमुच्यते॥ नैनमहोरात्रेआप्नुतः॥ यएतेनहविषायजते॥ यउचैनदेवंवेद॥
सोत्रजुहोति॥ अन्हेस्वाहारात्रियैस्वाहा॥ अतिमुक्त्यैस्वाहेति॥ २॥ उषावाअका
मयत॥ प्रियादित्यस्यसुभगास्यामिति॥ सैतमुषसेचरुंनिरवपत्॥ ततोवैसाप्रि
यादित्यस्यसुभगाभवत्॥ प्रियोहवैसमानानाꣳसुभगोभवति॥ यएतेनहवि
षायजते॥ यउचैनदेवंवेद॥ सोत्रजुहोति॥ उषसेस्वाहा॥ व्युष्ट्यैस्वाहा॥ व्यूषुष्यै
स्वाहाव्युछंत्यैस्वाहा॥ व्युष्टायैस्वाहेति॥ ३॥ अथैतस्मैनक्षत्रायचरुंनिर्वप
ति॥ यथालंदेवानामसि॥ एवमहंमनुष्याणांभूयासमिति॥ यथाहवाएतद्देवा
नां॥ एवꣳहवाएषमनुष्याणांभवति॥ यएतेनहविषायजते॥ यउचैनदेवंवेद॥

ब्रा॰ त॰
१५

सोऽत्र जुहोति॥ नक्षत्राय स्वाहोदेष्यते स्वाहा॥ उद्यते स्वाहोदिताय स्वाहा॥ हरसे स्वाहा भरसे स्वाहा॥ भ्राजसे स्वाहा तेजसे स्वाहा॥ तपसे स्वाहा ब्रह्मवर्चसाय स्वाहेति॥ ४ ॥ सूर्यो वा अकामयत॥ नक्षत्राणां प्रतिष्ठा स्यामिति॥ स एतꣳ सूर्याय नक्षत्रेभ्यश्चरुं निरवपत्॥ ततो वै स नक्षत्राणां प्रतिष्ठाभवत्॥ प्रतिष्ठा ह वै समानानां भवति॥ य एतेन हविषा यजते॥ य उ चैनदेवं वेद॥ सोऽत्र जुहोति॥ सूर्याय स्वाहा नक्षत्रेभ्यः स्वाहा॥ प्रतिष्ठायै स्वाहेति॥ ५ ॥ अथैतमदित्यै चरुं निर्वपति॥ इयं वा अदितिः॥ अस्यामेव प्रतितिष्ठति॥ सोऽत्र जुहोति॥ अदित्यै स्वाहा प्रतिष्ठायै स्वाहेति॥ ६ ॥ अथैतं विष्णवे चरुं निर्वपति॥ यज्ञो वै विष्णुः॥ यज्ञ एवान्ततः प्रतितिष्ठति॥॥

१५

दश सवितावनु

सोऽत्र जुहोति॥ विष्णवे स्वाहा यज्ञाय स्वाहा॥ प्रतिष्ठायै स्वाहेति॥ ७ ॥ ॥ अग्निः पंचदश प्रजापतिः षोडश सोम एकादश रुद्रो दशर्क्षे का दश बृहस्पतिर्दश द्वादश देवासुरा नवपितर एकादशार्यमा भगो दश दश त्वष्टा वायुरिंद्राग्नी दश दश पौर्णमास्या अष्टौ पंच दश॥ १५ ॥ मित्र इंद्रः प्रजापतिर्दश द्वादशाप एकादश विश्वे ब्रह्म दश द्वादश विष्णुस्त्रयो दश वसव इंद्रो जोहिर्बुध्नियः पूषाश्विनौ यमो दश दश मावास्याया अष्टौ पंच दश॥ १५ ॥ चंद्रमाः पंचदशाहोरात्रे सप्तदशो षाएकादशाथै तस्मिन नक्षत्राय त्रयोदश सूर्यो दशादित्ये पंच विष्णवे षट् सप्त॥ ७ ॥ सविताश्रूनां व्रीहीणामिंद्रो महाव्रीहीणामिंद्रः कृष्णानां व्रीहीणां महोरात्रे द्रुयानां व्रीणां॥ पितरः षट्कपाल ही

लं॥ सविता द्वादशकपालमिंद्राग्नी एकादशकपालमिंद्र एकादशकपालं विष्णु
स्त्रिकपालमिंद्रो दशकपालं महिर्भूमिकपालमश्विनौ द्विकपालं चंद्रमाः पंचद
शकपालमन्यत्राष्टाकलेंपा ॥ ॥ रुद्रोर्यमापूषापशुमान् ॥ सोमो रुद्रो बृह
स्पतिः पयसि ॥ वायुः पयः ॥ सोमो वायुरिंद्राग्नी मित्र इंद्र आपो ब्रह्मय मो भिजि
त्ये ॥ त्वष्टा प्रजापतिः प्रजायै ॥ पौर्णमास्या अमावास्याया अगस्त्ये ॥ विश्वे जि
त्ये ॥ अश्विनौ श्रुत्यै ॥ ॥ अग्निर्नैऋध्यास्मन वोन वो ग्निर्मित्रश्चंद्रमाः षट् ॥
॥ ६ ॥ ॥ ॥ अग्निर्नः पातु तन्नो वायुरहिर्बुध्निय ऋक्षा वाद्य
मथैतत्पौर्णमास्या अजो वा एकपात् सूर्येस्त्रिषष्टिः ॥ ६२ ॥ ७ ॥
॥ ७ ॥ ७ ॥ हरिः ॐ ॥ ७ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ श्री ॥

हरिः ओम् ॥ ॥ तृतीयस्यामितो दिवि सोम आसीत् ॥ तं गायत्र्याहरत् ॥ तस्य पर्णमच्छि
द्यत ॥ तत्पर्णो भवत् ॥ तत्पर्णस्य पर्णत्वं ॥ ब्रह्म वै पर्णः ॥ यत्पर्णशाखया वत्सानपाकरो
ति ॥ ब्रह्मणैवैनानपाकरोति ॥ गायत्रो वै पर्णः ॥ गायत्राः पशवः ॥ १ ॥ तस्मात्रीणि
त्रीणि पर्णस्य पलाशानि ॥ त्रिपदा गायत्री ॥ यत्पर्णशाखया गाः प्रार्पयति ॥ स्वयैवै
नां देवतया प्रार्पयति ॥ यं कामयेतापशुः स्यादिति ॥ अपर्णां तस्मै शुष्काग्रामाहरेत् ॥
अपशुरेव भवति ॥ यं कामयेत पशुमान्त्स्यादिति ॥ बहुपर्णां तस्मै बहुशाखामाह
रेत् ॥ पशुमंतमेवैनं करोति ॥ २ ॥ यत्प्राचीमाहरेत् ॥ देवलोकमभिजयेत् ॥ यदु
दीचीं मनुष्यलोकं ॥ प्राचीमुदीचीमाहरति ॥ उभयोर्लोकयोरभिजित्यै ॥ इषे त्वोर्जे
त्वेत्याह ॥ इषमेवोर्जं यजमाने दधाति ॥ वायव स्थेत्याह ॥ वायुर्वा अंतरिक्षस्याध्यक्षाः ॥

श्रा०त०२
१७

अंतरिक्षदेवत्याः खलु वै पशवः ॥ ३ ॥ वायव एवैनान्परिददाति ॥ प्र वा एनानेतदा
करोति ॥ यदाह ॥ वायव स्थोपायव स्थेत्याह ॥ यजमानायैव पशूनुपह्वयते ॥ देवो
वः सविता प्रार्पयत्वित्याह प्रसूत्यै ॥ श्रेष्ठतमाय कर्मण इत्याह ॥ यज्ञो हि श्रेष्ठतमं
कर्म ॥ तस्मादेवमाह ॥ आप्यायध्वमघ्निया देवभागमित्याह ॥ ४ ॥ वत्सेभ्यश्च
वा एताः पुरा मनुष्येभ्यश्चाप्यायंत ॥ देवेभ्य एवैना इंद्रायाप्याययति ॥ ऊर्जस्वतीः
पयस्वतीरित्याह ॥ ऊर्जꣳ हि पयः संभरंति ॥ प्रजावतीरनमीवा अयक्ष्मा इत्याह
प्रजात्यै ॥ मा व स्तेन ईशत माघशꣳस इत्याह गुप्त्यै ॥ रुद्रस्य हेतिः परि वो वृणक्त्वि
त्याह ॥ रुद्रादेवैनास्त्रायते ॥ ध्रुवा अस्मिन्गोपतौ स्यात बह्वीरित्याह ॥ ध्रुवा ए
वास्मिन्बह्वीः करोति ॥ ५ ॥ यजमानस्य पशून्पाहीत्याह ॥ पशूनां गोपी

१७

थाय ॥ तस्मात्सायं पशव उपसमावर्तंते ॥ अनधः सादयति ॥ गर्भाणां धृत्या अ
प्रपादाय ॥ तस्माद्गर्भाः प्रजानामप्रपादुकाः ॥ उपरीव निदधाति ॥ उपरीव हि
सुवर्गो लोकः ॥ सुवर्गस्य लोकस्य समष्ट्यै ॥ ६ ॥ पशवः करोति पशवो देव
भागमित्याह करोति नवच ॥ १ ॥ देवस्य त्वा सवितुः प्रसव इत्यश्वपर्शुमादत्ते
प्रसूत्यै ॥ अश्विनोर्बाहुभ्यामित्याह ॥ अश्विनौ हि देवानामध्वर्यू आस्तां ॥ पूष्णो
हस्ताभ्यामित्याह यत्यै ॥ यो वा ओषधीः पर्वशो वेद ॥ नैनाः स हिनस्ति ॥ प्रजाप
प्रजापतिर्वा ओषधीः पर्वशो वेद ॥ स एना न हिनस्ति ॥ अश्वपर्श्वा बर्हिरच्छैति ॥ प्रा
जापत्यो वा अश्वः सयोनित्वाय ॥ १ ॥ ओषधीनामहिꣳसायै ॥ यज्ञस्य घोषदसी
त्याह ॥ यजमान एव रयिं दधाति ॥ प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातय इत्याह ॥ रक्ष

ना

ब्रा॰तृ॰
१९

सामपहत्यै॥ प्रेयमगाद्धिषणा बर्हिरच्छेत्याह॥ विद्या वै धिषणा॥ विद्ययैवैनद-
च्छैति॥ मनुना कृता स्वधया वितष्टेत्याह॥ मानवी हि परशुः स्वधाकृता॥ २॥ त आ-
वहन्ति कवयः पुरस्तादित्याह॥ शुश्रुवांसो वै कवयः॥ यज्ञः पुरस्तात्॥ मुखत ए-
व यज्ञमारभते॥ अथो यदेनदुरुक्कायतः कुतश्चाहरति॥ तस्मात्प्राच्या एव दिशो भवति॥
देवेभ्यो जुष्टमिह बर्हिरासद इत्याह॥ बर्हिषः समृद्ध्यै॥ कर्मणोऽनपराधाय॥ देवा-
नां परिषूतमसीत्याह॥ ३॥ यद्वा इदं किंच॥ तद्देवानां परिषूतं॥ अथो यथा वस्य-
से प्रतिप्रोच्याह इदं करिष्यामीति॥ एवमेव तदध्वर्युर्देवेभ्यः प्रतिप्रोच्य बर्हिर्दा-
ति॥ आत्मनोऽहिंसायै॥ यावतः स्तम्बान्परिदिशेत्॥ यत्तेषामुच्छिंष्यात्॥ अति-
तद्यज्ञस्य रेचयेत्॥ एकं स्तम्बं परिदिशेत्॥ तं सर्वं दायात्॥ ४॥ यज्ञस्यान-

१८

तिरेकाय॥ वर्षवृद्धमसीत्याह॥ वर्षवृद्धा वा ओषधयः॥ देवबर्हिरित्याह॥ देवेभ्य
एवैनत्करोति॥ मा त्वान्वङ्मा तिर्यगित्याहाहिंसायै॥ पर्व ते राध्यासमित्याह
ध्र्यै॥ आच्छेत्ता ते मा रिषमित्याह॥ नास्यात्मनो मीयते॥ य एवं वेद॥ ५॥ देवबर्हिः
शतवल्शं विरोहेत्याह॥ प्रजा वै बर्हिः॥ प्रजानां प्रजननाय॥ सहस्रवल्शा वि वयं
रुहेमेत्याह॥ आशिषमेवैतामाशास्ते॥ पृथिव्याः संपृचः पाहीत्याह प्रतिष्ठित्यै॥
अयुङ्गायुङ्गान्मुष्टीन्लुनोति॥ मिथुनत्वाय प्रजात्यै॥ सुसंभृता त्वा संभरामी-
त्याह॥ ब्रह्मणैवैनत्संभरति॥ ६॥ अदित्यै रास्नासीत्याह॥ इयं वा अदि-
तिः॥ अस्या एवैनद्रास्नां करोति॥ इन्द्राण्यै संनहनमित्याह॥ इन्द्राणी वा
अग्रे देवतानां समनह्यत॥ सार्ध्नोत्॥ ऋद्ध्यै संनह्यति॥ प्रजा वै बर्हिः॥

ब्राह्मण२

१९

पा

प्रजानामपराधाय॥ तस्मात्समावसंततः प्रजाजायंते॥ ७॥ पूषाते ग्रंथिं ग्रथ्नात्वि
त्याह॥ पुष्टिमेव यजमाने दधाति॥ सते मास्थादित्याहा हिꣳसायै॥ पश्चात्प्रांचमु
पगूहति॥ पश्चाद्धि प्राचीनꣳ रेतो धीयते॥ पश्चादेवास्मै प्राचीनꣳ रेतो दधाति॥ इंद्र
स्यत्वा बाहुभ्यामुद्यच्छ इत्याह॥ इंद्रियमेव यजमाने दधाति॥ बृहस्पतेर्मूर्ध्ना हरामी
त्याह॥ ब्रह्म वै देवानां बृहस्पतिः॥ ८॥ ब्रह्मणैवैनद्धरति॥ उर्वंतरिक्षमन्विहीत्या
ह गत्यै॥ देवंगममसीत्याह॥ देवानेवैनद्गमयति॥ अनधः सादयति॥ गर्भाणां धृ
त्या अप्रपादाय॥ तस्माद्गर्भाः प्रजानामप्रपादुकाः॥ उपरीव निदधाति॥ उपरी
व हि सुवर्गो लोकः॥ सुवर्गस्य लोकस्य समष्ट्यै॥ ९॥ सयोनित्वाय स्वधा ह्
तासीत्याह दायाद्धि दं भरंति जायंते बृहस्पतिः समष्ट्यै॥ २॥ पूर्वेद्युरिध्मा

१९

बर्हिः करोति॥ यज्ञमेवारभ्य गृहीत्वोपवसति॥ प्रजापतिर्यज्ञमसृजत॥ तस्यो
खे अस्रꣳसेतां॥ यज्ञो वै प्रजापतिः॥ यत्सान्नाय्या खे भवतः॥ यज्ञस्यैव तदुखे
उपदधात्यप्रस्रꣳसाय॥ शुंधध्वं दैव्याय कर्मणे देवयज्यायाइत्याह॥ देव
यज्यायाएवैना निशुंधति॥ मातरिश्वनो घर्मोसीत्याह॥ अंतरिक्षं वै मातरि
श्वनो घर्मः॥ एषां लोकानां विधृत्यै॥ द्यौरसि पृथिव्य॥ १॥ सीत्याह॥ दि
वः श्चह्येषा पृथिव्याश्च संभृता॥ यदुखा॥ तस्मादेवमाह॥ विश्वधाया अ
सि परमेण धाम्नेत्याह॥ वृष्टिर्वै विश्वधायाः॥ वृष्टिमेवावरुंधे॥ दृꣳहस्व मा ह्वारि
त्याह धृत्यै॥ २॥ वसूनां पवित्रमसीत्याह॥ प्राणा वै वसवः॥ तेषां वा एतद्भागधेयं॥ क:
यत्पवित्रं॥ तेभ्य एवैनत्करोति॥ शतधारꣳ सहस्रधारमित्याह॥ प्राणेष्वेवायुर्दधा

ब्रा०तृ०
२०

ति सर्वत्वाय॥ त्रिवृत्पलाशशाखायां दर्भमयं भवति॥ त्रिवृद्वै प्राणः॥ त्रिवृतमेव
प्राणं मध्यतो यजमाने दधाति॥ ३ ॥ सोम्यः पर्णः सयोनित्वाय॥ साक्षात्प
वित्रं दर्भाः॥ प्राक्सायमधिनिदधाति॥ तत्प्राणापानयोरूपं॥ तिर्यक्प्रातः॥
तद्व्यानस्य रूपं॥ दार्ढ्यꣳ ह्येतदहः॥ अन्नं वैवं इमाः॥ अन्नं प्राणाः॥ उभयमे
वोपैत्यजामित्वाय॥ ४ ॥ तस्मादयꣳ सर्वतः पवते॥ हुतस्तोको हुतो द्रप्स
इत्याह प्रतिष्ठित्यै॥ हविषोऽस्कन्दाय॥ न हि हुतꣳ स्वाहाकृतꣳ स्कन्दति॥ दिवि
नाको नामाग्निः॥ तस्य विप्रुषो भागधेयं॥ अग्नये बृहते नाकायेत्याह॥ ना
कमेवाग्निं भागधेयेन समर्धयति॥ स्वाहा द्यावापृथिवीभ्यामित्याह॥ द्या
वापृथिव्योरेवैनत्प्रतिष्ठापयति॥ ५ ॥ पवित्रवत्यानयति॥ अपां चैवौषधी

२०

नां च रसꣳ संसृजति॥ अथो ओषधीष्वेव पशून्प्रतिष्ठापयति॥ अन्वारभ्य
वाचं यच्छति॥ यज्ञस्य धृत्यै॥ धारयन्नास्ते॥ धारयन्त इव हि दुहन्ति॥ कामधुक्ष
इत्याह तृतीयस्यै॥ त्रय इमे लोकाः॥ इमानेव लोकान्यजमानो दुहे॥ ६ ॥
अमूमिति नाम गृह्णाति॥ भद्रमेवासां कर्माविष्करोति॥ सा विश्वायुः सा वि
श्वव्यचाः सा विश्वकर्मेत्याह॥ इयं वै विश्वायुः॥ अंतरिक्षं विश्वव्यचाः॥ अ
सौ विश्वकर्मा॥ इमानेवैताभिर्लोकान्यथापूर्वं दुहे॥ अथो यथा प्रदात्रे पु
ण्यमाशास्ते॥ एवमेवैना एतदुपस्तौति॥ तस्मात्स्वादादिक्षुन्नीयवं दमाना
उपस्तुवंतः पशून्दुहंति॥ ७ ॥ बहुदुग्धीन्द्राय देवेभ्यो हविरिति वाचं वि
सृजंते॥ यथादेवतमेव प्रसौति॥ दैव्यस्य च मानुषस्य च व्यावृत्त्यै॥ त्रिराह॥

त्रिषत्या हि देवाः ॥ अवाचंयमोऽन्वारभ्योत्तराः ॥ अपरिमितमेवावरुंधे ॥ न दारुपा
त्रेण दुह्यात् ॥ अग्निवद्वै दारुपात्रं ॥ यद्दारुपात्रेण दुह्यात् ॥ ८ ॥ यातयाम्ना हवि
षा यजेत ॥ अथो खल्वाहुः ॥ पुरोडाशमुखानि वै हवींꣳषि ॥ नेतर्हि पुरोडाशꣳ ह
विषो यामोऽस्तीति ॥ काममेव दारुपात्रेण दुह्यात् ॥ शूद्र एव न दुह्यात् ॥ असतो वा
एष संभूतः ॥ यच्छूद्रः ॥ अहविरेव तदित्याहुः ॥ यच्छूद्रो दोग्धीति ॥ ९ ॥ अग्निहोत्र
मेव न दुह्याच्छूद्रः ॥ तद्धि नोत्पुनंति ॥ यदा खलु वै पवित्रमत्येति ॥ अथ तद्धविरिति ॥
संपृच्यध्वमृतावरीरित्याह ॥ अपां चैवौषधीनां च रसꣳ सꣳसृजति ॥ तस्मादपां चौ
षधीनां च रसमुपजीवामः ॥ मंद्रा धनस्य सातय इत्याह ॥ पुष्टिमेव यजमाने द
धाति ॥ सोमेन त्वातनच्मींद्राय दधीत्याह ॥ १० ॥ सोममेवैनत्करोति ॥ यो वै सो

मं भक्षयित्वा ॥ संवत्सरꣳ सोमं न पिबति ॥ पुनर्भक्ष्योऽस्य सोमपीथो भवति ॥ सोमः
खलु वै सान्नाय्यं ॥ य एवं विद्वान्त्सान्नाय्यं पिबति ॥ अपुनर्भक्ष्योऽस्य सोमपीथो
भवति ॥ न मृन्मयेनापिदध्यात् ॥ यन्मृन्मयेनापिदध्यात् ॥ पितृदेवत्यꣳ स्यात् ॥
॥ ११ ॥ अयस्पात्रेण वा दारुपात्रेण वापिदधाति ॥ तद्धि सदेवं ॥ उदन्वद्भवति ॥
आपो वै रक्षोघ्नीः ॥ रक्षसामपहत्यै ॥ अदस्तमसि विष्णवे त्वेत्याह ॥ यज्ञो वै वि
ष्णुः ॥ यज्ञायैवैनददस्तं करोति ॥ विष्णो हव्यꣳ रक्षस्वेत्याह गुप्त्यै ॥ अनधः सा
दयति ॥ गर्भाणां धृत्या अप्रपादाय ॥ तस्माद्गर्भाः प्रजानामप्रपादुकाः ॥ उपरी
व निदधाति ॥ उपरीव हि सुवर्गो लोकः ॥ सुवर्गस्य लोकस्य समष्ट्यै ॥ १२ ॥
असीत्याह धृत्यै यजमाने दधात्यजामित्वाय स्थापयंति दुहे दुहंति दुह्या

द्वोग्धीति दधीत्याहस्यात्सादयति पंच च ॥ ३ ॥ कर्मणे वां देवेभ्यः शकेयमित्याह
शक्त्यै ॥ यज्ञस्य वै संततिमनु प्रजाः पशवो यजमानस्य संतायंते ॥ यज्ञस्य विछित्ति
मनु प्रजाः पशवो यजमानस्य विछिद्यंते ॥ यज्ञस्य संततिरसि यज्ञस्य त्वा संतत्यै स्त
णामि संतत्यै त्वा यज्ञस्येत्याहाहवनीयात्संतनोति ॥ यजमानस्य प्रजायै पशूनां
संतत्यै ॥ अपः प्रणयति ॥ श्रद्धा वा आपः ॥ श्रद्धामेवारभ्य प्रणीय प्रचरति ॥ अपः प्र
णयति ॥ यज्ञो वा आपः ॥ १ ॥ यज्ञमेवारभ्य प्रणीय प्रचरति ॥ अपः प्रणयति ॥
वज्रो वा आपः ॥ वज्रमेव भ्रातृव्येभ्यः प्रहृत्य प्रणीय प्रचरति ॥ अपः प्रणयति ॥
आपो वै रक्षोघ्नीः ॥ रक्षसामपहत्यै ॥ अपः प्रणयति ॥ आपो वै देवानां प्रियं धाम ॥
देवानामेव प्रियं धाम प्रणीय प्रचरति ॥ २ ॥ अपः प्रणयति ॥ आपो वै सर्वा देवताः ॥

देवता एवारभ्य प्रणीय प्रचरति ॥ वेषाय त्वेत्याह ॥ वेषाय ह्येनदादत्ते ॥ प्रत्युष्टं र
क्षः प्रत्युष्टा अरातय इत्याह ॥ रक्षसामपहत्यै ॥ धूरसीत्याह ॥ एष वै धुर्योऽग्निः ॥
तं यदनुपस्पृश्यातीयात् ॥ ३ ॥ अध्वर्युं च यजमानं च प्रदहेत् ॥ उपस्पृश्यात्ये
ति ॥ अध्वर्योश्च यजमानस्य चाप्रदाहाय ॥ धूर्व तं योऽस्मान्धूर्वति तं धूर्व यं वयं
धूर्वाम इत्याह ॥ द्वौ वाव पुरुषौ ॥ यं चैव धूर्वति ॥ यश्चैनं धूर्वति ॥ तावुभौ शुचार्प
यति ॥ त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतममित्या
ह ॥ यथायजुरेवैतत् ॥ ४ ॥ अह्रुतमसि हविर्धानमित्याहानार्त्यै ॥ दृंह स्वमा
ह्वारित्याह धृत्यै ॥ मित्रस्य त्वा चक्षुषा प्रेक्ष इत्याह मित्रत्वाय ॥ मा भेर्मा संविक्
था मा त्वा हिंसिषमित्याहाहिंसायै ॥ यद्वै किंच वातो नाभिवाति ॥ तत्सर्वं व

रुणदेवत्यं॥ उरुवातायेत्याह॥ अवारुणमेवैनत्करोति॥ देवस्यत्वा सवितुः प्रसवइ
त्याहप्रसूत्यै॥ अश्विनो र्बाहुभ्यामित्याह॥ ५ ॥ अश्विनौ हि देवानामध्वर्यू आ
स्तां॥ पूष्णोहस्ताभ्यामित्याहयत्यै॥ अग्नये जुष्टं निर्वपामीत्याह॥ अग्नय एवैनं
जुष्टं निर्वपति॥ त्रिर्यजुषा॥ त्रयइमे लोकाः॥ एषां लोकानामाप्त्यै॥ तूष्णीं चतुर्थं॥
अपरिमितमेवावरुंधे॥ स × य × एवमेवानुपूर्वं हवींषि निर्वपति॥ ६ ॥ इदं
देवानामिदमुनः सहेत्याह व्यावृत्त्यै॥ स्फात्यै त्वा नारात्या इत्याह गुप्त्यै॥ तम
सीव वा एषों तश्चरति॥ यः परीणहि॥ सुवरभिविख्येषं वैश्वानरं ज्योतिरित्या
ह॥ सुवरेवाभिविपश्यति वैश्वानरं ज्योतिः॥ द्यावापृथिवी हविषि गृहीत उद
वेपेतां॥ दृंहतां दुर्या द्यावापृथिव्योरित्याह॥ गृहाणां द्यावापृथिव्योर्धृत्यै॥

उर्वंतरिक्षमन्विहीत्याह गत्यै॥ अदित्यास्त्वोपस्थे सादयामीत्याह॥ इयं वा अ
दितिः॥ अस्या एवैनदुपस्थे सादयति॥ अग्ने हव्यं रक्षस्वेत्याह गुप्त्यै॥ ७ ॥ यज्ञो
वा आपो धामसप्रणी यज्ञचरत्यतीयादेत द्वाकुंभ्यामित्याह हवींषि निर्वपतिग
त्यै चत्वारि च॥ ८ ॥ इंद्रो वृत्रमहन्॥ सोपः॥ अभ्यम्रियत॥ तासां यन्मेध्यं य
ज्ञियं सदेवमासीत्॥ तदपोदक्रामत्॥ ते दर्भा अभवन्॥ यद्दर्भैरप उत्पुनाति॥
या एव मेध्या यज्ञियाः सदेवा आपः॥ ताभिरेवैना उत्पुनाति॥ द्वाभ्यामुत्पुना
ति॥ १ ॥ द्विपाद्यजमानः प्रतिष्ठित्यै॥ देवोवः सवितोत्पुनात्वित्याह॥ सवितृप्र
सूत एवैना उत्पुनाति॥ अच्छिद्रेण पवित्रेणेत्याह॥ असौ वा आदित्योच्छिद्रं प
वित्रं॥ तेनैवैना उत्पुनाति॥ वसोः सूर्यस्य रश्मिभिरित्याह॥ प्राणा वा आपः॥

ब्रा०त०
२४

प्राणाच सवः॥ प्राणारम्भयः॥ २ ॥ प्राणैरेव प्राणान्त्संरणक्ति॥ सावित्रिय
र्चा॥ सवितृप्रसूतं मे कर्मासदिति॥ सवितृप्रसूतमेवास्य कर्म भवति॥ पञ्चो
गायत्रियाञ्जिः ष्वमृद्धत्वाय॥ आपो देवीरग्रेपुवो अग्रेगुव इत्याह॥ रूपमेवासा
मेतन्महिमानं व्याचष्टे॥ अग्र इमं यज्ञं नयताग्रे यज्ञपतिमित्याह॥ अग्र एव य
ज्ञं नयंति॥ अग्रे यज्ञपतिं॥ ३ ॥ युष्मानिंद्रो वृणीत वृत्रतूर्ये यूयमिंद्रमवृणी
ध्वं वृत्रतूर्य इत्याह॥ वृत्रं ह हनिष्यन्निंद्र आपो ववृ्रे॥ आपो हेंद्रं ववृरे॥ संज्ञा
मे वासामेतत्सामानं व्याचष्टे॥ प्रोक्षिता स्थेत्याह॥ तेनापः प्रोक्षिताः॥ अग्न
ये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्यामित्याह॥ यथादेवतमेवैनाः प्रोक्षति॥ त्रिः
प्रोक्षति॥ त्र्यावृद्धि यज्ञः॥ ४ ॥ अथो रक्षसामपहत्यै॥ शुंधध्वं दैव्याय कर्म

२४

णे देवयज्याया इत्याह॥ देवयज्याया एवैनाः शुंधति॥ त्रिः प्रोक्षति॥ त्र्यावृद्धिय
ज्ञः॥ अथो मेध्यत्वाय॥ अवधूतं रक्षोवधूता अरातय इत्याह॥ रक्षसामपहत्यै॥
अदित्यास्त्वगसीत्याह॥ इयं वा अदितिः॥ ५ ॥ अस्या एवैनत्त्वचं करोति॥ प्रति
त्वा पृथिवी वेत्त्वित्याह प्रतिष्ठित्यै॥ पुरस्तात्प्रतीचीनग्रीवमुत्तरलोमोपस्तृणा
ति मेध्यत्वाय॥ तस्मात्पुरस्तात्प्रत्यंचः पशवो मेधमुपतिष्ठंते॥ तस्मात्प्रजामृ
गंग्राहुकाः॥ यज्ञो देवेभ्यो निलायत॥ कृष्णो रूपं कृत्वा॥ यत्कृष्णाजिने हविर
ध्यवहंति॥ यज्ञादेव तद्यज्ञं प्रयुंक्ते॥ हविषोऽस्कंदाय॥ ६ ॥ अधिषवणमसि वा
नस्पत्यमित्याह॥ अधिषवणमेवैनत्करोति॥ प्रति त्वादित्यास्त्वग्वेत्त्वित्याह
सयत्वाय॥ अग्नेस्तनूरसीत्याह॥ अग्नेर्वा एषा तनूः॥ यदोषधयः॥ वाचो वि

श्रा०त०
२५

सर्जनमित्याह ॥ यदा हि प्रजा ओषधीनामश्नंति ॥ अथ बार्हं विसृजंते ॥ दे
ववीतये त्वा गृह्णामीत्याह ॥ देवताभिरेवैनत्सममर्धयति ॥ अद्रिरसि वानस्प
त्य इत्याह ॥ ग्रावाणमेवैन ×॥ ७ ॥× त्करोति ॥ स इदं देवेभ्यो हव्यꣳ सुशमि शमि
ष्वेत्याह शांत्यै ॥ हविष्कृदेहीत्याह ॥ य एव देवानाꣳ हविष्कृतः ॥ तान्ह्वयति ॥ त्रिर्ह्व
यति ॥ त्रिषत्या हि देवाः ॥ इषमावदोर्जमावदेत्याह ॥ ८ ॥ इषमेवोर्जं यजमा
ने दधाति ॥ द्युमद्वदत वयꣳ संघातं जेष्मेत्याह भ्रातृव्याभिभूत्यै ॥ मनोश्रद्धा
देवस्य यजमानस्यासुरघ्नी वाक् ॥ यज्ञायुधेषु प्रविष्टासीत् ॥ तेसुरा यावंतो
यज्ञायुधानामुद्वदतामुपाशृण्वन् ॥ ते पराभवन् ॥ तस्मात्स्वानां मध्येवसाय
यजेत ॥ यावंतोस्य भ्रातृव्या यज्ञायुधानामुद्वदतामुपशृण्वंति ॥ ते परा

२५

भवंति ॥ उच्चैः समाहंतवा आह विजित्यै ॥ ९ ॥ वर्कूर एषामिंद्रियं वीर्यं ॥ श्रेष्ठ एषां
भवति ॥ वर्षवृद्धमसि प्रतित्वा वर्षवृद्धं वेत्त्वित्याह ॥ वर्षवृद्धा वा ओषधयः ॥ वर्ष
वृद्धा इषीकाः समृध्यै ॥ यज्ञꣳ रक्षाꣳस्यनु प्राविशन् ॥ तान्यस्नापशुभ्यो निरवा
दयंत ॥ तुषैरोषधीभ्यः ॥ परापूतꣳ रक्षः परापूता अरातय इत्याह ॥ रक्षसामपहत्यै ॥ १० ॥ त्याह
रक्षसां भागोसीत्याह ॥ तुषैरेव रक्षाꣳसि निरवदयते ॥ अप उपस्पृशति मेध्यत्वा
य ॥ वायुर्वो विविनक्त्वित्याह ॥ पवित्रं वै वायुः ॥ पुनात्येवैनान् ॥ अंतरिक्षाद्दिव वा
एते प्रस्कंदंति ॥ ये शूर्पात् ॥ देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्वित्याह प्र
तिष्ठित्यै ॥ हविषोस्कंदाय ॥ त्रिष्फलीकर्तवा आह ॥ त्र्यावृद्धि यज्ञः ॥ अथो मेध्य
त्वाय ॥ ११ ॥ दृंभ्यामुत्पुनाति रश्मयो न यंत्यये यज्ञपतिं यज्ञो दिति रस्कंदाय

ब्रा०त०
२६

गृह्णामीत्याह। वदेत्याह। विजित्या अपहत्या अस्कंदाय त्रीणि च॥ ५ ॥ अवधू
तꣳरक्षोवधूता अरातय इत्याह॥ रक्षसामपहत्यै॥ अदित्यास्त्वगसीत्याह॥ इयंवा
अदितिः॥ अस्याएवैनत्वचंकरोति॥ प्रतित्वा पृथिवीवेत्वित्याह प्रतिष्ठित्यै॥ पु
रस्तात्प्रतीचीनग्रीवमुत्तरलोमोपस्तृणाति मेध्यत्वाय॥ तस्मात्पुरस्तात्प्रत्यं
चः पशवो मेधमुपतिष्ठंते॥ तस्मात्प्रजामृगंग्राहुकाः॥ यज्ञोदेवेभ्योनिलायत॥ १॥
कृष्णोरूपंकृत्वा॥ यत्कृष्णाजिने हविरधिपिनष्टि॥ यज्ञादेवतद्यज्ञंप्रयुंक्ते॥
हविषोस्कंदाय॥ द्यावापृथिवीसहास्तां॥ तेशम्यामात्रमेकमहर्व्यैतांꣳशम्या
मात्रमेकमहः॥ दिवस्कंभनिरसिप्रतित्वादित्यास्त्वग्वेत्वित्याह॥ द्यावापृथि
व्योर्वीधृत्यै॥ धिषणासिपर्वत्याप्रतित्वादिवस्कंभनिर्वेत्वित्याह॥ द्यावापृथिव्यो

२६

विधृत्यै॥ २ ॥ धिषणासिपार्वतेयीप्रतित्वापर्वतिर्वेत्वित्याह॥ द्यावापृथिव्योर्धृ
त्यै॥ देवस्यत्वासवितुःप्रसवइत्याहप्रसूत्यै॥ अश्विनोर्बाहुभ्यामित्याह॥ अश्वि
नौहिदेवानामध्वर्यूआस्तां॥ पूष्णोहस्ताभ्यामित्याहयत्यै॥ अधिवपामीत्याह॥
यथादेवतमेवैनानधिवपति॥ धान्यमसिधिनुहिदेवानित्याह॥ एतस्ययजुषोवी
र्येण॥ ३ ॥ यावदेकादेवताकामयतेयावदेका॥ तावदाहुतिःप्रथते॥ नहितदस्ति॥
यत्तावदेवस्यात्॥ यावज्जुहोति॥ प्राणायत्वापानायत्वेत्याह॥ प्राणानेवयज
मानेदधाति॥ दीर्घामनुप्रसितिमायुषेधामित्याह॥ आयुरेवास्मिन्दधाति॥ अं
तरिक्षाद्वाएतानिप्रस्कंदंति॥ यानिदृषदः॥ देवोवःसविताहिरण्यपाणिः
प्रतिगृह्णात्वित्याहप्रतिष्ठित्यै॥ हविषोस्कंदाय॥ असंवपंतीपिꣳषाणूनिकु

रुतादित्याह मेध्यत्वाय॥ ४ ॥निलायत विधृत्यैवीर्येण स्कंदंति चत्वारिच॥ ६ ॥
धृष्टिरसि ब्रह्मयच्छेत्याह धृत्यै॥अपाग्नेग्निमामादं जहि निष्क्रव्यादं सेधादेवयजं वहेत्याह॥ यएवामा क्रव्यात्॥ तमपहत्य॥ मेध्येग्नौ कपालमुपदधाति॥ निर्दग्धं रक्षो निर्दग्धा अरातय इत्याह॥ रक्षांस्येव निर्दहति॥ अग्निवत्युपदधाति॥ अस्मिन्नेव लोके ज्योतिर्धत्ते॥ अंगारमधिनर्तयति॥ १ ॥ अंतरिक्ष एव ज्योतिर्धत्ते॥ आदित्यमेवामुष्मिन्लोके ज्योतिर्धत्ते॥ ज्योतिष्मंतोस्मा इमेलोका भवंति॥ यएवं वेद॥ ध्रुवमसि पृथिवीं दृंहेत्याह॥ पृथिवीमेवैतेन दृंहति॥ धर्त्रमस्यंतरिक्षं दृंहेत्याह॥ अंतरिक्षमेवैतेन दृंहति॥ धरुणमसि दिवं दृंहेत्याह॥ दिवमेवैतेन दृंहति॥ धर्मासि दिशो दृंहेत्याह॥ दिश एवैतेन दृंहति॥ इमानेवैतैर्लोकान्दृंहति॥ दृंहंतेस्मा इ

मेलोकाः प्रजया पशुभिः॥ यएवं वेद॥ त्रीण्यग्रेकपालान्युपदधाति॥ त्रयइमेलोकाः॥ एषां लोकानामाप्त्यै॥ एकमग्रेकपालमुपदधाति॥ एकं वा अग्रेकपालं पुरुषस्य संभवति॥ २ ॥ अथ द्वे॥ अथ त्रीणि॥ अथ चत्वारि॥ अथाष्टौ॥ तस्मादष्टाकपालं पुरुषस्य शिरः॥ यदेवं कपालान्युपदधाति॥ यज्ञो वै प्रजापतिः॥ यज्ञमेव प्रजापतिं संस्करोति॥ आत्मानमेव तत्संस्करोति॥ तंसंस्कृतमात्मानं॥ ४ ॥ अमुष्मिन्लोकेनुपरैति॥ यदष्टावुपदधाति॥ गायत्रियात त्संमितं॥ यन्नव॥ त्रिवृतात्॥ यद्दश॥ विराजात त्॥ यदेकादश॥ त्रिष्टुभा तत्॥ द्वादश॥ ५ ॥ जगत्या तत्॥ छंदः संमितानि स उपदधत्कपालानि॥ इमान्लोकाननुपूर्वं दिशो विधृत्यै दृंहति॥ अथाथ युः प्राणानु ... जां पशून्यजमाने दधाति॥ सजातानस्मा अभितो बहुलान्करोति

चित्तस्थेत्याह॥ यथायजुरेवैतत्॥ भृगूणामंगिरसां तपसा तप्यध्वमित्याह॥ देवता
नामेवैनानि तपसा तपति॥ तानि ततः संस्थिते॥ यानि घर्मे कपालान्युपचिन्वंति
वेधस इति चतुष्पदयर्चा विमुंचति॥ चतुष्पादः पशवः॥ पशुष्वेवोपरिष्टात्प्रतिति
ष्ठति॥ ६॥ वर्तयति दिवमेवैतेन दृंहति संभवति संस्कृतमात्मानं द्वादश सं
स्थितेत्रीणि च॥ ७॥ देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्यै॥ अश्विनोर्बाहुभ्या
मित्याह॥ अश्विनौ हि देवानामध्वर्यू आस्तां॥ पूष्णो हस्ताभ्यामित्याह यत्यै॥ संव
पामीत्याह॥ यथादेवतमेवैनानि संवपति॥ समापो अद्भिरग्मत समोषधयो रसे
नेत्याह॥ आपो वा ओषधीर्जिन्वंति॥ ओषधयोपो जिन्वंति॥ अन्या वा एता साम
न्या जिन्वंति॥ १॥ तस्मादेवमाह॥ सं रेवतीर्जगतीभिर्मधुमतीर्मधुमतीभिः सृ

ज्यध्वमित्याह॥ आपो वै रेवतीः॥ पशवो जगतीः॥ ओषधयो मधुमतीः॥ आप ओ
षधीः पशून्॥ तानेवास्मा एकधा संसृज्य॥ मधुमतः करोति॥ अद्भ्यः परिप्रजा
तास्थ समद्भिः पृच्यध्वमिति पर्याप्लावयति॥ यथा सुवृष्ट इमामनुविसृत्य॥
॥ २॥ आप ओषधीर्महयंति॥ तादृगेव तत्॥ जनयत्यै त्वा संयौमीत्याह॥
प्रजा एवैतेन दाधार॥ अग्नये त्वाग्नीषोमाभ्यामित्याह व्यावृत्त्यै॥ मखस्य शि
रोसीत्याह॥ यज्ञो वै मखः॥ तस्यैतच्छिरः॥ यत्पुरोडाशः॥ तस्मादेवमाह॥ ३॥
घर्मोसि विश्वायुरित्याह॥ विश्वमेवायुर्यजमाने दधाति॥ उरु प्रथस्वोरु ते य
ज्ञपतिः प्रथतामित्याह॥ यजमानमेव प्रजया पशुभिः प्रथयति॥ त्वचं गृह्णी
ष्वेत्याह॥ सर्वमेवैनं सतनुं करोति॥ अथापप आनीय परिमार्ष्टि॥ मांसमेव

ब्रा०तृ०
२९

तत्त्वचं दधाति॥ तस्मात्त्वचा मांᳫं संछन्नं॥ घर्मोवाएषोशांतः॥ ४ ॥अर्धमासेर्धमासेप्रवृज्यते॥ यत्पुरोडाशः॥ सईश्वरोयजमानंᳫं शुचाप्रदहः॥ पर्यग्निकरोति॥ पशुमेवैनमकः॥ शांत्याअप्रदाहाय॥ त्रिःपर्यग्निकरोति॥ त्र्यावृद्धियज्ञः॥ अथोरक्षसामपहत्यै॥ अंतरितंᳫं रक्षोंतरिताअरातयइत्याह॥ ५॥ रक्षसामंतर्हित्यै॥ पुरोडाशंवाअधिश्रितंᳫं रक्षांᳫंस्यजिघांᳫंसन्॥ दिविनाकोनामाग्नीरक्षोहा॥ सएवास्माद्रक्षांᳫंस्यपाहन्॥ देवस्त्वासविताश्रपयत्वित्याह॥ सवितृप्रसूतएवैनंᳫं श्रपयति॥ वर्षिष्ठेअधिनाकइत्याह॥ रक्षसामपहत्यै॥ अग्निस्तेतनुवंमातिधागित्याहानतिदाहाय॥ अग्नेहव्यंᳫं रक्षस्वेत्याहगुप्त्यै॥ ६ ॥अविदहंतःश्रपयतेतिवाचंविसृजते॥ यज्ञमेवह

२९

वींᳫंष्यभिव्याहृत्यप्रतनुते॥ पुरोरुचमविदाहायश्र्टत्येकरोति॥ मस्तिष्कोवैपुरोडाशः॥ तंयंनाभिवासयेत्॥ आविर्मस्तिष्कस्यात्॥ अभिवासयति॥ तस्माद्गुहामस्तिष्कः॥ भस्मनाभिवासयति॥ तस्मान्मांᳫंसेनास्थिछन्नं॥ ॥ ७ ॥वेदेनाभिवासयति॥ तस्मात्केशैःशिरश्छन्नं॥ अस्खलतिभावुकोभवति॥ यएवंवेद॥ पशोर्वैप्रतिमापुरोडाशः॥ सनायजुष्कमभिवास्यः॥ वृथेयस्यात्॥ ईश्वरायजमानस्यपशवःप्रमेतोः॥ संब्रह्मणापृच्यस्वेत्याह॥ प्राणावैब्रह्म॥ ८ ॥प्राणाःपशवः॥ प्राणैरेवपशून्त्संपृणक्ति॥ नप्रमायुकाभवंति॥ यजमानोवैपुरोडाशः॥ प्रजापशवःपुरीषं॥ यदेवमभिवासयति॥ यजमानमेवप्रजयापशुभिःसमर्धयति॥ देवावैहविर्भृत्वाब्रुवन्॥

ब्रा०तृ०
३०

कस्मिन्निदं म्रक्ष्यामह इति ॥ सोग्निरब्रवीत् ॥ ९ ॥ मयि तनूः सन्निधध्वं ॥ अहं वस्तं जनयिष्यामि ॥ यस्मिन्म्रक्ष्यध्व इति ॥ ते देवा अग्नौ तनूः सन्न्यदध त ॥ तस्मादाहुः ॥ अग्निः सर्वा देवता इति ॥ सोंगारेणापः ॥ अभ्यपातयत् ॥ तत एकतो जायत ॥ स द्वितीयमभ्यपातयत् ॥ १० ॥ ततो द्वितो जायत ॥ स तृतीयमभ्यपातयत् ॥ ततस्त्रितो जायत ॥ यदद्भ्यो जायंत ॥ तदाप्त्यानामाप्त्यत्वं ॥ यदात्मभ्यो जायंत ॥ तदात्म्यानामात्म्यत्वं ॥ ते देवा आप्त्येष्वमृजत ॥ आप्त्या अमृजत सूर्याभ्युदिते ॥ सूर्याभ्युदितः सूर्याभिनिम्रुक्ते ॥ ११ ॥ सूर्याभिनिम्रुक्तः कुनखिनि ॥ कुनखी श्यावदति ॥ श्यावदन्नग्रेदिधिषौ ॥ अग्रेदिधिषुः परिवित्ते ॥ परिवित्तो वीरहणि ॥ वीरहा ब्रह्महणि ॥

३०

तद्ब्रह्महणं नात्यच्यवत ॥ अंतर्वेदि निनयत्यवरुध्यै ॥ उल्मुकेनाभिगृह्णाति शृतत्वाय ॥ शृतकामा इव हि देवाः ॥ १२ ॥ अन्याजिन्वंत्यनुविसृत्यैवमाहाशांत आ द्रु गुंह्येच्छ न्नेंब्रह्मा ब्रवीद्द्वितीयमभ्यपातयत्सूर्याभिनिम्रुक्ते देवाः ॥ ८ ॥ देवस्य त्वा सवितुः प्रसव इति स्फ्यमादत्ते प्रसूत्यै ॥ अश्विनोर्बाहुभ्यामित्याह ॥ अश्विनौ हि देवानामध्वर्यू आस्तां ॥ पूष्णो हस्ताभ्यामित्याह यत्यै ॥ आददइंद्रस्य बाहुरसि दक्षिण इत्याह ॥ इंद्रियमेव यजमाने दधाति ॥ सहस्रभृष्टिः शततेजा इत्याह ॥ रूपमेवास्यैतन्महिमानं व्याचष्टे ॥ वायुरसि तिग्मतेजा इत्याह ॥ तेजो वै वायुः ॥ १ ॥ तेज एवास्मिंद धाति ॥ पृथिवि देवयजनीत्याह ... विषाद्रूनामासुर आसीत् ॥ सोबिभेत् ॥ यज्ञेन मा देवा अभिभविष्यंतीति ॥ स पृथिवीमभ्यवमीत् ॥ सामेध्याभवत् ॥ अथो यदिंद्रो वृत्रमहन् ॥ तस्य लोहितं

ब्रा०त०
३१

पृथिवीमनुव्यधावत्॥ सामेध्याभवत्॥ पृथिविर्देवयजनीत्याह॥ २ ॥मेध्या
मेवैनां देवयजनीं करोति॥ ओषध्यास्ते मूलं मा हिंꣳसिषमित्याह॥ओषधीना
महिंꣳसायै॥ व्रजं गच्छ गोस्थानमित्याह॥ छंदाꣳसि वै व्रजो गोस्थानः॥छंदाꣳ
स्येवास्मै व्रजं गोस्थानं करोति॥ वर्षतु ते द्यौरित्याह॥ वृष्टिर्वै द्यौः॥ वृष्टिमेवा
वरुंधे॥ बधान देव सवितः परमस्यां परावतीत्याह॥ ३ ॥ द्वौ वाव पुरुषौ॥
यं चैव द्वेष्टि॥ यश्चैनं द्वेष्टि॥ तावुभौ बध्नाति परमस्यां परावति शतेन पा
शैः॥ योस्मान्द्वेष्टि यं च वयं द्विष्म स्तमतो मा मौगित्याहानिर्मुक्त्यै॥अ
ररुर्वै नामासुर आसीत्॥ स पृथिव्यामुपम्लुप्तोशयत्॥ तं देवा अपहतोर
रुः पृथिव्या इति पृथिव्या अपाघ्नन्॥ भ्रातृव्यो वा अररुः॥ अपहतोररुः

३१

पृथिव्या इति यदाह॥ ४ ॥ भ्रातृव्यमेव पृथिव्या अपहंति॥ ते मन्यंत॥ दिवं वा अयमितः
पतिष्यतीति॥ तमररुस्ते दिवं मास्कानिति दिवः पर्यबाधंत॥ भ्रातृव्यो वा अररुः॥ अररुस्ते
दिवं मास्कानिति [illegible]यदाह॥ भ्रातृव्यमेव दिवः परिबाधते॥ स्तंबयजुर्हरति॥ पृथिव्या एव
भ्रातृव्यमपहंति॥ द्वितीयꣳ हरति॥ ५ ॥ अंतरिक्षादेवैनमपहंति॥ तृतीयꣳ हरति॥ दिव ए
वैनमपहंति॥ तूष्णीं चतुर्थꣳ हरति॥ अपरिमितादेवैनमपहंति॥ असुराणां वा इयमग्र आ
सीत्॥ यावदासीनः परापश्यति॥ तावद्देवानां॥ ते देवा अब्रुवन्॥ अस्त्वेव नोस्यामपीति॥
॥ ६ ॥ कियन्नो दास्यथेति॥ यावत्स्वयं परिगृह्णीथेति॥ ते वसवस्त्वेति दक्षिणतः पर्य
गृह्णन्॥ रुद्रास्त्वेति पश्चात्॥ आदित्यास्त्वेत्युत्तरतः॥ तेग्निना प्रांचो जयन्॥ वसुभि
र्दक्षिणा॥ रुद्रैः प्रत्यंचः॥ आदित्यैरुदंचः॥ यस्यैवं विदुषो वेदिं परिगृह्णंति॥ ७ ॥

श्री०त०
३२

भवत्यात्मना॥ परास्य भ्रातृव्यो भवति॥ देवस्य सवितुः सवइत्याह प्रसूत्यै॥क
र्म कृण्वंति वेधस इत्याह॥ इषितꣳ हि कर्म क्रियते॥ पृथिव्यै मेध्यं चामेध्यं च व्यु
दक्रामतां॥ प्राचीनमुदीचीनं मेध्यं॥ प्रतीचीनं दक्षिणामेध्यं॥ प्राचीमुदीचीं प्रव
णां करोति॥ मेध्यामेवैनां देवयजनीं करोति॥ ८ ॥ प्राचीं वेदिꣳ सामुन्नयति॥
आहवनीयस्य परिगृहीत्यै॥ प्रतीची श्रोणी॥ गार्हपत्यस्य परिगृहीत्यै॥ अथो
मिथुनत्वाय॥ उद्धंति॥ यदेवास्या अमेध्यं॥ तदपहंति॥ उद्धंति॥ तस्मादोषधयः
पराभवंति॥ ९ ॥ मूलं छिनत्ति॥ भ्रातृव्यस्यैव मूलं छिनत्ति॥ मूलं वा अति
तिष्ठद्रक्षाꣳस्यनूत्पिपते॥ यद्धस्तेन छिंद्यात्॥ कुनखिनीः प्रजाः स्युः॥ स्फ्ये
न छिनत्ति॥ वज्रो वै स्फ्यः॥ वज्रेणैव यज्ञाद्रक्षाꣳस्यपहंति॥ पितृदेवत्या

३२

तिखाता॥ इयतीं खनंति॥ १०॥ प्रजापतिना यज्ञमुखेन संमितां॥ वेदिं देवेभ्यो
निलायत॥ तां चतुरंगुलेन्वविंदन्॥ तस्माच्चतुरंखेया॥ चतुरंगुलं खनंति॥ च
तुरंगुले ह्योषधयः प्रतितिष्ठंति॥ आप्रतिष्ठायै खनंति॥ यजमानमेव प्रतिष्ठां
गमयति॥ दक्षिणतो वर्षीयसीं करोति॥ देवयजनस्यैव रूपमकः॥ ११ ॥ पुरीष
वतीं करोति॥ प्रजा वै पशवः पुरीषं॥ प्रजयैवैनं पशुभिः पुरीषवंतं करोति॥ उत्त
रं परिग्राहं परिगृह्णाति॥ एतावती वै पृथिवी॥ यावती वेदिः॥ तस्या एतावत
एव भ्रातृव्यं निर्भज्य॥ आत्मन उत्तरं परिग्राहं परिगृह्णाति॥ ऋतमसि ऋतस
दनमसि ऋतश्रीरसीत्याह॥ यथा यजुरेवैतत्॥ १२ ॥ क्रूरमिव वा एतत्करोति॥
यद्वेदिं करोति॥ धा असि स्वधा असीति योयुप्यते शांत्यै॥ उर्वी चासि वस्वी चासी
त्याह॥ उरुमेवैनां वस्वीं करोति॥ पुरा क्रूरस्य विसृपो विराप्शिन्नित्याह मेध्य

गुलं

ब्रा० त० ३२

त्वाय ॥ उदादायपृथिवींजीरदानुर्यामैरयन्चंद्रमसि स्वधाभिरित्याह ॥ यद्वेवास्या
अमेध्यं ॥ तदपहत्य ॥ मेध्यांदेवयजनींकृत्वा ॥ १३ ॥ यदस्यांचंद्रमसिमेध्यं ॥ तदस्यां
मेरयति ॥ तांधीरासोअनुदृश्ययजंतइत्याहानुख्यात्यै ॥ प्रोक्षणीरासादय ॥ [illegible]
ध्माबर्हिरुपसादय ॥ स्रुवंचस्रुचश्चसंमृड्ढि ॥ पत्नीꣳसंनह्य ॥ आज्येनोदेहीत्या
हानुपूर्वतायै ॥ प्रोक्षणीरासादयति ॥ आपोवैरक्षोघ्नीः ॥ १४ ॥ रक्षसामपहत्यै ॥
स्फ्यस्यवर्त्मन्त्सादयति ॥ यज्ञस्यसंतत्यै ॥ उवाचहासितोदेवलः ॥ एतावतीर्वाअ
मुष्मिंल्लोकआपआसन् ॥ यावतीःप्रोक्षणीरिति ॥ तस्माद्बह्वीरासाद्याः ॥ स्फ्यमु
दस्यन् ॥ यंद्विष्यात्तंध्यायेत् ॥ शुचैवैनमर्पयति ॥ १५ ॥ चैवाख्युराहुपरावतीत्या
हाहद्वितीयꣳहरतीतिपरिगृह्णतिदेवयजनींकरोतिभर्वंतिरवनत्यकरेतत्तुरक्षो

३२

घ्नीरर्पयति ॥ ९ ॥ वज्रोवैस्फ्यः ॥ यदन्वंचंधारयेत् ॥ वज्रेध्वर्युःक्षण्वीत ॥ पुरस्तात्ति
र्यंचंधारयति ॥ वज्रोवैस्फ्यः ॥ वज्रेणैवयज्ञस्यदक्षिणतोरक्षाꣳस्यपहंति ॥ अग्नि
भ्यांप्राचश्चप्रतीचश्च ॥ स्फ्येनोदीचश्चाधराचश्च ॥ स्फ्येनवाएषवज्रेणास्येपा
प्मानंभ्रातृव्यमपहत्य ॥ उत्करेधिप्रवृश्चति ॥ १ ॥ यथोपधायवृश्चत्येवं ॥ हस्तावव
नेनिक्ते ॥ आत्मानमेवपवयते ॥ स्फ्यंप्रक्षालयतिमेध्यत्वाय ॥ अथोपाप्मनएव
भ्रातृव्यस्यन्यंङ्छिनत्ति ॥ इध्माबर्हिरुपसादयतियुक्त्यै ॥ यज्ञस्यमिथुनत्वाय ॥ अ
थोपुरोरुचमेवैतांदधाति ॥ उत्तरस्यकर्मणोनुख्यात्यै ॥ नपुरस्तात्प्रत्यगुपसादये
त् ॥ यत्पुरस्तात्प्रत्यगुपसादयेत् ॥ अन्यत्राहुतिपथादिध्मंप्रतिपादयेत् ॥ प्रजावै
बर्हिः ॥ अपराध्नुयाद्बर्हिषाप्रजानांप्रजननं ॥ पश्चात्प्रागुपसादयेत् ॥ आहुति
पथेनेध्मंप्रतिपादयति ॥ संप्रत्येवबर्हिषाप्रजानांप्रजननमुपैति ॥ दक्षिणमिध्मं ॥

ब्रा॰त॰
३४

उत्तरं बर्हिः॥ आत्मा वाऽइध्मः॥ प्रजा बर्हिः॥ प्रजा ह्यात्मन उत्तरतरा तीर्थे॥ त
तो मेधमुपनीय॥ यथा देवतमेवैनत्प्रतिष्ठापयति॥ प्रतितिष्ठति प्रजया प
शुभिर्यजमानः॥ ३॥ वृश्चति सादयेदिध्मः पंचच॥ १०॥ तृतीयस्यां देव
स्याश्वपर्शुर्यो वै पूर्वे द्युः कर्मणे वामिंद्रो वृत्रमहन्त्सोऽपो वधूतं धाहिर्देवस्य
त्वाहं संवपामि देवस्य स्फ्यमादत्ते वज्रो वै स्फ्यो दत्त्वा॥ १०॥ तृतीयस्यां यज्ञ
स्यानतिरेकाय पवित्रवत्यं ध्वर्युं चाधिषवणमस्यंतरिक्षं एव रक्षसामंत
र्हित्यै द्वौ वाव पुरुषौ यदद्धश्वंद्रमसि मे ध्यं पंचाशीतिः॥ ८५॥ हरिः ॐ॥ ३४
॥ ॥ ॥ ॥ श्रीगजाननार्पणमस्तु॥ ॥

॥ हरिः ओम्॥ ॥ प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इत्याह॥ रक्षसामपहत्यै॥ अ
ग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामीत्याह मेध्यत्वाय॥ स्रुचः संमार्ष्टि॥ स्रुवमग्रे॥
पुमाꣳसमेवाभ्यः सꣳश्यति मिथुनत्वाय॥ अथ जुहूं॥ अथोपभृतं॥ अथ ध्रु
वां॥ असौ वै जुहूः॥ १॥ अंतरिक्षमुपभृत्॥ पृथिवी ध्रुवा॥ इमे वै लोकाः
स्रुचः॥ वृष्टिः संमार्जनानि॥ वृष्टिर्वा इमान्लोकाननुपूर्वं कल्पयति॥ तेन
तः क्लृप्ताः समेधंते॥ समेधंतेऽस्मा इमे लोकाः प्रजया पशुभिः॥ य एवं वेद॥
यदि कामयेत वर्षुकः पर्जन्यः स्यादिति॥ अग्रतः संमृज्यात्॥ २॥ वृष्टि
मेव नियच्छति॥ अवाचीना या हि वृष्टिः॥ यदि कामयेतावर्षुकः स्यादिति॥
मूलतः संमृज्यात्॥ वृष्टिमेवोद्यच्छति॥ तदु वा आहुः॥ अग्र एवोपरिष्टात्सं
त

ब्रा० त० १

३५

मृज्यात् ॥ मूलतोधस्तात् ॥ तदनुपूर्वं कल्पते ॥ वर्षुको भवतीति ॥ ३ ॥ प्राची
मभ्याकारं ॥ अग्रैरंतरतः ॥ एवमिव ह्यन्नमद्यते ॥ अथो अग्रा ह्योषधीना
मूर्जं प्रजा उपजीवंति ॥ ऊर्ज एवान्नाद्यस्यावरुंध्ये ॥ अधस्तात्प्रतीचीं ॥ दंड
मुत्तमतः ॥ मूलेन मूलं प्रतिष्ठित्यै ॥ तस्मादरत्नौ प्राच्युपरिष्टाल्लोमानि ॥
प्रत्यंच्यधस्तात् ॥ ४ ॥ स्रुघ्येषा ॥ प्राणो स्रुवैवैवः ॥ जुहूर्दक्षिणो हस्तः ॥
उपभृत्सव्यः ॥ आत्मा ध्रुवा ॥ अन्नं संमार्जनानि ॥ मुखतो वै प्राणोपानौ
भूत्वा ॥ आत्मानमन्नं प्रविश्य ॥ बाह्यतस्तनुवं शुभयति ॥ तस्मात्स्रु
वमेवाग्रे संमार्ष्टि ॥ मुखतो हि प्राणोपानौ भूत्वा ॥ आत्मानमन्नमावि
शति ॥ तौ प्राणापानौ ॥ अध्वर्युकः प्राणापानाभ्यां भवति ॥ य एवं वेद ॥ ५ ॥ ३५

जुहूं मृज्याज्ञवतीति प्रत्यंच्यधस्तान्मार्ष्टि पंच च ॥ १ ॥ दिवः शिल्पमवततं ॥
पृथिव्याः ककुभिः श्रितं ॥ तेन वयं सहस्रवल्शेन ॥ सपत्नं नाशयामसि
स्वाहेति स्रुक्संमार्जनान्यग्नौ प्रहरति ॥ आपो वै दर्भाः ॥ रूपमेवैषामेतन्म
हिमानं व्याचष्टे ॥ अनुष्टुभर्चा ॥ आनुष्टुभः प्रजापतिः ॥ प्राजापत्यो वेदः ॥ प्र
वेदस्याग्रं स्रुक्संमार्जनानि ॥ १ ॥ स्वेनैवैनानि छंदसा ॥ स्वया देवतया
समर्धयति ॥ अथो ऋग्वा वेयोषा ॥ दर्भो वृषा ॥ तन्मिथुनं ॥ मिथुनमेवास्य
तद्यज्ञे करोति प्रजननाय ॥ प्रजायते प्रजया पशुभिर्यजमानः ॥ तान्ये के
वृथैवापास्यंति ॥ न तथा न कार्यं ॥ आरब्धस्य यज्ञियस्य कर्मणः स विदो
हः ॥ २ ॥ यद्येनानि पशवोभितिष्ठेयुः ॥ न तत्पशुभ्यः कं ॥ अद्भिर्मार्जयित्वा

ब्रा० तृ०
३६

त्करेन्यस्येत् ॥ यद्वै यज्ञियस्य कर्मणोन्यत्राहुतीभ्यः संतिष्ठते ॥ उत्करो वाव
तस्य प्रतिष्ठा ॥ एतां ह्येतस्मै प्रतिष्ठां देवाः समभरन् ॥ यदद्भिर्मार्जयति ॥ तेन
शान्तं ॥ यदुत्करेन्यस्यति ॥ प्रतिष्ठामेवैनानि तद्गमयति ॥ ३ ॥ प्रतितिष्ठति प्र
जया पशुभिर्यजमानः ॥ अथो स्तंबस्य वा एतद्रूपं ॥ यत्स्रुक्संमार्जनानि ॥ स्तं
बशो वा ओषधयः ॥ तासां जरत्कक्षे पशवो न रमंते ॥ अप्रियो ह्येषां जरत्क
क्षः ॥ यावदप्रियो ह वै जरत्कक्षः पशूनां ॥ तावदप्रियः पशूनां भवति ॥ यस्ये
तान्यन्यत्राग्नेर्दधाति ॥ नवदाव्यासु वा ओषधीषु पशवो रमंते ॥ ४ ॥ नव
दावो ह्येषां प्रियः ॥ यावत्प्रियो ह वै नवदावः पशूनां ॥ तावत्प्रियः पशूनां भव
ति ॥ यस्यैतान्यग्नौ प्रहरंति ॥ तस्मादेतान्यग्नावेव प्रहरेत् ॥ यतरस्मिन्

२
३६

त्संमृज्यात् ॥ पशूनां धृत्यै ॥ यो भूतानामधिपतिः ॥ रुद्रस्तंतिचरो वृषा ॥ पशू
नस्माकं मा हिꣳसीः ॥ एतदस्तु हुतं तव स्वाहेत्यग्नि संमार्जनान्यग्नौ प्रहर
ति ॥ एषा वा एतेषां योनिः ॥ एषा प्रतिष्ठा ॥ स्वामेवैनानि योनिं ॥ स्वां प्रतिष्ठां
गमयति ॥ प्रतितिष्ठति प्रजया पशुभिर्यजमानः ॥ ५ ॥ वेदस्याग्रꣳ स्रुक्सं
मार्जनानि विदो हो गमयति पश्वावो रमंते हिꣳसीः षट्च ॥ २ ॥ अयज्ञो वा
एषः ॥ योपत्नीकः ॥ न प्रजाः प्रजायेरन् ॥ पत्न्यन्वास्ते ॥ यज्ञमेवाकः ॥ प्रजा
नां प्रजननाय ॥ यत्तिष्ठंती संनह्येत ॥ प्रियं ज्ञातिꣳ रुंध्यात् ॥ आसीना संनह्य
ते ॥ आसीना ह्येषा वीर्यं करोति ॥ १ ॥ यत्पश्चात्प्राच्यन्वासीत ॥ अनया स
मदं दधीत ॥ देवानां पत्नीः समदं दधीत ॥ देशाद्दक्षिणत उदीच्यन्वास्ते ॥ ॥

या

आ०त०
२८

आत्मनो गोपीथाय॥ आशासाना सौमनसमित्याह॥ मेध्यामेवैनां केवलीं कृ
त्वा॥ आशिषा समर्धयति॥ अग्नेरनुव्रता भूत्वा संनह्ये सुकृतायकमित्याह॥
एतद्वै पत्नियै व्रतोपनयनं॥ २ ॥ तेनैवैनां व्रतमुपनयति॥ तस्मादाहुः॥ यश्चै
वं वेद यश्च न॥ योक्त्रमेव युते॥ यमन्वास्ते॥ तस्याममुष्मिन्लोके भवतीति योक्त्रे
ण॥ यद्योक्त्रं॥ स योगः॥ यदास्ते॥ स क्षेमः॥ २॥ योगक्षेमस्य क्लृप्त्यै॥ युक्तं क्रि
यातामाशीः कामैर्युज्यातामिति॥ आशिषः समृध्यै॥ ग्रंथिं ग्रथ्नाति॥ आशि
षएवास्यां परिगृह्णाति॥ पुमान्वै ग्रंथिः॥ स्त्री पत्नी॥ तन्मिथुनं॥ मिथुनमे
ने वास्य तद्यज्ञे करोति प्रजननाय॥ प्रजायते प्रजया पशुभिर्यजमानः॥ ४ ॥
अथो अर्धो वा एष आत्मनः॥ यत्पत्नी॥ यज्ञस्य धृत्या अशिथिलंभावाय॥ सु २८

स प्रजसस्त्वा वयं सुसदः पत्नीरुपसेदिमेत्याह॥ यज्ञमेवतन्मिथुनी करोति॥ ऊनेतिरिक्तं धीयाताइ
ति प्रजात्यै॥ महीनां पयोस्योषधीनां रसइत्याह॥ रूपमेवास्यैतन्महिमानं व्याचष्टे॥
तस्यास्ते क्षीयमाणस्य निर्वपामि देवयज्यायाइत्याह॥ आशिषमेवैतामाशास्ते॥ ५॥
करोति व्रतोपनयनं क्षेमो यजमानः शास्ति॥ ३॥ ॥ घृतं च वै मधु च प्रजापतिरासी
त्॥ यतो मध्वासीत्॥ ततः प्रजा असृजत॥ तस्मान्मधुषि प्रजननमिवास्ति॥ तस्मान्म
धुषा न प्रचरंति॥ यातयाम हि॥ आज्येन प्रचरंति॥ यज्ञो वा आज्यं॥ यज्ञेनैव यज्ञं
प्रचरंत्ययातयामत्वाय॥ पत्न्यवेक्षते॥ ६॥ मिथुनत्वाय प्रजात्यै॥ यद्वै पत्नी यज्ञ
स्य करोति॥ मिथुनं तत्॥ अथो पत्निया एवैष यज्ञस्यान्वारंभोनवच्छित्त्यै॥ अमे

ध्यं वा एतत्करोति॥ यत्पत्न्यवेक्षते॥ गार्हपत्येधिश्रयति मेध्यत्वाय॥ आहवनी
यमभ्युद्द्रवति॥ यज्ञस्य संतत्यै॥ तेजोसि तेजोनु प्रेहीत्याह॥ २॥ तेजो वा अग्निः॥
तेज आज्यं॥ तेजसैव तेजः समर्धयति॥ अग्निस्ते तेजो मा विनैदित्याह॥ हिंसा
यै॥ स्फ्यस्य वर्त्मन्त्सादयति॥ यज्ञस्य संतत्यै॥ अग्नेर्जिह्वासि सुभूर्देवानामि
त्याह॥ यथा यजुरेवैतत्॥ धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे भवेत्याह॥ आशि
षमेवैतामाशास्ते॥ ३॥ तद्वा अतः पवित्राभ्यामेवोत्पुनाति॥ यजमानो वा आ
ज्यं॥ प्राणापानौ पवित्रे॥ यजमान एव प्राणापानौ दधाति॥ पुनराहारं॥ एवमि
व हि प्राणापानौ संचरतः॥ शुक्रमसि ज्योतिरसि तेजोसीत्याह॥ रूपमेवास्यैत

न्महिमानं व्याचष्टे॥ त्रिर्यजुषा॥ त्रय इमे लोकाः॥ ४॥ एषां लोकानामाप्त्यै॥
त्रिः॥ त्र्यावृद्धि यज्ञः॥ अथो मिथुनत्वाय॥ अथाज्यवतीभ्यामपः॥ रूपमेवासामे
तद्वर्णं दधाति॥ अपि वा उताहुः॥ यथा ह वै योषा सुवर्णं हिरण्यं पेशलं बिभ्रती रू
पाण्यास्ते॥ एवमेता एतर्हीति॥ आपो वै सर्वा देवताः॥ ५॥ एषा हि विश्वेषां देवा
नां तनूः॥ यदाज्यं॥ तत्रोभयो मरुमाᳲसा॥ जामि स्यात्॥ यद्यजुषाज्यं यजुषाप
उत्पुनीयात्॥ छंदसापउत्पुनात्यजामित्वाय॥ अथो मिथुनत्वाय॥ सावि
त्रियर्चा॥ सवितृप्रसूतं मे कर्मासदिति॥ सवितृप्रसूतमेवास्य कर्म भवति॥ प
च्छो गायत्रिया त्रिष्षमृद्धत्वाय॥ अद्भिरेवौषधीः संनयति॥ ओषधीभिः पशून्॥
पशुभिर्यजमानं॥ शुक्रं त्वा शुक्रायां ज्योतिस्त्वा ज्योतिष्यर्चिस्त्वार्चिषीत्याह

ब्रा॰ त॰
३९

सर्वत्वाय॥ पर्याप्त्या अनंतरायाय॥ ६॥ ईक्षत आह। शास्ति लोका द्देवता भव
ति षड्ढा च॥ ४॥ देवासुराः संयत्ता आसन्॥ स एतमिंद्र आज्यस्यावकाशमपश्यत्॥
तेनावैक्षत॥ ततो देवा अभवन्॥ परासुराः॥ य एवं विद्वानाज्यमवेक्षते॥ भवत्या
त्मना॥ परास्य भ्रातृव्यो भवति॥ ब्रह्मवादिनो वदंति॥ यदाज्येनान्यानि हवीꣳ
ष्यभिघारयति॥ १॥ अथ केनाज्यमिति॥ सत्येनेति ब्रूयात्॥ चक्षुर्वै सत्यं॥
सत्येनैवैनदभिघारयति॥ ईश्वरो वा एषोंऽधो भवितोः॥ यश्चक्षुषाज्यमवेक्षते॥
निमील्यावेक्षेत॥ दाधारात्मंचक्षुः॥ अभ्याज्यं घारयति॥ आज्यं गृह्णाति॥ २॥
छंदाꣳसि वा आज्यं॥ छंदाꣳस्येव प्रीणाति॥ चतुर्जुह्वां गृह्णाति॥ चतुष्पादः
पशवः॥ पशूनेवा[illegible]वरुंधे॥ अष्टावुपभृति॥ अष्टाक्षरा गायत्री॥ गाय

५

३९

त्रः प्राणः॥ प्राणमेव पशुषु दधाति॥ चतुर्ध्रुवायां॥ ३॥ चतुष्पादः पशवः॥ पशु
ष्वेवोपरिष्टात्प्रतितिष्ठति॥ यजमानदेवत्या वै जुहूः॥ भ्रातृव्यदेवत्योपभृत्॥
चतुर्जुह्वां गृह्णन्भूयो गृह्णीयात्॥ अष्टावुपभृति गृह्णन्कनीयः॥ यजमा
नायैव भ्रातृव्यमुपस्तिं करोति॥ गौर्वै स्रुचः॥ चतुर्जुह्वां गृह्णाति॥ तस्मा
च्चतुष्पदी॥ ४॥ अष्टावुपभृति॥ तस्मादष्टाशफा॥ चतुर्ध्रुवायां॥ तस्माच्च
तुस्स्तना॥ गामेव तत्सꣳस्करोति॥ साऽस्मै सꣳस्कृतेषमूर्जं दुहे॥ यज्जुह्वां
गृह्णाति॥ प्रयाजेभ्यस्तत्॥ यदुपभृति॥ प्रयाजानूयाजेभ्यस्तत्॥ सर्व
स्मै वा एतद्यज्ञाय गृह्यते॥ यद्ध्रुवायामाज्यं॥ ५॥ अभिघारयति गृह्णाति
ध्रुवायां चतुष्पदी प्रयाजान् याजेभ्यस्त द्वे च॥ ५॥ आपो देवीरग्रेपुवो

अग्रेगुव इत्याह॥ रूपमेवासामेतन्महिमानं व्याचष्टे॥ अग्र इमं यज्ञं नयतेत्याग्रे यज्ञ
पतिमित्याह॥ अग्र एव यज्ञं नयंति॥ अग्रे यज्ञपतिं॥ युष्मानिंद्रो वृणीत वृत्रतूर्ये
तूर्येयूय मिंद्र मवृणीध्वं वृत्रतूर्य इत्याह॥ वृत्रं ह हनिष्यन्निंद्र आपो ववे॥ आ
पो हैं इंद्रं वव्रिरे॥ संज्ञामेवासामेतत्सामानं व्याचष्टे॥ प्रोक्षिता स्थेत्याह॥ १॥
तेनापः प्रोक्षिताः॥ अग्निर्देवेभ्यो निलायत॥ कृष्णो रूपं कृत्वा॥ स वनस्प
तीन्प्राविशत्॥ कृष्णोस्याखरेष्ठोग्नये त्वा स्वाहेत्याह॥ अग्नय एवैनं जुष्टं
करोति॥ अथो अग्नेरेव मेधमवरुंधे॥ वेदिरसि बर्हिषे त्वा स्वाहेत्याह॥ प्र
जा वै बर्हिः॥ पृथिवी वेदिः॥ २॥ प्रजा एव पृथिव्यां प्रतिष्ठापयति॥ बर्हिर
सि स्रुग्भ्यस्त्वा स्वाहेत्याह॥ प्रजा वै बर्हिः॥ यजमानः स्रुचः॥ यजमानमे

व प्रजासु प्रतिष्ठापयति॥ दिवे त्वांतरिक्षाय त्वा पृथिव्यै त्वेति बर्हिरासाद्य प्रोक्षति॥ एभ्य
एवैनल्लोकेभ्यः प्रोक्षति॥ अथ ततः सह स्रुचा पुरस्तात्प्रत्यंचं ग्रंथिं प्रत्युक्षति॥ प्रजा वै
बर्हिः॥ यथा सूत्यै काल आपः पुरस्ताद्यंति॥ ३॥ तादृगेव तत्॥ स्वधा पितृभ्य इत्याह॥
स्वधाकारो हि पितृणां॥ ऊर्ग्भव बर्हिषद्भ्य इति दक्षिणायै श्रोण्यै रोत्तरस्यै निनयति सं
तत्यै॥ मासा वै पितरो बर्हिषदः॥ मासानेव प्रीणाति॥ मासा वा ओषधीर्वर्धयंति॥ मा
साः पचंति समृध्यै॥ अनतिस्कंदन्ह पर्जन्यो वर्षति॥ यत्रैतदेवं क्रियते॥ ४॥ ऊर्जा
पृथिवीं गच्छतेत्याह॥ पृथिव्यामेवोर्जं दधाति॥ तस्मात्पृथिव्या ऊर्जं भुंजते॥ ग्रंथिं
विस्रंसयति॥ प्रजनयत्येव तत्॥ ऊर्ध्वं प्रांचमुद्गूढं प्रत्यंचमायच्छति॥ तस्मात्प्रा
चीनं रेतो धीयते॥ प्रतीचीः प्रजा जायंते॥ विष्णोः स्तूपोसीत्याह॥ यज्ञो वै विष्णुः॥ ५॥

ब्रा॰ त॰
५१

यज्ञस्य धृत्यै ॥ पुरस्तात्प्रस्तरं गृह्णाति ॥ मुख्यमेवैनं करोति ॥ इयन्तं गृह्णाति ॥ प्रजापतिना यज्ञमुखेन संमितं ॥ इयन्तं गृह्णाति ॥ यज्ञपरुषा संमितं ॥ इयन्तं गृह्णाति ॥ एतावद्वै पुरुषे वीर्यं ॥ वीर्य संमितं ॥ ६ ॥ अपरिमितं गृह्णाति ॥ अपरिमितस्यावरुध्यै ॥ तस्मिन्पवित्रे अपिसृजति ॥ यजमानो वै प्रस्तरः ॥ प्राणापानौ पवित्रे ॥ यजमान एव प्राणापानौ दधाति ॥ ऊर्णाम्रदसं त्वा स्तृणामीत्याह ॥ यथायजुरेवैतत् ॥ स्वासस्थं देवेभ्य इत्याह ॥ देवेभ्य एवैन[illegible]त्वा सस्थं करोति ॥ ७ ॥ बर्हिः स्तृणाति ॥ प्रजा वै बर्हिः ॥ पृथिवी वेदिः ॥ प्रजा एव पृथिव्यां प्रतिष्ठापयति ॥ अनतिदृश्नꣳ स्तृणाति ॥ प्रजयैवैनं पशुभिरनतिदृश्नं करोति ॥ धारयन्प्रस्तरं परिधीन्प

५१

रिदधाति ॥ यजमानो वै प्रस्तरः ॥ यजमान एव तत्स्वयं परिधीन्परिदधाति ॥ गंधर्वोसि विश्वावसुरित्याह ॥ ८ ॥ विश्वमेवायुर्यजमाने दधाति ॥ इंद्रस्य बाहुरसि दक्षिण इत्याह ॥ इंद्रियमेव यजमाने दधाति ॥ मित्रावरुणौ त्वोत्तरतः परि[illegible]धत्तामित्याह ॥ प्राणापानौ मित्रावरुणौ ॥ प्राणापानावेवास्मिन्दधाति ॥ सूर्यस्त्वा पुरस्तात्पात्वित्याह ॥ रक्षसामपहत्यै ॥ कस्याश्चिदभिशस्त्या इत्याह ॥ अपरिमितादेवैनं पाति ॥ ९ ॥ वीतिहोत्रं त्वा कव इत्याह ॥ अग्निमेव होत्रेण समर्धयति ॥ द्युमन्तꣳ समिधीमहीत्याह समिध्यै ॥ अग्ने बृहन्तमध्वर इत्याह वृध्यै ॥ विशो यन्त्रे स्थ इत्याह ॥ विशां यत्यै ॥ उदीचीनाग्रे निदधाति प्रतिष्ठित्यै ॥ वसूनाꣳ रु

ब्रा०त्र०
४२

द्राणामादित्यानाꣳ सदसि सीदेत्याह ॥ देवतानामेव सदने प्रस्तरꣳ सादयति ॥ जुहूरसि घृताची नाम्नेत्याह ॥ १० ॥ असौ वै जुहूः ॥ अंतरिक्षमुपभृत् ॥ पृथिवी ध्रुवा ॥ तासामेतदेव प्रियं नाम ॥ यद्घृताचीति ॥ यद्घृताचीत्याह ॥ प्रियेणैवैना नाम्ना सादयति ॥ एता असदन्त्सुकृतस्य लोक इत्याह ॥ सत्यं वै सुकृतस्य लोकः ॥ सत्य एवैनाः सुकृतस्य लोके सादयति ॥ ता विष्णो पाहीत्याह ॥ यज्ञो वै विष्णुः ॥ यज्ञस्य धृत्यै ॥ पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियमित्याह ॥ यज्ञाय यजमानायात्मने ॥ तेभ्य एवाशिषमाशास्तेऽनार्त्यै ॥ ११ ॥ स्थेत्याह पृथिवी वेदिर्यतिकियते विष्णुर्व्वैर्यै संमितं करोत्याह पाति नाम्नेत्याह लोके सादयति षड् ॥ ५ ॥ ॥

अग्निना वै होत्रा ॥ देवा असुरानभ्यभवन् ॥ अग्नये समिध्यमानायानुब्रूहीत्याह भ्रातृव्याभिभूत्यै ॥ एकविꣳशतिमिध्मदारूणि भवन्ति ॥ एकविꣳशो वै पुरुषः ॥ पुरुषस्याप्त्यै ॥ पंचदशेध्मदारूण्यभ्यादधाति ॥ पंचदश वा अर्धमासस्य रात्रयः ॥ अर्धमासशः संवत्सर आप्यते ॥ त्रीन्परिधीन्परिदधाति ॥ ॥ १ ॥ ऊर्ध्वे समिधावादधाति ॥ अनूयाजेभ्यः समिधमतिशिनष्टि ॥ षट्संपद्यन्ते ॥ षड्वा ऋतवः ॥ ऋतूनेव प्रीणाति ॥ वेदेनोपवाजयति ॥ प्राजापत्यो वै वेदः ॥ प्राजापत्यः प्राणः ॥ यजमान आहवनीयः ॥ यजमान एव प्राणं दधाति ॥ २ ॥ त्रिरुपवाजयति ॥ त्रयो वै प्राणाः ॥ प्राणानेवास्मिन्दधाति ॥ वेदेनोपयत्य स्रुवेण प्राजापत्यमाघारमाघारयति ॥ यज्ञो वै प्रजापतिः ॥ यज्ञमेव प्रजापतिं मुखत आरभन्ते ॥ अथो प्रजापतिः सर्वा देवताः ॥ सर्वा एव देवताः प्रीणाति ॥

ब्रा०त०
४३

अग्निमग्नीत्त्रिस्त्रिः संमृड्ढीत्याह ॥ त्र्यावृद्धि यज्ञः ॥ ३ ॥ अथो रक्षसामपहत्यै ॥
परिधीन्त्संमार्ष्टि ॥ पुनात्येवैनान् ॥ त्रिस्त्रिः संमार्ष्टि ॥ त्र्यावृद्धि यज्ञः ॥ अथो मे
ध्यत्वाय ॥ अथो एते वै देवाश्वाः ॥ देवाश्वानेव तत्संमार्ष्टि ॥ सुवर्गस्य लोकस्य
समष्ट्यै ॥ आसीनोन्यमाघारमाघारयति ॥ ४ ॥ तिष्ठन्नन्यं ॥ यथानो वा र
थं वा युंज्यात् ॥ एवमेव तदध्वर्युर्यज्ञं युनक्ति ॥ सुवर्गस्य लोकस्याभ्यूढ्यै ॥
वहंत्येनं ग्राम्याः पशवः ॥ य एवं वेद ॥ भुवनमसि विप्रथस्वेत्याह ॥ यज्ञो वै भु
वनं ॥ यज्ञ एव यजमानं प्रजया पशुभिः प्रथयति ॥ अग्ने यष्टरिदं नम इत्याह ॥
॥ ५ ॥ अग्निर्वै देवानां यष्टा ॥ य एव देवानां यष्टा ॥ तस्मा एव नमस्करोति ॥
जुह्वेह्यग्निस्त्वा ह्वयति देवयज्यायाउपभृदेहि देवस्त्वा सविता ह्वयति देव

९

४३

यज्यायाइत्याह ॥ आग्नेयी वै जुहूः ॥ सावित्र्युपभृत् ॥ ताभ्यामेवैने प्रसूत आदत्ते ॥ अ
ग्नाविष्णू मा वामवक्रमिषमित्याह ॥ अग्निः पुरस्तात् ॥ विष्णुर्यज्ञः पश्चात् ॥ ६ ॥
ताभ्यामेव प्रतिप्रोच्यात्याक्रामति ॥ विजिहाथां मा मा संताप्तमित्याहाहिंसायै ॥
लोकं मे लोककृतौ कृणुतमित्याह ॥ आशिषमेवैतामाशास्ते ॥ विष्णोः स्थानम
सीत्याह ॥ यज्ञो वै विष्णुः ॥ एतत्खलु वै देवानामपराजितमायतनं ॥ यद्यज्ञः ॥
देवानामेवापराजित आयतने तिष्ठति ॥ इत इन्द्रो अकृणोद्वीर्याणीत्याह ॥ ७ ॥
इंद्रियमेव यजमाने दधाति ॥ समारभ्योर्ध्वो अध्वरो दिविस्पृशमित्याह वृध्यै ॥
आघारमाघार्यमाणमनुसमारभ्य ॥ एतस्मिन्काले देवाः सुवर्गं लोकमायन् ॥
साक्षादेव यजमानः सुवर्गं लोकमेति ॥ अथो समृद्धेनैव यज्ञेन यजमानः सु

ब्रा०तृ० ४४ | १०

वर्गं लोकमेति॥ अङ्कुतो यज्ञो यज्ञपतेरित्याहानार्त्यै॥ इन्द्रावान्त्स्वाहेत्याह॥
इन्द्रियमेव यजमाने दधाति॥ बृहद्भा इत्याह॥ ८॥ सुवर्गो वै लोको बृहद्भाः॥
सुवर्गस्य लोकस्य समष्ट्यै॥ यजमानदेवत्या वै जुहूः॥ भ्रातृव्यदेवत्योपभृत्॥
प्राण आघारः॥ यत्संस्पर्शयेत्॥ भ्रातृव्येस्य प्राणं दध्यात्॥ असंस्पर्शय
न्नत्याक्रामति॥ यजमान एव प्राणं दधाति॥ पाहि माग्ने दुश्चरिताद्दामा सु
चरिते भजेत्याह॥ ९॥ अग्निर्वावपवित्रं॥ वृजिनमनृतं दुश्चरितं॥ ऋजुक
र्मं सत्यं सुचरितं॥ अग्निरेवैनं वृजिनादनृताद्दुश्चरितात्पाति॥ ऋजुक
र्मे सत्ये सुचरिते भजति॥ तस्मादेवमाशास्ते॥ आत्मनो गोपीथाय॥ शिरो
वा एतद्यज्ञस्य॥ यदाघारः॥ आत्मा ध्रुवा॥ १०॥ आघारमाघार्य ध्रुवां समन

४४

क्ति॥ आत्मन्नेव यज्ञस्य शिरः प्रतिदधाति॥ द्विः समनक्ति॥ द्वौ हि प्राणापानौ॥
तदाहुः॥ त्रिरेव समञ्ज्यात्॥ त्रिधा तु हि शिर इति॥ शिर इव वै तद्यज्ञस्य॥ अथो
त्रयो वै प्राणाः॥ प्राणानेवास्मिन्दधाति॥ मखस्य शिरोसि संज्योतिषा ज्यो
तिरङ्क्तामित्याह॥ ज्योतिरेवास्मा उपरिष्टाद्दधाति॥ सुवर्गस्य लोकस्या
नुख्यात्यै॥ ११॥ परिदधाति प्राणं दधाति हि यज्ञो घारयति नमइत्याहप
श्चाहीर्याणीत्याह भारत्या भजेत्याह ध्रुवे वास्मिन्दधाति त्रीणिच॥ ७॥
धिष्णिया वा एते न्युप्यन्ते॥ यद्ब्रह्मा॥ यद्धोता॥ यदध्वर्युः॥ यद्यजमानः॥
तान्यदन्तरेयात्॥ यजमानस्य प्राणान्त्संकर्षेत्॥ प्रमा× यदग्नीत्॥ यु
कस्यात्॥ पुरोडाशमपगृह्य संचरत्यध्वर्युः॥ १॥ यजमानायैव तद्धो

कंꣳ शिंꣳषति॥ नास्य प्राणान्त्संकर्षति॥ न प्रमायुको भवति॥ पुरस्तात्प्रत्यङ्ङा
सीनः॥ इडाया इडामादधाति॥ हस्त्यांꣳ होत्रे॥ पशवो वा इडा॥ पशवः पुरुषः॥
पशुष्वेव पशून्प्रतिष्ठापयति॥ इडायै वा एषा प्रजातिः॥ २ ॥ तां प्रजातिं यजमा
नोनुप्रजायते॥ द्विरंगुलावनक्ति पर्वणोः॥ द्विपाद्यजमानः प्रतिष्ठित्यै॥ स
कृदुपस्तृणाति॥ द्विरादधाति॥ सकृदभिघारयति॥ चतुः संपद्यते॥ चत्वा
रि वै पशोः प्रतिष्ठानानि॥ यावानेव पशुः॥ तमुपह्वयते॥ ३ ॥ मुखमिव प्र
त्युपह्वयेत॥ संमुखानेव पशूनुपह्वयते॥ पशवो वा इडा॥ तस्मात्सान्वा
रभ्या॥ अध्वर्युणा च यजमानेन च॥ उपहूतः पशुमानसानीत्याह॥ उपहूते

नो ह्वयते होता॥ इडायै देवतानामुपहवे॥ उपहूतः पशुमान्भवति॥ य एवं वे

द॥ ४ ॥ यां वै हस्त्यामिडामादधाति॥ वाचः सा भागधेयं॥ यामुपह्वयते॥ प्राणानांꣳ
सा॥ वाचं चैव प्राणांꣳश्चावरुंधे॥ अथ वा एतर्ह्युपहूतायामिडायां॥ पुरोडाशस्यै
व बर्हिषदो मीमांꣳसा॥ यजमानं देवा अब्रुवन्॥ हविर्नो निर्वपेति॥ नाहमभागोनि
र्वप्स्यामीत्यब्रवीत्॥ ५ ॥ न मयाभागयानुवक्ष्यथेति वागब्रवीत्॥ नाहमभागा
पुरोनुवाक्या भविष्यामीति पुरोनुवाक्या॥ नाहमभागायाज्या भविष्यामीति या
ज्या॥ न मयाभागेन वषट्करिष्यथेति वषट्कारः॥ यद्यजमानभागं निधाय पु

रोडाशं बर्हिषदं करोति॥ ताने व तद्भागिनः करोति॥ चतुर्धा करोति॥ चतस्रो दिशः॥ दि
क्ष्वेव प्रतितिष्ठति॥ बर्हिषदं करोति॥ ६ ॥ यजमानो वै पुरोडाशः॥ प्रजा बर्हिः॥
यजमानमेव प्रजासु प्रतिष्ठापयति॥ तस्माद्यस्थान्याः प्रजाः प्रतितिष्ठंति॥ मांꣳ

ब्रा०त०
५६

सेनान्याः॥ अथो खल्वाहुः॥ दक्षिणा वा एता हविर्यज्ञस्यांतर्वेद्यंतर्वेद्येवावरुध्यंते॥ ॥ १२ ॥
यत्पुरोडाशं बर्हिषदं करोतीति॥ चतुर्धा करोति॥ चत्वारो ह्येते हविर्यज्ञस्यर्त्वि
जः॥ ७ ॥ ब्रह्मा होताध्वर्युरग्नीत्॥ तमभिमृशेत्॥ इदं ब्रह्मणः॥ इदं होतुः॥
इदमध्वर्योः॥ इदमग्नीध इति॥ यथैवादः सौम्येऽध्वरे॥ आदेशमृत्विग्भ्यो दक्षि
णा नीयंते॥ तादृगेव तत्॥ अग्नीधे प्रथमायादधाति॥ ८ ॥ अग्निमुखा ह्यृद्धिः॥
२ अग्निमुखामेवर्द्धिं यजमान ऋध्नोति॥ सकृदुपस्तीर्य द्विरादधत्॥ उपस्तीर्य
द्विरभिघा[illegible]रयति॥ षट् संपद्यंते॥ षड्वा ऋतवः॥ ऋतूनेव प्रीणाति॥ वेदेन
ब्रह्मणे ब्रह्मभागं परिहरति॥ प्राजापत्यो वै वेदः॥ प्राजापत्यो ब्रह्मा॥ ९ ॥ स
विता यज्ञस्य प्रसूत्यै॥ अथ काममन्येन॥ ततो होत्रे॥ मध्यं वा एतद्यज्ञस्य॥ यद्धो ५६

ता॥ मध्यत एव यज्ञं प्रीणाति॥ अथाध्वर्यवे॥ प्रतिष्ठा वा एषा यज्ञस्य॥ यदध्वर्युः॥
तस्माद्धविर्यज्ञस्यैतामेवावृतमनु॥ १० ॥ अन्या दक्षिणा नीयंते॥ यज्ञस्य प्रति
ष्ठित्यै॥ अग्निमग्नीत्सकृत्सकृत्संमृड्ढीत्याह॥ पराङिव ह्येतर्हि यज्ञः॥ इषि
ता दैव्या होतार इत्याह॥ इषितं हि कर्म क्रियते॥ भद्रवाच्याय प्रेषितो मानु
षः सूक्तवाकाय सूक्ता ब्रूहीत्याह॥ आशिषमेवैतामाशास्ते॥ स्वगा दैव्या
होतृभ्य इत्याह॥ यज्ञमेव तत्स्वगाकरोति॥ स्वस्तिर्मानुषेभ्य इत्याह॥ आ
शिषमेवैतामाशास्ते॥ शंयोर्ब्रूहीत्याह॥ शंयुमेव बार्हस्पत्यं भागधेयेन
समर्धयति॥ ११ ॥ चरत्यध्वर्युः प्रजातिर्ह्ययंते वेदो ब्रवीद्बर्हिषदं करोत्य
त्विजो दधाति ब्रह्मानु करोति चत्वारि च॥ ८ ॥ अथ स्रुचावनुष्टुग्भ्यां वाजव

तीभ्यां व्यूहति ॥ प्रतिष्ठा वा अनुष्टुक् ॥ अन्नं वा ऊँर्जः प्रतिष्ठित्यै ॥ अन्नाद्यस्यावरुध्यै ॥
प्राचीं जुहूमूहति ॥ जातानेव भ्रातृव्यान्प्रणुदते ॥ प्रतीचीमुपभृतं ॥ जनिष्यमाणानेव
प्रतिनुदते ॥ सविषूच एवापोह्य सपत्नान्यजमानः ॥ अस्मिन्लोके प्रतितिष्ठति ॥ १ ॥
द्वाभ्यां ॥ द्विप्रतिष्ठो हि ॥ वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वेत्याह ॥ यथायजुरेवैतत् ॥
स्रुक्षु प्रस्तरमनक्ति ॥ इमे वै लोकाः स्रुचः ॥ यजमानः प्रस्तरः ॥ यजमानमेव तेजसा
नक्ति ॥ त्रेधानक्ति ॥ त्रय इमे लोकाः ॥ २ ॥ एभ्य एवैनं लोकेभ्योनक्ति ॥ अभिपूर्व
मनक्ति ॥ अभिपूर्वमेव यजमानं तेजसानक्ति ॥ अक्तुं रिहाणा इत्याह ॥ तेजो वा
आज्यं ॥ यजमानः प्रस्तरः ॥ यजमानमेव तेजसानक्ति ॥ वियंतु वय इत्याह ॥ वय ए
वैनं कृत्वा ॥ सुवर्गं लोकं गमयति ॥ ३ ॥ प्रजां योनिं मा निर्मृक्षमित्याह ॥ प्रजायै

गोपीथाय ॥ आप्यायंतामाप ओषधय इत्याह ॥ आप एवौषधीराप्याययति ॥ मरु
तां पृषतय स्थेत्याह ॥ मरुतो वै वृष्ट्या ईशते ॥ वृष्टिमेवावरुंधे ॥ दिवं गच्छ ततो नो वृ
ष्टिमेरयेत्याह ॥ वृष्टिर्वै द्यौः ॥ वृष्टिमेवावरुंधे ॥ ४ ॥ यावद्वा अध्वर्युः प्रस्तरं प्रहर
ति ॥ तावदस्यायुर्मीयते ॥ आयुष्पा अग्नेस्यायुर्मे पाहीत्याह ॥ आयुरेवात्मं धत्ते ॥
यावद्वा अध्वर्युः प्रस्तरं प्रहरति ॥ तावदस्य चक्षुर्मीयते ॥ चक्षुष्पा अग्नेसि चक्षुर्मे
पाहीत्याह ॥ चक्षुरेवात्मं धत्ते ॥ ध्रुवासीत्याह प्रतिष्ठित्यै ॥ यं परिधिं पर्यधत्था इ
त्याह ॥ ५ ॥ यथायजुरेवैतत् ॥ अग्ने देवपणिभिर्वीयमाण इत्याह ॥ अग्ने यए
वैनं जुष्टं करोति ॥ तं त एतमनु जोषं भरामीत्याह ॥ सजातानेवास्मा अनुकान्करो
ति ॥ नेदेष त्वदपचेतयाता इत्याह ॥ अनुख्यात्यै ॥ यज्ञस्य पाथ उप समितमित्याह ॥

ब्रा०त०
५८

१४

भूमानमेवोपैति॥ परिधीन्प्रहरति॥ यज्ञस्य समिष्ट्यै॥ ६॥ स्रुचौ संप्रस्रावयति॥
यदेव तत्र क्रूरं॥ तत्तेन शमयति॥ जुह्वामुपभृतं॥ यजमानदेवत्या वै जुहूः॥ भ्रा
तृव्यदेवत्योपभृत्॥ यजमानायैव भ्रातृव्यमुपस्तिं करोति॥ सं स्रावभागा
स्थेत्याह॥ वसवो वै रुद्रा आदित्याः सं स्रावभागाः॥ तेषां तद्भागधेयं॥ ७॥
तानेव तेन प्रीणाति॥ वैश्वदेव्यर्चा॥ एते हि विश्वे देवाः॥ त्रिष्टुग्भवति॥ इंद्रियं
वै त्रिष्टुक्॥ इंद्रियमेव यजमाने दधाति॥ अग्नेर्वामपन्नगृहस्य सदसि सा
दयामीत्याह॥ इयं वा अग्निरपन्नगृहः॥ अस्या एवैने सदने सादयति॥
सुम्नाय सुम्निनी सुम्ने माधत्तमित्याह॥ ८॥ प्रजा वै पशवः सुम्नं॥ प्रजा
मेव पशूनात्मन्धत्ते॥ धुरि धुर्यौ पातमित्याह॥ जायापत्योर्गोपीथाय॥ अग्ने

५८

दब्धायोऽशीततनो इत्याह॥ यथायजुरेवैतत्॥ पाहि माद्य दिवः पाहि प्रसित्यै पा
हि दुरिष्ट्यै पाहि दुरद्मन्यै पाहि दुश्चरितादित्याह॥ आशिषमेवैतामाशास्ते॥
अविषन्नः पितुं कृणु सुषदा योनिं स्वाहेतीध्मसंव्रश्चनान्यन्वाहार्यपचने
ऽभ्याधाय फलीकरणहोमं जुहोति॥ अतिरिक्तानि वा इध्मसंव्रश्चनानि॥ ९॥
अतिरिक्ताः फलीकरणाः॥ अतिरिक्तमाज्योच्छेषणं॥ अतिरिक्त एवाति
रिक्तं दधाति॥ अथो अतिरिक्तेनैवातिरिक्तमाप्त्वावरुंधे॥ वेदिर्देवेभ्यो नि
लायत॥ तां वेदेनान्वविंदन्॥ वेदेन वेदिं विविदुः पृथिवीं॥ सा पप्रथे पृथिवी
पार्थिवानि॥ गर्भं बिभर्ति भुवनेष्वंतः॥ ततो यज्ञो जायते विश्वदानिरिति पुर
स्तात्स्तंबयजुषो वेदेन वेदिं संमार्ष्ट्यनुवित्त्यै॥ १०॥ अथो यद्व्रश्च्यं बर्हिश्च

ब्रा॰ त॰
४९

१५

भवतः॥ मिथुनत्वाय प्रजात्यै॥ प्रजापतेर्वा एतानि श्मश्रूणि॥ यद्वेदः॥ पत्निया
उपस्थ आस्यति॥ मिथुनमेव करोति॥ विंदते प्रजां॥ वेदं होता देवनी यात्स्त
णं नेति॥ यज्ञमेव तत्संतनोत्योत्तरस्मादर्धमासात्॥ तं संततमुत्तरेर्धमास
आलभते॥ ११ ॥ तं काले काल आगते यजते॥ ब्रह्मवादिनो वदंति॥ स त्वा अ
ध्वर्युः स्यात्॥ यो यतो यज्ञं प्रयुंक्ते॥ तदेनं प्रतिष्ठापयतीति॥ वाता द्वा अध्वर्यु
र्यज्ञं प्रयुंक्ते॥ देवा गातुविदो गातुं वित्वा गातुमितेत्याह॥ यत एव यज्ञं प्रयुंक्ते॥
तदेनं प्रतिष्ठापयति॥ प्रतितिष्ठति प्रजया पशुभिर्यजमानः॥ १२ ॥ तिष्ठती
मे लोका गमयति द्यौ र्वृष्टिमेवावरुंधे पर्यधत्था इत्याह सम्मित्यै भागधेयं धत्त
मित्याह वा इध्मसंनह्नान्यनुविंदेल्लभते यजमानः॥ ९ ॥ ॥ यो वा अय

४९

भा देवतं यज्ञमुपचरति॥ आ देवताभ्यो वृश्च्यते॥ पापीयान्भवति॥ यो यथा देव
तं॥ न देवताभ्य आ वृश्च्यते॥ वसीयान्भवति॥ वारुणो वै पाशः॥ इमं विष्यामि
वरुणस्य पाशमित्याह॥ वरुणपाशादेवैनां मुंचति॥ सवितृप्रसूतो यथा देव
तं॥ १ ॥ न देवताभ्य आ वृश्च्यते॥ वसीयान्भवति॥ धातुश्च योनौ सुकृत
स्य लोक इत्याह॥ अग्निर्वै धाता॥ पुण्यं कर्म सुकृतस्य लोकः॥ अग्निरेवैनां
धाता॥ पुण्ये कर्मणि सुकृतस्य लोके दधाति॥ स्योनं मे सह पत्या करोमीत्या
ह॥ आत्मनश्च यजमानस्य चानार्त्यै संत्वाय॥ समायुषा सं प्रजयेत्याह॥
॥ २ ॥ आशिषमेवैतामाशास्ते पूर्णपात्रे॥ अंततोनुष्टुभा॥ चतुष्पद्वा एत
छंदः प्रतिष्ठितं पत्नियै पूर्णपात्रे भवति॥ अस्मिन्लोके प्रतितिष्ठानीति॥

ब्रा०तृ० ५०

अस्मिन्नेव लोके प्रतितिष्ठति ॥ अथो वाग्वा अनुष्टुप् ॥ वाङ्मिथुनं ॥ आपो रेतः
प्रजननं ॥ एतस्माद्वै मिथुनाद्विद्युन्नाद्विद्योतमानस्तनयन्वर्षति ॥ रेतः सिं
चन् ॥ ३ ॥ प्रजाः प्रजनयन् ॥ यद्वै यज्ञस्य ब्रह्मणा युज्यते ॥ ब्रह्मणा वै तस्य
विमोकः ॥ अद्भिः शांतिः ॥ विमुक्तं वा एतर्हि योक्त्रं ब्रह्मणा ॥ आदायैनत्प
त्नीसहापउपगृह्णीतिशांत्यै ॥ अंजलौ पूर्णपात्रमानयति ॥ रेत एवास्यां
प्रजां दधाति ॥ प्रजया हि मनुष्यः पूर्णः ॥ मुखं विमृष्टे ॥ अवभृथस्येव रू
पं कृत्वोत्तिष्ठति ॥ ४ ॥ सवितृप्रसूता यथादेवतं प्रजयेत्याह सिंचन्मध्व
एकं च ॥ १० ॥ ॥ परिवेषो वा एष वनस्पतीनां ॥ यदुपवेषः ॥ य एवं वेद ॥

१६ ५०

विंदते परिवेष्टारं ॥ तमुत्करे ॥ यं देवा मनुष्येषु ॥ उपवेषमधारयन् ॥ ये अस्म
दपचेतसः ॥ तानस्मभ्यमिहाकुरु ॥ उपवेषोपविद्धिनः ॥ १ ॥ प्रजां पुष्टि
मथो धनं ॥ द्विपदो नश्चतुष्पदः ॥ ध्रुवानन पगान्कुर्विति पुरस्तात्प्रत्यंच
मुपगूहति ॥ तस्मात्पुरस्तात्प्रत्यंचः क्षुद्रा अवस्यंति ॥ स्तब्धिमत उपगूह
ति ॥ अप्रतिवादिन एवैनान्कुरुते ॥ धृष्टिर्वा उपवेषः ॥ शुचं तोवज्रो ब्रह्मणा
संशितः ॥ योपवेषे शुक् ॥ सामुमृच्छतु यं द्विष्म इति ॥ २ ॥ अथास्मिन्ना
मगृह्यप्रहरति ॥ निरमुन्नुद ओकसः ॥ सपत्नो यः पृतन्यति ॥ निर्बाध्येन
हविषा ॥ इंद्र एणं पराशरीत् ॥ इहि तिस्रः परावतः ॥ इहि पंच जनाँ अति ॥
इहि तिस्रोति रोचना यावत् ॥ सूर्यो असद्दिवि ॥ परमां त्वा परावतं ॥ ३ ॥

म

इंद्रेणैनयत्तु वृत्रहा॥ भ्यतोनपुनरायसि॥ शाश्वतीभ्यः समाभ्य इति॥ त्रिर द्वा
एषवज्रोब्रह्मणासंशितः॥ शुंचैवैनं विध्या॥ एभ्यो लोकेभ्योनिर्णुदा॥ व
ज्रेण ब्रह्मणास्तृणुते॥ हतोसाववधिष्मामुमित्याहस्तृत्यै॥ यंद्विष्या
त्तंध्यायेत्॥ शुंचैवैनमर्पयति॥ ४ ॥ नोद्विष्मइतिपरावतमर्पय
ति॥ ११ ॥ ॥ प्रस्तुष्टंदिवःशिल्पमयज्ञोघृतंचवैदेवासु
राः सएतमिंड्आपोदेवीरग्रेग्निनाधिष्णियाअथस्तुचोयोवाअ
यथादेवतंपरिविषोवाएकादश॥ १२ ॥ ॥ प्रस्तुष्टमयज्ञएषाहिवि
श्वेषांदेवानामूर्जापृथिवीमथोरक्षसांतांप्रजातिंद्वाभ्यांतंकालेकालेनव
सततिः॥ ७९ ॥ ॥ श्रीसांबसदाशिवार्पणमस्तु॥ ७ ॥ श्री॥

हरिः ॐम्॥ ॥ब्रह्मणेब्राह्मणमालभते॥ क्षत्रायराजन्यं॥ मरुद्भ्योवैश्यं॥
तपसेशूद्रं॥ तमसेतस्करं॥ नारकायवीरहणं॥ पाप्मनेक्लीबं॥ आक्रया
यायोगूं॥ कामायपुंश्चलूं॥ अतिक्रुष्टायमागधं॥ १ ॥ गीतायसूतं॥ नृ
त्तायशैलूषं॥ धर्मायसभाचरं॥ नर्मायरेभं॥ नरिष्ठायैभीमलं॥ हसायका
रिं॥ आनंदायस्त्रीषखं॥ प्रमुदेकुमारीपुत्रं॥ मेधायैरथकारं॥ धैर्याय
तक्षाणं॥ २ ॥ श्रमायकौलालं॥ मायायैकार्मारं॥ रूपायमणिकारं॥
शुभेवपं॥ शरव्यायाइषुकारं॥ हेत्यैधन्वकारं॥ कर्मणेज्याकारं॥ दि
ष्टायरज्जुसर्जं॥ मृत्यवेमृगयुं॥ अंतकायश्वनितं॥ ३ ॥ संधयेजारं॥
गेहायोपपतिं॥ निर्ऋत्यैपरिवित्तं॥ आर्त्यैपरिविविदानं॥ अराध्यै

ब्रा०न०६
५२

दिधिषूपतिं॥पवित्राय भिषजं॥ प्रज्ञानाय नक्षत्रदर्शं॥निष्कृत्यै पेशस्कारीं॥ बलायोपदां॥ वर्णायानूरुधं॥ ४॥ नदीभ्यः पौंजिष्टं॥ ऋक्षीकाभ्यो नैषादं॥ पुरुषव्याघ्राय दुर्मदं॥ प्रयुग्भ्य उन्मत्तं॥ गंधर्वाप्सराभ्यो व्रात्यं॥ सर्पदेवजनेभ्यो प्रतिपदं॥ अवेभ्यः कितवं॥ इर्यताया अकितवं॥ पिशाचेभ्यो बिदलकारं॥ यातुधानेभ्यः कंटककारं॥ ५॥ उत्सादेभ्यः कुब्जं॥ प्रमुदे वामनं॥ द्वार्भ्यः स्रामं॥ स्वप्नायांधं॥ अधर्माय बधिरं॥ संज्ञानाय स्मरकारीं॥ प्रकामोद्यायोपसदं॥ आशिक्षायै प्रश्निनं॥ उपशिक्षाया अभिप्रश्निनं॥ मर्यादायै प्रश्नविवाकं॥ ६॥ ऋत्यै स्तेनहृदयं॥ वैरहत्याय पिशुनं॥ विविक्त्यै क्षत्तारं॥ औपद्रष्ट्याय संग्रहीतारं॥ बला

५२

यानुचरं॥ भूम्ने परिष्कंदं॥ प्रियाय प्रियवादिनं॥ अरिष्ट्या अश्वसादं॥ मेधाय वासःपल्पूलीं॥ प्रकामाय रजयित्रीं॥ ७॥ भायै दार्वाहारं॥ प्रभाया आग्नेंधं॥ नाकस्य पृष्ठायाभिषेक्तारं॥ ब्रध्नस्य विष्टपाय पात्रनिर्णेगं॥ देवलोकाय पेशितारं॥ मनुष्यलोकाय प्रकरितारं॥ सर्वेभ्यो लोकेभ्य उपसेक्तारं॥ अवर्त्यै वधायोपमंथितारं॥ सुवर्गाय लोकाय भागदुघं॥ वर्षिष्ठाय नाकाय परिवेष्टारं॥ ८॥ अर्मेभ्यो हस्तिपं॥ जवायाश्वपं॥ पुष्ट्यै गोपालं॥ तेजसे अजपालं॥ वीर्यायाविपालं॥ इरायै कीनाशं॥ कीलालाय सुराकारं॥ भद्राय गृहपं॥ श्रेयसे वित्तधं॥ अध्यक्षायानुक्षत्तारं॥ ९॥ मन्यवे अयस्तापं॥ क्रोधाय निसरं॥ शोकायाभिसरं॥

सा

श्री०व०४ उत्कूलविकूलाभ्यांत्रिस्थिनं॥योगाययोक्तारं॥क्षेमायविमोक्तारं॥वपुषेमान २
५३ स्कृतं॥शीलायांजनीकारं॥निर्ऋत्यैकोशकारीं॥यमायासूं॥ १०॥यम्यैयमसूं॥अ
थर्वभ्योवतोकां॥संवत्सरायपर्यायिणीं॥परिवत्सरायाविजातां॥इदावत्सरायाप
स्कद्वरीं॥इद्वत्सरायातीत्वरीं॥वत्सरायविजर्जरां॥संवत्सरायपलिक्नीं॥वना
यवनपं॥अन्यतोरण्यायदावपं॥ ११॥सरोभ्योधैवरं॥वेशंताभ्योदाशं॥उपस्था
रीभ्योबैंदं॥नडुलाभ्यःशौष्कलं॥पार्यायकैवर्त्तं॥अवार्यायमार्गारं॥तीर्थेभ्यआं
दं॥विषमेभ्योमैनालं॥स्वनेभ्यःपर्णकं॥गुहाभ्यःकिरातं॥सानुभ्योजंभकं॥
पर्वतेभ्यःकिंपूरुषं॥ १२॥प्रतिश्रुत्कायाऋतुलं॥घोषायभषं॥अंतायबहुवा ५३
दिनं॥अनंतायमूकं॥महसेवीणावादं॥क्रोशायतूणवध्मं॥आक्रंदायदुंदु
भ्याघातं॥अवरस्परायशंखध्मं॥ऋभुभ्योजिनसंधायं॥साध्येभ्यश्चर्मम्नं॥ १३॥

बीभत्सायैपौल्कसं॥भूत्यैजागरणं॥अभूत्यैस्वपनं॥तुलायैवाणिजं॥वर्णायहिर
ण्यकारं॥विश्वेभ्योदेवेभ्यःसिध्मलं॥पश्चाद्दोषायग्लावं॥ऋत्यैजनवादिनं॥व्यृध्या
अपगल्भं॥संशरायप्रछिदं॥ १४॥हसायपुंश्चलूमालभते॥वीणावादंगणकं
गीताय॥यादसेशाबुल्यां॥नर्मायभद्रवतीं॥तूणवध्मंग्रामण्यंपाणिसंघातंनृ
त्ताय॥मोदायानुक्रोशकं॥आनंदायतलवं॥अक्षराजायकितवं॥कृतायसभावि
नं॥त्रेतायाआदिनवदर्शं॥ १५॥द्वापरायबहिःसदं॥कलयेसभास्थाणुं॥दुष्कृ
तायचरकाचार्यं॥अध्वनेब्रह्मचारिणं॥पिशाचेभ्यःसैलगं॥पिपासायैगोव्यछं॥ गो
निर्ऋत्यैगोघातं॥क्षुधेगोविकर्त्तं॥क्षुत्तृष्णाभ्यांतं॥योगांविकृंततंमांसंभि
क्षमाणउपतिष्ठते॥ १६॥भूम्यैपीवसर्पिणमालभे॥अग्नयेंसलं॥वायवेचां
डालं॥अंतरिक्षायवंशनर्त्तिनं॥दिवेखलतिं॥सूर्यायहर्यक्षं॥चंद्रमसेमि

आ॰ तै॰ ४
५४

र्मिरं ॥ नक्षत्रेभ्यः किलासं ॥ अन्हे शुक्लं पिंगलं ॥ रात्रिये कृष्णं पिंगाक्षं ॥ १७ ॥ वा
चे पुरुषमालभते ॥ प्राणमपानं व्यानमुदानं समानं तान्वायवे ॥ सूर्याय
चक्षुरालभते ॥ मनश्चंद्रमसे ॥ दिग्भ्यः श्रोत्रं ॥ प्रजापतये पुरुषं ॥ १८ ॥ अ
थैतान रूपेभ्य आलभते ॥ अतिह्रस्वमतिदीर्घं ॥ अतिकृशमत्यंसलं ॥ अ
तिशुक्लमतिकृष्णं ॥ अतिश्लक्ष्णमतिलोमशं ॥ अतिकिरिटमतिदंतुरं ॥
अतिमिर्मिरमतिमेमिषं ॥ आशायै जामिं ॥ प्रतीक्षायै कुमारीं ॥ १९ ॥
ब्रह्मणे गीताय श्रमाय संधये नदीभ्य उत्सादेभ्य ऋत्व्ये भार्या अर्मेभ्यो मन्य
वे यम्ये दश दश सरोभ्यो द्वादश प्रतिश्रुत्कायै बीभत्सायै दश दश हसाय स
प्ताक्षराजाय त्रयोदश भूम्यै दश वाचे षउथनं वैकान्नविंशतिः ॥ १९ ॥ ५४
ब्रह्मणे यम्यै नव दश ॥ १९ ॥ श्रीगजाननार्पणमस्तु ॥ ॥ ॐम् ॥

हरिः ओम् ॥ ॥ सत्यं प्रपद्ये ॥ ऋतं प्रपद्ये ॥ अमृतं प्रपद्ये ॥ प्रजापतेः प्रियां तनु
वमनार्त्तां प्रपद्ये ॥ इदमहं पंचदशेन वज्रेण ॥ द्विषंतं भ्रातृव्यमवक्रामामि ॥
योस्मान्द्वेष्टि ॥ यं च वयं द्विष्मः ॥ भूर्भुवः सुवः ॥ हिं ॥ १ ॥ सत्यं दश ॥ १ ॥ प्रवो
वाजा अभिद्यवः ॥ हविष्मंतो घृताच्या ॥ देवांजिगाति सुम्नयुः ॥ अग्न आ
याहि वीतये ॥ गृणानो हव्य दातये ॥ निहोता सत्सि बर्हिषि ॥ तं त्वा समिद्भि
रंगिरः ॥ घृतेन वर्धयामसि ॥ बृहच्छोचा यविष्ठ्य ॥ सनः पृथु श्रवाय्यं ॥ १ ॥
अच्छा देव विवाससि ॥ बृहदग्ने सुवीर्यं ॥ ईडेन्यो नमस्यः स्तिरः ॥ तमां
सि दर्शतः ॥ समग्निरिध्यते वृषा ॥ वृषो अग्निः समिध्यते ॥ अश्वो न दे
ववाहनः ॥ तं हविष्मंत ईडते ॥ वृषणं त्वा वयं वृषन् ॥ वृषाणः समिधीम

ब्रा०नृ०५

५५

हि॥ २ ॥अग्ने दीद्यतं बृहत्॥ अग्निं दूतं वृणीमहे॥ होतारं विश्ववेदसं॥ अस्य
यज्ञस्य सुक्रतुं॥ समिध्यमानो अध्वरे॥ अग्निः पावक ईड्यः॥ शोचिष्केश
स्तमीमहे॥ समिद्धो अग्न आहुत॥ देवान्यक्षि स्वध्वर॥ त्वं हि हव्यवाड
सि॥ आजुहोत दुवस्यत॥ अग्निं प्रयत्यध्वरे॥ वृणीध्वं हव्यवाहनं॥
त्वं वरुण उत मित्रो अग्ने॥ त्वां वर्धंति मतिभिर्वसिष्ठाः॥ त्वे वसु सु
षणनानि संतु॥ यूयं पात स्वस्तिभिः सदा नः॥ ३ ॥अवाच्यमिध्मिमूह्य
सिसमत्र॥ २ ॥अग्ने महाँ असि ब्राह्मण भारत॥ असावसौ॥ देवेद्धो
मन्विद्धः॥ ऋषिष्टुतो विप्रानुमदितः॥ कविशस्तो ब्रह्म संशितो घृताह
वनः॥ प्रणीर्यज्ञानां॥ रथीरध्वराणां॥ अतूर्तो होता॥ तूर्णिर्हव्यवाट्॥

१

५

आस्पात्रं जुहूर्देवानां॥ १ ॥चमसो देवपानः॥ अराँ इवाग्ने नेमिर्देवाँस्त्वं
परिभूरसि॥ आवह देवान्यजमानाय॥ अग्निमग्न आवह॥ सोममावह॥
अग्निमावह॥ प्रजापतिमावह॥ अग्नीषोमावावह॥ इंद्राग्नी आवह॥
इंद्रमावह॥ महेंद्रमावह॥ देवाँ आज्यपाँ आवह॥ अग्निं होत्रायावह॥
स्वं महिमानमावह॥ आचाग्ने देवान्वह॥ सुयजा च यज जातवेदः॥ २॥
देवानामिंद्रमावह षट् च॥ ३ ॥अग्निर्होता वेत्वग्निः॥ होत्रं वेत्तु प्रावित्रं॥
स्मो वयं॥ साधु ते यजमान देवता॥ घृतवतीमध्वर्यो स्रुचमास्यस्व॥ देवा
युवं विश्ववारां॥ ईडामहै देवाँ ईडेन्यान्॥ नमस्याम नमस्यान्॥ यजा
म यज्ञियान्॥ १ ॥अग्निर्होतानव॥ ४ ॥ समिधो अग्न आज्यस्य

म

ब्रा०त०५
५८

वियंतु॥ तनूनपादग्नआज्यस्यवेतु॥ इडोअग्नआज्यस्यवियंतु॥ बर्हि
रग्नआज्यस्यवेतु॥ स्वाहाग्निं॥ स्वाहासोमं॥ स्वाहाग्निं॥ स्वाहाप्रजाप
तिं॥ स्वाहाग्नीषोमौ॥ स्वाहेंद्राग्नी॥ स्वाहेंद्रं॥ स्वाहामहेंद्रं॥ स्वाहादेवाँ
आज्यपानू॥ स्वाहाग्निँ होत्राज्जुषाणाः॥ अग्नआज्यस्यवियंतु॥
॥१॥ इंद्राग्नीपंचच॥ ५॥ अग्निर्वृत्राणिजंघनत्॥ द्रविणस्युर्विपन्यया॥
समिद्धः शुक्रआहुतः॥ जुषाणोअग्निराज्यस्यवेतु॥ त्वँ सोमासि
सत्पतिः॥ त्वँ राजोतवृत्रहा॥ त्वंभद्रोअसिक्रतुः॥ जुषाणः सोमआज्य
स्यहविषोवेतु॥ अग्निः प्रत्नेनजन्मना॥ शुंभानस्तनुवाँ स्वां॥ कवि
र्विप्रेणवावृधे॥ जुषाणोअग्निराज्यस्यवेतु॥ सोमगीर्भिष्ट्वावयं॥

वर्धयामोवचोविदः॥ सुमृडीकोनआविश॥ जुषाणः सोमआज्यस्यहवि
षोवेतु॥ १॥ स्वाँ षट्च॥ ६॥ अग्निर्मूर्धादिवः ककुत्॥ पतिः पृथिव्याअ
यं॥ अपाँ रेताँ सिजिन्वति॥ भुवोयज्ञस्यरजसश्चनेता॥ यत्रानियुद्भिः
सचसेशिवाभिः॥ दिविमूर्धानंदधिषेसुवर्षां॥ जिह्वामग्नेचकृषेहव्य
वाहं॥ प्रजापतेनत्वदेतान्यन्यः॥ विश्वाजातानिपरितावभूव॥ यत्कामा
स्तेजुहुमस्तन्नोअस्तु॥ १॥ वयँ स्यामपतयोरयीणां॥ सवेदपुत्रः
पितरँ समातरं॥ ससूनुर्भुवत्सभुवत्पुनर्मघः॥ सद्यामौर्णोदंतरिक्षँ
सस्सुवः॥ सविश्वाभुवोअभवत्सआभवत्॥ अग्नीषोमासवेदसा॥
सहूतीवनतंगिरः॥ संदेवत्राबभूवथुः॥ युवमेतानिदिविरोचनानि॥

अग्निश्च सोम सक्रतू अधत्तं॥ २ ॥युवं॑ सिंधूं॑रभिशस्तेरवद्यात्॥ अ
ग्नीषोमावमुंचतं गृभीतान्॥इंद्राग्नी रोचनादिवः॥ परिवाजेषु भूषथः॥तद्वां
चेति प्रवीर्यं॥ श्नथद्वृत्रमुत सनोति वाजं॥इंद्रायो अग्नी सक्रुरी सपर्यात्॥
इरज्यंता वसव्यस्य भूरेः॥ सहस्तमा सहसा वाजयंता॥ एंद्र सानसिं॑रयिं॥
॥ ३ ॥सजित्वानं॑ सदासहं॥ वर्षिष्ठमूतये भर॥ प्रससाहिषे पुरुहूत शत्रू
न्॥ज्येष्ठस्ते शुष्म इह रातिरस्तु॥ इंद्रा भर दक्षिणेना वसूनि॥ पतिः सिं
धूनामसि रेवतीनां॥ महां॑ इंद्रो य ओजसा॥ पर्जन्यो वृष्टिमां॑ इव॥ स्तो
मैर्वत्सस्य वावृधे॥ महां॑ इंद्रो नृवदा चर्षणिप्राः॥ ४ ॥उत द्विबर्हा अ
मिनः सहोभिः॥ अस्मद्र्यग्वावृधे वीर्याय॥ उरुः पृथुः सुकृतः कर्तृभि

र्भूत्॥पित्री हि देवां॑ उशतो यविष्ठ॥ विद्वां॑ ऋतूं॑ ऋतुपते यजेह॥ ये दैव्या
ऋत्विजस्तेभिरग्ने॥ त्वं॑ होतॄणामस्यायजिष्ठः॥अग्निं॑ स्विष्टकृतं॥ अ
या उग्निरग्नेः प्रिया धामानि॥ अयाट् सोमस्य प्रिया धामानि॥ ५ ॥अया
उग्नेः प्रिया धामानि॥ अयाट् प्रजापतेः प्रिया धामानि॥ अया उग्नीषो
मयोः प्रिया धामानि॥ अयाडिंद्राग्नियोः प्रिया धामानि॥ अयाडिंद्र
स्य प्रिया धामानि॥ अयाण्महेंद्रस्य प्रिया धामानि॥ अयाड्देवानामा
ज्यपानां प्रिया धामानि॥ यक्षदग्नेर्होतुः प्रिया धामानि॥ यक्षत्स्वं महि
मानं॥ आयजतामेज्या इषः॥ कृणोतु सो अध्वरा जातवेदाः॥ जुषतां॑
हविः॥ अग्ने यदद्य विशो अध्वरस्य होतः॥ पावकशोचे वेष्ट्वं॑ हि यज्वा॥

ब्रा०त०५
५८

४

ऋतायजासिमहिनाविंयज्ञ्ःहव्यावहयविष्ठयातेभुद्य॥ ६ ॥अस्त्वधत्तं
रयिंचर्षणिप्राः सोमस्यप्रियाधामानीषःषद्चं॥ ७॥उपहूतं रथंतरं
सहपृथिव्या॥उपमारथंतरं सहपृथिव्याह्वयतां॥उपहूतंवामदेव्यं
सहांतरिक्षेण॥उपमावामदेव्यं सहांतरिक्षेणह्वयतां॥उपहूतंबृह
त्सहदिवा॥उपमाबृहत्सहदिवाह्वयतां॥उपहूताः सप्तहोत्राः॥उपमास
प्तहोत्राह्वयंतां॥उपहूताधेनुः सहर्षभा॥उपमाधेनुः सहर्षभाह्वय
तां॥ १॥उपहूतोभक्षः सखा॥उपमाभक्षः सखाह्वयतां॥उपहूतांऽ
हो॥इडोपहूता॥उपहूतेडा॥उपोअस्मां इडाह्वयतां॥इडोपहूता॥उप
हूतेडा॥मानवीघृतपदी मैत्रावरुणी॥ब्रह्मदेवकृतमुपहूतं॥ २॥

देव्याअध्वर्यवउपहूताः॥उपहूतामनुष्याः॥यइमंयज्ञमवान्॥येयज्ञ
पतिंवर्धान्॥उपहूतेद्यावापृथिवी॥पूर्वजेऋतावरी॥देवीदेवपुत्रे॥उपहूतो
यंयजमानः॥उत्तरस्यां देवयज्यायामुपहूतः॥भूयसिहविष्करणउप
हूतः॥दिव्येधामन्नुपहूतः॥इदंमेदेवाहविर्जुषंतामितितस्मिन्नुपहू
तः॥विश्वमस्यप्रियमुपहूतं॥विश्वस्यप्रियस्योपहूतस्योपहूतः॥
॥ ३ ॥सहर्षभाह्वयतामुपहूतं हविष्करणउपहूतश्चेलारिन्व॥ ८॥
देवंबर्हिः॥वसुवनेवसुधेयस्यवेतु॥देवोनराशंसः॥वसुवनेवसु
धेयस्यवेतु॥देवोअग्निः स्विष्टकृत्॥सुद्रविणामंद्रः कविः॥सत्यम
न्मायजीहोता॥होतुर्होतुरायजीयान्॥अग्नेयांदेवानयाट्॥याः

ब्रा०त०५ ५९ये

अपिप्रेः॥ येतेहोत्रेअमत्सत॥ ताꣳ ससनुषीꣳ होत्रांदेवं गमं॥ दिविदेवेषुय
ज्ञमेरमं॥ स्विष्टकृच्चाग्ने होताभूः॥ वसुवनेव सुधेयस्यनमोवाकेवीहि॥
॥१॥ अपिप्रेः पंचच॥ ९॥ इदंद्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाकं॥ आ
उतनमोवाकं॥ ऋध्यास्मसूक्तोच्यमग्ने॥ त्वꣳ सूक्तवागसि॥ उपश्रितो
दिवः पृथिव्योः॥ ओमन्वती तेस्मिन्यज्ञेयजमानद्यावापृथिवीस्तां॥ शं
गयेजीरदानू॥ अत्रस्नूअप्रवेदे॥ उरुगव्यूतीअभयंकृतौ॥ १॥ वृष्टिद्या
वारीत्यापा॥ शंभुवौ मयोभुवौ॥ ऊर्जस्वतीच पयस्वतीच॥ सूपचरणास्वधिचर
णाच॥ तयोराविदि॥ अग्निरिदꣳ हविरजुषत॥ अवीवृधतमहोज्या ५९
योकृत॥ सोमइदꣳ हविरजुषत॥ अवीवृधतमहोज्यायोकृत॥ अग्नि

रिदꣳ हविरजुषत॥ २॥ अवीवृधतमहोज्यायोकृत॥ प्रजापतिरिदꣳ हविर
जुषत॥ अवीवृधतमहोज्यायोकृत॥ अग्नीषोमाविदꣳ हविरजुषेतां॥ अवी
वृधेतांमहोज्यायोक्रातां॥ इंद्र इदꣳ हविरजुषत॥ अवीवृधतमहोज्यायो
कृत॥ महेंद्र इदꣳ हविरजुषत॥ ३॥ अवीवृधतमहोज्यायोकृत॥ देवा
४ इंद्राग्नी इदꣳ हविरजुषेतां॥ अवीवृधेतांमहोज्यायोक्रातां॥ ४ आज्यपा
आज्यमजुषंत॥ अवीवृधंतमहोज्यायोकृत॥ अग्निर्होत्रेणेदꣳ हविर
जुषत॥ अवीवृधतमहोज्यायोकृत॥ अस्यामृधद्धोत्रायां देवंगमायां॥
आशास्तेयंयजमानोसौ॥ आयुराशास्ते॥ सुप्रजास्त्वमाशास्ते॥ सजा
तवनस्यामाशास्ते॥ ४॥ उत्तरांदेवयज्यामाशास्ते॥ भूयोहविष्करण

ब्रा० त० ५
६०

माशास्ते ॥ दिव्यं धामाशास्ते ॥ विश्वं प्रियमाशास्ते ॥ यदनेन हविषाशास्ते ॥ तदस्या
त्तदृध्यात् ॥ तदस्मै देवा रासंतां ॥ तदग्निर्देवो देवेभ्यो वनते ॥ वयमग्नेर्मानुषाः ॥
इष्टं च वीतं च ॥ उभे च नो द्यावापृथिवी अंहसस्पातां ॥ इह गतिर्वामस्येदं च ॥ न
मो देवेभ्यः ॥ ९ ॥ ॐ अभयं कृणोतु अग्निरिदं हविरजुषत सजातवनस्यामा
शास्ते वीतं च त्रीणि च ॥ १० ॥ तच्छंयोरावृणीमहे ॥ गातुं यज्ञाय ॥ गातुं यज्ञ
पतये ॥ दैवी स्वस्तिरस्तु नः ॥ स्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वं जिगातु भेषजं ॥ शं नो
अस्तु द्विपदे ॥ शं चतुष्पदे ॥ १ ॥ तच्छंयोरष्टौ ॥ ११ ॥ आप्यायस्व सं ते ॥ इह
त्वष्टारमग्रियं तं नस्तुरीपं ॥ देवानां पत्नीरुशतीरवंतु नः ॥ प्रावंतु नस्तुजे जये
वाजसातये ॥ याः पार्थिवासो या अपामपि व्रते ॥ ता नो देवीः सुहवाः शर्म
यच्छंतु ॥ उत ग्ना वियंतु देवपत्नीः ॥ इंद्राण्यग्नाय्यश्विनी राट् ॥ आ रोदसी

महेंद्र इंद्रः हविरजुषत

६

६०

वरुणानी शृणोतु ॥ वियंतु देवीर्य ऋतुर्जनीनां ॥ अग्निर्होता गृहपतिः स राजा ॥
विश्वा वेद जनिमा जातवेदाः ॥ देवानामुत यो मर्त्यानां ॥ यजिष्ठः स प्रयजतामृतावा ॥ वय
मु त्वा गृहपते जनानां ॥ अग्ने अकर्म समिधा बृहंतं ॥ अस्थूरि णो गार्हपत्यानि संतु ॥
तिग्मेन नस्तेजसा संशिशाधि ॥ २ ॥ जनीनामष्टौ च ॥ १२ ॥ उपहूतं रथंतरं सह
पृथिव्या ॥ उप मा रथंतरं सह पृथिव्या ह्वयतां ॥ उपहूतं वामदेव्यं सहांतरिक्षेण ॥
उप मा वामदेव्यं सहांतरिक्षेण ह्वयतां ॥ उपहूतं बृहत्सह दिवा ॥ उप मा बृहत्स
ह दिवा ह्वयतां ॥ उपहूताः सप्त होत्राः ॥ उप मा सप्त होत्रा ह्वयंतां ॥ उपहूता धेनुः
सहर्षभा ॥ उप मा धेनुः सहर्षभा ह्वयतां ॥ १ ॥ उपहूतो भक्षः सखा ॥ उप मा भक्षः
भक्षः सखा ह्वयतां ॥ उपहूतां ३ हो ॥ इडोपहूता ॥ उपहूतेडा ॥ उपो अस्मां
इडा ह्वयतां ॥ इडोपहूता ॥ उपहूतेडा ॥ मानवी घृतपदी मैत्रावरुणी ॥ ब्रह्म दे

श्रा॰त॰५
६१

वहूतमुपहूतं॥ २॥ दैव्याअध्वर्यवउपहूताः॥ उपहूतामनुष्याः॥ यइमंयं
ज्ञमवान्॥ येयज्ञपतिंवर्धान्॥ उपहूतेद्यावापृथिवी॥ पूर्वजेऋतावरी॥ देवी
देवपुत्रे॥ उपहूतेयंयजमाना॥ इंद्राणीवाविधवा॥ अदितिरिवसुपुत्रा॥ उत्त
रस्यांदेवयज्यायामुपहूता॥ भूयसिहविष्करणउपहूता॥ दिव्येधामन्नु
पहूता॥ इदंमेदेवाहविर्जुषंतामितितस्मिन्नुपहूता॥ विश्वमस्याःप्रि
यमुपहूतं॥ विश्वस्यप्रियस्योपहूतस्योपहूता॥ ३॥ सहर्षभाह
यतामुपहूतःसुपुत्राःषट्च॥ १३॥ ॥सत्यंप्रवोग्नेर्महान
ग्निर्होतासमिधोग्निर्वृत्राण्यग्निर्मूर्धोपहूतंदेवंबर्हिरिदंद्यावापृथिवी
तद्वंयोराप्यायस्वोपहूतंत्रयोदश॥ १२॥ सत्यंवयंस्यामवृष्टिद्यावान
ववि॰शान्तिः॥ २९॥ ॥श्रीगजाननार्पणमस्तु॥ ॥ओम्॥

७
नी
६१

हरिःओम्॥ ॥अंजंतित्वामध्वरेदेवयंतः॥ वनस्पतेमधुनादैव्येन॥ य
दूर्ध्वस्तिष्ठाद्रविणेहधत्तात्॥ यद्वाक्षयोमातुरस्याउपस्थे॥ उच्छ्रयस्व
वनस्पते॥ वर्ष्मन्पृथिव्याअधि॥ सुमितीमीयमानः॥ वर्चोधायज्ञवाह
से॥ समिद्धस्यश्रयमाणःपुरस्तात्॥ ब्रह्मवन्वानोअजरंसुवीरं॥ १॥
आरेअस्मदमतिंबाधमानः॥ उच्छ्रयस्वमहतेसौभगाय॥ ऊर्ध्वऊषुण
ऊतये॥ तिष्ठादेवोनसविता॥ ऊर्ध्वोवाजस्यसनितायदंजिभिः॥ वाघ
द्भिर्विह्वयामहे॥ ऊर्ध्वोनःपाह्यंहसोनिकेतुना॥ विश्वंसमत्रिणं
दह॥ कृधीनऊर्ध्वांचरथायजीवसे॥ विदादेवेषुनोदुवः॥ २॥ जातो
तोजायतेसुदिनत्वेअह्नां॥ समर्यआविदथेवर्द्धमानः॥ पुनंति

श्री०तृ० धीराअपसोमनीषा॥ देवयाविप्रउदियर्त्तिवाचं॥ युवासुवासाःपरिवी १
६२ तआगात्॥ सउश्रेयान्भवतिजायमानः॥ तंधीरासःकवयउन्नयंति॥ स्वा
धियोमनसादेवयंतः॥ पृथुपाजाअमर्त्यः॥ घृतनिर्णिक्स्वाहुतः॥ ३॥
अग्निर्यज्ञस्यहव्यवाट्॥ तंसबाधोयतस्रुचः॥ इत्थाधियायज्ञवंतः॥
आचक्रुरग्निमूतये॥ त्वंवरुणउतमित्रोअग्ने॥ त्वांवर्धंतिमतिभिर्व
सिष्ठाः॥ त्वेवसुसुषणनानिसंतु॥ यूयंपातस्वस्तिभिःसदानः॥ ४॥
सुवीरंदुवस्वाहुतोहोत्र॥ १॥ होतायक्षदग्निंसमिधासुषमि
धा [illegible] समिद्धंनाभापृथिव्याःसंगथेवामस्य॥ वर्ष्मन्दिवइडस्प ६२
देवेत्वाज्यस्यहोतर्यज॥ होतायक्षत्तनूनपातमदितेर्गर्भंभुवनस्य

गोपां॥ मध्वाद्यदेवोदेवेभ्योदेवयानान्पथोअनक्तुवेत्वाज्यस्यहोतर्य
ज॥ होतायक्षन्नराशंसंनृशस्तंनॄंःप्रणेत्रं॥ गोभिर्वपावान्स्याद्वी
रैःशक्तीवान्रथैःप्रथमयावाहिरण्यैश्चंद्रीवेत्वाज्यस्यहोतर्यज॥ होता
यक्षदग्निमिडईडितोदेवोदेवाँआवक्षद्दूतोहव्यवाडमूरः॥ उपेमंयज्ञमु
पेमांदेवोदेवहूतिमवतुवेत्वाज्यस्यहोतर्यज॥ होतायक्षद्बर्हिःसुष्टरीमो
र्णम्रदाअस्मिन्यज्ञेविवचप्रथतांस्वासस्थंदेवेभ्यः॥ एमेनदद्यवस
वोरुद्राआदित्याःसदंतुप्रियमिंद्रस्यास्तुवेत्वाज्यस्यहोतर्यज॥ १॥
य होताक्षद्दुरऋष्वाःकवष्योकोषधावनीरुदातामभिर्जिहतांविपक्षोभिः
श्रयंतां॥ सुप्रायणाअस्मिन्यज्ञेविश्रयंतामृतावृधियंत्वाज्यस्यहोत यो

ब्रा०त०६
६३

यजे॥ होतायक्षदुषासानक्ता बृहती सुपेशसा नृँः पतिभ्यो योनिं कृण्वाने॥ २
संस्मयमाने इंद्रेण देवैरेदं बर्हिः सीदतां वीतामाज्यस्य होतर्यज॥ होता
यक्षद्दैव्या होतारा मंद्रा पोतारा कवी प्रचेतसा॥ स्विष्टमद्यान्यः करदिषा
स्वभिगूर्तमन्य ऊर्जा सतवसेमं यज्ञं दिवि देवेषु धत्तां वीतामाज्यस्य हो
तर्यज॥ होतायक्षत्तिस्रो देवीरपसामपस्तमा अच्छिद्रमद्येदमपस्तन्व
तां॥ देवेभ्यो देवीर्देवमपो वियंत्वाज्यस्य होतर्यज॥ होतायक्षत्त्वष्टारमचि
ष्टुमपाकं रेतोधां विश्रवसं यशोधां॥ पुरुरूपमकाममकर्शनं सुपोषः
पोषैः स्यात्सुवीरो वीरैर्वेत्वाज्यस्य होतर्यज॥ होतायक्षद्वनस्पतिमु ६३
पावस्रक्षद्धियो जोष्टारं शशमन्नरः॥ स्वदात्स्वधितिर्ऋतुथाद्य दे

वो देवेभ्यो हव्यावाडु त्वाज्यस्य होतर्यज॥ होतायक्षदग्निं स्वाहाज्यस्य
स्वाहा मेदसः स्वाहा स्तोकानां स्वाहा स्वाहाकृतीनां स्वाहा हव्यसूक्तीनां॥
स्वाहा देवा आज्यपान्त्स्वाहाग्निं होत्राज्जुषाणा अग्न आज्यस्य वियंतु हो
तर्यज॥ २ ॥ प्रियमिंद्रस्यास्तु वेत्वाज्यस्य होतर्यज सुवीरो वीरैर्वेत्वाज्यस्य
होतर्यज चत्वारि च॥ २ ॥ समिद्धो अद्य मनुषो दुरोणे॥ देवो देवान्यजसि जा
तवेदः॥ आ च वह मित्रमहश्चिकित्वान्॥ त्वं दूतः कविरसि प्रचेताः॥ तनूनपात्पथ
ऋतस्य यानान्॥ मध्वा समंजन्त्स्वदया सुजिह्व॥ मन्मानि धीभिरुत यज्ञमृधं
न्॥ देवत्रा च कृणुह्यध्वरं नः॥ नराशंसस्य महिमानमेषां॥ उप स्तोषाम य
जतस्य यज्ञैः॥ १ ॥ ते सुक्रतवः शुचयो धियं धाः॥ स्वदंतु देवा उभयानि हव्या॥

श्रा०त०६
६४

आजुह्वान ईड्यो वंद्यश्च ॥ आयाह्यग्ने वसुभिः सजोषाः ॥ त्वं देवानामसि यह्व हो
ता ॥ स एनान्यक्षीषितो यजीयान् ॥ प्राचीनं बर्हिः प्रदिशा पृथिव्याः ॥ वस्तोरस्या
वृज्यते अग्रे अह्नां ॥ व्यु प्रथते वितरं वरीयः ॥ देवेभ्यो अदितये स्योनं ॥ २ ॥
व्यचस्वतीरुर्विया विश्रयंतां ॥ पतिभ्यो न जनयः शुंभमानाः ॥ देवीर्द्वारो बृ
हतीर्विश्वमिन्वाः ॥ देवेभ्यो भवथ सुप्रायणाः ॥ आ सुष्वयंती यजते उपाके ॥ उ
षासानक्ता सदतां नियोनौ ॥ दिव्ये योषणे बृहती सुरुक्मे ॥ अधि श्रियं
शुक्रपिशं दधाने ॥ दैव्या होतारा प्रथमा सुवाचा ॥ मिमाना यज्ञं मनुषो यज
ध्यै ॥ ३ ॥ प्रचोदयंता विदथेषु कारू ॥ प्राचीनं ज्योतिः प्रदिशा दिशंता ॥ आ नो
यज्ञं भारती तूयमेतु ॥ इळा मनुष्वदिह चेतयंती ॥ तिस्रो देवीर्बर्हिरेदं स्योनं ॥

३

६४

स्वतीः

सरस्वतीः स्वपसः सदंतु ॥ य इमे द्यावापृथिवी जनित्री ॥ रूपैरपिंशद्भुवनानि विश्वा ॥
तमद्य होतरिषितो यजीयान् ॥ देवं त्वष्टारमिह यक्षि विद्वान् ॥ ४ ॥ उपावसृज
त्मन्या समंजन् ॥ देवानां पाथ ऋतुथा हवींषि ॥ वनस्पतिः शमिता देवो अग्निः ॥
स्वदंतु हव्यं मधुना घृतेन ॥ सद्यो जातो व्यमिमीत यज्ञं ॥ अग्निर्देवानामभव
त्पुरोगाः ॥ अस्य होतुः प्रदिश्यृतस्य वाचि ॥ स्वाहाकृतं हविरदंतु देवाः ॥ ५ ॥
यज्ञे स्योनं यजध्यै विद्वान् देवे चे ॥ ३ ॥ अग्निर्होता नो अध्वरे ॥ वाजी सन्परि
णीयते ॥ देवो देवेषु यज्ञियः ॥ परि त्रिविष्ट्यध्वरं ॥ यात्यग्नी रथीरिव ॥ आ
देवेषु प्रयो दधत् ॥ परि वाजपतिः कविः ॥ अग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्ना
नि दाशुषे ॥ २ ॥ अग्निर्होता नो नव ॥ ७ ॥ अजैदग्निः ॥ असनद्वाजमग्नि ॥

देवो देवेभ्यो हव्या वाट्॥ प्रांज्ञोभिर्हिन्वानः॥ धेनाभिः कल्पमानः॥ यज्ञस्यायुःप्र
तिरन्॥ उपप्रेष्य होतः॥ हव्या देवेभ्यः॥ १॥ अजैद्‌ग्निः॥ ५ ॥ दैव्याः शमिता
र उत मनुष्या आरभध्वं॥ उपनयत मेध्या दुरः॥ आशासाना मेधपतिभ्यां
मेधं॥ प्रास्मा अग्निं भरत॥ स्तृणीत बर्हिः॥ अन्वेनं माता मन्यतां॥ अ
नु पिता॥ अनु भ्राता सगर्भ्यः॥ अनु सखा सयूथ्यः॥ उदीचीनाँ अस्य प
दो निधत्तात्॥ १॥ सूर्यं चक्षुर्गमयतात्॥ वातं प्राणमन्ववसृजतात्॥
दिशः श्रोत्रं॥ अंतरिक्षमसुं॥ पृथिवीं शरीरं॥ एकधास्य त्वचमाछ्य
तात्॥ पुरा नाभ्या अपिशसो वपामुत्खिदतात्॥ अंतरेवोष्माणं वार
यतात्॥ श्येनमस्य वक्षः कृणुतात्॥ प्रशसा बाहू॥ २॥ शला दोष

णी॥ कश्यपेवांसा॥ अछिद्रे श्रोणी॥ कवषोरू स्रेकपर्णाष्ठीवंता॥ ष
ड्विंशतिरस्य वंक्रयः॥ ता अनुष्ठ्योच्यावयतात्॥ गात्रं गात्रमस्यानूनं
कृणुतात्॥ ऊवध्यगोहं पार्थिवं खनतात्॥ अस्ना रक्षः संसृजतात्॥
वनिष्ठुमस्य मा राविष्ट॥ ३॥ उरूकं मन्यमानाः॥ नेद्वस्तोके तनये॥
रविता रवच्छमितारः॥ अध्रिगो शमीध्वं॥ सुशमि शमीध्वं॥ शमीध्वमध्रि
गो॥ अध्रिगुश्चापापश्च॥ उभौ देवानां शमितारौ॥ ताविमं पशुं श्रपयतां
प्रविद्वांसौ॥ यथायथास्य श्रपणं तथातथा॥ ४॥ धत्ता द्वा द्रूमा रावि
ष्टन थातथा॥ ६॥ जुषस्व सप्रथस्तमं॥ वचो देवप्सरस्तमं॥ हव्या जु
ह्वान आसनि॥ इमं नो यज्ञममृतेषु धेहि॥ इमा हव्या जातवेदो जुषस्व॥

ब्रा०८०
६६

स्तोकानामग्ने मेदसो घृतस्य॥ होतः प्राशान प्रथमो निषद्य॥ घृतवंतः
पावक ते॥ स्तोकाश्चोतंति मेदसः॥ स्वधर्मं देववीतये॥ १॥ श्रेष्ठं नो धेहि
वार्यं॥ तुभ्यं स्तोका घृतश्चुतः॥ अग्ने विप्राय संत्य॥ ऋषिः श्रेष्ठः समि
ध्यसे॥ यज्ञस्य प्राविता भव॥ तुभ्यं श्चोतंत्यध्रिगो शचीवः॥ स्तोकासो
अग्ने मेदसो घृतस्य॥ कविशस्तो बृहता भानुनागाः॥ हव्या जुषस्व मेधि
र॥ ओजिष्ठं ते मध्यतो मेद उद्भृतं॥ प्रते वयं ददामहे॥ श्चोतंति ते वसो स्तो
का अधि त्वचि॥ प्रति तान् देवशो विहि॥ २॥ देववीतयउद्भृतं त्रीणि च॥ ७॥

श्री

आ वृत्रहणा वृत्रहभिः शुष्मैः॥ इंद्र यातं नमोभिरग्ने अर्वाक्॥ युवं राधो
भिरकवेभिरिंद्र॥ अग्ने अस्मे भवतमुत्तमेभिः॥ होता यक्षदिंद्राग्नी॥

६६

छागस्य वपाया मेदसः॥ जुषेतां हविः॥ होतर्यज॥ विद्यरव्य मनसा वस्य इछ
न्॥ इंद्राग्नी ज्ञास उत वा सजातान्॥ १॥ नान्या युवत्प्रमतिरस्ति मह्यं॥
स वां धियं वाजयंतीमतक्षं॥ होता यक्षदिंद्राग्नी॥ पुरोडाशस्य जुषेतां
हविः॥ होतर्यज॥ ला मीउते अजिरं दूत्याय॥ हविष्मंतः सदमिन्मा
नुषासः॥ यस्य देवैरासदो बर्हिरग्ने॥ अहान्यस्मै सुदिना भवंतु॥ हो
ता यक्षदग्निं॥ पुरोडाशस्य जुषतां हविः॥ होतर्यज॥ २॥ सजातान
ग्निं द्वे च॥ ८॥ गीर्भिर्विप्रः प्रमतिमिछमानः॥ ईट्टे रयिं यशसं पूर्वभा
जं॥ इंद्राग्नी वृत्रहणा सुवज्रा॥ प्रणो नव्येभिस्तिरतं देष्णैः॥ मा छे
द्म रश्मीं रिति नाधमानाः॥ पितृणां शक्तीरनुयछमानाः॥ इंद्राग्नि

ऋ०त०
६७

भ्यां कं वृषणो मदंति ॥ ता ह्यद्री धिषणाया उपस्थे ॥ अग्निं सुदीतिं सुदृशं गृ
णंतः ॥ नमस्यामस्त्वेड्यं जातवेदः ॥ त्वां दूतमरतिं हव्यवाहं ॥ देवा अकृण्वन्न
मृतस्य नाभिं ॥ २ ॥ जातवेदो हेच ॥ ९ ॥ त्वं ह्यग्ने प्रथमो मनोता ॥ अस्या धियो
अभवो दस्म होता ॥ त्वं सीं वृषन्नकृणोर्दुष्टरीतु ॥ सहो विश्वस्मै सहसे सहध्यै ॥
अधा होता न्यसीदो यजीयान् ॥ इळस्पद इषयन्नीड्यः सन् ॥ तं त्वा नरः प्रथ
मं देवयंतः ॥ महो राये चितयंतो अनु ग्मन् ॥ वृते वयंतं बहुभिर्वसव्यैः ॥ त्वे र
यिं जागृवांसो अनु ग्मन् ॥ १ ॥ रुशंतमग्निं दर्शतं बृहंतं ॥ वपावंतं विश्वहा
दीदिवांसं ॥ पदं देवस्य नमसा वियंतः ॥ श्रवस्यवः श्रव आपन्नमृक्तं ॥ नामा
नि चिद्दधिरे यज्ञियानि ॥ भद्रायां ते रणयंत संदृष्टौ ॥ त्वां वर्धंति क्षितयः पृथि

६७

॥२॥

व्यां ॥ त्वं राय उभयासो जनानां ॥ त्वं त्राता तरणे चेत्यो भूः ॥ पिता माता सदमिन्मा
नुषाणां ॥ सपर्येण्यः स प्रियो विक्ष्वग्निः ॥ होता मंद्रो नि षसादा यजीयान् ॥ तं
त्वा वयं दम आ दीदिवांसं ॥ उप ज्ञुबाधो नमसा सदेम ॥ तं त्वा वयं सुधियो
नव्यमग्ने ॥ सुम्नायव ईमहे देवयंतः ॥ त्वं विशो अनयो दीद्यानः ॥ दिवो अग्ने
बृहता रोचनेन ॥ विशां कविं विश्पतिं शश्वतीनां ॥ नितोशनं वृषभं चर्षणी
नां ॥ ३ ॥ प्रेतीषणिमिषयंतं पावकं ॥ राजंतमग्निं यजतं रयीणां ॥ सो अ
ग्न ईजे शशमे च मर्तः ॥ यस्त आनट् समिधा हव्यदातिं ॥ य आहुतिं परि वेदा
नमोभिः ॥ विश्वेत्स वामा दधते त्वोतः ॥ अस्मा उ ते महि महे विधेम ॥ नमोभिर
ग्ने समिधोत हव्यैः ॥ वेदी सूनो सहसो गीर्भिरुक्थैः ॥ आ ते भद्रायां सुमतौ

यतेम॥ ४॥आयस्त तंथरो दमी विभासा॥श्रवोभिश्चश्रवस्यस्तरुत्रः॥बृहद्भिर्वाजैस्थविरेभिरस्मे॥रेवद्भिरग्ने वितरंविभाहि॥नृवद्वसोसदमिद्धेह्यस्मे॥भूरितोकायतनयायपश्वः॥पूर्वीरिषोबृहतीरारेअघाः॥अस्मेभद्रासौश्रवसानिसंतु॥पुरूण्यग्नेपुरुधात्वाया॥वसूनिराजन्वसुतातेअश्यां॥पुरूणिहित्वेपुरुवारसंति॥अग्नेवसुविधतेराजनित्वे॥ ५॥जागृवाꣳसोअनुग्मन्मानुषाणां चर्षणीनांयतेमाश्यांद्वेच॥ १०॥आभरतꣳशिक्षतंवज्रबाहू॥अस्माꣳइंद्राग्नीअवतꣳशचीभिः॥इमेनुतेरश्मयःसूर्यस्य॥येभिःसपित्वंपितरोनआयन्॥ होतायक्षदिंद्राग्नी॥छागस्यहविषआत्तामद्य॥मध्यतोमेदउद्भृतं॥पुराद्वेषोभ्यः॥पुरापौरुषेय्यागृभः॥घस्तांनूनं॥ १॥

घासेअज्राणांयवसप्रथमानां॥सुमत्क्षराणाꣳशतरुद्रियाणां॥अग्निष्वात्तानांपीवोपवसनानां॥पार्श्वतःश्रोणितःशितामतउत्सादतः॥अंगादंगादवत्तानां॥करतएवेंद्राग्नी॥जुषेतांꣳहविः॥होतर्यज॥देवेभ्योवनस्पतेहवीꣳषि॥हिरण्यपर्णप्रदिवस्तेअर्थं॥ २॥प्रदक्षिणिद्रशनयानियूय॥ऋतस्यवक्षिपथिभीरजिष्ठैः॥होतायक्षद्वनस्पतिमभिहि॥पिष्टतमयारभिष्ठयारशनयाधित॥यत्रेंद्राग्नियोश्छागस्यहविषःप्रियाधामानि॥यत्रवनस्पतेःप्रियापाथाꣳसि॥यत्रदेवानामाज्यपानांप्रियाधामानि॥यत्राग्नेर्होतुःप्रियाधामानि॥तत्रैतंप्रस्तुत्येवोपस्तुत्येवोपावस्रक्षत्॥रभीयाꣳसमिवकृत्वी॥ ३॥करदेवंदेवोवनस्पतिः॥जुषतांꣳहविः॥होतर्यज॥

ब्रा०त०

६९

पिप्रीहि देवाꣳ उशतो यविष्ठ ॥ विद्वाꣳ ऋतूꣳ ऋतुपते यजेह ॥ ये दैव्या ऋत्विज
स्तेभिरग्ने ॥ त्वꣳ होतृणामस्यायजिष्ठः ॥ होता यक्षदग्निꣳ स्विष्टकृतं ॥ अ
याऽग्निरिंद्राग्नियोश्छागस्य हविषः प्रिया धामानि ॥ अयाड्वनस्पतेः प्रि
या पाथाꣳसि ॥ अयाड्देवानामाज्यपानां प्रिया धामानि ॥ यक्षदग्नेर्होतुः
प्रिया धामानि ॥ यक्षत्स्वं महिमानं ॥ आयजतामेज्या इषः ॥ कृणोतु सोऽअ
ध्वरा जातवेदाः ॥ जुषतांꣳ हविः ॥ होतर्यज ॥ ४ ॥ नूनमर्थे कृत्वी पाथाꣳसि
समश्च ॥ ११ ॥ उपो हयद्विदथं वाजिनो गूः ॥ गीर्भिर्विप्राः प्रमतिमिच्छमा
नाः ॥ अर्वंतो न काष्ठां नक्षमाणाः ॥ इंद्राग्नी जोहुवतो नरस्ते ॥ वनस्प
ते रशनयाभिधाय ॥ पिष्टतमया वयुनानि विद्वान् ॥ वह देवत्रा दिधि

६९

षो हवीꣳषि ॥ प्र च दातारममृतेषु वोचः ॥ अग्निꣳ स्विष्टकृतं ॥ अयाऽग्निरिंद्रा
ग्नियोश्छागस्य हविषः प्रिया धामानि ॥ २ ॥ अयाड्वनस्पतेः प्रिया पाथाꣳ
सि ॥ अयाड्देवानामाज्यपानां प्रिया धामानि ॥ यक्षदग्नेर्होतुः प्रिया धामा
नि ॥ यक्षत्स्वं महिमानं ॥ आयजतामेज्या इषः ॥ कृणोतु सोऽअध्वरा जात
वेदाः ॥ जुषतांꣳ हविः ॥ अग्ने यदद्य विशोऽअध्वरस्य होतः ॥ पावकशोचे वे
ष्ट्वꣳ हि यज्वा ॥ ऋता यजासि महिना वि यद्भूः ॥ हव्या वह यविष्ठ या तेऽअ
द्य ॥ २ ॥ धामानि भूरिकं च ॥ १२ ॥ देवं बर्हिः सुदेवं देवैः स्यात्सुवीरं वी
रैर्वस्तोर्वृज्येताक्तोः प्र भ्रियेतात्यन्या राया बर्हिष्मतो मदेम वसुवने व
सुधेयस्य वेतु यज ॥ देवीर्द्वारः संघाते विड्वीर्यामं छिथिरा ध्रुवा देवहूतौ

ब्रा० तृ०
७०

वत्सम् ईं मेना त्तरुणआमिमीया त्कुमारो वा नवजातो मेनाअर्वा रेणुककाटः पृ
णग्वसुवने वसुधेयस्य वियंतु यज ॥ देवी उषासानक्ता द्यास्मिन्यज्ञे प्रयत्य
ह्वेतामपि नूनं दैवी विश्वः प्रायासिष्टां सुप्रीते सुधिते वसुवने वसुधेयस्य
वीतां यज ॥ देवी जोष्ट्री वसुधिती ययोरन्याघाद्वेषांसि युयवदान्यावक्षद्व
सु वार्याणि यजमानाय वसुवने वसुधेयस्य वीतां यज ॥ देवी ऊर्जाहुती इ
षमूर्जमन्यावक्षत्सग्धिं सपीतिमन्यानवेन पूर्वं दयमाना स्याम पुराणे
न नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यज ॥
देवी दैव्या होतारा नेष्टारा पोतारा हताघशंसावाभरद्वसू वसुवने वसुधेय
स्य वीतां यज ॥ देवीस्तिस्रस्तिस्रो देवीरिडा सरस्वती भारती द्यां भारत्यादि

३

७०

त्यैरस्पृक्षत्सरस्वतीमं रुद्रैर्यज्ञमावीदिहैवेडया वसुमत्या सधमादं मदेम व
सुवने वसुधेयस्य वियंतु यज ॥ देवो नराशंसः स्त्रिशीर्षा षडक्षः शतमिदेनं
शितिपृष्ठा आदधति सहस्रमीं प्रवहंति मित्रावरुणेदस्य होत्रमर्हतो बृहस्प
तिस्तोत्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वेतु यज ॥ देवो वनस्पतिर्वर्ष
प्रावा घृतनिर्णिग्द्यामग्रेणास्पृक्षदांतरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृं
हीद्वसुवने वसुधेयस्य वेतु यज ॥ देवं बर्हिर्वारितीनां निधेधासि प्रच्युती
नाम प्रच्युतं निकामधरणं पुरुस्पार्हं यशस्वदेना बर्हिषान्या बर्हींष्यभि
ष्याम वसुवने वसुधेयस्य वेतु यज ॥ देवो अग्निः स्विष्टकृत्सुद्रविणा मंद्रः क
विः सत्यमन्मायजी होता होतुर्होतुरायजीयानग्ने यां देवानयाड्या अं

श्रा०द०
७१

अपिप्रेयेते होत्रे अमत्सत ताꣳ सस नुषीꣳ होत्रां देवं गमां दिवि देवेषु यज्ञमेरयेमꣳ स्विष्टकृच्चाग्ने होता भूर्वसुवने वसुधेयस्य नमोवाके वीहि यज ॥ १ ॥ यजे कंच ॥ १२ ॥ देवं बर्हिः ॥ वसुवने वसुधेयस्य वेतु ॥ देवीर्द्वारः ॥ वसुवने वसुधेयस्य वियंतु ॥ देवी उषासानक्ता ॥ वसुवने वसुधेयस्य वीतां ॥ देवी जोष्ट्री ॥ वसुवने वसुधेयस्य वीतां ॥ देवी ऊर्जाहुती ॥ वसुवने वसुधेयस्य वीतां ॥ १ ॥ देव्या देव्या होतारा ॥ वसुवने वसुधेयस्य वीतां ॥ देवीस्तिस्रः स्तिस्रो देवीः ॥ वसुवने वसुधेयस्य वियंतु ॥ देवो नराशꣳसः ॥ वसुवने वसुधेयस्य वेतु ॥ देवो वनस्पतिः ॥ वसुवने वसुधेयस्य वेतु ॥

७१

देवं बर्हिर्वारितीनां ॥ वसुवने वसुधेयस्य वेतु ॥ २ ॥ देवो अग्निः स्विष्टकृत् ॥ सुद्रविणा मंद्रः कविः ॥ सत्यमन्मा यजी होता ॥ होतुर्होतुरायजीयान् ॥ अग्ने यां देवानयाट् ॥ याꣳ अपिप्रेः ॥ ये ते होत्रे अमत्सत ॥ ताꣳ ससनुषीꣳ होत्रां देवं गमां ॥ दिवि देवेषु यज्ञमेरयेमं ॥ स्विष्टकृच्चाग्ने होता भूः ॥ वसुवने वसुधेयस्य नमोवाके वीहि ॥ २ ॥ वीतां वेस्वभूरेकं च ॥ १४ ॥ अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशं बध्नन्निंद्राग्निभ्यां छागꣳ सूपस्था अद्य देवो वनस्पतिरभवदिंद्राग्निभ्यां छागेनाघस्तां तं मेदस्तः प्रतिपचताग्रभीष्टामवीवृधेतां पुरो

ब्रा०त० ७२

उशेनत्वा मघवर्षआर्षेयमृषीणांनपादवृणीतायंयजमानोबन्धुभ्यआसंगते भ्यएषमेदेवेषुवसुवार्यायक्ष्यतइतितायादेवादेवदानान्यदुस्तान्यस्मा आचस्वाशास्वाचगुरस्वेषितश्चहो।तरसिभद्रवाच्यायप्रेषितोमानुषःसूक्त वाकायसूक्ताब्रूहि॥ १ ॥ अग्निमद्येकं॥ १५ ॥ ॥अंजंतिहोतो यक्षत्समिद्धोअद्याग्निरजेदेव्याजुषस्वावृत्रहणागीर्भिस्त्वंद्यावरत मुपोहयद्देवंबर्हिःसुदेवंदेवंबर्हिरग्निमद्यपंचदश॥ १५ ॥ ॥ अंजंत्यग्निर्होतानोगीर्भिरुपोहयद्दिदथंसप्तत्रिंशत्॥ ३७ ॥
॥ ० ॥ ० ॥ ० ॥श्रीसांबसदाशिवार्पणमस्तु॥ ० ॥ ० ॥

७१ ७२

मा

हरिःओम्॥ ॥सर्वान्वाएषोग्नेकामान्प्रवेशयति॥योग्नीनन्वाधा यव्रतमुपैति॥सयदनिष्ट्वाप्रयायात्॥अकामप्रीताएनंकामाननुप्र यायुः॥अतेजाअवीर्यस्यात्॥सजुहुयात्॥तुभ्यंताअंगिरस्तम॥वि श्वाःसुक्षितयःपृथक्॥अग्नेकामाययेमिरइति॥कामानेवास्मिन्द धाति॥ १ ॥कामप्रीताएनंकामाअनुप्रयांति॥तेजस्वीवीर्यावान्भ वति॥संततिर्वाएषायज्ञस्य॥योग्नीनन्वाधायव्रतमुपैति॥सय दुद्वायति॥विछित्तिरेवास्यसा॥तंप्रांचमुद्धृत्य॥मनसोपतिष्ठेत॥ मनोवैप्रजापतिः॥प्राजापत्योयज्ञः॥ २॥मनसैवयज्ञंसंतनोति॥ भूरित्याह॥भूर्नोवैप्रजापतिः॥भूतिमेवोपैति॥विवाएषइंद्रियेण

ब्रा० द्व० ७
७२

वीर्येण र्ध्यते ॥ यस्याहिताग्नेरग्निरपक्षायति ॥ यावच्छम्यया प्रविध्येत् ॥ यदि तावदपक्षायेत् ॥ तꣳ संभरेत् ॥ इदंत एकं पर उत एकं ॥ ३ ॥
तृतीयेन ज्योतिषा संविशस्व ॥ संवेशनस्तनुवे चारुरेधि ॥ प्रियो देवानां परमे जनित्र इति ॥ ब्रह्मणैवैनꣳ संभरति ॥ सैव ततः प्रायश्चित्तिः ॥ ओषधीर्वा एतस्य पशून्पयः प्रविशति ॥ यस्य हविषे वत्सा अपाकृता धयंति ॥ ४ ॥ तान्यदुह्यात् ॥ यातयाम्ना हविषा यजेत ॥ यन्नदुह्यात् ॥ यज्ञपरुरंतरियात् ॥ वायव्यां यवागूं निर्वपेत् ॥
वायुर्वै पयसः प्रदापयिता ॥ स एवास्मै प्रदापयति ॥ पयो वा ओषधयः ॥ पयः पयः ॥ पयसैवास्मै पयो व॰ पयः॰ रुंधे ॥ ५ ॥ अथोत्तरयदि परस्तरामपक्षायेत् ॥ अनुप्रयायावस्येत् ॥ सो एव ततः प्रायश्चित्तिः ॥

स्मै हविषे वत्सानपाकुर्यात् ॥ सैव ततः प्रायश्चित्तिः ॥ अन्यतरान्वा एष देवान्भागधेयेन व्यर्धयति ॥ ये यजमानस्य सायं गृहमागछंति ॥
यस्य सायं दुग्धꣳ हविरार्त्तिमार्छति ॥ इंद्राय व्रीहीन्निरुप्यापवसेत् ॥ पयो वा ओषधयः ॥ पय एवारभ्य गृहीत्वोपवसति ॥ यत्प्रातः स्यात् ॥ तच्छृतं कुर्यात् ॥ ६ ॥ अथैतरमैंद्रः पुरोडाशः स्यात् ॥ इंद्रियेएवास्मै समीचीदधाति ॥ पयो वा ओषधयः ॥ पयः पयः ॥ पयसैवास्मै पयो वरुंधे ॥ अथोत्तरस्मै हविषे वत्सानपाकुर्यात् ॥ सैव ततः प्रायश्चित्तिः ॥
उभयान्वा एष भागधेयेन व्यर्धयति ॥ ये यजमानस्य सायं च प्रातश्च गृहमागछंति ॥ यस्योभयꣳ हविरार्त्तिमार्छति ॥ ७ ॥ ऐंद्रं पं

देवान्

७२

श्रौ० त०७ चशरावमोदनंनिर्वपेत्॥ अग्निंदेवतानांप्रथमंयजेत्॥ अग्निमुखाएवदेवताः प्रीणाति॥ अग्निंवाअन्वन्यादेवताः॥ इंद्रमन्वन्याः॥ ताएवोभयीः प्रीणाति॥ पयोवाओषधयः॥ पयः पयः॥ पयसैवास्मैपयोवरुंधे॥ अथोत्तरस्मैहविषेवत्सानकुर्यात्॥ ८ ॥ सैवततःप्रायश्चित्तिः॥ अधोवाएतस्ययज्ञमीयते॥ यस्यव्रत्येहन्पत्न्यनालंभुकाभवति॥ तामपरुध्ययजेत॥ सर्वेणैवयज्ञेनयजते॥ तामिष्ट्वोपह्वयेत॥ अमूहमस्मि॥ सात्वं॥ द्यौरहं॥ पृथिवीत्वं॥ सामाहं॥ ऋक्त्वं॥ तावेहिसंभवाव॥ सहरेतोदधावहै॥ पुंसेपुत्रायवेत्तवै॥ रायस्पोषायसुप्रजास्त्वायसुवीर्यायेति॥ अर्धएवैनामुपह्वयते॥

७८ स्य पा ७८

सैवततःप्रायश्चित्तिः॥ ९ ॥ दधातियज्ञउतएकंधयंतिरुंधेकुर्यादाच्छलपाकुर्यात्पृथिवीलमुष्टौच॥ १ ॥ यद्विष्पण्णेनजुहुयात्॥ अप्रजाअपशुर्यजमानःस्यात्॥ यदनायतनेनिनयेत्॥ अनायतनःस्यात्॥ प्राजापत्ययर्चावल्मीकवपायामवनयेत्॥ प्राजापत्योवैवल्मीकः॥ यज्ञःप्रजापतिः॥ प्रजापतावेवयज्ञंप्रतिष्ठापयति॥ भूरित्याह॥ भूतोवैप्रजापतिः॥ १ ॥ भूतिमेवोपैति॥ तत्कृत्वा॥ अन्यांदुग्ध्वापुनर्होतव्यं॥ सैवततःप्रायश्चित्तिः॥ यत्कीटावपन्नेनजुहुयात्॥ अप्रजाअपशुर्यजमानःस्यात्॥ यदनायतनेनिनयेत्॥ अनायतनःस्यात्॥ मध्यमेनपर्णेद्यावापृथिव्ययर्चांतःपरिधिनिनयेत्॥ द्यावापृथिव्योरे

ने

त्ति

वेनत्स्रैष्ठापयति ॥ २ ॥ तत्कृत्वा ॥ अन्यां दुग्ध्वा पुनर्होतव्यं ॥ सैव ततः
प्रायश्चित्तिः ॥ यदवदृष्टेन जुहुयात् ॥ अपरूपमस्यात्मंजायेते ॥ किला
सो वास्या दर्शसो वा ॥ यत्सत्येयात् ॥ यज्ञं विछिंद्यात् ॥ सज्जुहुयात् ॥ मि
त्रोजनान्कल्पयतिप्रजानन् ॥ ३ ॥ मित्रो दाधार पृथिवीमुत द्यां ॥ मि
त्रः कृष्टीरनिमिषाभिचष्टे ॥ सत्याय हव्यं घृतवज्जुहोतेति ॥ मित्रेणै
वैनत्कल्पयति ॥ तत्कृत्वा ॥ अन्यां दुग्ध्वा पुनर्होतव्यं ॥ सैव ततः प्रा
यश्चित्तिः ॥ यत्पूर्वस्यामाहुत्यां हुतायामुत्तराहुतिः स्कंदेत् ॥ द्वि
पाद्भिः पशुभिर्यजमानो व्यृध्येत ॥ यदुत्तरयाभियाभिजुहुयात् ॥
॥ ४ ॥ चतुष्पाद्भिः पशुभिर्यजमानो व्यृध्येत ॥ यत्रवेत्थ वनस्पते देवानां

गुह्यानामानि ॥ तत्र हव्यानि गामयेति वानस्पत्यय र्चा समिधमाधाय ॥
तूष्णीमेव पुनर्जुहुयात् ॥ वनस्पतिनैव यज्ञस्या र्त्तां चाहुतीं विदाधार ॥ त्त्यानार्त्तां
तत्कृत्वा ॥ अन्यां दुग्ध्वा पुनर्होतव्यं ॥ सैव ततः प्रायश्चित्तिः ॥ यत्पुरा
प्रयाजेभ्यः प्राङंगारः स्कंदेत् ॥ अध्वर्यवे च यजमानाय चाकं स्या
त् ॥ ५ ॥ यद्दक्षिणा ॥ ब्रह्मणे च यजमानाय चाकं स्यात् ॥ यत्प्रत्यक् ॥
होत्रे च पत्नियै च यजमानाय चाकं स्यात् ॥ यदुदङ् ॥ अग्नीधे च
पशुभ्यश्च यजमानाय चाकं स्यात् ॥ यदभिजुहुयात् ॥ रुद्रोस्य प
शून्घातुकः स्यात् ॥ यन्नाभिजुहुयात् ॥ अशांतः प्रह्रियेत ॥ ६ ॥
स्रुवस्य बुध्नेनाभिनिदध्यात् ॥ मा तमो मा यज्ञस्तमन्मा यजमा

श्रौ० त० ७८ नस्तमत्॥ नमस्ते अस्त्वायते॥ नमो रुद्र परायते॥ नमो यत्र निषीद ५

सि॥ अमुं मा हिं॰सीरमुं मा हिं॰सीरिति येन स्कंदेत्॥ तं प्रहरेत्॥ स
हस्रशृंगो वृषभो जातवेदाः॥ स्तोमपृष्ठो घृतवान्त्सुप्रतीकः॥ मा नो हा
सीन्मे थितो नेत्वाजहाम॥ गोपोषंनो वीरपोषं च यच्छेति॥ ब्रह्मणे
वैनं प्रहरति॥ से वततः प्रायश्चित्तिः॥ १॥ वै प्रजापतिस्त्थापयति प्र
जानन्नभिजुहुयात्स्याद्धियेत जहामत्रीणि च॥ २॥ विवा एषइं
द्रियेण वीर्येण घर्यते॥ यस्याहिताग्नेरग्निर्मथ्यमानो न जायते॥
यत्रान्यं पश्येत्॥ तत आहृत्य होतव्यं॥ अग्नावेवास्याग्निहोत्रं॰ हु ७६
तं भवति॥ यद्यन्यं न विंदेत्॥ अजायां॰ होतव्यं॥ आग्नेयी वा एषा॥

यदजा॥ अग्नावेवास्याग्निहोत्रं॰ हुतं॰ भवति॥ १॥ अजस्य तु ना
श्नीयात्॥ यदजस्याश्नीयात्॥ यामेवाग्नावाहुतिं जुहुयात्॥ तामद्यात्॥ बा
तस्मादजस्य नाश्यं॥ यद्यजां न विंदेत्॥ ब्राह्मणस्य दक्षिणे हस्ते होतव्यं॥
एष वा अग्निर्वैश्वानरः॥ यद्ब्राह्मणः॥ अग्नावेवास्याग्निहोत्रं॰ हु
तं भवति॥ २॥ ब्राह्मणं तु वसत्यै नापरुंध्यात्॥ यद्ब्राह्मणं वसत्या
अपरुंध्यात्॥ यस्मिन्नेवाग्नावाहुतिं जुहुयात्॥ तं भागधेयेन व्य
र्धयेत्॥ तस्माद्ब्राह्मणो वसत्यै नापरुध्यः॥ यदि ब्राह्मणं न विंदेत्॥
दर्भस्तंबे होतव्यं॥ अग्निवान्वै दर्भस्तंबः॥ अग्नावेवास्याग्निहोत्रं॰
हुतं भवति॥ दर्भां॰स्तु नाध्यासीत॥ ३॥ यद्दर्भानध्यासीत॥ या

श्रा०त०
७७

मेवाग्नावाहुतिं जुहुयात्॥ तामध्यासीत॥ तस्माद्दर्भा न ध्यासितव्याः॥ ५
यद्दिदर्भान्न विंदेत्॥ अप्सु होतव्यं॥ आपो वै सर्वा देवताः॥ देवतास्वेवा
स्याग्निहोत्रं हुतं भवति॥ आपस्तु न परिचक्षीत॥ यदापः परिचक्षी
त॥ ४॥ यामेवाप्स्वाहुतिं जुहुयात्॥ तां परिचक्षीत॥ तस्मादापो न
परिचक्ष्याः॥ मेध्या च वा एतस्यामेध्या च तनुवौ संसृज्येते॥ य
स्याहिताग्नेरन्यैरग्निभिरग्नयः संसृज्यंते॥ अग्नये विविच
ये पुरोडाशमष्टाकपालं निर्वपेत्॥ मेध्यां चैवास्यामेध्यां च तनुवौ
व्यावर्त्तयति॥ अग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत्॥
अग्निमेव व्रतपतिं स्वेन भागधेयेनोपधावति॥ स एवैनं व्रतमाल

७७

भयति॥ ५॥ गर्भं स्रवंतमगदमकः॥ अग्निरिंद्रस्त्वष्टा बृहस्पतिः॥
पृथिव्यामवचुश्चोतैतत्॥ नाभिप्राप्नोति निर्ऋतिं पराचैः॥ रेतो वा एत
द्वाजिनमाहिताग्नेः॥ यदग्निहोत्रं॥ तद्यत्स्रवेत्॥ रेतोस्य वाजिनं
स्रवेत्॥ गर्भं स्रवंतमगदमकरित्याह॥ रेत एवास्मिन्वाजिनं दधा
ति॥ ६॥ अग्निरित्याह॥ अग्निर्वै रेतोधाः॥ रेत एव तद्दधाति॥ इं
द्र इत्याह॥ इंद्रियमेवास्मिन्दधाति॥ त्वष्टेत्याह॥ त्वष्टा वै पशूनां मि
थुनानां रूपकृत्॥ रूपमेव पशुषु दधाति॥ बृहस्पतिरित्याह॥
ब्रह्म वै देवानां बृहस्पतिः॥ ब्रह्मणैवास्मै प्रजाः प्रजनयति॥ पृथिव्या
मवचुश्चोतैतदित्याह॥ अस्यामेवैनत्प्रतिष्ठापयति॥ नाभिप्रा

बृ

श्रा०स०
७८

ग्नीतिनिर्ऋतिं पराचैरित्याह॥ रक्षसामपहत्यै॥ ७॥ अजा ग्नावेवास्या ग्निहोत्रꣳ हुतं भवति भवत्यो सी तपरिचक्षीत लंभयतिद धातिंदेवानां बृहस्पतिःपंचच॥ ३॥ याःपुरस्तात्प्रस्रवंति॥ उपरिष्टात्प्रस्रवतश्च याः॥ ताभीरश्मिपवित्राभिः॥ श्रद्धांयज्ञमारभे॥ देवागातुविदः॥ गातुंयज्ञा यविंदत॥ मनसस्पतिनांदिवेन॥ वाताघ्नतःप्रयुज्यतां॥ तृतीयंस्यदि वः॥ गायत्रियासोमआभृतः॥ १॥ सोमपीथायसंनयितुं॥ वकुल मंतरमाददे॥ आपोदेवीःशुद्धास्थ॥ इमापात्राणिशुंधत॥ उपातंक्या यदेवानां॥ पर्णवल्कमुतशुंधत॥ पयोगृहेषुपयोअघ्नियासु॥ पयो वत्सेषुपयइंद्रायहविषेध्रियस्व॥ गायत्रीपर्णवल्केन॥ पयःसोमंक

७८

ल्पिमं॥ २॥ अग्निंगृह्णामिसुरथंयोमयोभूः॥ यउद्यंतमारोहतिसू र्यमह्ने॥ आदित्यंज्योतिषांज्योतिरुत्तमं॥ श्वोयज्ञायरमतांदेवताभ्यः॥ वसून्रुद्रानादित्यान्॥ इंद्रेणसहदेवताः॥ ताःपूर्वःपरिगृह्णामि॥ स्व आयतनेमनीषया॥ इमामूर्जंपंचदशींयेप्रविष्टाः॥ तान्देवान्परिगृह्णा मिपूर्वः॥ ३॥ अग्निर्हव्यवाडिहतानावहतु॥ पौर्णमासꣳ हविरिद मेषांमयि॥ आमावास्यꣳ हविरिदमेषांमयि॥ अंतराग्नीपशवः॥ देवसꣳसदमागमन्॥ तान्पूर्वःपरिगृह्णामि॥ स्वआयतनेमनीष या॥ इहपशवो विश्वरूपापरमंतां॥ अग्निंगृहपतिमभिसंवसानाः॥ तान्पूर्वःपरिगृह्णामि॥ ४॥ स्वआयतनेमनीषया॥ इहपशवोविश्व

श्रा०त०७ ७९

रूपापरमंतां॥अग्निं गृहपतिमभिसंवसाना:॥ तान्पूर्वःपरिगृह्णा
मि॥स्व आयतने मनीषया॥अयंपितृणामग्नि:॥अवाड्ढव्यापितृ
भ्यआ॥तंपूर्वःपरिगृह्णामि॥अविषन्नःपितुंकरत्॥अजस्रंत्वां
सभापाला:॥ ५ ॥विजयेभागं समिंधतां॥अग्नेदीदायमेसभ्य॥वि
जित्येशरदःशतं॥अन्नमावसथीयं॥अभिहरामिशरदःशतं॥आ
वसथेश्रियंमंत्रं॥अहिर्बुध्नियो नियच्छतु॥इदमहमग्निज्येष्ठेभ्यः॥
वसुभ्योयज्ञंप्रब्रवीमि॥इदमहमिंद्रज्येष्ठेभ्यः॥ ६ ॥रुद्रेभ्योयज्ञंप्र
ब्रवीमि॥इदमहंवरुणज्येष्ठेभ्यः॥आदित्येभ्यो यज्ञंप्रब्रवीमि॥प
यस्वतीरोषधयः॥पयस्वद्वीरुधांपयः॥अपांपयसोयत्पयस्॥तेनमा

७

७९

मिंद्रसंसृज॥अग्नेव्रतपतेव्रतंचरिष्यामि॥ तच्छकेयंतन्मेराध्यतां॥
वायोव्रतपतआदित्यव्रते॥ ७ ॥व्रतानांव्रतपतेव्रतंचरिष्यामि॥तच्छ
केयंतन्मेराध्यतां॥इमांप्राचीमुदीचीं॥इषमूर्जमभिसंस्कृतां॥ब
हुपर्णामशुष्काग्रां॥हरामिपशुपामहं॥यत्कृष्णोरूपंकृत्वा॥प्रावि
शस्त्वंवनस्पतीन्॥ततस्त्वामेकविंशतिधा॥संभरामिसुसंभृता॥
॥ ८ ॥त्रीन्परिधीं स्तिस्रःसमिधः॥यज्ञायुरनुसंचरान्॥उपवेषंमे
क्षणंधृष्टिं॥संभरामिसुसंभृता॥याजाओषधयः॥देवेभ्यस्त्रियु
गंपुरा॥तासांपर्वराध्यासं॥परिस्तरमाहरन्॥अपांमेध्यंयज्ञि
यं॥सदेवंशिवमस्तुमे॥ ९ ॥आच्छेत्तावोमारिषं॥जीवानिशरदः

श्रा० तृ०

८

शतं॥ अपरिमितानांपरिमिताः॥ संनह्येसुकृताय कं॥ एनोमानिगां
कतमच्चनाहं॥ पुनरुत्थायबकुलाभंतु॥ सकृदाछिन्नंबर्हिरूर्णामृ
दु॥ स्योनंपितृभ्यस्त्वाभराम्यहं॥ अस्मिन्त्सीदंतुमेपितरः सोम्याः॥
पितामहाः प्रपितामहाश्चानुगैः सह॥ १०॥ त्रिवृत्पलाशेदर्भः॥ इया
न्प्रादेशसंमितः॥ यज्ञेपवित्रंपोतृतमं॥ पयोहव्यंकरोतुमे॥ इमौप्रा
णापानौ॥ यज्ञस्यांगानि सर्वशः॥ आप्याययंतौसंचरतां॥ पवित्रेह
व्यशोधने॥ पवित्रेस्थोवैष्णवी॥ वायुर्वोमनसापुनातु॥ ११॥ अ
यंप्राणश्चापानश्च॥ यजमानमपिगच्छतां॥ यज्ञेह्यभूतांपोतारौ॥
पवित्रेहव्यशोधने॥ त्वयावेदिंविविदुः पृथिवीं॥ त्वयायज्ञोजायते

विश्वदानिः॥ अछिद्रंयज्ञमन्वेषिविद्वानू॥ त्वया होतासंतनोत्यर्धमा
सानू॥ त्रयस्त्रिंशोसितंतूनां॥ पवित्रेणसहागहि॥ १२॥ शिवेयंरज्जु
रभिधानी॥ अघ्नियामुपसेवतां॥ अप्रस्त्रंसायज्ञस्य॥ उखेउपद
धाम्यहं॥ पशुभिः संनीतंबिभृतां॥ इंद्रायशृतंदधि॥ उपवेषोसियज्ञा
य॥ त्वांपरिवेषमधारयनू॥ इंद्रायहविः कृण्वंतः॥ शिवः शग्मोभवासि
नः॥ १३॥ अमृन्मयंदेवपात्रं॥ यज्ञस्यायुषिप्रयुज्यतां॥ तिरःपवित्र
मतिनीताः॥ आपोधारयमातिगुः॥ देवेनसवित्रोत्पूताः॥ वसोःसूर्य
स्यरश्मिभिः॥ गोदोहपवित्रेरज्जुं॥ सर्वापात्राणिशुंधत॥ एताआच
रंतिमधुमद्दुहानाः॥ प्रजावतीर्यशसोविश्वरूपाः॥ १४॥ बह्वीर्भवं

श्रा०त०
८१

नीरूपजायमानाः॥ इह्ववइंद्रोरमयतुगावः॥ पूषास्थ॥ अयक्ष्मावःप्र
जयासंसृजामि॥ रायस्पोषेणबहुलाभवंतीः॥ उर्जंपयःपिन्वमाना
घृतंच॥ जीवोजीवंतीरूपवःसदेयं॥ द्यौश्चेमंयज्ञंपृथिवीचसंदुहातां॥
धातासोमेनसहवातेनवायुः॥ यजमानायद्रविणंदधातु॥ १५॥ उत्सं
दुहंतिकलशंचतुर्बिलं॥ इडांदेवीमधुमतींसुवर्विदं॥ तदिंद्राग्नी
जिन्वतंसुनृतावत्॥ तद्यजमानममृतत्वेदधातु॥ कामधुक्षःप्रणो
ब्रूहि॥ इंद्रायहविरिंद्रियं॥ अमूंयस्यांदेवानां॥ मनुष्याणांपयोहि
तं॥ बहुग्धींद्रायदेवेभ्यः॥ हव्यमाप्यायतांपुनः॥ १६॥ वत्सेभ्योम
नुष्येभ्यः॥ पुनर्दोहायकल्पतां॥ यज्ञस्यसंततिरसि॥ यज्ञस्यत्वास

दु

८१

ततिमनुसंतनोमि॥ अदस्तमसिविष्णवेत्वा॥ यज्ञायापिदधाम्यहं॥ अद्भि
ररिक्तेनपात्रेण॥ याःपूताःपरिशेरते॥ अयंपयःसोमंकृत्वा॥ स्वांयोनिम
पिगछतु॥ १७॥ पर्णवल्कःपवित्रं॥ सौम्यःसोमाद्धिनिर्मितः॥ इध्मोपर्णं
चदर्भश्च॥ देवानांहव्यशोधनो॥ प्रातर्वेषायगोपाय॥ विष्णोहव्यंहिर
क्षसि॥ उभावंउपस्तृणते॥ देवताउपसंतुमे॥ अहंग्राम्यानुपवसामि॥ म
ह्यंगोपतयेपशून्॥ १८॥ आभृतइमंगृह्णामिपूर्वःस्त्वाःपूर्वःपरिगृह्णा
मिसभापालाइंद्रज्येष्ठेभ्यआदित्यव्रतपतेसुसंभृतामेसहपुनातुगार्हिनो
विश्वरूपादधातुपुनर्गछतुपशून्॥ १॥ देवादेवेषुपराक्रमध्वं॥ प्रथ
माद्वितीयेषु॥ द्वितीयास्तृतीयेषु॥ त्रिरेकादशाइहमावत॥ इदंशकियंय

ग्नी

दिदं करोमि ॥ आत्माकरोत्वात्मने ॥ इदं करिष्ये भेषजं ॥ इदं मे विश्वभेषजा ॥ १०
अश्विनाप्रावतंयुवं ॥ इदमहꣳ सेनाया अभीत्वर्यै ॥ १ ॥ मुखमपोहामि ॥
सूर्यज्योतिर्विभाहि ॥ महतइंद्रियाय ॥ आप्यायतांघृतयोनिः ॥ अग्निर्ह
व्यानुमन्यतां ॥ खमंक्ष्वत्वमंक्ष्व ॥ सुरूपंत्वावसुविदं ॥ पशूनांतेजसा ॥
अग्नयेजुष्टमभिघारयामि ॥ स्योनंतेसदनंकरोमि ॥ २ ॥ घृतस्य
धारयासुशेवंकल्पयामि ॥ तस्मिन्त्सीदामृतेप्रतितिष्ठ ॥ व्रीहीणांमे
धसुमनस्यमानः ॥ आर्द्रः प्रथस्नुर्भुवनस्यगोपाः ॥ शृतउत्स्नातिज
निता मतीनां ॥ यस्तआत्मापशुषुप्रविष्टः ॥ देवानांविष्ठामनुयोवितस्थे ॥ ८२
आत्मन्वान्त्सोमघृतवान्हिभूत्वा ॥ देवान्गाछसुवर्विंदयजमानायमह्यं ॥

इराभूतिः पृथिव्येरसोमोत्क्रमीत् ॥ ३ ॥ देवाः पितरः पितरोदेवाः ॥ योह
मस्मिससन्यजे ॥ यस्यास्मिनतमंतरेमि ॥ स्वंमइष्टꣳ स्वंदत्तं ॥ स्वंपूर्तꣳ
स्वꣳश्रांतं ॥ स्वꣳहुतं ॥ तस्यमेग्निरुपद्रष्टा ॥ वायुरुपश्रोता ॥ आदित्यो
नुख्याता ॥ द्यौः पिता ॥ ४ ॥ पृथिवीमाता ॥ प्रजापतिर्बंधुः ॥ यएवास्मिस
सन्यजे ॥ माभेर्मासंविक्थामात्वाहिꣳसिषं ॥ मातेतेजोपक्रमीत् ॥ भर
तमुद्धरेमनुषिंच ॥ अवदानानितेप्रत्यवदास्यामि ॥ नमस्तेअस्तुमामा
हिꣳसीः ॥ यदवदानानितेवद्यन् ॥ विलोमाकार्षमात्मनः ॥ ५ ॥ आ
ज्येनप्रत्यनज्म्येनत् ॥ तत्तआप्यायतांपुनः ॥ आज्यायोयवमात्रात् ॥
आव्याधात्कृत्यतामिदं ॥ मारूरुपामयज्ञस्य ॥ शुद्धꣳस्विष्टमिदꣳहविः ॥

श्रा०त० ११

८३

मनुनादृष्टां घृतपदीं ॥ मित्रावरुणसमीरितां ॥ दक्षिणार्धादसंभिदन् ॥
अवद्यांभ्येकृतोमुखां ॥ ६ ॥ इडेभागंजुषस्वनः ॥ जिन्वगाजिन्वार्वतः ॥
तस्यास्तेभक्षिवाणः स्याम ॥ सर्वात्मानः सर्वगणाः ॥ ब्रध्नपिन्वस्व ॥ द
दतोमेमाक्षायि ॥ कुर्वतोमेमोपदसत् ॥ दिशांकॢप्तिरसि ॥ दिशोमे
कल्पंतां ॥ कल्पंतां मे दिशः ॥ ७ ॥ दैवीश्च मानुषीश्च ॥ अहोरात्रेमेकल्प
तां ॥ अर्धमासा मेकल्पंतां ॥ मासा मे कल्पंतां ॥ ऋतवो मे कल्पंतां ॥
संवत्सरोमेकल्पतां ॥ कॢप्तिरसिकल्पतांमे ॥ आशानांत्वाशापाले
भ्यः ॥ चतुर्भ्योअमृतेभ्यः ॥ इदंभूतस्याध्यक्षेभ्यः ॥ ८ ॥ विधेम
हविषावयं ॥ भजतांभागीभागं ॥ माभागोभक्त ॥ निरभागंभजामः ॥

८२

गो

अपस्पिन्व ॥ ओषधीर्जिन्व ॥ द्विपात्पाहि ॥ चतुष्पादव ॥ दिवोवृष्टिमेरय ॥
ब्राह्मणामिदंहविः ॥ ९ ॥ सोम्यानांसोमपीथिनां ॥ निर्भक्तोब्राह्म
णः ॥ नेहाब्राह्मणस्यास्ति ॥ समक्तंबर्हिर्हविषाघृतेन ॥ समादित्यैर्व
सुभिः संमरुद्भिः ॥ समिंद्रेणविश्वेभिर्देवेभिरक्तं ॥ दिव्यंनभोगच्छतु
यत्स्वाहा ॥ इंद्राणीवाविधवाभूयासं ॥ अदितिरिवसुपुत्रा ॥ अस्थू
रित्वागार्हपत्य ॥ १० ॥ उपनिषदेसुप्रजास्त्वाय ॥ संपत्नीपत्यासुकृ
तेनगच्छतां ॥ यज्ञस्ययुक्तौधुर्याबभूतां ॥ संजानानौविजहतामरातीः ॥
दिविज्योतिरजरमारभेतां ॥ दशतेतनुवोयज्ञयज्ञियाः ॥ ताः प्रीणातु
यजमानोघृतेन ॥ नारिष्ठयोः प्रशिषमीडमानः ॥ देवानांदैव्येपियज

ब्रा०द०
८४

मानोमृतोभूत्॥ यंवांदेवाअकल्पयन्॥ ११॥ ऊर्जोभागꣳशतक्रतू॥
एतद्वांतेनप्रीणानि॥ तेनतृप्यतमꣳहहो॥ अहंदेवानाꣳसुकृतामस्मिं
ल्लोके॥ ममेदमिष्टंनमिथुर्भवाति॥ अहंनारिष्ठावनुयजामिविद्वान्॥
यदाभ्यामिंद्रोअदधाद्भागधेयं॥ अदारसद्भवतदेवसोम॥ अस्मिन्य
ज्ञेमरुतोमृडतानः॥ मानोविददभिभाअशस्तिः॥ १२॥ मानोविदद्वृ
जनाद्वेष्यायाः॥ ऋषभंवाजिनंवयं॥ पूर्णमासंयजामहे॥ सनोदोह
ताꣳसुवीर्यं॥ रायस्पोषꣳसहस्रिणं॥ प्राणायसुराधसे॥ पूर्णमासा
यस्वाहा॥ अमावास्यासुभगासुशेवा॥ धेनुरिवभूयआप्यायमाना॥
सानोदोहताꣳसुवीर्यं॥ रायस्पोषꣳसहस्रिणं॥ अपानायसुराधसे॥

१२

मो

८४

अमावास्यायैस्वाहा॥ अभिस्तृणीहिपरिधेहिवेदिं॥ जामिंमाहिꣳसीर
मुयाशयाना॥ होतृषदनाहरिताःसुवर्णाः॥ निष्काइमेयजमानस्यब्र
ध्ने॥ १२॥ अभीलर्येकरोमिक्रमीत्पितात्मनएकतोमुखांमेदिशो
ध्यक्षेभ्योहविर्गार्हपत्याकल्पयन्नशास्तिःसानोदोहताꣳसुवीर्यꣳ
सप्तच॥ ५॥ परिस्तृणीतपरिधत्ताग्निं॥ परिहितोग्निर्यजमानं
भुनक्तु॥ अपाꣳरसओषधीनाꣳसुवर्णः॥ निष्काइमेयजमानस्य
संतुकामदुघाः॥ अमुत्रामुष्मिन्लोके॥ भूपतेभुवनपते॥ महतो
भूतस्यपते॥ ब्रह्माणंत्वावृणीमहे॥ अहंभूपतिरहंभुवनपतिः॥ अ
हंमहतोभूतस्यपतिः॥ १॥ देवेनसवित्राप्रसूतआर्त्विज्यंकरिष्या

मि॥ देवस्य सवितरेतं त्वा वृणते॥ बृहस्पतिं दैव्यं ब्रह्माणं॥ तदहं मनसे प्रब्रवीमि॥ मनो गायत्रियै॥ गायत्री त्रिष्टुभे॥ त्रिष्टुब्जगत्यै॥ जगत्यनुष्टुभे॥ अनुष्टुक्पङ्क्त्यै॥ पङ्क्तिः प्रजापतये॥ २ ॥ प्रजापतिर्विश्वेभ्यो देवेभ्यः॥ विश्वे देवा बृहस्पतये॥ बृहस्पतिर्ब्रह्मणे॥ ब्रह्म भूर्भुवः सुवः॥ बृहस्पतिर्देवानां ब्रह्मा॥ अहं मनुष्याणां॥ बृहस्पते यज्ञं गोपाय॥ इदं तस्मै हर्म्यं करोमि॥ यो वो देवाश्चरति ब्रह्मचर्यं॥ मेधावी दिक्षु मनसा तपस्वी॥ ३ ॥ अंतर्दूतश्चरति मानुषीषु॥ चतुःशिखंडा युवतिः सुपेशाः॥ घृतप्रतीका भुवनस्य मध्ये॥ मर्मृज्यमाना महते सौभगाय॥ मह्यं धुक्ष्व यजमानाय कामान्॥ भूमिर्भूत्वा महिमानं पुपोष॥

ततो देवी वर्धयते पयांसि॥ यज्ञिया यज्ञं विचयंति शं च॥ ओषधीरापइह शक्करीश्च॥ यो मा हृदा मनसा यश्च वाचा॥ ४ ॥ यो ब्रह्मणा कर्मणा द्वेषि देवाः॥ यः श्रुतेन हृदयेनेष्णता च॥ तस्येंद्र वज्रेण शिरश्छिनद्मि॥ ऊर्णम्रदुः प्रथमानं स्योनं॥ देवेभ्यो जुष्टं सदनाय बर्हिः॥ सुवर्गे लोके यजमानं हि धेहि॥ मां नाकस्य पृष्ठे परमे व्योमन्॥ चतुःशिखंडा युवतिः सुपेशाः॥ घृतप्रतीका वयुनानि वस्ते॥ सा स्तीर्यमाणा महते सौभगाय॥ ५ ॥ सा मे धुक्ष्व यजमानाय कामान्॥ शिवा च मे शग्मा चैधि॥ स्योना च मे सुषदा चैधि॥ ऊर्जस्वती च मे पयस्वती चैधि॥ इषमूर्जं मे पिन्वस्व॥ ब्रह्म तेजो मे पिन्वस्व॥ क्षत्रमोजो

ब्रा० तृ० ७ मे पिन्वस्व ॥ विशं पुष्टिं मे पिन्वस्व ॥ आयुरन्नाद्यं मे पिन्वस्व ॥ प्रजां पशून्मे १४
८६ पिन्वस्व ॥ ६ ॥ अस्मिन्यज्ञ उप भूय इन्नु मे ॥ अविक्षोभाय परिधीं दधामि ॥
धर्त्ता धरुणो धरीयान् ॥ अग्निर्द्वेषाꣳसि निरितो नुदाते ॥ विछिनद्मि विधृ
तीभ्याꣳ सपत्नान् ॥ जातान्भ्रातृव्यान्ये च जनिष्यमाणाः ॥ विशोयंत्राभ्यां
विधमाम्येनान् ॥ अहꣳ स्वानामुत्तमोऽसानि देवाः ॥ विशोयंत्रे नुदमाने
अरातिं ॥ विश्वं पाप्मानममतिं दुर्मरायुं ॥ ७ ॥ सीदंती देवी सुकृतस्य लो
के ॥ धृतीस्थो विधृती स्वधृती ॥ प्राणान्मयि धारयतं ॥ प्रजां मयि धार
यतं ॥ पशून्मयि धारयतं ॥ अयं प्रस्तर उभयस्य धर्त्ता ॥ धर्त्ता प्रयाजा ८६
नामुतानूयाजानां ॥ स दाधार समिधो विश्वरूपाः ॥ तस्मिन्[illegible]स्रुचो

अध्यासादयामि ॥ आरोह पथो जुहु देवयानान् ॥ ८ ॥ यत्रर्षयः प्रथम
जा ये पुराणाः ॥ हिरण्यपक्षाजिरा संभृतांगा ॥ वहासि मा सुकृतां यत्र लोकाः ॥
अवाहं बाध उपभृता सपत्नान् ॥ जातान्भ्रातृव्यान्ये च जनिष्यमाणाः ॥ दोहै व्या
यज्ञꣳ सुदुघामिव धेनुं ॥ अहमुत्तरो भूयासं ॥ अधरे मत्सपत्नाः ॥ यो मा
वाचा मनसा दुर्मरायुः ॥ हृदारातीयादभिदासदग्ने ॥ ९ ॥ इदमस्य
चित्तमधरं ध्रुवायाः ॥ अहमुत्तरो भूयासं ॥ अधरे मत्सपत्नाः ॥ ऋषभो
सि शाक्करः ॥ घृताचीनाꣳ सूनुः ॥ प्रियेण नाम्ना प्रिये सदसि सीद ॥ स्यो
नो मे सीद सुषदः पृथिव्यां ॥ प्रथयि प्रजया पशुभिः सुवर्गे लोके ॥ दिवि
सीद पृथिव्यामंतरिक्षे ॥ अहमुत्तरो भूयासं ॥ १० ॥ अधरे मत्सपत्नाः ॥

ब्रा० तृ० ३ इयं स्थाली घृतस्य पूर्णा ॥ अछिन्नपयाः शतधारउत्सः ॥ मारुतेन शर्मणा १५
८७ दैव्येन ॥ यज्ञोसि सर्वतः श्रितः ॥ सर्वतो मां भूतं भविष्य छ्रयतां ॥ शतं मे सं
त्वाशिषः ॥ सहस्रं मे संतु सूनृताः ॥ इरावतीः पशुमतीः ॥ प्रजापतिरसि
सर्वतः श्रितः ॥ ११ ॥ सर्वतो मां भूतं भविष्य छ्रयतां ॥ शतं मे संत्वाशिषः ॥
सहस्रं मे संतु सून्टताः ॥ इरावतीः पशुमतीः ॥ इदमिंद्रियममृतं वीर्यं ॥
अनेनेंद्राय पशवो चिकित्सन्तु ॥ तेन देवा अवतोप मां ॥ इहेष मूर्जं यशः
सह ओजः सनेयं ॥ शृतं मयि श्रयतां ॥ यत्पृथिवीमचरत्तत्प्राविष्टं ॥ १२ ॥
येनासिंच द्बलमिंद्रे प्रजापतिः ॥ इदं तच्छुक्रं मधुवाजिनीवत् ॥ येनोपरि ८७
ष्टादधिनोन्महेंद्रं ॥ दधिमांधिनोतु ॥ अयं वेदः पृथिवीमन्वविंदत् ॥

गुहासती गहने गह्वरेषु ॥ सविंदतु यजमानाय लोकं ॥ अछिद्रं यज्ञं भू
रिकर्मा करोतु ॥ अयं यज्ञः समसदद्धविष्मान् ॥ ऋचा साम्ना यजुषा देव
ताभिः ॥ १३ ॥ तेन लोकान्त्सूर्यवतो जयेम ॥ इंद्रस्य सख्यममृतत्वमश्यां ॥
यो नः कनीय इह कामयाते ॥ अस्मिन्यज्ञे यजमानाय मह्यं ॥ अपतामिं
द्राग्नी भुवनान्नुदेतां ॥ अहं प्रजां वीरवतीं विदेय ॥ अग्ने वाजजित् ॥
वाजं त्वा सरिष्यंतं ॥ वाजं जेष्यंतं ॥ वाजिनं वाजजितं ॥ १४ ॥ वाजजित्या
ये संमार्ज्मि ॥ अग्निमन्नादमन्नाद्याय ॥ उपहूतो द्यौः पिता ॥ उप मां द्यौः
पिता ह्वयतां ॥ अग्निराग्नीध्रात् ॥ आयुषे वर्चसे ॥ जीवात्वै पुण्याय ॥
उपहूता पृथिवी माता ॥ उप मां माता पृथिवी ह्वयतां ॥ अग्निराग्नीध्रा

श्रा०त्र०७ ८८

त॥ १५॥आयुषेवर्चसे॥जीवात्वैपुण्याय॥ मनोज्योतिर्जुषतामाज्यं॥
विछिन्नंयज्ञꣳसमिमंदधातु॥ बृहस्पतिस्तनुतामिमंनः॥विश्वेदेवाइ
हमादयंतां॥यंतेअग्नआवृश्चामि॥अहंवाक्षिपितश्चरन्॥प्रजांचत
स्यमूलंच॥नीचैर्देवानिवृश्चत॥ १६॥ अग्नेयोनोभिदासति॥समा
नोयश्चनिष्ट्यः॥इध्मस्येवप्रक्षायतः॥मातस्योछेषिकिंचन॥यो
मांद्वेष्टिजातवेदः॥यंचाहंद्वेष्मियश्चमां॥ सर्वाꣳस्तानग्नेसंदह॥याꣳ
श्चाहंद्वेष्मियेचमां॥अग्नेवाजजित्॥ वाजंत्वाससृवाꣳसं॥ १७॥
वाजंजिगिवाꣳसं॥वाजिनंवाजजितं॥वाजजित्यायैसंमार्ज्मि॥अ
ग्निमन्नादमन्नाद्याय॥वेदिर्बर्हिः शृतꣳहविः॥इध्मःपरिपरिधयः

१६ ८८

स्रुचः॥आज्यंयज्ञऋचोयजुः॥याज्याश्चवषट्काराः॥संमेसंनतयोनमंतां॥
इध्मसंनहनेहुते॥ १८॥ दिवंखीलोवततः॥पृथिव्याअध्युत्थितः॥तेनासह
स्रकांडेन॥द्विषंतꣳशोचयामसि॥द्विषन्मेबहुशोचतु॥ओषधेमोअहꣳ
शुचं॥यज्ञनमस्तेयज्ञ॥नमोनमश्चतेयज्ञ॥शिवेनमेसंतिष्ठस्व॥स्योने
नमेसंतिष्ठस्व॥ १९॥सुभूतेनमेसंतिष्ठस्व॥ब्रह्मवर्चसेनमेसंतिष्ठस्व॥
यज्ञस्यर्धिमनुसंतिष्ठस्व॥उपतेयज्ञनमः॥उपतेनमः॥उपतेनमः॥त्रि
ष्फलीक्रियमाणानां॥योन्यंगोअवशिष्यते॥रक्षसाभागधेयं॥आप
स्तत्प्रवहतादितः॥ २०॥उलूखलेमुसलेयच्चशूर्पे॥आशिश्लेषदृषदियत्
कपाले॥अवप्रुषोविप्रुषः संयजामि॥विश्वेदेवाहविरिदंजुषंतां॥यज्ञे

यावितुष: संति बुद्धी:॥ अग्नौताः सर्वाः स्विष्टाः सुहुताजुहोमि॥ उद्यंनद्यमि
त्रमहः॥ सपत्नान्मे अनीनशः॥ दिवैनान्विद्युताजहि॥ निम्नोचं नं धरान्कृ
धि॥ २१॥ उद्यन्नद्यविनोभज॥ पितापुत्रेभ्योयथा॥ दीर्घायुत्वस्यहेशि
षे॥ तस्यनोदेहिसूर्य॥ उद्यन्नद्यमित्रमहः॥ आरोहन्नुत्तरांदिवं॥ हृद्रो
गंममसूर्य॥ हरिमाणंचनाशय॥ शुकेषुमेहरिमाणं॥ रोपणाकासुद
ध्मसि॥ २२॥ अथोहारिद्रवेषुमे॥ हरिमाणंनिदध्मसि॥ उदगादय
मादित्यः॥ विश्वेनसहसासह॥ द्विषंतंममरंधयन्॥ मोअहंद्विषतेर
धं॥ योनःशपादशपतः॥ यश्चनःशपतःशपात्॥ उषाश्चतस्मैनिम्रुक्
च॥ सर्वंपापंसमूहतां॥ २३॥ योनःसपत्नोयोरणः॥ मर्त्तोभिदास

तिदेवाः॥ इध्मस्येवप्रक्षायतः॥ मातस्योच्छेषिकिंचन॥ अवसृष्टःपरापत॥ शरो
ब्रह्मसंशितः॥ गच्छामित्रान्प्रविश॥ मैषां कंचनोच्छिषः॥ २४॥ पतिःप्रजापतये
तपस्वीवाचासोभयंगोपशून्मेपिन्वस्वदुर्मरायुंदेवयानानग्नेंतरिक्षेहमुत्तरो
भूयासंप्रजापतिरसिसर्वतःश्रितःप्रविष्टंदेवताभिर्वाजजितंपृथिवीद्रुयतामग्नि
राग्नीध्राद्दृश्चनससृवाः संकुतेस्योनेनेमेसंतिष्ठस्वेतःरुधिदध्मस्यूहता
मष्टोचं॥ ८॥ सक्षेदंपश्य॥ विधर्तरिदंपश्य॥ नाकेदंपश्य॥ रमतिःपनिष्ठा॥
ऋतंवर्षिष्ठं॥ अमृतायान्याकुः॥ सूर्योवरिष्ठोअक्षभिर्विभाति॥ अनुधावापृ
थिवीदेवपुत्रे॥ दीक्षासितपसोयोनिः॥ तपोसिब्रह्मणोयोनिः॥ १॥ ब्रह्मासि
क्षत्रस्ययोनिः॥ क्षत्रमस्यृतस्योनिः॥ ऋतमसिभूरारभे॥ श्रद्धांमनसा॥
यो

ब्रा० त० ५ दीक्षांतपसा ॥ विश्वंस्यभुवनस्याधिपत्नी ॥ सर्वेकामायजमानस्यसंतु ॥ वातंप्रा १८
१० णमनसान्वारभामहे ॥ प्रजापतिंयोभुवनस्यगोपाः ॥ सनोमृत्योस्त्रायतांपात्वं
हसः ॥ २ ॥ ज्योग्जीवाजरामशीमहि ॥ इंद्रशाकरगायत्रींप्रपद्ये ॥ तांतेयुनज्मि ॥
इंद्रशाकरत्रिष्टुभंप्रपद्ये ॥ तांतेयुनज्मि ॥ इंद्रशाकरजगतींप्रपद्ये ॥ तांतेयुनज्मि ॥
इंद्रशाकरानुष्टुभंप्रपद्ये ॥ तांतेयुनज्मि ॥ इंद्रशाकरपङ्क्तिंप्रपद्ये ॥ ३ ॥ तांतेयुन
ज्मि ॥ आहंदीक्षामरुहमृतस्यपत्नीं ॥ गायत्रेणछंदसाब्रह्मणाच ॥ ऋतंसत्ये
धायि ॥ सत्यमृतेधायि ॥ ऋतंचमेसत्यंचाभूतां ॥ ज्योतिरभूवंसुवरगमं ॥
सुवर्गंलोकंनाकस्यपृष्ठं ॥ ब्रध्नस्यविष्टपमगमं ॥ पृथिवीदीक्षा ॥ ४ ॥ तया
ग्निर्दीक्षयादीक्षितः ॥ ययाग्निर्दीक्षयादीक्षितः ॥ तयात्वादीक्षयादीक्षया १०

मि ॥ अंतरिक्षंदीक्षा ॥ तयावायुर्दीक्षयादीक्षितः ॥ ययावायुर्दीक्षयादीक्षितः ॥
तयात्वादीक्षयादीक्षयामि ॥ द्यौर्दीक्षा ॥ तयादित्योदीक्षयादीक्षितः ॥ यया
दित्योदीक्षयादीक्षितः ॥ ५ ॥ तयात्वादीक्षयादीक्षयामि ॥ दिशोदीक्षा ॥
तयाचंद्रमादीक्षयादीक्षितः ॥ ययाचंद्रमादीक्षयादीक्षितः ॥ तयात्वादीक्षयादी
क्षयामि ॥ आपोदीक्षा ॥ तयावरुणोराजादीक्षयादीक्षितः ॥ ययावरुणो
राजादीक्षयादीक्षितः ॥ तयात्वादीक्षयादीक्षयामि ॥ ओषधयोदीक्षा ॥ ६ ॥
तयासोमोराजादीक्षयादीक्षितः ॥ ययासोमोराजादीक्षयादीक्षितः ॥ तया
यो त्वादीक्षेदीक्षयामि ॥ वाग्दीक्षा ॥ तयाप्राणोदीक्षयादीक्षितः ॥ ययाप्राणो
दीक्षयादीक्षितः ॥ तयात्वादीक्षयादीक्षयामि ॥ पृथिवीत्वादीक्षमाण

ब्रा० तृ० ७ मनुदीक्षतां ॥ अंतरिक्षंत्वा दीक्षमाणमनुदीक्षतां ॥ द्यौस्त्वा दीक्षमाणम १९
८१ नुदीक्षतां ॥ ७ ॥ दिशस्त्वादीक्षमाणमनुदीक्षंतां ॥ आपस्त्वादीक्षमाणम
नुदीक्षंतां ॥ ओषधयस्त्वादीक्षमाणमनुदीक्षंतां ॥ वाक्त्वादीक्षमाणमनु
दीक्षतां ॥ ऋचस्त्वादीक्षमाणमनुदीक्षंतां ॥ सामानि त्वादीक्षमाणमनुदी
क्षंतां ॥ यजूꣳषि त्वादीक्षमाणमनुदीक्षंतां ॥ अहश्च रात्रिश्च ॥ कृषिश्च वृ
ष्टिश्च ॥ त्विषिश्चापचितिश्च ॥ ८ ॥ आपश्चौषधश्च ॥ ऊर्क्च सूनृता च ॥
तास्त्वादीक्षमाणमनुदीक्षंतां ॥ स्वेदक्षे दक्षपितेह सीद ॥ देवानाꣳ सुम्नो ८१
महते रणाय ॥ स्वासस्थ तनुवा संविशस्व ॥ पितेवैधि सूनव आ सुशेवः ॥
शिवो मा शिवमा विश ॥ सत्यं म आत्मा ॥ श्रद्धा मेक्षितिः ॥ ९ ॥ तपो

मे प्रतिष्ठा ॥ सवितृप्रसूता मा दिशो दीक्षयंतु ॥ सत्यमस्मि ॥ अहं त्वदस्मि
मदसि त्वमेतत् ॥ ममासि योनिस्तव योनिरस्मि ॥ ममैव सन्वह हव्यान्य
ग्ने ॥ पुत्रः पित्रे लोककृज्जातवेदः ॥ आजुह्वानः सुप्रतीकः पुरस्तात् ॥ अ
ग्ने स्वां योनिमासीद साध्या ॥ अस्मिन्त्सधस्थे अध्युत्तरस्मिन् ॥ १० ॥
विश्वे देवा यजमानश्च सीदत ॥ एकमिषे विष्णुस्त्वान्वेतु ॥ द्वे ऊर्जे विष्णु
स्त्वान्वेतु ॥ त्रीणि व्रताय विष्णुस्त्वान्वेतु ॥ चत्वारि मायोभवाय विष्णुस्त्वा
न्वेतु ॥ पंच पशुभ्यो विष्णुस्त्वान्वेतु ॥ षड्रायस्पोषाय विष्णुस्त्वान्वेतु ॥
सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वान्वेतु ॥ सखायः सप्तपदा अभूम ॥ स
ख्यं ते गमेयं ॥ ११ ॥ सख्यात्ते मा योषं ॥ सख्यान्मे मा योष्ठाः ॥ सासि

श्रा०त०५ १२२

सुब्रह्मण्ये॥ तस्यास्ते पृथिवी पादः॥ सासि सुब्रह्मण्ये॥ तस्यास्तेंतरि
क्षंपादः॥ सासि सुब्रह्मण्ये॥ तस्यास्ते द्यौः पादः॥ सासि सुब्रह्मण्ये॥ तस्या
स्ते दिशः पादः॥ १२॥ परोरजास्ते पंचमः पादः॥ सानूर्जं धुक्ष्व॥ ते
जइंद्रियं॥ ब्रह्मवर्चसमन्नाद्यं॥ विमिमे त्वा पयस्वती॥ देवानां धेनुः
सुदुघाम नपस्फुरंती॥ इंद्रः सोमंपिबतु॥ क्षेमो अस्तु नः॥ इमां नराः
कृणुत वेदिमेत्य॥ वसुमतीं रुद्रवतीमादित्यवतीं॥ १३॥ वर्ष्मन्दिवः॥
नाभा पृथिव्याः॥ यथा यं यजमानो न रिष्येत्॥ देवस्य सवितुः प्रस
वे॥ चतुःशिखंडा युवतिः सुपेशाः॥ घृतप्रतीका भुवनस्य मध्ये॥ तस्यां
सुपर्णावधियोनिविष्टौ॥ तयोर्देवानामधिभागधेयं॥ अपजन्यं भयं

२० १२

नुद॥ अपचक्राणि वर्तय॥ गृहं सोमस्य गच्छतं॥ न वा उवेतन्म्रियसे न रिष्यसि॥ दिवां इदेषि पथिभिः सुगेभिः॥ यत्र यंति सुकृतो नापि दुष्कृ
तः॥ तत्र त्वा देवः सविता दधातु॥ १४॥ ब्रह्मणो योनिरंहसः पृङ्क्तिः प्रपद्ये
दीक्षाय यादित्यो दीक्षया दीक्षितस्तया त्वा दीक्षया दीक्षयाम्योषध
यो दीक्षा द्यौस्त्वा दीक्षमाणमनुदीक्षतामपचितिश्चाक्षितिरुत्तरस्मि
न्नामेयं दिशः पाद आदित्यवतीं वर्तय पंचच॥ ७॥ यदस्य पारे रजसः॥
शुक्रं ज्योतिरजायत॥ तन्नः पर्षदतिद्विषः॥ अग्ने वैश्वानर स्वाहा॥
यस्माद्भीषा वाशिष्ठाः॥ ततो नो अभयं कृधि॥ प्रजाभ्यः सर्वाभ्यो मृड॥
नमो रुद्राय मीढुषे॥ यस्माद्भीषा न्यषदः॥ ततो नो अभयं कृधि॥ १॥

ब्रा॰ त॰
९२

ष्ठ

प्रजाभ्यः सर्वाभ्यो मृड ॥ नमो रुद्राय मीढुषे ॥ उदुस्त्र तिष्ठ प्रति तिष्ठ मा रिषः ॥ २१
मेमं यज्ञं यजमानं च रीरिषः ॥ सुवर्गे लोके यजमानꣳ हि धेहि ॥ शन्न ए
धि द्विपदे शं चतुष्पदे ॥ यस्माद्भीषावेपिष्ठाः पलायिष्ठाः समज्ञास्थाः ॥
ततो नो अभयं कृधि ॥ प्रजाभ्यः सर्वाभ्यो मृड ॥ नमो रुद्राय मीढुषे ॥ २ ॥
यद्रुद्रमकः ॥ तस्मै नमः ॥ तस्मै स्वाहा ॥ नवा उ वेतन्म्रियसे ॥ आशानां
त्वा विश्वा आशाः ॥ यज्ञस्य हि स्थ ऋत्वियौ ॥ इंद्राग्नी चेतनस्य च ॥
ऋतावृतस्य तृप्यतं ॥ अकृतस्य कृतस्य च ॥ कृतस्य चाकृतस्य च ॥ अ
कृतस्य कृतस्य च ॥ इंद्राग्नी अस्य सोमस्य ॥ वीतं पिबतं जुषेथां ॥ मा
यजमानं तमो विदत् ॥ मर्त्विजो मो इमाः प्रजाः ॥ मा यः सोममिमं पिबा ९२

त् ॥ सꣳसृष्टमुभयं कृतं ॥ ३ ॥ कृधि मीढुषे कृतस्य च सप्त च ॥ ८ ॥ ॥
अनागसस्त्वा वयं ॥ इंद्रेण प्रेषिता उप ॥ वायुष्टे अस्त्वꣳ शंभूः ॥ मित्रस्ते अ
स्त्वꣳ शंभूः ॥ वरुणस्ते अस्त्वꣳ शंभूः ॥ अपांक्षया ऋतस्य गर्भाः ॥ भुवन
स्य गोपाः श्येना अतिथयः ॥ पर्वतानां ककुभः प्रयुतो नपातारः ॥ वग्नुनें
द्रꣳ ह्वयत ॥ घोषेणामीवाꣳश्चातयत ॥ १ ॥ युक्तास्थ वहत ॥ देवा यावा त
णद्दं दुरिंद्र इत्यवादिषुः ॥ ऐंद्रमचुच्यवुः परमस्याः परावतः ॥ आस्मा
त्सधस्थात् ॥ ओरोरंतरिक्षात् ॥ आ सुभूतमसुषवुः ॥ समरे रक्षाꣳस्य
वधिषुः ॥ अपहतं ब्रह्मज्यस्य ॥ वाक्च त्वा मनश्च श्रीणीतां ॥ २ ॥ प्राण
श्च त्वा पानश्च श्रीणीतां ॥ चक्षुश्च त्वा श्रोत्रं च श्रीणीतां ॥ दक्षश्च त्वा
ब्रह्मवर्चसं म आसुषवुः ॥

श्रौ०त० ७ ९४

बलं च श्रीणीतां ॥ ओजश्च त्वा सहश्च श्रीणीतां ॥ आयुश्च त्वा जरा च श्रीणीतां ॥ आत्मा च त्वा तनूश्च श्रीणीतां ॥ शृतोसि शृतं कृतः ॥ शृताय त्वा शृतेभ्यस्त्वा ॥ यमिंद्र माहुर्वरुणं यमाहुः ॥ यं मित्रमाहुर्यमु सत्यमाहुः ॥ ३ ॥ यो देवानां देवतमस्तपोजाः ॥ तस्मै त्वा तेभ्यस्त्वा ॥ मयि त्यदिंद्रियं महत् ॥ मयि दक्षो मयि क्रतुः ॥ मयि धायि सुवीर्यं ॥ त्रिशुग्घर्मो विभातु मे ॥ आकूत्या मनसा सह ॥ विराजा ज्योतिषा सह ॥ यज्ञेन पयसा सह ॥ तस्य दोहमशीमहि ॥ ४ ॥ तस्य सुम्नमशीमहि ॥ तस्य भक्षमशीमहि ॥ वाग्जुषाणा सोमस्य तृप्यतु ॥ मित्रो जनान्त्स मित्र ॥ यस्मान्न जातः परो अन्यो स्ति ॥ य आविवेश भुवनानि विश्वा ॥ प्रजापतिः प्रजया संविदानः ॥

२२

९४

त्रीणि ज्योतींषि सचते स षोडशी ॥ एष ब्रह्मा य ऋत्वियः ॥ इंद्रो नाम श्रुतो गणे ॥ ५ ॥ प्र ते महे विदथे शंसिषं हरी ॥ य ऋत्वियः प्र ते वन्वे ॥ वनुषो हर्यतं मदं ॥ इंद्रो नाम घृतं न यः ॥ हरिभिश्चारु सेचते ॥ श्रुतो गण आ त्वा विशंतु ॥ हरिवर्पसं गिरः ॥ इंद्राधिपतेधिपतिस्त्वं देवानामसि ॥ अधिपतिं मां ॥ आयुष्मंतं वर्चस्वंतं मनुष्येषु कुरु ॥ ६ ॥ इंद्रश्च सम्राड्वरुणश्च राजा ॥ तौ ते भक्षं चक्रतुरग्र एतं ॥ तयोरनु भक्षं भक्षयामि ॥ वाग्जुषाणा सोमस्य तृप्यतु ॥ प्रजापतिर्विश्वकर्मा ॥ तस्य मनो देवं यज्ञेन राध्यासं ॥ अर्थेगा अस्य जहितः ॥ अवसानपते वसानं मे विंद ॥ नमो रुद्राय वास्तोष्पतये ॥ आयने विद्रवणे ॥ ७ ॥ उद्याने यत्परायणे ॥ आवर्तने विवर्तने ॥ यो गोपा

श्रा०त०७
१९

यतितᳪंह्वे॥ यान्यपामित्यान्यप्रतीत्तान्यस्मि॥ यमस्य बलिनाच्चरामि॥
इहैवसंतःप्रतिनद्यातयामः॥ जीवाजीवेभ्योनिहरामिएनत्॥ अनृणाअस्मि
न्ननृणाःपरस्मिन्॥ तृती येलोकेअनृणाःस्याम॥ येदेवयानाउतपितृया
णाः॥ ८ ॥ सर्वान्पथोअनृणाआक्षीयेम॥ इदमूनुःश्रेयोवसानमागन्म॥
शिवेनोद्यावापृथिवीउभेइमे॥ गोमद्धनवदश्ववदूर्जस्वत्॥ सुवीरावीरैर
नुसंचरेम॥ अर्कःपवित्रᳪंरजसोविमानः॥ पुनातिदेवानांभुवनानिवि
श्वा॥ [illegible] द्यावापृथिवीपयसासंविदाने॥ घृतंदुहातेअमृतंप्रपीने॥
पवित्रमर्कोरजसोविमानः॥ पुनातिदेवानांभुवनानिविश्वा॥ सुवर्ज्योति
र्यशोमहत्॥ अशीमहिगाधमुतप्रतिष्ठां॥ ९ ॥ वातयुतश्रीणीताᳪंस

२३

१९

॥

७

त्यमाङ्करशीमहिगणेकुरुविइवणेपितृयाणाअर्कोरजसोविमानस्त्रीपि
च॥ १ ॥ उदस्तांप्सीत्सविताभित्रोअर्यमा॥ सर्वानमित्रानवधीद्युगेन॥
बृहंतंमामकरद्वीरवंतं॥ रथंतरेश्रय स्वस्वाहापृथिव्यां॥ वामदेव्यमश्रयस्व
स्वाहांतरिक्षे॥ बृहतिश्रयस्वस्वाहादिवि॥ बृहतास्तोपस्तभ्नोमि॥ आ
त्वांददेयशसेवीर्यायच॥ अस्मासुधिग्रियायूयंदधाथेंद्रियंपयः॥ यस्ते
द्रप्सोयस्तउदर्षः॥ १ ॥ दैव्यःकेतुर्विश्वंभुवनमाविवेश॥ सनःपाह्यरि
ष्ट्येस्वाहा॥ अनुमासर्वोयज्ञोयमेतु॥ विश्वेदेवामरुतःसामार्कः॥ आ
प्रियश्छंदाᳪंसिनिविदोयजूᳪंषि॥ अस्येपृथिव्येयद्यज्ञियं॥ प्रजापते
र्वर्तनिमनुवर्तस्व॥ अनुवीरैरनुराध्यामगोभिः॥ अन्वश्वैरनुसर्वैरु

श्रा०त०५
१६

पुष्टेः॥अनुप्रजयान्विंद्रियेण॥ २ ॥देवानीयज्ञमृजुधानयंतु॥प्रतिक्षत्रेप्र
तितिष्ठामिराष्ट्रे॥प्रत्यश्वेषुप्रतितिष्ठामिगोषु॥प्रतिप्रजायांप्रतितिष्ठामि
भव्ये॥विश्वमन्याभिवावृधे॥तदन्यस्यामधिश्रितं॥दिवेचविश्वकर्मणे॥
पृथिव्येचाकरन्नमः॥अस्कान्द्यौः पृथिवीं॥अस्कानृषभोयुवागाः॥ ३ ॥
स्कन्नेमाविश्वाभुवना॥स्कन्नोयज्ञः प्रजनयतु॥अस्कानजनिप्राज
नि॥आ स्कन्नाज्जायतेवृषा॥स्कन्नात्प्रजनिषीमहि॥येदेवायेषा
मिदंभागधेयंबभूव॥येषांप्रयाजाउतानूयाजाः॥इंद्रज्येष्ठेभ्योवरुण
राजभ्यः॥अग्निहोतृभ्योदेवेभ्यः स्वाहा॥उतत्वानोदिवामतिः॥ ४ ॥
अदितिरूत्यागमत्॥साशंताचीमयस्करत्॥अपस्त्रिधः॥उतत्वादे

२४

१६

व्याभिषजा॥शन्नस्करतोअश्विना॥युयातामस्मद्रपः॥अपस्त्रिधः॥
शमग्निरग्निभिस्करत्॥शन्नस्तपतुसूर्यः॥शंवातोवात्वरपाः॥ ५ ॥अ
पस्त्रिधः॥तक्षिप्रदंनविचिकेतविद्वान्॥यन्मृतःपुनरप्येतिजीवान्॥त्रि
वृद्यद्भुवनस्यरथवृत्॥जीवोगर्भोनमृतः सजीवात्॥प्रत्यस्मेपिपीषते॥
विश्वानिविदुषेभर॥अरंगमायजग्मवे॥अपश्चाद्दघ्वनेनरे॥इंदु
रिंदुमवागात्॥इंदोरिंद्रोपात्॥तस्यतइंद्रविंद्रपीतस्यमधुमतः॥उ
पहूतस्योपहूतोभक्षयामि॥ ९ ॥उदर्षइंद्रियेणगामतिररपाअंगा
न्नीणिव॥ १० ॥ब्रह्मप्रतिष्ठामनसोब्रह्मवाचः॥ब्रह्मयज्ञानांहृ
विषामाज्यस्य॥अतिरिक्तंकर्मणोयच्चहीनं॥यज्ञःपर्वाणिप्रतिरंने

तिकल्पयन्॥ स्वाहाकृताऋतिरेतुदेवान्॥ आश्रावितमत्याश्रावितं॥ व
षट्कृतमत्यनूक्तंचयज्ञे॥ अतिरिक्तंकर्मणोयच्चहीनं॥ यज्ञःपर्वाणिप्र
तिरन्नेतिकल्पयन्॥ स्वाहाकृताऋतिरेतुदेवान्॥ १॥ यद्वोदेवाअति
पादयानि॥ वाचाचित्प्रयतंदेवहेडनं॥ अरायोअस्माँअभिदुच्छुना
यते॥ अन्यत्रास्मन्मरुतस्तान्निधेतन॥ ततंमआपस्तदुतायतेपुनः॥
स्वादिष्ठाधीतिरुचथायशस्यते॥ अयंसमुद्रउतविश्वभेषजः॥
स्वाहातस्यसमुत्तप्ष्णुतभुवः॥ उद्वयंतमसस्परि॥ उदुत्यंचित्रं॥ २॥

इमंवरुणतत्वायामि॥ त्वंनोअग्नेसत्वन्नोअग्ने॥ त्वमग्नेअयासि
प्रजापते॥ इमंजीवेभ्यःपरिधिंदधामि॥ मैषांनुगादपरोअर्धमेतं॥

शतंजीवंतुशरदःपुरूचीः॥ तिरोमृत्युंदधतांपर्वतेन॥ इष्टेभ्यःस्वाहाव
षडनिष्टेभ्यःस्वाहा॥ भेषजंदुरिष्ट्यैस्वाहानिष्कृत्यैस्वाहा॥ दौराध्यैस्वा
हादेवीभ्यस्तनूभ्यःस्वाहा॥ ३॥ ऋध्यैस्वाहासमृध्यैस्वाहा॥ यतइंद्र
भयामहे॥ ततोनोअभयंकृधि॥ मघवञ्छग्धितवतन्नऊतये॥ विद्विषो
विमृधोजहि॥ स्वस्तिदाविशस्पतिः॥ वृत्रहाविमृधोवशी॥ वृषेंद्रःपुरए
तुनः॥ स्वस्तिदाअभयंकरः॥ आभिर्गीर्भिर्यदतोनऊनं॥ ४॥ आप्या
ययहरिवोवर्धमानः॥ यदास्तोतृभ्योमहिगोत्रारुजासि॥ भूयिष्ठभा
जोअधतेस्याम॥ अनाज्ञातंयदाज्ञातं॥ यज्ञस्यक्रियतेमिथु॥ अग्ने
तदस्यकल्पय॥ त्वंहिवेत्थयथातथं॥ पुरुषसंमितोयज्ञः॥ यज्ञःपुरु

षसंमितः॥अग्नेतदस्यकल्पय॥त्वंहिवेत्थयथातथं॥यत्पाकत्रामन
सादीनदक्षान॥यज्ञस्यमन्वतेमर्त्तासः॥अग्निष्टद्धोताक्रतुविद्विजा
नन्॥यजिष्ठोदेवाँ ऋतुशोयजाति॥ १ ॥देवाँश्चित्रंतनूभ्यःस्वाहोनं
पुरुषसंमितोग्नेतदस्यकल्पयपंचच॥ ११ ॥यद्देवादेवहेडनं॥देवास
श्चकृमावयं॥आदित्यास्तस्मान्मामुंचत॥ऋतस्यर्तेनमामुत॥दे
वाजीवनकाम्यायत्॥वाचानृतमूदिम॥अग्निर्मातस्मादेनसः॥गा
र्हपत्यःप्रमुंचतु॥दुरितायानिचकृम॥करोतुमामनेनसं॥ १ ॥ऋ
तेनद्यावापृथिवी॥ऋतेनत्वंसरस्वति॥कृतान्मामुंचतांहसः॥
यदन्यकृतमारिम॥सजातशंसादुतवाजामिशंसात्॥ज्यायसः

शंसादुतवाकनीयसः॥अनाज्ञातंदेवकृतंयदेनः॥तस्मात्त्वमस्माज्जा
तवेदोमुमुग्धि॥यद्वाचायन्मनसा॥बाहुभ्यामूरुभ्यामष्ठीवद्भ्यां॥
॥ २ ॥शिश्नैर्यदनृतंचकृमावयं॥अग्निर्मातस्मादेनसः॥यद्धस्ताभ्यां
चकरकिल्बिषाणि॥अक्षाणांवग्नुमुपजिघ्नमानः॥दूरेपश्याचरा
ष्ट्रभृच्च॥तान्यप्सरसावनुदत्तामृणानि॥अदीव्यंनृणंयदहंचकार॥
यद्वादास्यन्त्संजगारजनेभ्यः॥अग्निर्मातस्मादेनसः॥यन्मयिमा
तामभेसति॥ ३ ॥एनश्चकारयत्पिता॥अग्निर्मातस्मादेनसः॥य
दापिपेषमातरंपितरं॥पुत्रःप्रमुदितोधयन्॥अहिंसितौपितरौम
यातत्॥तदग्नेअनृणोभवामि॥यदंतरिक्षंपृथिवीमुतद्यां॥यन्मातरं

ब्रा० त० ७ ११

पितरं वा जिहिंसिम ॥ अग्निर्मा तस्मादेनसः ॥ यदाशसा निशसा यत्पराशसा ॥ ४ ॥ यदेनश्चकृमा नूतनं यत्पुराणं ॥ अग्निर्मा तस्मादेनसः ॥ अतिक्रामामि दुरितं यदेनः ॥ जहामि रिप्रं परमे सधस्थे ॥ यत्र यंति सुकृतो नापि दुष्कृतः ॥ तमारोहामि सुकृतां नु लोकं ॥ त्रिते देवा अमृजतैतदेनः ॥ त्रित एतन्मनुष्येषु मामृजे ॥ ततो मा यदि किंचिदानशे ॥ अग्निर्मा तस्मादेनसः ॥ ५ ॥ गार्हपत्यः प्रमुंचतु ॥ दुरिता यानि चकृम ॥ करोतु मामनेनसं ॥ दिवि जाता अप्सु जाताः ॥ या जाता ओषधीभ्यः ॥ अथो या अग्निजा आपः ॥ ता नः शुंधंतु शुंधनीः ॥ यदापो नक्तं दुरितं चराम ॥ यद्वा दिवा नूतनं यत्पुराणं ॥ हिरण्यवर्णास्तत उत्पुनीत नः ॥ इमं मे

२७ ११

वरुण तत्त्वा यामि ॥ त्वं नो अग्ने स त्वं नो अग्ने ॥ त्वमग्ने अयासि ॥ ६ ॥ अनेनसमघी वद्धाः सति पराशसा नरो ग्निर्मा नस्मादेनसः पुनीत न स्त्रीणि च ॥ १२ ॥ यत्ते ग्राव्णा चिच्छिदुः सोम राजन् ॥ प्रियाण्यंगानि स्वधिता परूंषि ॥ तत्संधत्स्वाज्येनोत वर्धयस्व ॥ अनागसो अध मित्संक्षयेम ॥ यत्ते ग्रावा बाहुच्युता अचुच्यवुः ॥ नरो यत्ते दुदुहुर्दक्षिणेन ॥ तत्त आप्यायतां तत्ते ॥ निष्ट्याय तां देव सोम ॥ यत्ते त्वचं बिभिदुर्यच्च योनिं ॥ यदास्थानात्प्रच्युतो वेनसि त्मना ॥ १ ॥ त्वया तत्सोम गुप्तमस्तु नः ॥ सा नः संधासत्परमे व्योमन् ॥ अहाच्छरीरं पयसा समेत्य ॥ अन्योन्यो भवति वर्णो अस्य ॥ तस्मिन्वयमुपहूतास्तव स्मः ॥ आ नो भज सदसि विश्वरूपे ॥

ब्रा०त०७
१००

नृचक्षाः सोमउतशुश्रुगस्तु ॥ मानोविहासीद्गिर आवृणानः ॥ अना
गास्तनुवोवावृधानः ॥ आनोरूपंवहतुजायमानः ॥ २ ॥ उपक्षरंतिजु
ह्वोघृतेन ॥ प्रियाण्यंगानितववर्धयंती ॥ तस्मैतेसोमनमइद्वषट्च ॥ उ
पमाराजन्त्सुकृतेह्वयस्व ॥ संप्राणापानाभ्यां समुचक्षुषात्वं ॥ सं
श्रोत्रेणगछस्वसोमराजन् ॥ यत्तआस्थितंशमुतत्तेअस्तु ॥ जा
नीतान्नः संगमनेपथीनां ॥ एतंजानीतात्परमेव्योमन् ॥ वृकाः सध
स्थाविदरूपमस्य ॥ ३ ॥ यदागछात्पथिभिर्देवयानैः ॥ इष्टापूर्तेकृ
णुतादाविरस्मै ॥ अरिष्टोराजन्नगदः परेहि ॥ नमस्तेअस्तुचक्षसेरघू
यते ॥ नाकमारोहसहयजमानेन ॥ सूर्यंगछतात्परमेव्योमन् ॥ अ

२८

१००

भूद्देवः सवितावंद्योनुनः ॥ इदानीमन्हउपवाच्योनृभिः ॥ वियोर
त्नाभजतिमानवेभ्यः ॥ श्रेष्ठंन्नोअत्रद्रविणंयथादधत् ॥ उपनोमि
त्रावरुणाविहावतं ॥ अन्वादीध्याथामिहनः सखाया ॥ आदित्यानां
प्रसितिर्हेतिः ॥ उग्राशतापाष्ठाघविषापरिणोवृणक्तु ॥ आप्यायस्व
संते ॥ ४ ॥ त्वमनाजायमानोस्यदधत्वंचच ॥ १३ ॥ यद्दीक्षेमन
सायच्चवाचा ॥ यद्वाप्राणेश्चक्षुषायच्चश्रोत्रेण ॥ यद्रेतसामिथुनेना
प्यात्मना ॥ अद्भ्योलोकाद्दधिरेतेजइंद्रियं ॥ शुक्रादीक्षायैतपसो
विमोचनीः ॥ आपोविमोक्त्रीर्मयितेजइंद्रियं ॥ यदृचासाम्नायजुषा ॥

ब्रा०त०७
१०१

पशूनां चर्मन्हविषा दिदीक्षे॥ यज्ञं दोभिरोषधीभिर्वनस्पतौ॥ अद्भ्यो लो

२९

कादधिरे तेजइंद्रियं॥ १॥ शुक्रा दीक्षायै तपसो विमोचनीः॥ आपो विमो

क्रीर्मयि तेज इंद्रियं॥ येन ब्रह्म येन क्षत्रं॥ येनेंद्राग्नी प्रजापतिः सोमो व

रुणो येन राजा॥ विश्वे देवा ऋषयो येन प्राणाः॥ अद्भ्यो लोकादधिरे ते

जइंद्रियं॥ शुक्रा दीक्षायै तपसो विमोचनीः॥ आपो विमोक्रीर्मयि तेज

इंद्रियं॥ अपां पुष्पमस्योषधीनाꣳ रसः॥ सोमस्य प्रियं धाम॥ २॥ अग्नेः

प्रियतमꣳ हविः स्वाहा॥ अपां पुष्पमस्योषधीनाꣳ रसः॥ सोमस्य प्रि

१०१

यं धाम॥ इंद्रस्य प्रियतमꣳ हविः स्वाहा॥ अपां पुष्पमस्योषधीनाꣳ रसः॥

सोमस्य प्रियं धाम॥ विश्वेषां देवानां प्रियतमꣳ हविः स्वाहा॥ वयꣳ सो

मव्रते तव॥ मनस्तनूषु पिभ्रतः॥ प्रजावंतो अशीमहि॥ ३॥ देवेभ्यः पितृ

भ्यः स्वाहा॥ सोम्येभ्यः पितृभ्यः स्वाहा॥ कव्येभ्यः पितृभ्यः स्वाहा॥ देवास

इह मादयध्वं॥ सोम्यास इह मादयध्वं॥ कव्यास इह मादयध्वं॥ अनंतरि

ताः पितरः सोम्याः सोमपीथात्॥ अपैतु मृत्युरमृतंन आगन्॥ वैवस्वतो

नो अभयं कृणोतु॥ पर्णं वनस्पतेरिव॥ ४॥ अभिनः शीयताꣳ रयिः॥

सचतान्नः शचीपतिः॥ परं मृत्यो अनुपरेहि पंथां॥ यस्ते स्व इतरो

देवयानात्॥ चक्षुष्मते शृण्वते ते ब्रवीमि॥ मा नः प्रजाꣳ रीरिषो मोत

वीरान्॥ इदमूनुः श्रेयो वसानमागन्म॥ यद्गोजिद्धनजिदश्वजिद्य

त्॥ पर्णं वनस्पतेरिव॥ अभिनः शीयताꣳ रयिः॥ सचतान्नः शची

ब्रा०त०
१०२

पतिः॥ ५ ॥ वनस्पतावन्नो लोका दधिरे तेजइंद्रियं धामा
शीमहीवाभिनःशीयताꣳ रयिरेकंच॥ १४ ॥ ॥ सर्वान्य
ह्वैष्वण्णेन विवेयाःपुरस्ताद्देवादेवेषुपरिस्तृणीत सक्षेदंयदस्य
पारेनाग सउदस्तांझीद्ब्रह्मप्रतिष्ठायद्देवायत्तेयाव्णायद्दिदी
क्षेचतुर्दश॥ १४ ॥ ॥ सर्वान्भूतिमेवयामेवाश्वा कु
तिंव्रतानांपर्णवल्कः सोम्यानाम स्मिन्यज्ञेग्नेयो नोभितोज्यो
ग्जीवाःपरोरजास्तेप्रते महिब्रह्मप्रतिष्ठा गार्हपत्यस्त्रिꣳश
दुत्तरशतं॥ १२० ॥ ॥श्रीगजाननार्पणमस्तु॥ ॥ॐम्॥ ॥

३०

१०२

हरिःॐ॥ ॥ सांग्रहण्येष्ट्यायजते॥ इमांजनताꣳ संगृह्णानीति॥ द्वाद
शारत्नीरशनाभवति॥ द्वादशमासाःसंवत्सरः॥ संवत्सरमेवावरुंधे॥ मौं
जीभवति॥ ऊर्ग्वैमुंजाः॥ ऊर्जमेवावरुंधे॥ चित्रानक्षत्रंभवति॥ चित्रंवाएत
त्कर्म॥ १ ॥ यदश्वमेधःसमृध्द्यै॥ पुण्यनामदेवयजनमध्यवस्यति॥ पुण्या
मेवतेनकीर्तिमभिजयति॥ अपदातीनृत्विजःसमावहंत्यासुब्रह्मण्यायाः॥
सुवर्गस्यलोकस्यसमष्ट्यै॥ केशश्मश्रुवपते॥ नखानिनिकृंतते॥ दतोधा
वते॥ स्नाति॥ अहतंवासःपरिधत्ते॥ पाप्मनोपहत्यै॥ वाचंयत्वोपवसति॥
सुवर्गस्यलोकस्यगुप्त्यै॥ रात्रिंजागरयंतआसते॥ सुवर्गस्यलोकस्य
समष्ट्यै॥ २ ॥ कुर्मधत्तेपंचच॥ १॥ चतुष्टय्यआपोभवंति॥ चतुःश

श्री०त०८
१०३

फो वा अश्वः प्राजापत्यः समृध्ये ॥ तादिग्भ्यः समाभृता भवंति ॥ दिक्षु वा आपः ॥ १
अन्नं वा आपः ॥ अद्भ्यो वा अन्नं जायते ॥ यदेवाद्भ्यो न्नं जायते ॥ तदेवा वरुंधे ॥ ता
सु ब्रह्मौदनं पचति ॥ रेत एव तद्दधाति ॥ १ ॥ चतुः शरावो भवति ॥ दिक्ष्वेव प्रति
तिष्ठति ॥ उभयतो रुक्मौ भवतः ॥ उभयत एवास्मिन्रुचं दधाति ॥ उद्धरति शृतत्वा
य ॥ सर्पिष्वान्भवति मेध्यत्वाय ॥ चत्वार आर्षेयाः प्राश्नंति ॥ दिशामेव ज्यो
तिषि जुहोति ॥ चत्वारि हिरण्यानि ददाति ॥ दिशामेव ज्योतींष्यव रुंधे ॥ २ ॥
यदाज्यमुच्छिष्यते ॥ तस्मिन्रशना न्युनक्ति ॥ प्रजापतिर्वा ओदनः ॥ रेत आ १०३
ज्यं ॥ यदाज्ये रशनान्युनक्ति ॥ प्रजापतिमेव रेतसा समर्धयति ॥ दर्भमयी
रशना भवति ॥ बहु वा एष कुचरो मेध्यमुपगच्छति ॥ यदश्वः ॥ पवित्रं वै दर्भाः ॥ ३ ॥

यद्दर्भमयी रशना भवति ॥ पुनात्येवैनं ॥ पूतमेनं मेध्यमालभते ॥ अश्वस्य वा स्य
आलब्धस्य महिमो दक्रामत् ॥ स महर्त्विजः प्राविशत् ॥ तं महर्त्विजां म न्
हार्त्विक्त्वं ॥ यत्महर्त्विजः प्राश्नंति ॥ महिमानमेवास्मिन्तद्दधाति ॥ अ
श्वस्य वा आलब्धस्य रेत उदक्रामत् ॥ तत्सुवर्णं हिरण्यमभवत् ॥ य
त्सुवर्णं हिरण्यं ददाति ॥ रेत एव तद्दधाति ॥ ओदने ददाति ॥ रेतो वा ओ
दनः ॥ रेतो हिरण्यं ॥ रेतसैवास्मिन्रेतो दधाति ॥ ४ ॥ दधाति रुंधे दर्भा
अभवत्षट्च ॥ २ ॥ यो वै ब्रह्मणे देवेभ्यः प्रजापतये प्रतिप्रोच्याश्वं मेध्यं
बध्नाति ॥ आ देवताभ्यो वृश्च्यते ॥ पापीयान्भवति ॥ यः प्रतिप्रोच्या न
देवताभ्य आ वृश्च्यते ॥ वसीयान्भवति ॥ यदाह ॥ ब्रह्मन्नश्वं मेध्यं भ

न्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासमिति ॥ ब्रह्म वै ब्रह्मा ॥ ब्रह्मण एव
देवेभ्यः प्रजापतये प्रतिप्रोच्याश्वं मेध्यं बध्नाति ॥ १ ॥ न देवताभ्य आवृश्च्यते ॥
वसीयान्भवति ॥ देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते प्रसूत्यै ॥ अ
श्विनोर्बाहुभ्यामित्याह ॥ अश्विनौ हि देवानामध्वर्यू आस्तां ॥ पूष्णो ह
स्ताभ्यामित्याह यत्यै ॥ व्यृद्धं वा एतद्यज्ञस्य ॥ यदयजुष्केण क्रियते ॥ इ
माम गृभ्णन्रशनामृतस्येत्यधिवदति यजुष्कृत्यै ॥ यज्ञस्य समृध्यै ॥ २ ॥

तदाहुः ॥ द्वादशारत्नी रशना कर्तव्या २ त्रयोदशारत्नी ३ रिति ॥ ऋषभो
वा एष ऋतूनां ॥ यत्संवत्सरः ॥ तस्य त्रयोदशो मासो विष्टपं ॥ ऋषभ एष
यज्ञानां ॥ यदश्वमेधः ॥ यथा वा ऋषभस्य विष्टपं ॥ एवमे तस्य विष्टपं ॥

त्रयोदशमरत्निं रशनायामुपादधाति ॥ ३ ॥ यथर्षभस्य विष्टपं संस्करोति ॥ तादृगेव तत् ॥ पूर्वमायुषि विदथेषु कव्येत्याह ॥ आयुरेवास्मिन्दधाति ॥
तया देवाः सुतमा बभूवुरित्याह ॥ भूतिमेवोपावर्तते ॥ ऋतस्य सामन्त्सरमा
रपन्तीत्याह ॥ सत्यं वा ऋतं ॥ सत्येनैवैनमृतेनारभते ॥ अभिधा असीत्या
ह ॥ ४ ॥ तस्मादश्वमेधयाजी सर्वाणि भूतान्यभिभवति ॥ भुवनमसी
त्याह ॥ भूमानमेवोपैति ॥ यन्तासीत्याह ॥ यन्तारमेवैनं करोति ॥ धर्त्ता
सीत्याह ॥ धर्त्तारमेवैनं करोति ॥ सोऽग्निं वैश्वानरमित्याह ॥ अग्ना
येवैनं वैश्वानराय जुहोति ॥ सप्रथसमित्याह ॥ ५ ॥ प्रजयैवैनं पशु
भिः प्रथयति ॥ स्वाहाकृत इत्याह ॥ होम एवास्यैषः ॥ पृथिव्यामित्या

श्री॰तृ॰ १०५

ह॥ अस्यामेवैनं प्रतिष्ठापयति॥ यंता राड्यंतासि यमनो धर्तासि धरुण इत्याह॥ रूपमेवास्यैतन्महिमानं व्याचष्टे॥ कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वेत्याह॥ आशिषमेवैतामाशास्ते॥ स्वगा त्वा देवेभ्य इत्याह॥ देवेभ्य एवैनꣳ स्वगाकरोति॥ स्वाहा त्वा प्रजापतय इत्याह॥ प्राजापत्यो वा अश्वः॥ यस्या एव देवतायाआलभ्यते॥ तयैवैनꣳ समर्धयति॥ ८॥ बध्नाति स॰ उपा॰ दधात्यसीत्याह सप्रथ समित्याह देवेभ्य इत्याह पंच च॥ ३॥ यः पितुरनुजायाः पुत्रः॥ स पुरस्तान्नयति॥ यो मातुरनुजायाः पुत्रः॥ स पश्चान्नयति॥ विषूचमेवास्मात्पाप्मानं विवृहतः॥ योऽर्वंतं जिघांꣳसति तमभ्यमीति वरुण इति श्वानं चतुर

ध्या ३ १०५

क्षं प्रसौति॥ परो मर्तः परः श्वेति श्वानश्चतुरक्षस्य प्रहंति॥ श्वैव वै पाप्मा भ्रातृव्यः॥ पाप्मानमेवास्य भ्रातृव्यꣳ हंति॥ सैधकं मुसलं भवति॥ १॥ कर्मकर्मैवास्मै साधयति॥ पौꣳश्चलेयो हंति॥ पुꣳश्चल्वां वै देवाः शुचं न्यदधुः॥ शुचैवास्य शुचꣳ हंति॥ पाप्मा वा एतमीप्सतीत्याहुः॥ योऽश्वमेधेन यजत इति॥ अश्वस्याधस्पदमुपास्यति॥ वज्री वा अश्वः प्राजापत्यः॥ वज्रेणैव पाप्मानं भ्रातृव्यमवक्रामति॥ दक्षिणापप्लावयति॥ २॥ पाप्मानमेवास्माच्छमलमपप्लावयति॥ ऐषीक उदूहो भवति॥ आयुर्वा इषीकाः॥ आयुरेवास्मिन्दधाति॥ अमृतं वा इषीकाः॥ अमृतमेवास्मिन्दधाति॥ वैतसः शाखोपसंबद्धो भवति॥ अप्सुयोनिर्वा अश्वः॥ अप्सु

ति

ब्रा० ल०८
१०६

५

जो वैतसः॥ स्वा देवैनं योनेर्निर्मिमीते॥ पुरस्तात्प्रत्यंचमभ्युदूहति॥ पुर
स्तादेवास्मिन्प्रतीच्यमृतं दधाति॥ अहं च त्वं च वृत्रहन्निति ब्रह्माय जमा
नस्य हस्तं गृह्णाति॥ ब्रह्मक्षत्रे एव संदधाति॥ अभिक्रत्वेंद्र भूरध ज्म
न्नित्यध्वर्युर्यजमानं वाचयत्यभिजित्यै॥ ३॥ भवति प्लावयाति भिमी
ते पंच च॥ ४॥ चत्वार ऋत्विजः समुक्षंति॥ आभ्य एवैनं चतसृभ्यो दि
ग्भ्योभिसमीरयंति॥ शतेन राजपुत्रैः सहाध्वर्युः॥ पुरस्तात्प्रत्यङ् तिष्ठ
न्प्रोक्षति॥ अनेनाश्वेन मेध्येनेष्ट्वा॥ अयं राजा वृत्रं वध्यादिति॥ रा
ज्यं वा अध्वर्युः॥ क्षत्रं राजपुत्रः॥ राज्येनैवास्मिन्क्षत्रं दधाति॥ शते
न राजभिरुग्रैः सह ब्रह्मा॥ १॥ दक्षिणत उदङ् तिष्ठन्प्रोक्षति॥ अने

१०६

नाश्वेन मेध्येनेष्ट्वा॥ अयं राजाप्रतिधृष्योस्त्विति॥ बलं वै ब्रह्मा॥ बल
मेराजोयः॥ बलेनैवास्मिन्बलं दधाति॥ शतेन सूतग्रामणिभिः सह हो
ता॥ पश्चात्प्राङ् तिष्ठन्प्रोक्षति॥ अनेनाश्वेन मेध्येनेष्ट्वा॥ अयं राजास्यै
विशः॥ २॥ बहुग्वै बहुश्वायै बहुजाविकायै॥ बहुव्रीहियवायै बहु
माषतिलायै॥ बहुहिरण्यायै बहुहस्तिकायै॥ बहुदासपुरुषायै र
यिमत्यै पुष्टिमत्यै॥ बहुरायस्पोषायै राजास्त्विति॥ भूमा वै होता॥ भू
मा सूतग्रामण्यः॥ भूम्नैवास्मिन्भूमानं दधाति॥ शतेन क्षत्तसंग्रहीतृ
भिः सहोद्गाता॥ उत्तरतो दक्षिणा तिष्ठन्प्रोक्षति॥ ३॥ अनेनाश्वेन
मेध्येनेष्ट्वा॥ अयं राजा सर्वमायुरेत्विति॥ आयुर्वा उद्गाता॥ आ

युः क्षत्त्रसंग्रहीतारः ॥ आयुष्येवास्मिन्नायुर्दधाति ॥ शतꣳ शतं भवंति ॥
शतायुः पुरुषः शतेंद्रियः ॥ आयुष्येवेंद्रिये प्रतितिष्ठति ॥ चतुः शता भवं
ति ॥ चतस्रो दिशः ॥ दिक्ष्वेव प्रतितिष्ठति ॥ ४ ॥ ब्रह्मा विशउक्षति दिशा
एकं च ॥ ५ ॥ यथा वै हविषो गृहीतस्य स्कंदति ॥ एवं वा एतदश्वस्य स्कं
दति ॥ यन्निक्तमनालब्धमुत्सृजंति ॥ यत्स्तोक्या अन्वाह ॥ सर्वहु
तमेवैनं करोत्यस्कंदाय ॥ अस्कन्नꣳ हि तत् ॥ यद्धुतस्य स्कंदति ॥
सहस्रमन्वाह ॥ सहस्रसंमितः सुवर्गो लोकः ॥ सुवर्गस्य लोकस्या
भिजित्यै ॥ ६ ॥ यत्परिमिता अनुब्रूयात् ॥ परिमितमवरुंधीत ॥
अपरिमिता अन्वाह ॥ अपरिमितः सुवर्गो लोकः ॥ सुवर्गस्य लोकस्यस
मि

मष्ट्यै ॥ स्तोक्या जुहोति ॥ या एव वर्ष्या आपः ॥ ता अवरुंधे ॥ अस्यां जुहो
ति ॥ इयं वा अग्निर्वैश्वानरः ॥ २ ॥ अस्यामेवैनाः प्रतिष्ठापयति ॥ उवा
च ह प्रजापतिः ॥ स्तोक्यासु वा अहमश्वमेधꣳ सꣳस्थापयामि ॥ तेन ततः
सꣳस्थितेन चरामीति ॥ अग्नये स्वाहेत्याह ॥ अग्नय एवैनं जुहो
ति ॥ सोमाय स्वाहेत्याह ॥ सोमायैवैनं जुहोति ॥ सवित्रे स्वाहेत्याह ॥
सवित्र एवैनं जुहोति ॥ ३ ॥ सरस्वत्यै स्वाहेत्याह ॥ सरस्वत्या एवैनं जु
होति ॥ पूष्णे स्वाहेत्याह ॥ पूष्ण एवैनं जुहोति ॥ बृहस्पतये स्वाहेत्या
ह ॥ बृहस्पतय एवैनं जुहोति ॥ अपां मोदाय स्वाहेत्याह ॥ अद्भ्य ए
वैनं जुहोति ॥ वायवे स्वाहेत्याह ॥ वायव एवैनं जुहोति ॥ ४ ॥ मित्रा

ब्रा०तृ०८
१०८

युस्वाहेत्याह ॥ मित्रायैवैनंजुहोति ॥ वरुणायस्वाहेत्याह ॥ वरुणायैवै
नंजुहोति ॥ एताभ्यएवैनंदेवताभ्योजुहोति ॥ दशांदशांसंपादंजुहोति ॥
दशाक्षराविराट् ॥ अन्नंविराट् ॥ विराजैवान्नाद्यमवरुंधे ॥ सवाएषो
स्माल्लोकाच्च्यवते ॥ यःपराचीराहुतीर्जुहोति ॥ पुनःपुनरभ्यावर्तंजुहो
ति ॥ अस्मिन्नेवलोकेप्रतितिष्ठति ॥ एतांहवावसोश्वमेधस्यसं
स्थितिमुवाचास्कंदाय ॥ अस्कन्नंहितत् ॥ यद्यज्ञस्यसंस्थित
स्यस्कंदति ॥ ५ ॥ अभिजित्यैवैश्वानरःसवित्रएवैनंजुहोत्यायवएवैति
नंजुहोतिच्यवतेषट्च ॥ ६ ॥ प्रजापतयेत्वाजुष्टंप्रोक्षामीतिपु
रस्तात्प्रत्यङ्तिष्ठन्प्रोक्षति ॥ प्रजापतिर्वैदेवानामन्नादोवीर्यावान् ॥

६
१०८

अन्नाद्यमेवास्मिन्वीर्यंदधाति ॥ तस्मादश्वःपशूनामन्नादोवीर्यावत्तमः ॥
इंद्राग्निभ्यांत्वेतिदक्षिणतः ॥ इंद्राग्नीवैदेवानामोजिष्ठौबलिष्ठौ ॥ ओज
एवास्मिन्बलंदधाति ॥ तस्मादश्वःपशूनामोजिष्ठोबलिष्ठः ॥ वायवेत्वेतिप
श्चात् ॥ वायुर्वैदेवानामाशुःसारसारितमः ॥ १ ॥ जवमेवास्मिन्दधाति ॥ त
स्मादश्वःपशूनामाशुःसारसारितमः ॥ विश्वेभ्यस्त्वादेवेभ्यइत्युत्तरतः ॥
विश्वेवैदेवादेवानांयशस्वितमाः ॥ यशएवास्मिन्दधाति ॥ तस्मादश्वःप
शूनांयशस्वितमः ॥ देवेभ्यस्त्वेत्यधस्तात् ॥ देवावैदेवानामपचिततमाः ॥
अपचितिमेवास्मिन्दधाति ॥ तस्मादश्वःपशूनामपचिततमः ॥ २ ॥
सर्वेभ्यस्त्वादेवेभ्यइत्युपरिष्टात् ॥ सर्वेवैदेवास्त्विषिमंतोहरस्विनः ॥

श्री०त०८
१०९

त्विषिमेवास्मिन्हरो दधाति ॥ तस्मादश्वः पशूनां त्विषिमान्हरस्वितमः ॥
दिवे त्वांतरिक्षाय त्वा पृथिव्यै त्वेत्याह ॥ एभ्य एवैनं लोकेभ्यः प्रोक्षति ॥
सते त्वासते त्वाद्भ्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्य इत्याह ॥ त
स्मादश्वमेधयाजिनं सर्वाणि भूतान्युपजीवंति ॥ ब्रह्मवादिनो वदंति ॥ प्र
ाजापत्योश्वः ॥ अथ कस्मादेनमन्याभ्यो देवताभ्यः प्रोक्षतीति ॥ अ
श्वे वै सर्वा देवता अन्वायत्ताः ॥ तं यद्विश्वेभ्यस्त्वा भूतेभ्य इति प्रोक्षति ॥ देव
ता एवास्मिन्नन्वायातयति ॥ तस्मादश्वे सर्वा देवता यत्ताः ॥ ३ ॥ सास्मा
रितमोपचिततमः प्राजापत्योश्वः पंच च ॥ ७ ॥ यथा वै हविषो गृहीत
स्य स्कंदति ॥ एवं वा एतदश्वस्य स्कंदति ॥ यत्प्रोक्षितमनालब्धमुत्सृ

अन्वा
१०९

जंति ॥ यदश्वचरितानि जुहोति ॥ सर्वहुतमेवैनं करोत्यस्कंदाय ॥ अस्क
न्नं हि तत् ॥ यद्धुतस्य स्कंदति ॥ ईंकाराय स्वाहा हिंकृताय स्वाहेत्याह ॥
एतानि वा अश्वचरितानि ॥ चरितैरेवैनं समर्धयति ॥ १ ॥ तदाहुः ॥
अनाहुतयो वा अश्वचरितानि ॥ नैता होतव्या इति ॥ अथो खल्वाहुः ॥
होतव्या एव ॥ अत्र वा एवं विद्वानश्वमेधं संस्थापयति ॥ यदश्वचरि
तानि जुहोति ॥ तस्माद्धोतव्या इति ॥ बहिर्धा वा एनमेतदायतनाद्द
धाति ॥ भ्रातृव्यमजनयति ॥ २ ॥ यस्यानायतनेन्यत्राग्नेराहुती
र्जुहोति ॥ सावित्रिया इष्ट्याः पुरस्तात्स्विष्टकृतः ॥ आहवनीयेश्वच
रितानि जुहोति ॥ आयतन एवास्याहुतीर्जुहोति ॥ नास्मै भ्रातृव्यं

स्मै

ब्रा० त०८
नु रव्या
११०

जनयति ॥ तदाऊः ॥ यज्ञमुखेयज्ञमुखेहोतव्याः ॥ यज्ञस्य कॢप्त्यै ॥ सु
वर्गस्यलोकस्याप्त्याइति ॥ अथोखल्वाऊः ॥ यद्यज्ञमुखेयज्ञमुखेजु
ऊयात् ॥ पशुभिर्यजमानं व्यर्धयेत् ॥ अवसुवर्गाल्लोकाच्छि द्येत ॥
पापीयान्त्स्यादिति ॥ सकृदेवहोतव्याः ॥ नयजमानंपशुभिर्व्यर्ध
यति ॥ अभिसुवर्गं लोकंजयति ॥ नपापीयान्भवति ॥ अष्टाचत्वा
रिꣳशतमश्वरूपाणिजुहोति ॥ अष्टाचत्वारिꣳशदक्षराजगती ॥
जागतोश्वः प्राजापत्यः समृध्यै ॥ एकमतिरिक्तंजुहोति ॥ तस्मादे
कः प्रजास्वर्धुकः ॥ ४ ॥ अर्धयतिजनयतिखल्वाऊः जगतीत्री
णिच ॥ ८ ॥ विभूर्मात्राप्रभूः पित्रेत्याह ॥ इयंवैमाता ॥ असौपिता ॥

८
॥ ३ ॥
११०

भाभ्यामेवैनंपरिददाति ॥ अश्वोसिहयोसीत्याह ॥ शास्त्येवैनमेतत् ॥
तस्मा[illegible]च्छिष्टाः प्रजाजायंते ॥ अत्योसीत्याह ॥ तस्मादश्वः सर्वान्पशू
नत्येति ॥ तस्मादश्वः सर्वेषांपशूनाꣳश्रैष्ठ्यंगच्छति ॥ १ ॥ प्रयशाः श्रैष्ठ्य
माप्नोति ॥ यएवंवेद ॥ नरोस्यर्वासिसप्तिरसिवाज्यसीत्याह ॥ रूपमे
वास्यैतन्महिमानंव्याचष्टे ॥ ययुर्नामासीत्याह ॥ एतद्वा अश्वस्यप्रियं
नामधेयं ॥ प्रियेणैवैनंनामधेयेनाभिवदति ॥ तस्मादप्यामित्रौसंग
त्य ॥ नाम्नाह्वयेते ॥ मित्रमेवभवतः ॥ २ ॥ आदित्यानांपत्वान्वि
हीत्याह ॥ आदित्यानेवैनंगमयति ॥ अग्नयेस्वाहास्वाहेंद्राग्नि
भ्यामितिपूर्वहोमांजुहोति ॥ पूर्वएवद्विषंतंभ्रातृव्यमतिक्राम

ति॥ भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वेत्युत्सृजति सर्वत्वाय॥ देवा
आशापाला एतं देवेभ्योश्वं मेधाय प्रोक्षितं गोपायतेत्याह॥ शतं वै तल्प्या रा
जपुत्रा देवा आशापालाः॥ तेभ्य एवैनं परिददाति॥ ईश्वरो वा अश्वः प्रमुक्तः
परां परावतं गंतोः॥ इह धृतिः स्वाहा हविधृतिः स्वाहेहरंतिः स्वाहेहरमतिः
स्वाहेति चतुष्पत्सु जुहोति॥ २ ॥ एतद्वा अश्वस्य बंधनं॥ ताभिरेवैनं ब
ध्नाति॥ तस्मादश्वः प्रमुक्तो बंधनमागच्छति॥ तस्मादश्वः प्रमुक्तो बंधनं
न जहाति॥ राष्ट्रं वा अश्वमेधः॥ राष्ट्रे खलु वा एते व्यायच्छंते॥ येश्वं मेध्यं
रक्षंति॥ तेषां य उदृचं गच्छंति॥ राष्ट्रादेव ते राष्ट्रं गच्छंति॥ अथ य उदृचं न ग
च्छंति॥ ३ ॥ राष्ट्रादेव ते व्यवच्छिद्यंते॥ परा वा एष सिच्यते॥ योबलोश्व

मेधेन यजते॥ यदमित्रा अश्वं विंदेरन्॥ हन्येतास्य यज्ञः॥ चतुःशता रक्षंति॥
यज्ञस्याघाताय॥ अथान्यमानीय प्रोक्षेयुः॥ सैव ततः प्रायश्चित्तिः॥ ४ ॥
गच्छति भवतः पत्नसु जुहोति न गच्छंति न वच॥ ९ ॥ प्रजापतिरकामयताश्वमे
धेन यजेयेति॥ स तपोतप्यत॥ तस्य तेपानस्य॥ सप्तात्मनो देवता उदक्रामन्॥
सा दीक्षाभवत्॥ स एतानि वैश्वदेवान्यपश्यत्॥ तान्यजुहोत्॥ तैर्वै स दी
क्षामवारुंध॥ यद्वैश्वदेवानि जुहोति॥ दीक्षामेव तैर्यजमानोवरुंधे॥ १ ॥
सप्त जुहोति॥ सप्त हि ता देवता उदक्रामन्॥ अन्वहं जुहोति॥ अन्वह
मेव दीक्षामवरुंधे॥ त्रीणि वैश्वदेवानि जुहोति॥ चत्वार्यौद्ग्रहणानि॥ स
प्त संपद्यंते॥ सप्त वै शीर्षण्याः प्राणाः॥ प्राणा दीक्षा॥ प्राणैरेव प्राणान्दी

ब्रा०त०८
११२

क्षामवरुंधे॥ २ ॥ एकविꣳशतिं वैश्वदेवानि जुहोति॥ एकविꣳशतिर्वै दे
वलोकाः॥ द्वादश मासाः पंचर्तवः॥ त्रय इमे लोकाः॥ असावादित्य एकविꣳ
शः॥ एष सुवर्गो लोकः॥ तद्दैव्यं क्षत्रं॥ सा श्रीः॥ तद्ब्रध्नस्य विष्टपं॥ तत्स्वारा
ज्यमुच्यते॥ ३ ॥ त्रिꣳशतमोद्ग्रहणानि जुहोति॥ त्रिꣳशदक्षरा विराट्॥
अन्नं विराट्॥ विराजैवान्नाद्यमवरुंधे॥ त्रेधा विभज्य देवतां जुहोति॥
त्र्यावृतो वै देवाः॥ त्र्यावृत इमे लोकाः॥ एषां लोकानामाप्त्यै॥ एषां लोका
नां क्लृप्त्यै॥ अप वा एतस्मात्प्राणाः क्रामंति॥ ४ ॥ यो दीक्षामतिरेचय
ति॥ सप्ताहं प्रचरंति॥ सप्त वै शीर्षण्याः प्राणाः॥ प्राणा दीक्षा॥ प्राणैरेव
प्राणान्दीक्षामवरुंधे॥ पूर्णाहुतिमुत्तमां जुहोति॥ सर्वं वै पूर्णाहुतिः॥

१०
११२

सर्वमेवाप्नोति॥ अथो इयं वै पूर्णाहुतिः॥ अस्यामेव प्रतितिष्ठति॥ ५ ॥
रुंधे प्राणान्दीक्षामवरुंध उच्यते क्रामंति तिष्ठति॥ १० ॥ प्रजापतिरश्व
मेधमसृजत॥ तꣳ सृष्टं न किंचनोदयच्छत्॥ तं वैश्वदेवान्येवोदयच्छन्॥ यद्वै
श्वदेवानि जुहोति॥ यज्ञस्योद्यत्यै॥ स्वाहाधिमाधीताय स्वाहा॥ स्वाहाधी
तं मनसे स्वाहा॥ स्वाहा मनः प्रजापतये स्वाहा॥ काय स्वाहा कस्मै स्वाहा॥
कतमस्मै स्वाहेति प्राजापत्ये मुख्ये भवतः॥ प्रजापतिरेवैनं देवताभिरु मुखाभि
यच्छते॥ १ ॥ अदित्यै स्वाहादित्यै मह्यै स्वाहादित्यै सुमृडीकायै स्वाहे
त्याह॥ इयं वा अदितिः॥ अस्या एवैनं प्रतिष्ठायोद्यच्छते॥ सरस्वत्यै स्वा
हा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहेत्याह॥ वाग्वै सरस्व
स

श्रो०त०८ ती॥ वाचैवैनमुद्यच्छते॥ पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरंधिषा ११
११२ य स्वाहेत्याह॥ पशवो वै पूषा॥ पशुभिरेवैनमुद्यच्छते॥ त्वष्ट्रे स्वाहा त्वष्ट्रे
तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहेत्याह॥ त्वष्टा वै पशूनां मिथुनानाꣳ
रूपकृत्॥ रूपमेव पशुषु दधाति॥ अथो रूपैरेवैनमुद्यच्छते॥ विष्ण
वे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहेत्याह॥
यज्ञो वै विष्णुः॥ यज्ञायैवैनमुद्यच्छते॥ पूर्णाहुतिमुत्तमां जुहोति॥ प्र
त्युत्तब्ध्यै सयत्वाय॥ २॥ यच्छते पुरुरूपाय स्वाहेत्याहाष्टौ च॥ १२॥ ११३
सावित्रमष्टाकपालं प्रातर्निर्वपति॥ अष्टाक्षरा गायत्री॥ गायत्रं प्रातः
सवनं॥ प्रातःसवनादेवैनं गायत्रियाश्छंदसोऽधि निर्मिमीते॥ अथो

णां वा एतद्रूपं॥ यत्पृथुकाः॥ यत्पृथुकैर्जुहोति॥ ३॥ रुद्रानेव तत्प्रीणाति॥
लाजैर्जुहोति॥ आदित्यानां वा एतद्रूपं॥ यल्लाजाः॥ यल्लाजैर्जुहोति॥ आदि
त्यानेव तत्प्रीणाति॥ करंबैर्जुहोति॥ विश्वेषां वा एतद्देवानाꣳ रूपं॥ यत्करं
बाः॥ यत्करंबैर्जुहोति॥ ४॥ विश्वानेव तद्देवान्प्रीणाति॥ धानाभिर्जु
होति॥ नक्षत्राणां वा एतद्रूपं॥ यद्धानाः॥ यद्धाभिर्जुहोति॥ नक्षत्राण्येव त ना
त्प्रीणाति॥ सक्तुभिर्जुहोति॥ प्रजापतेर्वा एतद्रूपं॥ यत्सक्तवः॥ यत्सक्तुभि
र्जुहोति॥ ५॥ प्रजापतिमेव तत्प्रीणाति॥ मसूस्यैर्जुहोति॥ सर्वासां वा
एतद्देवतानाꣳ रूपं॥ यन्मसूस्यानि॥ यन्मसूस्यैर्जुहोति॥ सर्वा एव
तद्देवताः प्रीणाति॥ प्रियंगुतंडुलैर्जुहोति॥ प्रियांगा हवै नामैते॥ एते

ब्रा०त०८
११६

॥१५॥

एतेवैदेवा अश्वस्यांगानि समदधुः॥ यत्प्रियंगु तंडुलैर्जुहोति॥ अश्व
स्यैवांगानि संदधाति॥ दशान्नानि जुहोति॥ दशाक्षरा विराट्॥ विराट्
कृत्स्नस्यान्नाद्यस्यावरुध्यै॥ ६ ॥जुहोति मधुना जुहोति पृथुकैर्जु
होति करंबैर्जुहोति सक्तुभिर्जुहोति प्रियंगुतंडुलैर्जुहोति चत्वारिंच॥
॥ १४ ॥अन्नहोमानाज्येनाग्नेर्मधुना तंडुलैः पृथुकैर्लाजैः करंबै
र्धानाभिः सक्तुभिर्मसूस्यैः प्रियंगुतंडुलैर्दशान्नानि द्वादश॥ ॥
प्रजापतिरश्वमेधमसृजत॥ तं सृष्टं रक्षांसि अजिघांसन्॥ स
एतान्प्रजापतिर्नक्तं होमानपश्यत्॥ तानजुहोत्॥ तैर्वै स यज्ञा
द्रक्षांस्यपाहन्॥ यन्नक्तं होमांजुहोति॥ यज्ञादेवतैर्यजमानो

११६

रक्षांस्यपहंति॥ आज्येन जुहोति॥ वज्रोवा आज्यं॥ वज्रेणैव यज्ञाद्रक्षां
स्यपहंति॥ १ ॥आज्यस्य प्रतिपदं करोति॥ प्राणो वा आज्यं॥ मुखत एवास्य
प्राणं दधाति॥ अन्नहोमांजुहोति॥ शरीरं वदेवाव रुंधे॥ व्यत्यासं जुहोति॥
उभयस्यावरुध्यै॥ नक्तं जुहोति॥ रक्षसामपहत्यै॥ आज्येनांततो जु
होति॥ २ ॥ प्राणो वा आज्यं॥ उभयत एवास्य प्राणं दधाति॥ पुरस्ताच्चो
परिष्टाच्च॥ एकस्मै स्वाहेत्याह॥ अस्मिन्नेव लोके प्रतितिष्ठति॥ द्वाभ्यां
स्वाहेत्याह॥ अमुष्मिन्नेव लोके प्रतितिष्ठति॥ उभयोरेव लोकयोः प्रति
तिष्ठति॥ अस्मिंश्चामुष्मिंश्च॥ शताय स्वाहेत्याह॥ शतायुर्वै पुरु
षः शतवीर्यः॥ आयुरेव वीर्यमवरुंधे॥ सहस्राय स्वाहेत्याह॥ आ

ब्रा० तृ०८ युर्वै सहस्रं ॥ आयुरेवावरुंधे ॥ सर्वस्मै स्वाहेत्याह ॥ अपरिमितमेवाव रुं १५

११८ धे ॥ ३ ॥ एवयज्ञाद्रक्षांꣳस्यपहंत्यं ततो जुहोति शतायस्वाहेत्याह सप्त च ॥ १५ ॥

प्रजापतिं वा एषईप्सतीत्याहुः ॥ योऽश्वमेधेन यजत इति ॥ अथो आहुः ॥
सर्वाणि भूतानीति ॥ एकस्मै स्वाहेत्याह ॥ प्रजापतिर्वा एकः ॥ तमेवाप्नोति ॥
एकस्मै स्वाहा द्वाभ्याꣳ स्वाहेत्यभिपूर्वमाहुतीर्जुहोति ॥ अभिपूर्वमेव सु
वर्गं लोकमेति ॥ एकोत्तरं जुहोति ॥ १ ॥ एकवदेव सुवर्गं लोकमेति ॥
संततं जुहोति ॥ शतायस्वाहेत्याह ॥ शतायुर्वै पुरुषः शतवीर्यः ॥ आयुरे
व वीर्यमवरुंधे ॥ सहस्रायस्वाहेत्याह ॥ आयुर्वै सहस्रं ॥ आयुरेवावरुं ११८
धे ॥ अयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहेत्याह ॥ २ ॥
सुवर्गस्य लोकस्य संतत्यै ॥

त्रय इमे लोकाः ॥ इमानेव लोकानवरुंधे ॥ अर्बुदाय स्वाहेत्याह ॥ वाग्वा
अर्बुदं ॥ वाचमेवावरुंधे ॥ न्यर्बुदाय स्वाहेत्याह ॥ यो वै वाचो भूमा ॥ तन्न्य
र्बुदं ॥ वाच एव भूमानमवरुंधे ॥ समुद्राय स्वाहेत्याह ॥ ३ ॥ समुद्रमेवा
प्नोति ॥ मध्याय स्वाहेत्याह ॥ मध्यमेवाप्नोति ॥ अंताय स्वाहेत्याह ॥ अं
तमेवाप्नोति ॥ परार्धाय स्वाहेत्याह ॥ परार्धमेवाप्नोति ॥ उषसे स्वाहा व्यु
ष्ट्यै स्वाहेत्याह ॥ रात्रिर्वा उषाः ॥ अहर्व्युष्टिः ॥ अहोरात्रे एवावरुंधे ॥ अथो
अहोरात्रयोरेव प्रतितिष्ठति ॥ ता यदुभयीर्दिवा वा नक्तं वा जुहुयात् ॥
अहोरात्रे मोहयेत् ॥ उषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वा
हेत्यनुदिते जुहोति ॥ उदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वा

हस्त्युदितिजुहोति॥ अहोरात्रयोरव्यतिमोहाय॥ ४॥ एकोत्तरंजुहोतित्र्यु
तोयस्वाहेत्याहसमुद्रायस्वाहेत्याहार्व्यृष्टिःसमच्च॥ १६॥ विभूर्मात्रा
प्रभूःपित्रेत्यश्वनामानिजुहोति॥ उभयोरेवैनंलोकयोर्नामधेयंगम
यति॥ आयनायपरायणायस्वाहेत्युद्द्रावंजुहोति॥ स
र्वमेवैनमस्कन्नꣳसुवर्गंलोकंगमयति॥ अग्नयेस्वाहासोमाय
स्वाहेतिपूर्वहोमांजुहोति॥ पूर्वएवद्विषंतंभ्रातृव्यमतिक्रामति॥ पृ
थिव्यैस्वाहांतरिक्षायस्वाहेत्याह॥ यथायजुरेवैतत्॥ अग्नयेस्वा

हासोमायस्वाहेतिपूर्वदीक्षाजुहोति॥ पूर्वएवद्विषंतंभ्रातृव्यम
तिक्रामति॥ १॥ पृथिव्यैस्वाहांतरिक्षायस्वाहेत्येकविꣳशिनीं

दीक्षांजुहोति॥ एकविꣳशतिर्वैदेवलोकाः॥ द्वादशमासाःपंचर्तवः॥ त्रयइमे लोकाः॥ असावादित्यएकविꣳशः॥ एषसुवर्गोलोकः॥ सुवर्गस्यलोकस्य
समष्ट्यै॥ भुवोदेवानांकर्मणेत्यृतुदीक्षांजुहोति॥ ऋतूनेवास्मैकल्पय
ति॥ अग्नयेस्वाहावायवेस्वाहेतिजुहोत्यनंतरित्यै॥ २॥ अर्वाङ्य
ज्ञःसंक्रामत्वित्यासीर्जुहोति॥ सुवर्गस्यलोकस्याप्त्यै॥ भूतंभव्यंभवि
ष्यदितिपर्याप्तीर्जुहोति॥ सुवर्गस्यलोकस्यपर्याप्त्यै॥ आमेगृहा
भवंत्वित्याभूर्जुहोति॥ सुवर्गस्यलोकस्याभूत्यै॥ अग्निनातपो
न्वभवदित्यनुभूर्जुहोति॥ सुवर्गस्यलोकस्यानुभूत्यै॥ स्वाहानु
धिमाधीतायस्वाहेतिसमस्तानिवैश्वदेवानिजुहोति॥ समस्ते

ब्रा०त०८
११०

मेवद्विषंतं भ्रातृव्यमतिक्रामति॥ ३ ॥दद्भ्यः स्वाहा हनूभ्याꣳ स्वाहेत्यंग होमाञ्जुहोति॥ अंगेअंगे वै पुरुषस्य पाप्मोपश्लिष्टः॥ अंगादंगादेवै नं पाप्मनस्तेन मुंचति॥ अंज्येताय स्वाहा कृष्णाय स्वाहा श्वेताय स्वाहेत्यश्वरूपाणि जुहोति॥ रूपैरेवैनꣳ समर्धयति॥ ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहेत्योषधिहोमाञ्जुहोति॥ द्वय्यो वा ओषधयः॥ पुष्पेभ्योन्याः फलं गृह्णंति॥ मूलेभ्योन्याः॥ ता एवोभयीरवरुंधे॥ ४ ॥ वनस्पतिभ्यः स्वाहेति वनस्पतिहोमाञ्जुहोति॥ आरण्यस्यान्नाद्यस्यावरुध्ये॥ मेषस्त्वा पचतैरवत्विति अपाव्यानि जुहोति॥ प्राणा वैदेवा अपाव्याः॥ प्राणानेवावरुंधे॥ कूप्याभ्यः स्वाहाद्भ्यः स्वा

१७
११२

हेत्यपाꣳ होमाञ्जुहोति॥ अप्सु वा अम्भः॥ अन्नं वा आपः॥ अद्भ्यो वा अन्नं जायते॥ यदेवाद्भ्योन्नं जायते॥ तदवरुंधे॥ ५ ॥ पूर्वदीक्षा जुहोति पूर्व एव द्विषंतं भ्रातृव्यमतिक्रामत्यनंतरित्यैक्रामति रुंधे जायत एकं च॥ ॥ १७ ॥ अंभाꣳसि जुहोति॥ अयं वै लोको अंभाꣳसि॥ तस्य वसवोधिपतयः॥ अग्निर्ज्योतिः॥ यदंभाꣳसि जुहोति॥ इममेव लोकमवरुंधे॥ वसूनाꣳ सायुज्यं गच्छति॥ अग्निं ज्योतिरवरुंधे॥ नभाꣳसि जुहोति॥ अंतरिक्षं वै नभाꣳसि॥ १ ॥ तस्य रुद्रोधिपतयः॥ वायुर्ज्योतिः॥ यन्नभाꣳसि जुहोति॥ अंतरिक्षमेवावरुंधे॥ रुद्राणाꣳ सायुज्यं गच्छति॥ वायुं ज्योतिरवरुंधे॥ महाꣳसि जुहोति॥ असौ वै लो

अ

श्री०तै०८ १२०

कोमहाꣳसि॥तस्यादित्योधिपतयः॥ सूर्योज्योतिः॥ २॥यन्महाꣳसि १८
जुहोति॥अमुमेव लोकमवरुंधे॥आदित्यानाꣳसायुज्यं गच्छति॥
सूर्यंज्योतिरवरुंधे॥नमोराज्ञेनमोवरुणायेतियव्यानिजुहोति॥अ
न्नाद्यस्यावरुध्ये॥मयोभूर्वातोअभिवातूस्राइतिगव्यानिजुहोति॥
पशूनामवरुध्ये॥प्राणायस्वाहाव्यानायस्वाहेसंतातिहोमांजुहोति॥ ति
सुवर्गस्यलोकस्यसंतत्ये॥ ३॥सिताय स्वाहासितायस्वाहेतिप्रमु
क्तोर्जुहोति॥ सुवर्गस्यलोकस्यप्रमुक्त्यै॥पृथिव्यैस्वाहांतरिक्षा
यस्वाहेत्याह॥यथायजुरेवैतत्॥दत्तेस्वाहादंतकायस्वाहेतिश
रीरहोमांजुहोमांजुहोति॥पितृलोकमेवतैर्यजमानोवरुंधे॥कस्त्वा १२०

युनक्तिसत्वायुनक्त्विति परिधीन्युनक्ति॥इमेवैलोकाःपरिधयः॥इ
मानेवास्मैलोकान्युनक्ति॥सुवर्गस्यलोकस्यसमष्ट्यै॥ ४॥यःप्राण
तोयआत्मदाइति महिमानौजुहोति॥सुवर्गोवैलोकोमहः॥सुवर्ग
मेवताभ्यांलोकंयजमानोवरुंधे॥आब्रह्मन्ब्राह्मणोब्रह्मवर्चसी
जायतामितिसमस्तानिब्रह्मवर्चसानिजुहोति॥ब्रह्मवर्चसमेवतै
र्यजमानोवरुंधे॥जज्ञिबीजमितिजुहोत्यनंतरित्यै॥अग्नयेसम
नमत्पृथिव्यैसमनमदितिसन्नतिहोमांजुहोति॥सुवर्गस्यलो
कस्यसन्नत्यै॥भूतायस्वाहाभविष्यतेस्वाहेतिभूताभव्यौहो
मौजुहोति॥अयंवैलोकोभूतं॥ ५॥असौभविष्यत्॥अनयो

ब्रा०त०८
१२१

१८

रेवलोकयोः प्रतितिष्ठति ॥ सर्वस्याप्त्यै ॥ सर्वस्यावरुध्यै ॥ यदक्रंदः प्रथमं
जायमान इत्यश्वस्तोमीयं जुहोति ॥ सर्वस्याप्त्यै ॥ सर्वस्य जित्यै ॥ सर्वमेव
तेनाप्नोति ॥ सर्वं जयति ॥ योऽश्वमेधेन यजते ॥ ६ ॥ य उ चैनमेवं वेद ॥ य
ज्ञꣳ रक्षाꣳस्यजिघाꣳसन् ॥ स एतान्प्रजापतिर्नक्तꣳहोमानपश्यत् ॥
तानजुहोत् ॥ तैर्वै स यज्ञाद्रक्षाꣳस्यपाहन् ॥ यन्नक्तꣳहोमाञ्जुहोति ॥
यज्ञादेव तैर्यजमानो रक्षाꣳस्यपहंति ॥ उषसे स्वाहा व्युष्ट्यै स्वाहेत्यंत
तो जुहोति ॥ सुवर्गस्य लोकस्य समष्ट्यै ॥ ७ ॥ विनभाꣳसि सूर्यो ज्यो
तिः संतत्यै समष्ट्यै भूतं यजंते नव च ॥ १८ ॥ एकयूपो वैकादशिनी वा ॥
अन्येषां यज्ञानां यूपा भवंति ॥ एकविꣳशिन्यश्वमेधस्य ॥ सुवर्गस्य लो

१२१

कस्याभिजित्यै ॥ बैल्वो वा खादिरो वा पालाशो वा ॥ अन्येषां यज्ञक्रतू
नां यूपा भवंति ॥ राज्जुदाल एकविꣳशत्यरत्निरश्वमेधस्य ॥ सुवर्गस्य लो
कस्य समष्ट्यै ॥ नान्येषां पशूनां तेजन्या अवद्यंति ॥ अवद्यंत्यश्वस्य ॥ १ ॥
पाप्मा वै तेजनी ॥ पाप्मनोऽपहत्यै ॥ प्लक्षशाखायामन्येषां पशूनामवद्यं
ति ॥ वेतसशाखायामश्वस्य ॥ अप्सुयोनिर्वा अश्वः ॥ अप्सुजो वेतसः ॥
स्व एवास्य योनाववद्यति ॥ यूपेषु ग्राम्यान्पशून्नियुंजंति ॥ आरोके
ष्वारण्यान्धारयंति ॥ पशूनां व्यावृत्त्यै ॥ आ ग्राम्यान्पशूंल्लभंते ॥ प्रार
ण्यान्त्सृजंति ॥ पाप्मनोऽपहत्यै ॥ २ ॥ अश्वस्य व्यावृत्त्यै त्रीणि च ॥ १९ ॥
राज्जुदालमग्निष्ठं मिनोति ॥ भ्रूणहत्याया अपहत्यै ॥ पौतुद्रवावभितो

४

ब्रा०त०८
१२२

२०

भवतः ॥ पुण्यस्य गंधस्यावरुध्ये ॥ भ्रूणहत्यामेवास्मादपहत्य ॥ पु
ण्येन गंधेनोभयतः परिगृह्णाति ॥ षड्बैल्वा भवंति ॥ ब्रह्मवर्चसस्या
वरुध्ये ॥ षड्खादिराः ॥ तेजसोवरुध्ये ॥ १ ॥ षड्पालाशाः ॥ सोमपी
थस्यावरुध्ये ॥ एकविंꣳशतिः संपद्यंते ॥ एकविंꣳशतिर्वै देवलोकाः ॥
द्वादशमासाः पंचर्तवः ॥ त्रयइमेलोकाः ॥ असावादित्यएकविंꣳशः ॥
एषसुवर्गोलोकः ॥ सुवर्गस्य लोकस्य समष्ट्यै ॥ शतंपशवोभवंति ॥
॥ २ ॥ शतायुः पुरुषः शतेंद्रियः ॥ आयुष्येवेंद्रिये प्रतितिष्ठति ॥ स
र्वंवा अश्वमेधेनाप्नोति ॥ अपरिमिताभवंति ॥ अपरिमितस्यावरु
ध्ये ॥ ब्रह्मवादिनोवदंति ॥ कस्मात्सत्यात् ॥ दक्षिणतोन्येषांपशूना

१२२

मवद्यंति ॥ उत्तरतोश्वस्येति ॥ वारुणोवा अश्वः ॥ ३ ॥ एषावैवरुणस्यदि
क् ॥ स्वायामेवास्यदिश्यवद्यति ॥ यदितरेषांपशूनामवद्यति ॥ शतदेवत्यंते
नावरुंधे ॥ चितेग्नावधिवेतसे कटेश्वंचिनोति ॥ अप्सुयोनिर्वा अश्वः ॥ अ
प्सुजो वेतसः ॥ स्वएवैनं योनौप्रतिष्ठापयति ॥ पुरस्तात्प्रत्यंचं तूपरंचि
नोति ॥ पश्चात्प्राचीनं गोमृगं ॥ ४ ॥ प्राणापानावेवास्मिन्त्सम्यंचौ
दधाति ॥ अश्वंतूपरंगोमृगमिति सर्वहुत एतान्जुहोति ॥ एषांलोका
नामभिजित्यै ॥ आत्मनाभिजुहोति ॥ सात्मानमेवैनꣳ सतनुं करोति ॥
सात्माऽमुष्मिन्लोके भवति ॥ यएवंवेद ॥ अथोवसोरेव धारां तेनावरुं
धे ॥ इलुवर्दाय स्वाहा बलिवर्दाय स्वाहेत्याह ॥ संवत्सरो वा इलुवर्दः ॥

श्री०ब्रा०
१२३

परिवत्सरो बलिवर्दः ॥ संवत्सरादेव परिवत्सरादायुरवरुंधे ॥ आयुरेवास्मि
न्दधाति ॥ तस्मादश्वमेधयाजी जरसा विस्रसामुं लोकमेति ॥ ९ ॥ तेजसो वरु
ध्ये भवंत्यश्वो गोमृग मिलुवर्दश्चत्वारि च ॥ २० ॥ एकविंशोग्निर्भवति ॥
एकविंश स्तोमः ॥ एकविंशतिर्यूपाः ॥ यथा वा अश्वा वर्षभा वा वृषाणः सं
स्फुरेरन् ॥ एवमेवैतत्स्तोमाः संस्फुरंते ॥ यदेकविंशाः ॥ तेयत्स मृछेरन् ॥
हन्येतास्य यज्ञः ॥ द्वादश एवाग्निः स्यादित्याहुः ॥ द्वादश स्तोमः ॥ १ ॥ ए
कादश यूपाः ॥ यद्द्वादशोग्निर्भवति ॥ द्वादश मासाः संवत्सरः ॥ संवत्सरेणै
वास्मा अन्नमवरुंधे ॥ यद्दश यूपा भवंति ॥ दशाक्षरा विराट् ॥ अन्नं वि
राट् ॥ विराजैवान्नाद्यमवरुंधे ॥ य एकादशः ॥ स्तन एवास्यैसः ॥ २ ॥ दुह एवै

२१

श

श
१२३

वैनां तेन ॥ तदाहुः ॥ यद्द्वादशोग्निः स्याद्द्वादशः स्तोम एकादश यूपाः ॥
यथा स्थूरिणा यायात् ॥ तादृक्तत् ॥ एकविंश एवाग्निः स्यादित्याहुः ॥
एकविंश स्तोमः ॥ एकविंशतिर्यूपाः ॥ यथा प्रष्टिभिर्याति ॥ तादृगेवा
तत् ॥ ३ ॥ यो वा अश्वमेधे तिस्रः ककुभो वेद ॥ ककुद्ध राज्ञां भवति ॥
एकविंशोग्निर्भवति ॥ एकविंश स्तोमः ॥ एकविंशतिर्यूपाः ॥ एता
वा अश्वमेधे तिस्रः ककुभः ॥ य एवं वेद ॥ ककुद्राज्ञां भवति ॥ यो वा
अश्वमेधे त्रीणि शीर्षाणि वेद ॥ शिरो ह राज्ञां भवति ॥ एकविंशोग्नि
र्भवति ॥ एकविंश स्तोमः ॥ एकविंशतिर्यूपाः ॥ एतानि वा अश्व

ब्रा॰त॰
१२४

मेधेत्रीणि। शीर्षाणि॥ यएवंवेद॥ शिरोहरात्मांभवति॥ ४ ॥द्वादशः
स्तोमः सएवतच्छिरोहरात्मांभवतिषट्च॥ २१॥ देवावाअश्वमेधेपव
माने॥ सुवर्गंलोकंनप्राजानन्॥ तमश्वः प्राजानात्॥ यदश्वमेधेश्वे
नमेध्येनोदंचोबहिष्पवमानंः सर्पंति॥ सुवर्गस्यलोकस्यप्रज्ञात्यै॥
नवैमनुष्यः सुवर्गंलोकंजसावेद॥ अश्वोवैसुवर्गंलोकमंजसा
वेद॥ यदुद्गातोद्गायेत्॥ यथाक्षेत्रज्ञोन्येनपथाप्रतिपादयेत्॥
तादृक्तत्॥ १ ॥उद्गातारमपरुध्य॥ अश्वमुद्गीथायवृणीते॥ य
थाक्षेत्रज्ञोंजसानयति॥ एवमेवैनमश्वः सुवर्गंलोकमंजसानय

२२

१२४

मं

ति॥ पुछमन्वारभंते॥ सुवर्गस्यलोकस्यसमष्ट्यै॥ हिंकरोति॥ सा
मैवाकः॥ हिंकरोति॥ उद्गीथएवास्यसः॥ २ ॥ वडबाउपरुंधंति॥ मि
थुनत्वायप्रजात्यै॥ अथोयथोपगातारउपगायंति॥ तादृगेवतत्॥
उदगासीदश्वोमेध्यइत्याह॥ प्राजापत्योवाअश्वः॥ प्राजापतिस्साक्षी
श्वः॥ उद्गीथमेवावरुंधे॥ अथोऋक्सामयोरेवप्रतितिष्ठति॥ हि
रण्येनोपाकरोति॥ ज्योतिर्वैहिरण्यं॥ ज्योतिरेवमुखतोदधाति॥
यजमानेचप्रजासुच॥ अथोहिरण्यज्योतिरेवयजमानः सुवर्गं
लोकमेति॥ ३॥ तत्सउपाकरोतिचत्वारिच॥ २२ ॥पुरुषोवैयज्ञः॥

यज्ञः प्रजापतिः॥ यदश्वे पशून्नियुंजंति॥ यज्ञादेव तद्यज्ञं प्रयुंक्ते॥ गोश्र
श्वं तूपरं गोमृगं॥ तानग्निष्ठ आलभंते॥ सेनामुखमेव तत्संश्यति॥
तस्माद्राजमुखं भीष्मं भावुकं॥ आग्नेयं कृष्णग्रीवं पुरस्ताल्ललाटे॥ पू
र्वाग्निमेव तं कुरुते॥ १॥ तस्मात्पूर्वाग्निं पुरस्तात्स्थापयंति॥ पौष्ण
मन्वंचं॥ अन्नं वै पूषा॥ तस्मात्पूर्वाग्नावाहार्यं॥ माहरंति॥ ऐंद्रापौ
ष्णमुपरिष्टात्॥ ऐंद्रो वै राजन्यो न्नं पूषा॥ अन्नाद्येनैवैनमुभय
तः परिगृह्णाति॥ तस्माद्राजन्योन्नादो भावुकः॥ आग्नेयौ कृष्ण
ग्रीवौ बाह्वोः॥ बाह्वोरेव वीर्यं धत्ते॥ २॥ तस्माद्राजन्यो बाहुबली

भावुकः॥ त्वाष्ट्रौ लोमशसक्थौ सक्थ्योः॥ सक्थ्योरेव वीर्यं धत्ते॥ तस्मा
द्राजन्य ऊरुबली भावुकः॥ शितिपृष्ठौ बार्हस्पत्यौ पृष्ठे॥ ब्रह्मवर्चसमेवो
परिष्टाद्धत्ते॥ अथो कवचे एवैते अभितः पर्यूहते॥ तस्माद्राजन्यः सन्न
द्धो वीर्यं करोति॥ धात्रे पृषोदरमधस्तात्॥ प्रतिष्ठामेवैतां कुरुते॥ अ
थो इयं वै धाता॥ अस्यामेव प्रतितिष्ठति॥ सौर्यं बलक्षं पुच्छे॥ उत्सेधमे
व तं कुरुते॥ तस्मादुत्सेधं भयं प्रजा अभिसंश्रयंति॥ ३॥ कु
रुते धत्ते कुरुते पंच च॥ २३॥ ॥ सांग्रहण्या चैतुष्ट्यायो वै
यः पितृभ्यस्त्वा रोयथा निःक्तं प्रजापतये त्वा यथा प्रोक्षितं विभूराह
प्रजापतिरकामयताश्वमेधेन प्रजापतिर्न किंचन सावित्रमाव्र

ब्रा० त०
१२६

त्प्रजापतिर्देवेभ्यः प्रजापतीरक्षांꣳसि प्रजापतिमी सतिविभू
रश्वनामान्यं भांꣳस्येकयूपोराज्जुदालमेकविंꣳशो देवाः पुरुष
स्त्रयोविंꣳशतिः ॥ २३ ॥ ॥ संग्रहण्यातस्मादश्वमेध
याजी यत्परिमिताय यज्ञमुखेयो दीक्षां देवानेवतेस्त्रय इमे
लोकाः सिताय स्वाहा प्राणापानावेवास्मिन्नस्माद्राज
न्योबाहुबलीभावुक एकनवतिः ॥ ९१ ॥ ॥ हरिः
ओम् ॥ ॥ श्रीगजाननार्पणमस्तु ॥ ॥ शुभमस्तु ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ श्री ॥ ॥

२४

१२६

हरिः ओम् ॥ ॥ प्रजापतिरश्वमेधमसृजत ॥ सोस्मात्सृष्टोपाक्रामत् ॥
तमष्टादशिभिरनुप्रायुङ्क्त ॥ तमाप्नोत् ॥ तमाप्त्वाष्टादशिभिरवारुंध ॥ यदष्टा
दशिन आलभ्यंते ॥ यज्ञमेवतेराप्त्वायजमानोवरुंधे ॥ संवत्सरस्य वा एषा
प्रतिमा ॥ यदष्टादशिनः ॥ द्वादशमासाः पंचर्तवः ॥ १ ॥ संवत्सरोष्टादशः ॥ य
दष्टादशिन आलभ्यंते ॥ संवत्सरमेवतैराप्त्वायजमानोवरुंधे ॥ अग्निष्ठेन्यान्प नो
श्नुपाकरोति ॥ इतरेषु यूपेष्वष्टादशिनो जामित्वाय ॥ नवनवालभ्यंतेसवी
र्यत्वाय ॥ यदारण्यैः संꣳस्थापयेत् ॥ व्यवस्येतां पितापुत्रौ ॥ व्यध्वानः क्रामे
युः ॥ विदूरंग्यामयोर्ग्रामांतौस्यातां ॥ २ ॥ ऋक्षीकाः पुरुषव्याघ्राः परि
मोषिण आव्याधिनीस्तस्करा अरण्येष्वाजायेरन् ॥ तदाहुः ॥ अपशवोवा

एते ॥ यदारण्याः ॥ यदारण्यैः संस्थापयेत् ॥ क्षिप्रे यजमानमरण्यं मृतꣳ
हरेयुः ॥ अरण्यायतना ह्यारण्याः पशव इति ॥ यत्पशून्नालभेत ॥ अनवरु
द्धा अस्य पशवः स्युः ॥ यत्पर्यग्निकृतानुत्सृजेत् ॥ ३ ॥ यज्ञवेशसं कुर्यात् ॥
यत्पशूनालभते ॥ तेनैव पशूनवरुंधे ॥ यत्पर्यग्निकृतानुत्सृजत्ययज्ञवे
शसाय ॥ अवरुद्धा अस्य पशवो भवंति ॥ न यज्ञवेशसं भवति ॥ न यजमा
नमरण्यं मृतꣳ हरंति ॥ ग्राम्यैः संस्थापयति ॥ एते वै पशवः क्षेमो नाम ॥
सं पितापुत्रावेवस्यतः ॥ समध्वानः क्रामंति ॥ समंतिकं ग्राममयोर्ग्रामांतौ
भवतः ॥ नर्क्षरीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिनीस्तस्करा
अरण्येष्वाजायंते ॥ ४ ॥ ऋतवः स्यातामुत्सृजेत्स्यंतस्त्रीणि च ॥ ९ ॥

प्रजापतिरकामयतोभौ लोकाववरुंधीयेति ॥ स एतानुभयान्पशूनपश्य
त् ॥ ग्राम्याꣳश्चारण्याꣳश्च ॥ तानालभत ॥ तैर्वै स उभौ लोकाववारुंध ॥ ग्रा
म्यैरेव पशुभिरिमं लोकमवारुंध ॥ आरण्यैरमुं ॥ यद्ग्राम्यान्पशूनालभते ॥
इममेव तैर्लोकमवरुंधे ॥ यदारण्यान् ॥ १ ॥ अमुं तैः ॥ अनवरुद्धो वा एत
स्य संवत्सर इत्याहुः ॥ य इत इतश्चातुर्मास्यानि संवत्सरं प्रयुंक्त इति ॥
एतावान्वै संवत्सरः ॥ यच्चातुर्मास्यानि ॥ यदेते चातुर्मास्याः पशव आल
भ्यंते ॥ प्रत्यक्षमेव तैः संवत्सरं यजमानोवरुंधे ॥ विवा एष प्रजया पशुभि
रृध्यते ॥ यः संवत्सरं प्रयुंक्ते ॥ संवत्सरः सुवर्गो लोकः ॥ २ ॥ सुवर्गं तु
लोकं नापराध्नोति ॥ प्रजा वै पशव एकादशिनी ॥ यदेत ऐकादशिनाः

म्या
रु

ब्रा० त० १२८

पशवआलभ्यंते ॥ साक्षादेवप्रजांपशून्यजमानोवरुंधे ॥ ॥ प्रजापतिर्विरा
जमसृजत ॥ सासृष्टाश्वमेधंप्राविशत् ॥ तांदशिभिरनुप्रायुंक्त ॥ तामाप्नोत् ॥
तामाप्त्वादशिभिरवारुंध ॥ यद्दशिनआलभ्यंते ॥ ३ ॥ विराजमेवतैरा
प्त्वायजमानोवरुंधे ॥ एकादशदशतआलभ्यंते ॥ एकादशाक्षरात्रिष्टु
प् ॥ त्रैष्टुभाः पशवः ॥ पशूनेवावरुंधे ॥ वैश्वदेवोवाअश्वः ॥ नानादेवत्याः
पशवोभवंति ॥ अश्वस्यसर्वत्वाय ॥ नानारूपाभवंति ॥ तस्मान्नानारू
पाः पशवः ॥ बहुरूपाभवंति ॥ तस्माद्बहुरूपाः पशवः समृध्ये ॥ ४ ॥
आरण्यान्लोकोदशिनआलभ्यंते नानारूपाः पशवोहैच ॥ २८ ॥ अ
स्मैवैलोकायग्राम्याः पशवआलभ्यंते ॥ अमुष्माआरण्याः ॥ यद्ग्राम्या

१२८

न्पशूनालभते ॥ इममेवतैर्लोकमवरुंधे ॥ यदारण्यान् ॥ अमुंतैः ॥ उभया
न्पशूनालभते ॥ ग्राम्यांश्चारण्यांश्च ॥ उभयोर्लोकयोरवरुध्ये ॥ उभया
न्पशूनालभते ॥ १ ॥ ग्राम्यांश्चारण्यांश्च ॥ उभयस्यान्नाद्यस्यावरु
ध्ये ॥ उभयान्पशूनालभते ॥ ग्राम्यांश्चारण्यांश्च ॥ उभयेषांपशूना
मवरुध्ये ॥ त्रयस्त्रयोभवंति ॥ त्रयइमेलोकाः ॥ एषांलोकानामाप्त्यै ॥
ब्रह्मवादिनोवदंति ॥ कस्मात्सत्यात् ॥ २ ॥ अस्मिन्लोकेबहवः का
माइति ॥ यत्समानीभ्योदेवताभ्योन्येन्येपशवआलभ्यंते ॥ अस्मिन्ने
वतल्लोकेकामान्दधाति ॥ तस्मादस्मिन्लोकेबहवः कामाः ॥ त्रयाणां
त्रयाणांसहवपाजुहोति ॥ त्र्यावृतोवैदेवाः ॥ त्र्यावृतइमेलोकाः ॥ एषां

ब्रा०त०
१२९

लोकानाभाष्ये ॥ एषां लोकानां क्लृप्त्यै ॥ पर्यग्निकृतानारण्यानुत्सृजंत्य
हिंसायै ॥ ३ ॥ उभयान्पशूनालभंते सत्याद्दहिंसायै ॥ २ ॥ युंजंतिब्र
ध्नमित्याह ॥ असौ वा आदित्योब्रध्नः ॥ आदित्यमेवास्मैयुनक्ति ॥ अरु
षमित्याह ॥ अग्निर्वाअरुषः ॥ अग्निमेवास्मैयुनक्ति ॥ चरंतमित्याह ॥
वायुर्वैचरन्न् ॥ वायुमेवास्मैयुनक्ति ॥ परितस्थुष इत्याह ॥ १ ॥ इमेवै
लोकाःपरितस्थुषः ॥ इमानेवास्मैलोकान्युनक्ति ॥ रोचंतेरोचनादि
वीत्याह ॥ नक्षत्राणिवैरोचनादिवि ॥ नक्षत्राण्येवास्मैरोचयति ॥ युं
जंत्यस्यकाम्येत्याह ॥ कामानेवास्मैयुनक्ति ॥ हरीविपक्षसेत्याह ॥ इ
मेवैहरीविपक्षसा ॥ इमेएवास्मैयुनक्ति ॥ २ ॥ शोणाधृष्णूनृवाहसेत्या

३

१२९

ह ॥ अहोरात्रेवैनृवाहसा ॥ अहोरात्रेएवास्मैयुनक्ति ॥ एताएवास्मैदेवतायु
नक्ति ॥ सुवर्गस्यलोकस्यसमष्ट्यै ॥ केतुंकृण्वन्नकेतवइति ध्वजंप्रतिमुंच
ति ॥ यशएवैनंराज्ञांगमयति ॥ जीमूतस्येवभवतिप्रतीकमित्याह ॥ य
थायजुरेवैतत् ॥ यतेपंथानःसमितःपूर्व्यास इत्यध्वर्युर्यजमानंवाचय
त्यभिजित्यै ॥ ३ ॥ पराङ्वाएतस्ययज्ञएति ॥ यस्यपशुरुपाकृतोन्यत्रवेद्या
एति ॥ एतंस्तोतरेतेनपथापुनरश्वमावर्तयासिनइत्याह ॥ वायुर्वै
स्तोता ॥ वायुमेवास्यपरस्ताद्दधात्यावृत्यै ॥ यथावैहविषोगृहीतस्य
स्कंदति ॥ एवंवाएतदश्वस्यस्कंदति ॥ यदस्योपाकृतस्यलोमानिशी
यंते ॥ यद्वालेषुकाचानावयंति ॥ लोमान्येवास्यतत्संभरंति ॥ ४ ॥ भू

ब्रा०त०३
१३०

भूर्भुवः सुवरिति प्राजापत्याभिर्वाचयंति ॥ प्राजापत्यो वा अश्वः ॥ स्वयैवैनं देवतया समर्द्धयंति ॥ भूरिति महिषी ॥ भुव इति वावाता ॥ सुवरिति परिवृक्ती ॥ एषां लोकानामभिजित्यै ॥ हिरण्मयाः काचा भवंति ॥ ज्योतिर्वै हिरण्यं ॥ राष्ट्रमश्वमेधः ॥ ५ ॥ ज्योतिश्चैवास्मै राष्ट्रंच समीची दधाति ॥ सहस्रं भवंति ॥ सहस्रसंमितः सुवर्गो लोकः ॥ सुवर्गस्य लोकस्याभिजित्यै ॥ अप वा एतस्मात्तेज इंद्रियं पशवः श्रीः क्रामंति ॥ योऽश्वमेधेन यजते ॥ वसवस्त्वांजंतु गायत्रेण छंदसेति महिष्यभ्यनक्ति ॥ तेजो वा आज्यं ॥ तेजो गायत्री ॥ तेजसैवास्मै तेजोऽवरुंधे ॥ ६ ॥ रुद्रास्त्वांजंतु त्रैष्टुभेन छंदसेति वावाता ॥ तेजो वा आज्यं ॥ इंद्रि[illegible]ये[illegible] त्रिष्टुप् ॥ तेजसैवास्मा

४
१३०

इंद्रियमवरुंधे ॥ आदित्यास्त्वांजंतु जागतेन छंदसेति परिवृक्ती ॥ तेजो वा आज्यं ॥ पशवो जगती ॥ तेजसैवास्मै पशूनवरुंधे ॥ पत्नयोऽभ्यंजंति ॥ श्रिया वा एतद्रूपं ॥ ७ ॥ यत्पत्नयः ॥ श्रियमेवास्मिन्तद्दधाति ॥ नास्मात्तेज इंद्रियं पशवः श्रीरपक्रामंति ॥ लाजी३न्छाची३न्यशो ममा३ इत्यतिरिक्तमन्नमश्वायोपाहरंति ॥ प्रजामेवान्नादीं कुर्वते ॥ एतद्देवा अन्नमत्तैतदन्नमद्धि प्रजापत इत्याह ॥ प्रजायामेवान्नाद्यं दधते ॥ यदि नावजिघ्रेत् ॥ अग्निः पशुरासीदित्यवघ्रापयेत् ॥ अवैवजिघ्रति ॥ अक्रान्वाजीक्रमैरत्यक्रमीद्वाजी द्यौस्ते पृष्ठं पृथिवी सधस्थमित्यश्वमनुमंत्रयते ॥ एषांलोकानामभिजित्यै ॥ समिद्धो अंजन्कृदरं मतीनामित्यश्वस्याप्रियो भवंति सरूपत्वा

ब्रा०तृ०९
१२१

य॥ ८ ॥ परि त्नुस्थुषड्ढत्याहेमे एवास्मैयुनक्त्यभिजित्यै भरंत्यश्वमेधोरुं धेद्रूपं जिघ्रति त्रीणिच॥ ५ ॥तेजसावाएषब्रह्मवर्चसेन व्यृध्यते ।योश्वमे धेन यजंते॥ होता चब्रह्मा चब्रह्मोद्यं वदतः॥तेजसाचैवैनं ब्रह्मवर्चसेनच समर्धयतः॥ दक्षिणतो ब्रह्मा भवति॥ दक्षिणत आयतनो वैब्रह्म॥ बार्ह स्पत्यो वैब्रह्मा॥ ब्रह्मवर्चसमेवास्यदक्षिणतो दधाति॥तस्माद्दक्षिणोर्धो ब्रह्मवर्चसितरः॥उत्तरतो होता भवति॥ १ ॥उत्तरत आयतनो वैहोता॥ आग्नेयो वैहोता॥तेजो वा अग्निः॥ तेज एवास्योत्तरतो दधाति॥ तस्मादुत्तरो र्धस्तेजस्वितरः॥ यूपमभितो वदतः॥ यजमानदेवत्यो वैयूपः॥ यजमान मेव तेजसा च ब्रह्मवर्चसेन च समर्धयतः॥ किंस्विदासीत्पूर्वचित्तिरित्या

५
त
१२१

ह॥ द्यौर्वै वृष्टिः पूर्वचित्तिः॥ २ ॥ दिवमेव वृष्टिमवरुंधे॥ किंस्विदासीद्बृहद्वय इत्याह॥ अश्वो वै बृहद्वयः॥ अश्वमेवावरुंधे॥ किंस्विदासीत्पिशंगिलेत्याह॥ रात्रिर्वै पिशंगिला॥ रात्रिमेवावरुंधे॥ किंस्विदासीत्पिलिप्पिलेत्याह॥ श्रीर्वै पिलिप्पिला॥ अन्नाद्यमेवावरुंधे॥ ३ ॥ कस्विदेकाकी चरतीत्याह॥ असौ वा आदित्य एकाकी चरति॥ तेज एवावरुंधे॥ कउस्विज्जायते पुनरित्याह॥ चंद्रमा वै जायते पुनः॥ आयुरेवावरुंधे॥ किंस्विद्धिमस्य भेषजमित्याह॥ अग्निर्वै हिमस्य भेषजं॥ ब्रह्मवर्चसमेवावरुंधे॥ किंस्विदावपनं महदित्याह॥ ४ ॥ अयं वै लोक आवपनं महत्॥ अस्मिन्नेव लोके प्रतितिष्ठति॥ पृच्छामि त्वा परमंतं पृथिव्या इत्याह॥ वेदिर्वै परोंतः पृथिव्याः॥ वेदिमेवावरुंधे॥ पृच्छामि

ब्रा०त्र०९
१३२ इ
व

त्वाभुवनस्यनाभिमित्याह॥ यज्ञोवैभुवनस्यनाभिः॥ यज्ञमेवावरुंधे॥ ए
छामित्वावृष्णोअश्वस्यरेतइत्याह॥ सोमोवैवृष्णोअश्वस्यरेतः॥ सोमपीथ
मेवावरुंधे॥ एछामिवाचःपरमंव्योमेत्याह॥ ब्रह्मवैवाचःपरमंव्योम॥ ब्र
ह्मवर्चसमेवारुंधे॥ ५॥ होताभवतिवैवृष्टिः पूर्वंचित्तिरन्नाद्यमेवावरुंधेम
हदित्याह सोमोवैवृष्णोअश्वस्यरेतश्चत्वारिच॥ ५॥ अपवाएतस्मात्प्रा
णाःक्रामंति॥ योश्वमेधेनयजते॥ प्राणायस्वाहाव्यानायस्वाहेतिसंज्ञप्य
मानआहुतीर्जुहोति॥ प्राणानेवास्मिन्दधाति॥ नस्मात्प्राणाअपक्रामंति॥
अर्वतीस्थावंतीस्त्वावंतु॥ प्रियंत्वाप्रियाणां॥ वर्षिष्ठमाप्यानां॥ निधीनांत्वा
निधिपतिꣳहवामहेवसोममेत्याह॥ अपेवास्मैतन्हुवते॥ १॥ अथोधुवंत्ये

१३२
६

वैनं॥ अथोन्येवास्मैन्हुवते॥ त्रिः परियंति॥ त्रयइमेलोकाः॥ एभ्यएवैनंलो
केभ्योधुवते॥ त्रिःपुनःपरियंति॥ षट्संपद्यंते॥ षड्वाऋतवः॥ ऋतुभिरेवैनंधु
वते॥ अपवाएतेभ्यःप्राणाःक्रामंति॥ २॥ येयज्ञेधुवनंतन्वते॥ नवकृत्वःप
रियंति॥ नववैपुरुषेप्राणाः॥ प्राणानेवात्मन्दधते॥ नेभ्यःप्राणाअपक्रामं
ति॥ अंबेअंबाल्यंबिकइतिपत्नीमुदानयति॥ अह्वतेवैनां॥ सुभगेकांपी
लवासिनीत्याह॥ तपएवैनामुपनयति॥ सुवर्गेलोकेसंप्रोर्ण्वाथामित्या
ह॥ २॥ सुवर्गमेवैनांलोकंगमयति॥ आहमजानिगर्भधमात्वमजासि
गर्भधमित्याह॥ प्रजावैपशवोगर्भः॥ प्रजामेवपशूनात्मन्धत्ते॥ देवावाअ
श्वमेधेपवमाने॥ सुवर्गंलोकंनप्राजानन्॥ तमश्वःप्राजानात्॥ यत्स्वी

ब्रा० तृ० ९
१३३

भिरसि पथान्कल्पयंति ॥ सुवर्गस्य लोकस्य प्रज्ञात्यै ॥ गायत्री त्रिष्टुब्जगतीत्या
ह ॥ ४ ॥ यथायजुरेवैतत् ॥ त्रय्यः सूच्यो भवंति ॥ अयस्मय्यो रजता हरिण्यः ॥
अस्य वै लोकस्य रूपमयस्मय्यः ॥ अंतरिक्षस्य रजताः ॥ दिवो हरिण्यः ॥ दिशो
वा अयस्मय्यः ॥ अवांतरदिशा रजताः ॥ ऊर्ध्वा हरिण्यः ॥ दिश एवास्मै कल्पय
ति ॥ कस्त्वा छ्यति कस्त्वा विशास्तीत्याह ॥ अहिंसायै ॥ ५ ॥ न्कुवते क्रामंत्सु
पर्वाथामित्याह जगतीत्याह कल्पयत्येकं च ॥ ६ ॥ अप वा एतस्माछ्रीरा
ष्ट्रं क्रामति ॥ योऽश्वमेधेन यजते ॥ ऊर्ध्वामेनामुच्छ्रयतादित्याह ॥ श्रीर्वै राष्ट्र
मश्वमेधः ॥ श्रियमेवास्मै राष्ट्रमूर्ध्वमुच्छ्रयति ॥ वेणुभारं गिराविवेत्याह ॥
राष्ट्रं वै भारः ॥ राष्ट्रमेवास्मै पर्यूहति ॥ अथास्या मध्यमेधतामित्याह ॥ श्री

७

१३३

र्वै राष्ट्रस्य मध्यं ॥ १ ॥ श्रियमेवावरुंधे ॥ शीते वाते पुनन्निवेत्याह ॥ क्षे
मो वै राष्ट्रस्य शीतो वातः ॥ क्षेममेवावरुंधे ॥ यद्धरिणी यवमत्तीत्याह ॥ वि
ड्वै हरिणी ॥ राष्ट्रं यवः ॥ विशं चैवास्मै राष्ट्रं च समीचीं दधाति ॥ न पुष्टं पशु मन्य
त इत्याह ॥ तस्माद्राजा पशून्न पुष्यति ॥ २ ॥ शूद्रो यदर्यजारा न पोषाय धना
यतीत्याह ॥ तस्माद्वैशीपुत्रं नाभिषिंचंते ॥ इयं यका शकुंतिकेत्याह ॥ विड्वै
शकुंतिका ॥ राष्ट्रमश्वमेधः ॥ विशं चैवास्मै राष्ट्रं च समीचीं दधाति ॥ आहल
मिति सर्पतीत्याह ॥ तस्माद्राष्ट्राय विशः सर्पंति ॥ आहतं गभे पस इत्याह ॥
विड्वै गभः ॥ ३ ॥ राष्ट्रं पसः ॥ राष्ट्रमेव विश्याहंति ॥ तस्माद्राष्ट्रं विशं घातुकं ॥ मा
ता च ते पिता च त इत्याह ॥ इयं वै माता ॥ असौ पिता ॥ आभ्यामेवैनं परिददा

प

ब्रा०त०
१३४

ति ॥ अयं वृक्षस्यरो हत इत्याह ॥ श्रीर्वै वृक्षस्याग्रं ॥ श्रियमेवावरुंधे ॥ ४ ॥
प्रसुलामीति तेपिता गर्भे मुष्टिमतं सयदित्याह ॥ विड्वै गर्भः ॥ राष्ट्रं मुष्टिः ॥
राष्ट्रमेव विश्याहंति ॥ तस्माद्राष्ट्रं विशंघातुकं ॥ अप वा एते भ्यः प्राणाः
क्रामंति ॥ ये यज्ञे पूतं वदंति ॥ दधिक्राव्णो अकारिषमिति सुरभिमती
मृचं वदंति ॥ प्राणा वै सुरभयः ॥ प्राणानेवात्मन्दधते ॥ नैभ्यः प्राणा अप
क्रामंति ॥ आपो हि ष्ठा मयोभुव इत्यद्भिर्मार्जयंते ॥ आपो वै सर्वा देवताः ॥
देवताभिरेवात्मानं पवयंते ॥ ५ ॥ राष्ट्रस्य मध्यं पुष्यति गर्भो रुंधेदध
ते चत्वारि च ॥ ७ ॥ प्रजापतिः प्रजाः सृष्ट्वा प्रेणानुप्राविशत् ॥ ताभ्यः पुनः
संभवितुं नाशक्नोत् ॥ सोब्रवीत् ॥ ऋध्नवदित्सः ॥ यो मेतः पुनः संभरदिति ॥

८
१३४

तं देवा अश्वमेधेनैव समभरन् ॥ ततो वै त आर्ध्नुवन् ॥ योश्वमेधेन यजते ॥
प्रजापतिमेव संभरत्यृध्नोति ॥ पुरुषमालभते ॥ १ ॥ वैराजो वै पुरुषः ॥
विराजमेवालभते ॥ अथो अन्नं वै विराट् ॥ अन्नमेवावरुंधे ॥ अश्वमाल
भते ॥ प्राजापत्यो वा अश्वः ॥ प्रजापतिमेवालभते ॥ अथो श्रीर्वा एकश
फं ॥ श्रियमेवावरुंधे ॥ गामालभते ॥ २ ॥ यज्ञो वै गौः ॥ यज्ञमेवालभ
ते ॥ अथो अन्नं वै गौः ॥ अन्नमेवावरुंधे ॥ अजावी आलभते भूम्ने ॥
अथो पुष्टिर्वै भूमा ॥ पुष्टिमेवावरुंधे ॥ पर्यग्निकृतं पुरुषं चारण्यांश्चो
त्सृजंत्यहिंसायै ॥ उभौ वा एतौ पशू आलभ्येते ॥ यश्चावमो यश्च पर
मः ॥ तेस्योभये यज्ञे बद्धाः ॥ अभीष्टा अभिप्रीताः ॥ अभिजिता अभिहु

ब्रा० त०
१३५

ताभवंति ॥ नैनंदंदश्णवः पशवोयुज्ञेबद्धाः ॥ अभीष्टाअभिप्रीताः ॥ आभिजि
ताअभिकृताहिंसंति ॥ योश्वमेधेनयजते ॥ यउचैनमेवंवेद ॥ २ ॥ लभंते
गामालभंतेपुरमौष्टोच ॥ ८ ॥ प्रथमेनवा एषस्तोमेन राध्वा ॥ चतुष्टो
मेनकृतेनायानामुत्तरेहन् ॥ एकविंशेप्रतिष्ठायांप्रतितिष्ठति ॥ एकविं
शात्प्रतिष्ठायाऋतून्नन्वारोहति ॥ ऋतवोवैपृष्ठानि ॥ ऋतवः संवत्सरः ॥
ऋतुष्वेव संवत्सरेप्रतिष्ठाय ॥ देवताअभ्यारोहति ॥ शाकरयः पृष्ठंभवंत्य
न्यदन्यछंदः ॥ अन्येन्येवाएतेपशवआलभ्यंते ॥ १ ॥ उतेवग्राम्याः ॥ उते
वारण्याः ॥ अहरेवरूपेणसमर्द्धयति ॥ अथोअन्हएवैषबालिह्रियते ॥ १३५
तदाहुः ॥ अपशवोवाएते ॥ यदजावयश्चारण्याश्च ॥ एतेवैसर्वेपशवः ॥

१

यद्गव्या इति ॥ गव्यान्पशूनुत्तमेहन्नालभंते ॥ २ ॥ तेनैवोभयान्पशूनव
रुंधे ॥ प्राजापत्याभवंति ॥ अनभिजितस्याभिजित्यै ॥ सौरीर्नवश्वेतावशाअ
नूबंध्याभवंति ॥ अंततएवब्रह्मवर्चसमवरुंधे ॥ सोमायस्वराज्ञेनोवाहावन
ड्वाहावितिद्वंद्विनः पशूनालभंते ॥ अहोरात्राणामभिजित्यै ॥ पशुभिर्वा
एषव्यृध्यते ॥ योश्वमेधेनयजते ॥ छगलंकल्माषंकिकिदीविंविदीग
यूमितित्वाष्ट्रान्पशूनालभंते ॥ पशुभिरेवात्मानंसमर्धयति ॥ ऋतु
भिर्वाएषव्यृध्यते ॥ योश्वमेधेनयजते ॥ पिशंगास्त्रयोवासंताइत्यृतुप
शूनालभंते ॥ ऋतुभिरेवात्मानंसमर्धयति ॥ आवाएषपशुभ्योवृश्च्यते ॥
योश्वमेधेनयजते ॥ पर्यग्निकृतानुत्सृजंत्यनावस्काय ॥ ३ ॥ लभ्यंते

विं

ब्रा० तृ० ९ लभतेत्वाष्ट्रान्पशूनालभतेष्टौच ॥ ९ ॥ प्रजापतिरकामयत महानन्नादस्यामि १०
१३६ ति ॥ स एतावश्वमेधे महिमानावपश्यत् ॥ तावगृह्णीत ॥ ततो वै स महान
न्नादोभवत् ॥ यः कामयेत महानन्नादस्यामिति ॥ स एतावश्वमेधे महिमा
नौ गृह्णीत ॥ महानेवान्नादो भवति ॥ यजमानदेवत्या वै वपा ॥ राजा महिमा ॥
यद्वपां महिम्नोभयतः परियजति ॥ यजमानमेव राज्येनोभयतः परिगृह्णा
ति ॥ पुरस्तात्स्वाहाकारा वा अन्ये देवाः ॥ उपरिष्टात्स्वाहाकारा अन्ये ॥ ते
वा एतेश्व एव मेध्य उभये वरुध्यंते ॥ यद्वपां महिम्नोभयतः परियजति ॥
तानेवोभयान्प्रीणाति ॥ १ ॥ परियजति षट् च ॥ १० ॥ वैश्वदेवो वा अश्वः ॥ १३६
तं यत्प्राजापत्यं कुर्यात् ॥ या देवता अपिभागाः ॥ ताभागधेयेन व्यर्धयेत् ॥

देवताभ्यः समदं दध्यात् ॥ स्तेगान्दंष्ट्राभ्यां मण्डूकाञ्जम्भ्येभिरिति ॥ आज्यमवदा
नैकृत्वा प्रति संख्याय माहुतीर्जुहोति ॥ या एव देवता अपिभागाः ॥ ताभागधेये
न समर्धयति ॥ न देवताभ्यः समदं दधाति ॥ १ ॥ चतुर्दशैतानुवाकाञ्जुहो
त्यनंतरित्यै ॥ प्रयासाय स्वाहेति पंचदशं ॥ पंचदश वा अर्धमासस्य रात्रयः ॥
अर्धमासशः संवत्सर आप्यते ॥ देवासुराः संयत्ता आसन् ॥ ते ब्रुवन्नग्न
यः स्विष्टकृतः ॥ अश्वस्य मेध्यस्य वयमुद्धारमुद्धरामहै ॥ अथैतानभि
भवामेति ॥ ते लोहितमुदहरंत ॥ ततो देवा अभवन् ॥ २ ॥ परासुराः ॥ यत्स्वि
ष्टकृद्भ्यो लोहितं जुहोति भ्रातृव्याभिभूत्यै ॥ भवत्यात्मना ॥ परास्य
भ्रातृव्यो भवति ॥ गोमृगकंठेन प्रथमामाहुतिं जुहोति ॥ पशवो वै गोमृगः ॥ मा

ब्रा०तृ०९
१३७

रुद्रोग्निः स्विष्टकृत्॥ रुद्राद्देवपशूनंतर्दधाति॥ अथोयत्रैषाहुतिर्हूयते॥ न
तत्ररुद्रः पशूनभिमन्यते॥ २॥ अश्वशफेनद्वितीयामाहुतिंजुहोति॥ पशवो
वाएकशफं॥ रुद्रोग्निः स्विष्टकृत्॥ रुद्राद्देवपशूनंतर्दधाति॥ अथोयत्रैषा
हुतिर्हूयते॥ नतत्ररुद्रः पशूनभिमन्यते॥ अयस्मयेनकमंडलुनातृतीयां॥
आहुतिंजुहोत्यायास्यौवैप्रजाः॥ रुद्रोग्निः स्विष्टकृत्॥ रुद्राद्देवप्रजा त अं
र्दधाति॥ अथोयत्रैषाहुतिर्हूयते॥ नतत्ररुद्रः प्रजा भिमन्यते॥ ३॥ दधा अ
त्यभवन्मन्यते प्रजाअंतर्दधातिद्वेच॥ ११॥ अश्वस्य वाआलब्धस्यमे
धउदक्रामत्॥ तदश्वस्तोमीयमभवत्॥ यदश्वस्तोमीयंजुहोति॥ समेध
मेवेनमालभते॥ आज्येनजुहोति॥ मेधोवाआज्यं॥ मेधोश्वस्तोमीयं॥

११

१३७

मेधेनैवास्मिन्मेधंदधाति॥ षट्त्रिंशतंजुहोति॥ षट्त्रिंशदक्षराबृहती॥ १॥
बार्हताःपशवः॥ सापशूनांमात्रा॥ पशूनेवमात्रयासमर्धयति॥ तायद्भूयसीर्वाक
नीयसीर्वाजुहुयात्॥ पशून्मात्रयाव्यर्धयेत्॥ षट्त्रिंशतंजुहोति॥ षट्त्रिंश
दक्षराबृहती॥ बार्हताःपशवः॥ सापशूनांमात्रा॥ पशूनेवमात्रयासमर्धय
ति॥ २॥ अश्वस्तोमीयंहुत्वाद्विपदांजुहोति॥ द्विपाद्वैपुरुषोद्विप्रतिष्ठः॥
तदेनंप्रतिष्ठयासमर्धयति॥ तदाहुः॥ अश्वस्तोमीयंपूर्वंहोतव्यां ३ द्विपदा ३
इति॥ अश्वोवाअश्वस्तोमीयं॥ पुरुषोद्विपदाः॥ अश्वस्तोमीयंहुत्वाद्वि
पदाजुहोति॥ तस्माद्द्विपाच्चतुष्पादमत्ति॥ अथोद्विपद्येवचतुष्पदःप्रति
ष्ठापयति॥ द्विपदांहुत्वा॥ नान्यामुत्तरामाहुतिंजुहुयात्॥ यदन्यामुत्तरा

ब्रा०तृ०२
१३८

मा ऽर्तिं जुहुयात् ॥ प्रमतिष्ठायाऽश्वं चेत ॥ द्विपदा अंततो जुहोति प्रतिष्ठित्यै ॥ १२
॥ २ ॥ हूहृत्य र्धयति स्थापयति पंच च ॥ १२ ॥ प्रजापतिरश्वमेधमसृजत ॥
सोऽस्मात्सृष्टोऽपाक्रामत् ॥ तं यज्ञक्रतुभिरन्वैच्छत् ॥ तं यज्ञक्रतुभिर्नान्वविं
दत् ॥ तमिष्टिभिरन्वैच्छत ॥ तमिष्टिभिरन्वविंदत ॥ तदिष्टीनामिष्टित्वं ॥ यत्सं
वरं त्सेमिष्टिभिर्यजते ॥ अश्वमेव तदन्विच्छति ॥ सावित्रियो भवंति ॥ १ ॥
इयं वै सविता ॥ यो वा अस्यां नश्यति यो निलयते ॥ अस्यां वाव तं विंदंति ॥
न वा इमां कश्चनेत्याहुः ॥ तिर्यङ्नोर्ध्वोत्येवमर्हतीति ॥ यत्सावित्रियो
भवंति ॥ सवितृप्रसूत एवैनमिच्छति ॥ ईश्वरो वा अश्वः प्रमुक्तः परांपरावतं गंतोः ॥ यत्सायं धृतीर्जुहोति ॥ अश्वस्य यत्यै धृत्यै ॥ २ ॥ यत्प्रातरिष्टि १३८

भिर्यजते ॥ अश्वमेव तदन्विच्छति ॥ यत्सायं धृतीर्जुहोति ॥ अश्वस्यैव य
त्यै धृत्यै ॥ तस्मात्सायं प्रजाः क्षेम्या भवंति ॥ यत्प्रातरिष्टिभिर्यजते ॥ अ
श्वमेव तदन्विच्छति ॥ तस्माद्दिवा नष्टैष एति ॥ यत्प्रातरिष्टिभिर्यजते सायं
धृतीर्जुहोति ॥ अहोरात्राभ्यामेवैनमन्विच्छति ॥ अथो अहोरात्राभ्यामे
वास्मै योगक्षेमं कल्पयति ॥ २ ॥ भवंति धृत्या एनमन्विच्छत्यै के च ॥ १३ ॥
अप वा एतस्माच्छ्री राष्ट्रं क्रामति ॥ योऽश्वमेधेन यजते ॥ ब्राह्मणो वीणागा
थिनौ गायतः ॥ श्रिया वा एतद्रूपं ॥ यद्वीणा ॥ श्रियमेवास्मिन्तद्धतः ॥
यदा खलु वै पुरुषः श्रियमश्नुते ॥ वीणास्मै वाद्यते ॥ तदाहुः ॥ यदुभौ ब्रा
ह्मणौ गायेतां ॥ १ ॥ प्रभ्रंश्युकास्माच्छ्रीः स्यात् ॥ न वै ब्राह्मणे श्रीर

ब्रा० त० ९ मन्तइति॥ ब्राह्मणोन्यो गायेत्॥ राजन्योन्यः॥ ब्रह्म वै ब्राह्मणः॥ क्षत्रꣳ राज १३
१२९ न्यः॥ तथा हास्य ब्रह्मणा च क्षत्रेण चो भयतः श्रीः परिगृहीता भवति॥ तदा
हुः॥ यदुभौ दिवा गायेतां॥ अपास्माद्राष्ट्रं क्रामेत्॥ २ ॥ नैवै ब्राह्मणे राष्ट्रꣳ
रमत इति॥ यदा खलु वै राजा कामयते॥ अथ ब्राह्मणं जिनाति॥ दिवा ब्रा
ह्मणो गायेत्॥ नक्तꣳ राजन्यः॥ ब्रह्मणो वै रूपमहः॥ क्षत्रस्य रात्रिः॥
तथा हास्य ब्रह्मणा च क्षत्रेण चो भयतो राष्ट्रं परिगृहीतं भवति॥ इत्यददा
इत्ययजथा इत्यपच इति ब्राह्मणो गायेत्॥ इष्टापूर्तं वै ब्राह्मणस्य॥ ३ ॥ इष्टा १२९
स पूर्तेनैवैनꣳ समर्धयति॥ इत्यजिना इत्ययुध्यथा इत्यमुꣳ संग्राममह
न्निति राजन्यः॥ युद्धं वै राजन्यस्य॥ युद्धेनैवैनꣳ समर्धयति॥ अक्लृ स

वा प्तो एतस्यर्तवइत्याहुः॥ योश्वमेधेन यजत इति॥ तिस्रोन्यो गायति ति
स्रोन्यः॥ षट् संपद्यन्ते॥ षड्वा ऋतवः॥ ऋतूनेवास्मै कल्पयतः॥ ताभ्याꣳ
सꣳस्थायां॥ अनोयुक्ते च शते च ददाति॥ शतायुः पुरुषः शतेन्द्रियः॥ आयु
ष्येवेन्द्रिये प्रतितिष्ठति॥ ४ ॥ गायेतां कामे ब्राह्मणस्य कल्पयतश्चत्वा
रि च॥ १४ ॥ सर्वेषु वा एषु लोकेषु मृत्यवोन्वायत्ताः॥ तेभ्यो यदाहुतीर्नजु
हुयात्॥ लोके लोक एनं मृत्युर्विन्देत्॥ मृत्यवे स्वाहा मृत्यवे स्वाहेत्यभि
पूर्वमाहुतीर्जुहोति॥ लोकाल्लोकादेव मृत्युमवयजते॥ नैनं लोके लोके
मृत्युर्विन्दति॥ यदमुष्मै स्वाहामुष्मै स्वाहेति जुहुयात्संचक्षीत॥ बहुं मृ
त्युममित्रं कुर्वीत॥ मृत्यवे स्वाहेत्येकस्मा एवैकां जुहुयात्॥ एको

ब्रा०त०२
७५०

वाअमुष्मिंल्लोके मृत्युः॥ १ ॥अशनया मृत्युरेव॥ तमेवामुष्मिंल्लोके
वयजते॥ भ्रूणहत्यायै स्वाहेत्यवभृथआहुतिं जुहोति॥ भ्रूणहत्यामेवा
वयजते॥ तदाहुः॥ यद्भ्रूणहत्यापात्र्याथ॥ कस्माद्यज्ञेपिक्रियतइति॥ अ
मृत्युर्वाअन्योभ्रूणहत्यायाइत्याहुः॥ भ्रूणहत्यावावमृत्युरिति॥ यद्भ्रू
णहत्यायैस्वाहेत्यवभृथआहुतिं जुहोति॥ २ ॥ मृत्युमेवाहुत्या तर्पयि
त्वापरिपाणं कृत्वा॥ भ्रूणघ्ने भेषजंकरोति॥ एतांऽह वैमुंडिभऔद
न्यवः॥ भ्रूणहत्यायैप्रायश्चित्तिं विदांचकार॥ योहास्यापिप्रजा
यांब्राह्मणंऽहंति॥ सर्वस्मैतस्मैभेषजंकरोति॥ जुंबकायस्वाहेत्यव
भृथउत्तमामाहुतिंजुहोति॥ वरुणोवैजुंबकः॥ अंततएववरुणमव

१४
त
१४०

यजते॥ खलतेर्विक्लिधस्य शुक्लस्य पिंगाक्षस्य मूर्धन्जुहोति॥ एतद्वैवरुणस्य
रूपं॥ रूपेणैववरुणमवयजते॥ ३ ॥ लोके मृत्युर्जुहोति मूर्धन्जुहोतिद्वेच॥ १२॥
वारुणोवाअश्वः॥ तंदेवतयाव्यर्धयति॥ यत्प्राजापत्यं करोति॥ नमोराज्ञेन
मोवरुणायेत्याह॥ वारुणोवाअश्वः॥ स्वयैवैनंदेवतयासमर्धयति॥ नमो
श्वायनमः प्रजापतयइत्याह॥ प्राजापत्योवाअश्वः॥ स्वयैवैनंदेवतयास
मर्धयति॥ नमोधिपतयइत्याह॥ १ ॥ धर्मोवाअधिपतिः॥ धर्ममेवावरुं
धे॥ अधिपतिरस्यधिपतिं माकुर्वधिपतिरहंप्रजानां भूयासमित्या
ह॥ अधिपतिमेवैनंऽसमानानांकरोति॥ मांधेहिमयिधेहीत्याह॥
आशिषमेवैतामाशास्ते॥ उपाकृताय स्वाहेत्युपाकृते जुहोति॥ आ

आलब्धायुस्वाहेति नियुक्ते जुहोति ॥ कृतायस्वाहेति कृते जुहोति ॥ एषां लो
कानामभिजित्यै ॥ २ ॥ प्रवा एष एभ्यो लोकेभ्यश्च्यवते ॥ योऽश्वमेधेन यजते ॥ लो
आग्नेयमैंद्राग्नमाश्विनं ॥ तान्पशूनालभते प्रतिष्ठित्यै ॥ यदाग्नेयो भ
वति ॥ अग्निः सर्वा देवताः ॥ देवता एवावरुंधे ॥ ब्रह्म वा अग्निः ॥ क्षत्रमिं
द्रः ॥ यदैंद्राग्नो भवति ॥ ३ ॥ ब्रह्मक्षत्रे एवावरुंधे ॥ यदाश्विनो भव
ति ॥ आशिषामवरुध्यै ॥ त्रयो भवंति ॥ त्रय इमे लोकाः ॥ एष्वेव लोके
षु प्रतितिष्ठति ॥ अग्नये ंहोमुचेष्टाकपाल इति दशा हवींषि भिषजिनि
र्वपति ॥ दशाक्षरा विराट् ॥ अन्नं विराट् ॥ विराजैवान्नाद्यमवरुंधे ॥
अग्ने मन्वे प्रथमस्य प्रचेतस इति याज्यानुवाक्या भवंति सर्वत्वाय ॥ ४ ॥

अधिपतय इत्याहाभिजित्यां ऐंद्राग्नो भवति रुंधएकं च ॥ १६ ॥ यद्यश्व
मुपतपद्विंदेत् ॥ आग्नेयमष्टाकपालं निर्वपेत् ॥ सौम्यं चरुं ॥ सावित्रम
ष्टाकपालं ॥ यदाग्नेयो भवति ॥ अग्निः सर्वा देवताः ॥ देवताभिरेवैनं
भिषज्यति ॥ यत्सौम्यो भवति ॥ सोमो वा ओषधीनां राजा ॥ याभ्य एवै
नं विंदति ॥ १ ॥ ताभिरेवैनं भिषज्यति ॥ यत्सावित्रो भवति ॥ सवित्रप्रसू
त एवैनं भिषज्यति ॥ एताभिरेवैनं देवताभिर्भिषज्यति ॥ अगदो हैव भ
वति ॥ पौष्णं चरुं निर्वपेत् ॥ यदि श्लोणः स्यात् ॥ पूषा वै श्लोणस्य भि
षक् ॥ स एवैनं भिषज्यति ॥ अश्लोणो हैव भवति ॥ २ ॥ रौद्रं चरुं निर्व
पेत् ॥ यदि महती देवताभिमन्येत ॥ एतद्देवत्यो वा अश्वः ॥ [illegible]

ब्रा०तृ०१ १५२ १६

स्वयैवेनं देवतया भिषज्यति॥ अगदो हैव भवति॥ वैश्वानरं द्वादशकपालं
निर्वपेन्मृगाखरे यदि नागछेत्॥ इयं वा अग्निर्वैश्वानरः॥ इयमेवैनम
भिण्यां परिरोधमानयति॥ आहैव सुत्यमहर्गछति॥ यद्यधीयात्॥ २॥ अ
ग्नयेंऽहोमुचेष्टाकपालः॥ सौर्यं पयः॥ वायव्य आज्यभागः॥ यजमानो
वा अश्वः॥ अंहसा वा एष गृहीतः॥ यस्याश्वो मेधाय प्रोक्षितो ध्येति॥
यदंहोमुचे निर्वपति॥ अंहस एवैतेन मुच्यते॥ यजमानो वा अश्वः॥ रेत
सा वा एष व्यृध्यते॥ ३॥ यस्याश्वो मेधाय प्रोक्षितो ध्येति॥ सौर्यं रेतः॥
स यत्सौर्यं पयो भवति॥ रेतसैवैनं समर्धयति॥ यजमानो वा अश्वः॥ गर्भै १४२
र्वा एष व्यृध्यते॥ यस्याश्वो मेधाय प्रोक्षितो ध्येति॥ वायव्या गर्भाः॥ य

द्वायव्य आज्यभागो भवति॥ गर्भैरेवैनं समर्धयति॥ अथो यस्यैषाश्वमेधे सरु
प्रायश्चित्तिः क्रियते॥ इष्ट्वा वसीयान्भवति॥ ४॥ विंदत्यश्लोणो हैव भव
त्यधीयाद्ध्यते गर्भैरेवैनं समर्धयति द्वच॥ १७॥ नदाकुः॥ द्वादश ब्रह्मौ
श दनान्त्संस्थिते निर्वपेत्॥ द्वादशभिर्वेष्टिभिर्यजेतेति॥ यदिष्टिभिर्यजेत॥ उ भि
पनामुक एनं यज्ञः स्यात्॥ पापीयांस्तु स्यात्॥ आप्तानि वा एतस्य छंदां
सि॥ य ईजानः॥ तानि क एतावदाश्रु पुनः प्रयुंजीतेति॥ सर्वा वै संस्थिते
यज्ञे वागाप्यते॥ १॥ साप्ता भवति यातयाम्नी॥ क्रूरीकृतेव हि भवत्यरु
ष्कृता॥ सा न पुनः प्रयुज्येत्याकुः॥ द्वादशैव ब्रह्मौदनान्त्संस्थिते निर्वपेत्॥
प्रजापतिर्वा ओदनः॥ यज्ञः प्रजापतिः॥ उपनामुक एनं यज्ञो भवति॥ न पा

पीयान्भवति॥ द्वादशभवंति॥ द्वादशमासाःसंवत्सरः॥ संवत्सरएवप्र
तितिष्ठति॥ २ ॥आप्यतेसंवत्सरएकंच॥ १८ ॥ एषवैभूर्नामयज्ञः॥ स
र्वं ह वैतत्र विभुर्भवति॥ यत्रैतेनयज्ञेनयजंते॥ एषवैप्रभूर्नामयज्ञः॥
सर्वं ह वैतत्रप्रभुर्भवति॥ यत्रैतेनयज्ञेनयजंते॥ एषऊर्जस्वान्नामय
ज्ञः॥ सर्वं ह वैतत्रोर्जस्वद्भवति॥ यत्रैनयज्ञेनयजंते॥ एषवैपयस्वान्ना
मयज्ञः॥ १॥ सर्वं ह वैतत्रपयस्वद्भवति॥ यत्रैतेनयज्ञेनयजंते॥ एष
वैविधृतोनामयज्ञः॥ सर्वं ह वैतत्र विधृतंभवति॥ यत्रैतेनयज्ञेनय
जंते॥ एषवैव्यावृत्तोनामयज्ञः॥ सर्वं ह वैत्र व्यावृत्तंभवति॥ यत्रैतेन
यज्ञेनयजंते॥ एषवैप्रतिष्ठितोनामयज्ञः॥ सर्वं ह वैतत्रप्रतिष्ठितंभ

वति॥ २ ॥ यत्रैतेनयज्ञेनयजंते॥ एषवैतेजस्वीनामयज्ञः॥ सर्वं ह वैत्रतेजस्वि
भवति॥ यत्रैतेनयज्ञेनयजंते॥ एषवैब्रह्मवर्चसीनामयज्ञः॥ आ ह वैतत्र ब्राह्म
णो ब्रह्मवर्चसी जायते॥ यत्रैतेनयज्ञेनयजंते॥ एषवाअतिव्याधीनामयज्ञः॥
आ ह वैतत्र राजन्योऽतिव्याधीजायते॥ यत्रैतेनयज्ञेनयजंते॥ एषवैदीर्घोना
मयज्ञः॥ दीर्घायुषो ह वैतत्र मनुष्याभवंति॥ यत्रैतेनयज्ञेनयजंते॥ एषवै
क्लृप्तोनामयज्ञः॥ कल्पते ह वैतत्र प्रजाभ्योयोगक्षेमः॥ यत्रैतेनयज्ञेनय
जंते॥ २ ॥ पयस्वान्नामयज्ञःप्रतिष्ठितंभवतियत्रैतेनयज्ञेनयजंतेषट्
च॥ १९ ॥ एषवैविभूःप्रभूरुर्जस्वान्पयस्वान्विधृतोव्यावृत्तःप्रतिष्ठि
तस्तेजस्वीब्रह्मवर्चस्यतिव्याधीदीर्घः क्लृप्तोद्वादश॥ ॥ तार्क्ष्येणाश्वं

ब्रा०त०९
१४४

संज्ञपयंति॥ यज्ञो वै तार्प्यं॥ यज्ञेनैवैनꣳ समर्धयंति॥ यामेन साम्ना प्रस्तोतानू पतिष्ठते॥ यमलोकमेवैनं गमयति॥ तार्प्ये च कृत्यधीवासे चाश्वꣳ संज्ञपयंति॥ एतद्वै पशूनाꣳ रूपं॥ रूपेणैव पशूनवरुंधे॥ हिरण्यकशिपु भवति॥ तेजसोऽवरुध्यै॥ १॥ रुक्मो भवति॥ सुवर्गस्य लोकस्यानुख्यात्यै॥ अश्वो भवति॥ प्रजापतेराप्त्यै॥ अस्य वै लोकस्य रूपं तार्प्यं॥ अंतरिक्षस्य कृत्यधीवासः॥ दिवो हिरण्यकशिपु॥ आदित्यस्य रुक्मः॥ प्रजापतेरश्वः॥ इममेव लोकं तार्प्येणाप्नोति॥ २॥ अंतरिक्षं कृत्यधीवासेन॥ दिवꣳ हिरण्यकशिपुना॥ आदित्यꣳ रुक्मेण॥ अश्वेनैव मेध्येन प्रजापतेः सायुज्यꣳ सलोकतामाप्नोति॥ एतासामेव देवतानाꣳ सायुज्यं॥ सार्ष्टिताꣳ समानलोकतामाप्नोति॥ योऽश्व

१८
१४४

मेधेन यजते॥ य उ चैनमेवं वेद॥ ३॥ अवरुध्या आप्नोत्येष्टो च॥ २०॥ आदित्याश्चांगिरसश्च सुवर्गे लोके स्पर्धंत॥ तेंगिरस आदित्येभ्यः॥ अमुमादित्यमश्वꣳ श्वेतं भूतं दक्षिणामनयन्॥ तेऽब्रुवन्॥ यन्नोनेष्ट॥ स वर्यो भूदिति॥ तस्मादश्वꣳ सवर्येत्याह्वयंति॥ तस्माद्यज्ञे वरो दीयते॥ यत्प्रजापतिरालब्धोऽश्वोऽभवत्॥ तस्मादश्वो नाम॥ १॥ यछ्वयदरुरासीत्॥ तस्मादर्वा नाम॥ यत्सद्यो वाजान्त्समजयत्॥ तस्माद्वाजी नाम॥ यदसुराणां लोकानादत्त॥ तस्मादादित्यो नाम॥ अग्निर्वा अश्वमेधस्य योनिरायतनं॥ सूर्योऽग्नेर्योनिरायतनं॥ यदश्वमेधेऽग्नौ चित्य उत्तरवेदिमुपवपति॥ योनिमंतमेवैनमायतनवंतं करोति॥ २॥ योनिमानायतनवान्भ

वति॥ य एवं वेद॥ प्राणापानौ वा एतौ देवानां॥ यदर्काश्वमेधौ॥ प्राणापाना
वेवावरुंधे॥ ओजो बलं वा एतौ देवानां॥ यदर्काश्वमेधौ॥ ओजो बलमेवाव
रुंधे॥ अग्निर्वा अश्वमेधस्य योनिरायतनं॥ सूर्योग्नेर्योनिरायतनं॥ य
दश्वमेधेग्निं चित्वा उत्तरवेदिं चिनोति॥ तावर्काश्वमेधौ॥ अर्काश्वमेधा
वेवावरुंधे॥ अथो अर्काश्वमेधयोरेव प्रतितिष्ठति॥ २॥ नाम करोति
सूर्याग्नेर्योनिरायतनं च ता रिच॥ २१॥ प्रजापतिं वै देवाः पितरं॥ पशुं
भूतं मेधायालभंत॥ तमालभ्योपावसन्॥ प्रातर्यष्टास्म इति॥ एकं

वा एतद्देवानामहः॥ यत्संवत्सरः॥ तस्मादश्वः पुरस्तात्संवत्सर आ
लभ्यते॥ यत्प्रजापतिरालब्धोऽश्वोऽभवत्॥ तस्मादश्वः॥ यत्सद्योमे

धोऽभवत्॥ १॥ तस्मादश्वमेधः॥ वेदुकोऽश्वमाशुं भवति॥ य एवं वेद॥ यद्वै
तत्प्रजापतिरालब्धोऽभवत्॥ तस्मादश्वः प्रजापतेः पशूनामनुरूपतमः॥ आ
स्य पुत्रः प्रतिरूपो जायते॥ य एवं वेद॥ सर्वाणि भूतानि संभृत्यालभते॥
सर्वेनं देवास्तेजसे ब्रह्मवर्चसाय भरंति॥ योऽश्वमेधेन यजते॥ २॥ य उ
चैनमेवं वेद॥ एतद्वै तद्देवा एतां देवतां॥ पशुं भूतं मेधायालभंत॥ यज्ञमे
व॥ यज्ञेन यज्ञमयजंत देवाः॥ कामप्रं यज्ञमकुर्वत॥ तेऽमृतत्वमकाम
यंत॥ तेऽमृतत्वमगच्छन्॥ योऽश्वमेधेन यजते॥ देवानामेवायनेनैति॥
॥ ३॥ प्राजापत्येनैव यज्ञेन यजते कामप्रेण॥ अपुनर्मारमेव गच्छति॥
एतस्यैव रूपेण पुरस्तात्प्राजापत्यमृषभं तूपरं बहुरूपमालभते॥ स

ब्रा० त०२
१४६

यैभ्यः कामेभ्यः॥ सर्वस्याप्त्यै॥ सर्वस्य जित्यै॥ सर्वमेव तेनाप्नोति॥ सर्वं जयति॥ योश्वमेधेन यजते॥ य उ चैनमेवं वेद॥ ४ ॥ मिधो भवद्यजंत एति वेद॥ २२॥ ॥ यो वा अश्वस्य मेध्यस्य लोमनी वेद॥ अश्वस्यैव मेध्यस्य लोमंल्लोमं जुहोति॥ अहोरात्रे वा अश्वस्य मेध्यस्य लोमनी॥ यत्सायं प्रातर्जुहोति॥ अश्वस्यैव मेध्यस्य लोमंल्लोमं जुहोति॥ एतद्ध नुद्भूति ह स्म वै पुरा॥ अश्वस्य मेध्यस्य लोमंल्लोमं जुहूति॥ यो वा अश्वस्य पदे वेद॥ अश्वस्यैव मेध्यस्य पदेपदे जुहोति॥ दर्शपूर्णमासौ वा अश्वस्य मेध्यस्य पदे॥ १॥ यद्दर्शपूर्णमासौ यजते॥ अश्वस्यैव मेध्यस्य पदेपदे जुहोति॥ एतद्ध नुद्भूति ह स्म

मेध्यस्य

२०

१४६

यदग्निहोत्रं जुहोति॥ त्रं

वै पुरा॥ अश्वस्य मेध्यस्य पदेपदे जुह्वति॥ यो वा अश्वस्य मेध्यस्य विवर्तनं वेद॥ अश्वस्यैव मेध्यस्य विवर्तने विवर्तने जुहोति॥ असौ वा आदित्योश्वः॥ स आहवनीयमागच्छति॥ तद्विवर्तनं॥ अश्वस्यैव मेध्यस्य विवर्तने विवर्तने जुहोति॥ एतद्ध नुद्भूति ह स्म वै पुरा॥ अश्वस्य मेध्यस्य विवर्तने विवर्तने जुह्वति॥ ॥ २॥ पदे अग्निहोत्रं जुहोति त्रीणि च॥ २२॥ ॥ प्रजापतिस्त्रयोदशिभिः प्रजापतिरकामयत प्रभावयेमेति युंजतितेज

श्रा०त०
१४७

सापप्राणाअपश्यन्नीरूर्ध्वांप्रजापतिःप्रेणानुप्रथमेनप्रजापतिरका
मयतमहान्वैश्वदेवोवाअश्वस्यप्रजापतिस्तंयज्ञक्रतुभिरपश्री
र्ब्रह्मणोसर्वेषुवारुणायधश्वंतदाङ्करेषवेविभूस्तार्प्येणादित्याः
प्रजापतिंपितरंयोवाअश्वस्यमेध्यस्यलोमनीत्रयोविंशश
तिः॥ २३ ॥ ॥प्रजापतिरस्मिन्लोकेबहवउत्तरतःश्रिय
मेवावप्रजापतिरकामयतमहान्यस्यातरिष्टिभिःप्रवाएषभ्यो
लोकेभ्यःसर्वंहवेतत्रपयस्खधउनैनमेवंवेदचत्वार्यशीतिः॥ २४ ॥

२१
१४७

हरिःओम्॥ ॥संज्ञानंविज्ञानंप्रज्ञानंजानदभिजानत्॥संकल्पमानंप्र
कल्पमानमुपकल्पमानमुपक्लृप्तंक्लृप्तं॥श्रेयोवसीयआयत्संभूतंभूतं॥
चित्रःकेतुःप्रभानाभान्त्संभान्॥ज्योतिष्मांस्तेजस्वानातपंस्तपन्नभि
तपन्॥रोचनोरोमानेनःशोभनःशोभमानःकल्याणः॥दर्शादृष्टादर्श
ताविश्वरूपासुदर्शना॥आप्यायमानाप्यायमानाप्यायासूनृतेरा॥
आपूर्यमाणापूर्यमाणापूरयंतीपूर्णापौर्णमासी॥दाताप्रदातानंदोमो
दःप्रमोदः॥ १ ॥आवेशयन्निवेशयन्त्संवेशनःसंशांतःशांतः॥आ
भवन्प्रभवन्त्संभवन्त्संभूतोभूतः॥प्रस्तुतंविष्टुतंसंस्तुतंकल्याणंवि
श्वरूपं॥ शुक्रममृतंतेजस्वितेजःसमिद्धं॥अरुणंभानुमन्मरीचिम

दभितपत्तपस्वन् ॥ सविताप्रसविता दीप्तो दीपयन्दीप्यमानः ॥ ज्वलंज्वलिता त
पन्नितपन्त्संतपन् ॥ रोचनो रोचमानश्शुंभूः शुंभमानो वामः ॥ सुताः सुन्वती प्रसु
तासूयमाना भिषूयमाणा ॥ पीती प्रपा संपा तृप्तिस्तर्पयंती ॥ २ ॥ कांताकां
म्या कामजाताऽयुष्मती काम दुघा ॥ अभिशास्तानुमंता नंदो मोदः प्रमोदः ॥ आ

य
शो
लो

सादयन्निषादन्त्संसादनः सं सन्नः सन्नः ॥ आभूर्विभूः प्रभूः शंभूर्भुवः ॥
पवित्रं पवयिष्यन्पूतो मेध्यः ॥ यशो यशस्वानायुरमृतः ॥ जीवो जीविष्यन्त्स्व
र्गोकः ॥ सहस्वान्त्सहीयानोजस्वान्त्सहमानः ॥ जयन्नभिजयन्त्सुद्रविणो

द्रविणोदाः ॥ आर्द्रपवित्रो हरिकेशो मोदः प्रमोदः ॥ ३ ॥ अरुणोरुणर
जाः पुंडरीको विश्वजिदभिजित् ॥ आर्द्रः पिन्वमानोन्नवानन्नसवा निरा

वान् ॥ सर्वौषधः संभरो महस्वान् ॥ एजत्का जोवत्काः ॥ क्षुल्लकाः शिपिविष्टकाः ॥ सरिस्र
राः सुशेरवः ॥ अजिरासो गमिष्णवः ॥ इदानींतदानीमेतर्हि क्षिप्रमजिरं ॥ आशुर्निमे
षः फणाद्रवन्नतिद्रवन् ॥ त्वरंस्त्वरमाण आशुराशीयान्जवः ॥ अग्निष्टोम उक्थ्योति
रात्रो द्विरात्रस्त्रिरात्रश्चतूरात्रः ॥ अग्निर्ऋतुः सूर्य ऋतुश्चंद्रमा ऋतुः ॥ प्रजापतिः
संवत्सरो महान्कः ॥ ४ ॥ प्रमोदस्तर्पयंती प्रमोदो जवस्त्रीणि च ॥ १ ॥ भूरग्निं
च पृथिवीं च मां च ॥ त्रींश्च लोकान्त्संवत्सरं च ॥ प्रजापतिस्त्वा सादयतु ॥ तया
देवतयांगिरस्वद्ध्रुवा सीद ॥ भुवो वायुं चांतरिक्षं च मां च ॥ त्रींश्च लोकान्त्संव
त्सरं च ॥ प्रजापतिस्त्वा सादयतु ॥ तया देवतयांगिरस्वद्ध्रुवा सीद ॥ स्वरादित्यं
च दिवं च मां च ॥ त्रींश्च लोकान्त्संवत्सरं च ॥ प्रजापतिस्त्वा सादयतु ॥ तया दे

श्रा० त० १०

१४९

वतयां गिरस्वद्ध्रुवासीद॥ भूर्भुवस्वः श्चंद्रमसंच दिशश्च मांच॥ त्रीं॑श्च लोका
न्त्संवत्सरं च॥ प्रजापतिस्त्वा सादयतु॥ तया देवतयां गिरस्वद्ध्रुवासीद॥
॥१॥ संवत्सरंच षट् च॥ २ ॥त्वमेव त्वांवेत्थयोसि सोसि॥ त्वमेव त्वाम
चेषीः॥ चितश्चासि संचितश्चास्य ग्ने॥ एतावा॑श्चासि भूया॑श्चास्य
ग्ने॥ यत्तेअ ग्नेन्यूनं यदुतेतिरिक्तं॥ आदित्यास्तदं गिरसश्चिन्वंतु॥ वि
श्वेते देवाश्चितिमापूरयंतु॥ चितश्चासि संचितश्चास्य ग्ने॥ एतावा॑श्चा
सि भूया॑श्चास्य ग्ने॥ मातेअ ग्ने चयेन मातिचये नायुराद्वृक्षि ॥ १॥ स
वैंषांज्योतिर्ज्योतिर्यद दावुदेति॥ तपसो जातमनिभृष्टमोजः॥ तत्तेज्या
तिरिष्टके॥ तेन मे तप॥ तेन मे ज्वल॥ तेन मे दीदिहि॥ याव द्देवाः॥ यावद

पं

२

१४९

सातिसूर्यः॥ यावदुतापिब्रह्म॥ २ ॥आद्रक्षिनवच॥ २ ॥ संवत्सरोसिपरिवत्सरो
सि॥ इदावत्सरोसीदुवत्सरोसि॥ इद्वत्सरोसिवत्सरोसि॥ तस्यंते वसंतः शिरः॥ ग्रीष्मो
दक्षिणः पक्षः॥ वर्षाः पुछं॥ शरदुत्तरः पक्षः॥ हेमंतो मध्यं॥ पूर्वपक्षाश्चितयः॥ अपरप
क्षाः पुरीषं॥ १ ॥अहोरात्राणीष्टकाः॥ ऋषभोसि स्वर्गो लोकः॥ यस्यां दिशि म
हीयसे॥ ततो नो म हआवह॥ वायुर्भूत्वा सर्वा दिशआवाहि॥ सर्वा दिशोनुविवा
हि॥ सर्वा दिशोनु संवाहि॥ चित्याचितिमापृण॥ अचित्याचितिमापृण॥ चिद
सि समुद्रयोनिः॥ २ ॥ इंदुर्दक्षः श्येन ऋतावा॥ हिरण्यपक्षः शकुनोभुरण्युः॥
महान्त्सधस्थे ध्रुवआनिषत्तः॥ नमस्तेअस्तु मा मा हिं॑सीः॥ दतिर्नतिर्वीति
समित्सुदिति॥ दिवं मे यछ॥ अंतरिक्षं मे यछ॥ पृथिवीं मे यछ॥ पृथिवीं मे यछ॥ अं

वा० त० १ रिक्षंमेयच्छ॥ दिवंमेयच्छ॥ अन्हाप्रसारय॥ रात्र्यासमंच॥ रात्र्याप्रसायेरे॥ अन्हा २
१५० समंच॥ कामंप्रसारय॥ कामंᳪ᳭समंच॥ ३ ॥ पुरीषᳪ᳭समुद्रयोनिः पृथिवीमेय
छांतरिक्षमेयच्छसप्तचे॥ ४ ॥ भूर्भुवःस्वः॥ ओजोबलं॥ ब्रह्मक्षत्रं॥ यशोमहत्॥
सत्यंतपोनाम॥ रूपममृतं॥ चक्षुःश्रोत्रं॥ मनआयुः॥ विश्वंयशोमहः॥ समंतपोह
रोभाः॥ जातवेदाय दिवापावकोसि॥ वैश्वानरोयदिवीवेघृतोसि॥ शंप्रजाभ्याय
जमानायलोकं॥ ऊर्जंपुष्टिंदधदभ्यावर्तस्व॥ १॥ माश्वत्वारिचा॥ ५ ॥ राज्ञी
विराज्ञी॥ सम्राज्ञीस्वराज्ञी॥ अर्चिः शोचिः॥ तपोहरोभाः॥ अग्निरिंद्रोबृहस्प
तिः॥ विश्वेदेवाभुवनस्यगोपाः॥ तेमासर्वेयशसासंᳪ᳭सृजंतु॥ ११॥ राज्ञीज्ञेमा १५०
सप्त॥ ६ ॥ असवेस्वाहावसवेस्वाहा॥ विभुवेस्वाहाविवस्वतेस्वाहा॥ अभिभुवे

ज्यो स्वाक्षाधिपतयेस्वाहा॥ दिवांपतयेस्वाहाᳪ᳭हस्पत्यायस्वाहा॥ चाक्षुष्मत्याय
स्वाहौतिष्मत्यायस्वाहा॥ राज्ञेस्वाहाविराज्ञेस्वाहा॥ सम्राज्ञेस्वाहास्वरा
ज्ञेस्वाहा॥ शूषायस्वाहासूर्यायस्वाहा॥ चंद्रमसेस्वाहाज्योतिषेस्वाहा॥ सᳪ᳭
सर्पायस्वाहाकल्याणायस्वाहा॥ अर्जुनायस्वाहा॥ २ ॥ कल्याणायस्वा
हेकंच॥ ७ ॥ विपश्चितेपवमानायगायत॥ महीनधारात्यंधोअर्षति॥
अहिर्नजूर्णामतिसर्पतित्वचं॥ अत्योनक्रीडन्नसरद्वृषाहरिः॥ उपया
मगृहीतोसिमृत्यवेत्वाजुष्टंगृह्णामि॥ एषतेयोनिर्मृत्यवेत्वा॥ अप
मृत्युमपक्षुधं॥ अपेतःशपथंजहि॥ अधानोअग्नआवह॥ रायस्पो
षᳪ᳭सहस्रिणं॥ १॥ यतेसहस्रमयुतंपाशाः॥ मृत्योमर्त्यायहंतवे॥

तान्यूँस्यमायया॥ सर्वानवयजामहे॥ भक्षोस्यमृतभक्षः॥ तस्य तेमधुपीतस्या
मृतवतः॥ स्वगाकृतस्यमधुमतः॥ उपहूतस्योपभक्षयामि॥ मन्द्राभिभूतिः केतु
र्यज्ञानांवाक्॥ असावेहि॥ अंधोजागृविः प्राण॥ असावेहि॥ बधिरआक्रंद
इतरपान॥ असावेहि॥ अहस्तोस्त्वाचक्षुः॥ असावेहि॥ अपादाशोमनः॥ अ
सावेहि॥ कवेविप्रचित्तेश्रोत्र॥ असावेहि॥ ३ ॥ सुहस्तः सुवासाः॥ शूषो
नामास्यमृतोमर्त्येषु॥ तंत्वाहंतथावेद॥ असावेहि॥ अग्निर्मेवाचिश्रितः॥
वाग्घृदये॥ हृदयंमयि॥ अहममृते॥ अमृतंब्रह्मणि॥ वायुर्मेप्राणेश्रितः॥ प्राणो
हृदये॥ हृदयंमयि॥ अहममृते॥ अमृतंब्रह्मणि॥ सूर्योमेचक्षुषिश्रितः॥ चक्षु
र्हृदये॥ हृदयंमयि॥ अहममृते॥ अमृतंब्रह्मणि॥ चंद्रमामेमनसिश्रितः॥ ५ ॥

मनोहृदये॥ हृदयंमयि॥ अहममृते॥ अमृतंब्रह्मणि॥ दिशोमेश्रोत्रेश्रिताः॥ श्रो
त्रꣳहृदये॥ हृदयंमयि॥ अहममृते॥ आपोमेरेतसिश्रिताः॥ ६ ॥ रेतोहृदये॥ हृदयंम
यि॥ अहममृते॥ अमृतंब्रह्मणि॥ पृथिवीमेशरीरेश्रिता॥ शरीरꣳहृदये॥ हृदयंमयि॥
अहममृते॥ अमृतंब्रह्मणि॥ ओषधिवनस्पतयोमेलोमसुश्रिताः॥ ७ ॥ लोमा
निहृदये॥ हृदयंमयि॥ अहममृते॥ अमृतंब्रह्मणि॥ इंद्रोमेबलेश्रितः॥ बलꣳहृद
ये॥ हृदयंमयि॥ अहममृते॥ अमृतंब्रह्मणि॥ पर्जन्योमेमूर्ध्निश्रितः॥ ८ ॥ मूर्धा
हृदये॥ हृदयंमयि॥ अहममृते॥ अमृतंब्रह्मणि॥ ईशानोमेमन्यौश्रितः॥ मन्युर्हृद
ये॥ हृदयंमयि॥ अहममृते॥ अमृतंब्रह्मणि॥ आत्मामआत्मनिश्रितः॥ ९ ॥ आ

Margin: त्यु ४ हूतो; अमृतंब्रह्म णि

ब्रा० तृ०
१५२ कृ
लो

आत्मा हृदये॥ हृदयं मयि॥ अहममृते॥ अमृतं ब्रह्मणि॥ पुनर्म आत्मा पुनरा
युरागात्॥ पुनः प्राणः पुनराकूतमागात्॥ वैश्वानरो रश्मिभिर्वावृधानः॥ अ
न्तस्तिष्ठत्वमृतस्य गोपाः॥ १०॥ सहस्त्रिणि मिहि श्रोत्रासा वेहि प्राणे श्रितो
मनसि श्रितो रेतसि श्रितो मनसु श्रिता मूर्धि श्रित आत्मनि श्रितौ ष्टो च॥
॥ ८॥ अग्निर्वायुः सूर्यश्चंद्रमा दिश आपः पृथिव्योषधिवनस्पतिय इंद्रः
पर्जन्य ईशान आत्मा पुनर्मे द्वादश॥ प्रजापतिर्देवानसृजत॥ ते पाप्म
ना संदिता अजायंत॥ तान्व्यद्यत॥ यद्व्यद्यत्॥ तस्माद्विद्युत्॥ तमवृश्चत्॥
यदवृश्चत्॥ तस्माद्वृष्टिः॥ तस्माद्यत्रैते देवते अभिप्राप्नुतः॥ वि चैव हैवास्य

१५२

तत्र पाप्मानं घ्नतः॥ १॥ वृश्च तत्र॥ सैषामीमांसाग्निहोत्र एव सं

५

पन्ना॥ अथो आहुः॥ सर्वेषु यज्ञक्रतुष्विति॥ होष्यन्नप उपस्पृशेत्॥ विद्युदसि विद्य

न

मे पाप्मानमिति॥ अथ हुत्वोपस्पृशेत्॥ वृष्टिरसि वृश्च मे पाप्मानमिति॥ अक्ष्यमाणो
विष्णावा॥ वि चैव हैवास्यै ते देवते पाप्मानं घ्नतः॥ २॥ वृश्च तश्च॥ अरुणं हौद्दालकिः॥
ब्रह्मचारिणे प्रश्नं प्रोच्य प्रजिघाय॥ परेहि॥ प्लक्षं दय्यांपातिं पृच्छ॥ वेत्थ सा
वित्रीं ३ न वेत्था ३ इति॥ तमागत्य पप्रच्छ॥ आचार्यो माप्राहैषीत्॥ वेत्थ सा
वित्रीं ३ न वेत्था ३ इति॥ स होवाच वेदेति॥ ३॥ स कस्मिन्प्रतिष्ठित इति॥ पु
रो रजसीति॥ कस्तद्यत्पुरो रजा इति॥ एष वाव स परो रजा इति होवाच॥ य एष
तपति॥ स कस्मिन्न्वेष इति॥ सत्य इति॥ किं तत्सत्यमिति॥ तप इति॥ ४॥
कस्मिन्नु तप इति॥ बल इति॥ किं तद्बलमिति॥ प्राण इति॥ मास्म प्राण
एवोर्व्याप्रजा इति॥

ब्रा॰ त॰
१५३

मतिप्रच्छ इति मा चार्यो ब्रवीदिति होवाच ब्रह्मचारी ॥ स होवाच प्लुक्षो दय्यांपातिः ॥ ६
यं ह्येव ब्रह्मचारिन् प्राणमलप्रक्ष्यः ॥ मूर्द्धा ते व्यपतिष्यत् ॥ अद्य सुतआचार्या च्क्रे यान् भ
विष्यामि ॥ यो मा सावित्रे समवादिष्टेति ॥ ५ ॥ तस्मात्सावित्रेन संवदेत ॥ स यो ह वै
सावित्रं विदुषा सावित्रे संवदते ॥ स हास्मिं छ्रियं दधाति ॥ अनु ह वा अस्मा असौ
तपं छ्रियं मन्यते ॥ अन्वस्मै श्री त्तपो मन्यते ॥ अन्वस्मै तपो बलं मन्यते ॥ अन्व
स्मै बलं प्राणं मन्यते ॥ स यदाह ॥ संज्ञानं विज्ञानं दर्शा द्दष्टे
ति ॥ एष एव तत् ॥ ६ ॥ अथ यदाह ॥ प्रस्तुतं विष्टुतं सुता सुन्वतीति ॥
एष एव तत् ॥ एष ह्येव तान्यहानि ॥ एष रात्रयः ॥ अथ यदाह ॥ चित्रः केतुर्दाता प्रदा १५३
तो सविता प्रसविताभिशास्तानुमंतेति ॥ एष एव तत् ॥ एष ह्येव ते ह्यामुहूर्ताः ॥

एष रात्रेः ॥ ७ ॥ अथ यदाह ॥ पवित्रं पवयिष्यन्त्सहस्वान्त्सहीयानरुणो
रुणरजा इति ॥ एष एव तत् ॥ एष ह्येव ते र्धमासाः ॥ एष मासाः ॥ अथ यदाह ॥ अ
ग्निष्टोम उक्थ्योग्निर्ऋतुः प्रजापतिः संवत्सर इति ॥ एष एव तत् ॥ एष ह्येव ते यज्ञ
ऋतवः ॥ एष ऋतवः ॥ ८ ॥ एष संवत्सरः ॥ अथ यदाह ॥ इदानीं तदानीमिति ॥
एष एव तत् ॥ एष ह्येव ते मुहूर्तानां मुहूर्ताः ॥ जनको ह वै वैदेहः ॥ अहोरात्रैः समा
जगाम ॥ तं होचुः ॥ यो वा अस्मान्वेद ॥ विजहत्पाप्मानमेति ॥ ९ ॥ सर्वमायु त्मा
रेति ॥ अभि स्वर्गं लोकं जयति ॥ नास्यामुष्मिन्लोके न्नं क्षीयत इति ॥ विजह
द्धवै पाप्मानमेति ॥ सर्वमायुरेति ॥ अभि स्वर्गं लोकं जयति ॥ नास्यामुष्मिन्
लोके न्नं क्षीयते ॥ य एवं वेद ॥ अहीनाहाश्वत्थ्यः ॥ सावित्रं विदांचकार ॥ १० ॥
स ह हंसो हिरण्मयो भूत्वा ॥ स्वर्गं लोकमियाय ॥ आदित्यस्य सायुज्यं ॥ हंसो

ब्रा०त०
१५४

हवैहिरण्मयोभूत्वा॥ स्वर्गंलोकमेति॥ आदित्यस्य सायुज्यं॥ यएवंवेद॥ देवभागो हश्रौतर्षः॥
तं ह वाग दृश्यमानाभ्युवाच॥ ११ ॥ सर्वं बतगौतमोवेद॥ यः सावित्रं वेदेति॥
देवानो मुत्तमो लोकः॥ गुह्यं मनोबिभ्रदिति॥ एतावति हगौतमः॥ यज्ञोपवीतं
कृत्वाधोनिपपात॥ नमोनमइति॥ १२ ॥ सहोवाच॥ मोभैषीर्गौतम॥ जितो
वैतेलोकइति॥ तस्माद्येके चैसावित्रंविदुः॥ सर्वेतेजितलोकाः॥ सयो हवैसा
वित्रस्याष्टाक्षरंपदं श्रियाभिषिक्तं वेद॥ श्रियाहैवाभिषिच्यते॥ घृणिरि
ति द्वेअक्षरे॥ सूर्यइतित्रीणि॥ आदित्य इति त्रीणि॥ १३ ॥ एतद्वैसावित्रस्याष्टा
क्षरंपदं श्रियाभिषिक्तं॥ यएवंवेद॥ श्रियाहैवाभिषिच्यते॥ तदेतदृचा
भ्युक्तं॥ ऋचोअक्षरेपरमेव्योमन्॥ यस्मिन्देवाअधिविश्वेनिषेदुः॥ य
स्तन्नवेद किमृचा करिष्यति॥ यइत्तद्विदुस्तइमेसमासतइति॥ नहवा
सहोवाच॥ केषा वागसीति॥ अयमहं सावित्रः॥ सावित्रंविदांचकार॥

त्यइ
१५४

एतस्यर्चा न यजुषा न साम्नार्थोस्ति॥ यः सावित्रं वेद॥ १४ ॥ तदेतत्परि
यद्वेवचक्रे॥ आर्द्रंपिन्वमानं स्वर्गंलोकएति॥ विजह द्विश्वाभूतानिसंपश्य
त॥ आर्द्रंहवैपिन्वमानः स्वर्गंलोकएति॥ विजहद्विश्वाभूतानिसंपश्यन्॥
यएवंवेद॥ भूषोहवैवार्ष्ण्यः॥ आदित्येनसमाजगाम॥ तं होवाच॥ ए
हि सावित्रं विद्धि॥ अयं वैस्वर्ग्योग्निः पारयिष्णुरमृतान्त्संभूतइति॥
एषवाव ससावित्रः॥ यएषतपति॥ एहिमां विद्धि॥ इतिवैहैनं तदुवाच॥
॥ १५ ॥ यतो यतो वेदेति तपइति स मवादिष्टेति तद्वा चै ऋ तवएति च का
रोवाव न मत्यादित्य इति त्रीणि सावित्रं वेद विद्धि पंचच॥ १ ॥ संज्ञानं
प्रस्तुतं तान्यहानि चित्रः केतुस्तेन्हो मुहूर्ताः पवित्रं तेर्धमासाअग्नि

श्रा॰ तृ॰ ८

१५५

ष्टोमोयज्ञक्रतवइदानींमुहूर्त्तानांजनकोहवाआह्नीनादेवभागः केषावा
कूश्यपोहवैषोडश॥ ॥इयंवावसरघा॥ तस्याअग्निरेवसारघंमधु॥या
एताः पूर्वपक्षापरपक्षयोरात्रयः॥ तामधुकृतः॥ यान्यहानि॥ तेमधुवृषाः॥
सयोहवाएतामधुकृतश्चमधुवृषांश्चवेद॥ कुर्वंतिहास्यैताअग्नौम
धु॥ नास्येष्टापूर्तंधयंति॥ अथयोनवेद॥ १॥ नहास्यैताअग्नौमधुकु
र्वंति॥ धयंत्यस्येष्टापूर्तं॥ योहवाअहोरात्राणांनामधेयानिवेद॥ नाहो
रात्रेष्वार्तिमार्छति॥ संज्ञानंविज्ञानंदर्शादृष्टेति॥ एतावनुवाकोपूर्वप
क्षस्याहोरात्राणांनामधेयानि॥ प्रस्तुतंविष्टुतं सुतासुन्वतीति॥ ए
तावनुवाकावपरपक्षस्याहोरात्राणांनामधेयानि॥ नाहोरात्रेष्वार्ति

१५८

मार्छति॥ यएवंवेद॥ २॥ योहवैमुहूर्तानांनामधेयानिवेद॥ नमुहूर्तेष्वार्ति
मार्छति॥ चित्रः केतुर्दाताप्रदातासविताप्रसविताभिशास्तानुमंतेति॥ ए
तेनुवाकामुहूर्तानांनामधेयानि॥ नमुहूर्तेष्वार्तिमार्छति॥ यएवंवेद॥
योहवाअर्धमासानांचमासानांचनामधेयानिवेद॥ नार्धमासेषुनमा
सेष्वार्तिमार्छति॥ पवित्रंपवयिष्यन्त्सहस्वान्त्सहीयानरुणोरुणरजा
इति॥ एतेनुवाकाअर्धमासानांचमासानांचनामधेयानि॥ ३॥ नार्ध
मासेषुनमासेष्वार्तिमार्छति॥ यएवंवेद॥ योहवैयज्ञक्रतूनांचर्तूनांच
संवत्सरस्यचनामधेयानिवेद॥ नयज्ञक्रतुषुनर्तुषुनसंवत्सरआर्तिमा
र्छति॥ अग्निष्टोमउक्थ्योग्निर्ऋतुः प्रजापतिः संवत्सरइति॥ एतेनुवा

ब्रा०त०
१५६
मु

१

कार्यज्ञक्रतूनां चर्त्तूनां च संवत्सरस्य च नामधेयानि ॥ न यज्ञक्रतुपुनर्त्तु
पुनः संवत्सर आर्तिमार्छति ॥ य एवं वेद ॥ यो ह वै मुहूर्त्तानां मुहूर्त्तान्वेद ॥ न
मुहूर्त्तानां मुहूर्त्ते घार्तिमार्छति ॥ ५ ॥ इदानीं तदानीमिति ॥ एते वै मुहूर्त्तानां
मुहूर्त्ताः ॥ न मुहूर्त्तानां मुहूर्त्ते घार्तिमार्छति ॥ य एवं वेद ॥ अथो यथा क्षे
त्रज्ञो भूत्वानुप्रविश्यान्नमत्ति ॥ एवमेवैतान्क्षेत्रज्ञो भूत्वानुप्रविश्यान्न
मत्ति ॥ स एतेषामेव सलोकताꣳ सायुज्यमश्नुते ॥ अपपुनर्मृत्युं जयति ॥
य एवं वेद ॥ ५ ॥ नवं दैवं वेदानुवाका अर्धमासानां च मासानां च नाम
धेयानि मुहूर्त्ते घार्तिमार्छति नव च ॥ १० ॥ इयमहोरात्राꣳ संज्ञानं प्रस्तु
तं मुहूर्त्तानां चित्रः केतुरर्धमासानां पवित्रं यज्ञक्रतूनामग्निष्टोमो मुहू

१५६

र्त्तानां मुहूर्त्तान्वेदेदानीमथो द्वादश ॥ ॥ कश्चिद्ध वा अस्माल्लोकात्प्रेत्य ॥ आ
त्मानं वेद ॥ अयमहमस्मीति ॥ कश्चित्स्वं लोकं न प्रतिप्रजानाति ॥ अग्नि
मुग्धो हैव धूमतान्तः ॥ स्वं लोकं न प्रतिप्रजानाति ॥ अथ यो ह वै तमग्निꣳ सा
वित्रं वेद ॥ स एवास्माल्लोकात्प्रेत्य ॥ आत्मानं वेद ॥ अयमहमस्मीति ॥ २ ॥
स स्वं लोकं न प्रतिप्रजानाति ॥ एष उ वेवैनं तत्सावित्रः ॥ स्वर्गं लोकमभिवहति ॥
अहोरात्रे वा इदꣳ सयुग्भिः क्रियते ॥ इति रात्र्यायादीक्षिषत ॥ इति रात्र्यायव्रत
मुपागुरिति ॥ तान्विद्वानेवं विदुषः ॥ अमुष्मिँल्लोके शेवधिं धयंति ॥ धीतꣳ हे
व सतो वधिमनुपरैति ॥ अथ यो ह वै तमग्निꣳ सावित्रं वेद ॥ २ ॥ तस्य हैवा
होरात्राणि ॥ अमुष्मिँल्लोके शेवाधिं धयंति ॥ अधीतꣳ हैव स शेवधिमनु

न

ब्रा० त०
१५७

